□आर, वक्र, लोहिताङ्ग, मङ्गल, कुज, आषाढाभू, नवार्चिस्, (भौम, माहेय, धरणीसुत) [भौम, व्योमोल्मुक, एकाङ्ग शे. १४]।
*अङ्गति कुटिलं क्रामतीति अङ्गारः "अग्यङ्गि" (उणा-४०५) इत्यादिना आरः अङ्गानीर्यर्ति पीनत्वादिति वा स्वार्थे क इति अङ्गारकः।

**अङ्गारधानी**-स्त्री-१०२०-સગડી
□हसनी, अङ्गारशकटी अङ्गारपात्री, हसन्तिका।
*अङ्गारा धीयन्तेऽस्यां इति अङ्गारधानी।

**अङ्गारपात्री** स्त्री-१०२०-સગડી
द्र० अङ्गारधानी शब्दः।
*अङ्गाराणां पात्रीति अङ्गारपात्री।

**अङ्गारशकटी**-स्त्री-१०२०-સગડી
द्र० अङ्गारधानी-शब्द।
*अङ्गाराणां शकटीति अङ्गारशकटी।

**अङ्गिका**-स्त्री-६७४-ચોળી, કાંસળી
चोल, कञ्चुलिका, कूर्पासक, कञ्चुक, [कूर्पास शि. ५५]।
*अङ्गस्य प्रतिकृतिः इति अङ्गिका।

**(अङ्गिरस)**-पुं-१२४-સપ્તર્ષિ પૈકી એક ઋષિનું નામ.

**अङ्गीकार**-पुं-२७८-સ્વીકાર
□संविद्, सन्धा, आस्था, अभ्युपाय, संश्रव, प्रतिश्रव, आश्रव, अभ्युपगम, प्रतिज्ञा, आगू, सङ्गर, समाधि [शि. १८]।
*अङ्गीकरणं इति अङ्गीकारः।

**अङ्गीकृत** न.-१९८८-સ્વીકાર કરેલું
□प्रतिज्ञात, ऊरीकृत, 'उरीकृत', उररीकृत, संश्रुत, अभ्युपगत, उररीकृत, आश्रुत, सङ्गीर्ण प्रतिश्रुत, 'विदित, उपश्रुत, उपगत' [कक्षी कृत, स्वीकृत शि. १३४]।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*अनङ्गं अङ्गं क्रियते स्म इति अङ्गीकृतं, कक्षीकृतस्वीकृते अपि ।

**अङ्गुरि**-स्त्री–५९२–આંગળી

द्र० अङ्गुरीशब्दः ।

*अङ्गतीति अङ्गुरीः, 'मस्यसि'-(उणा६९९) इत्युरिः ।

**अङ्गुरी**-स्त्री–५९२–આંગળી

□करशाखा, अङ्गुली, (अङ्गुलि, अङ्गुरि) ।

*अङ्गतीति अङ्गुरिः' मस्यसि (उणा–६९९) इत्युरिः ङ्यां अङ्गुरी ।

**अङ्गुल**-पुं–५९२–અંગુઠો

अङ्गुष्ठ ।

*अङ्गंशरीराऽवयवं लातीति अङ्गुलः ।

**अङ्गुल**–पुं–८५४–વાસ્ત્યાયન મુનિ

□वात्स्यायन, मल्लनाग, कौटिल्य, (कौटल्य), चणकात्मज, द्रामिल, पक्षिलस्वामिन्, विष्णुगुप्त, [चाणक्य शि. ७५] ।

*अङ्गं शरीरावयवं लातीति अङ्गुलः हीनाङ्गुलिरस्याऽस्तीतिवा "हीनात्"-(७।२।४५) इति ।

**(अङ्गुलि)**–स्त्री–५९२–આંગળી

द्र० अङ्गुरीशब्दः ।

**अङ्गुली**–स्त्री–५९२–આંગળી

द्र० अङ्गुरी शब्दः ।

*अङ्गतीत्यङ्गुरिः, "मस्यसि" (उणा–६९९ इत्युरिः, लत्वे ङ्यां चाऽङ्गुली ।

**अङ्गुलिमुद्रा**–स्त्री–६६४–નામાક્ષરવાળી વીંટી

ऊर्मिका ।

*अङ्गुल्यां मोदते अङ्गुलीं मुद्रयतिवा ।

**अङ्गुष्ठ**-पुं–५९२–અંગુઠો

अङ्गुल ।

*अङ्गौ तिष्ठती त्यङ्गुष्ठः गोऽम्बा"–(२।३।३० इति षत्वम् ।

**अङ्गूस**–न.–१३८१–પાપ

द्र० अंहसूशब्दः ।

**अङ्घ्रि** पु–६१६ (शि. ४८)–પગ

द्र० अंह्रीशब्दः ।

**अङ्घ्रिप)**–पुं–१११४–વૃક્ષ

द्र० अंह्रिप शब्दः ।

**अचण्डी**–स्त्री–१२७१–શાન્ત સ્વભાવવાળી ગાય

सुकरा, (अकोपना) ।

*न चण्डते इति अचण्डी अकोपनेत्यर्थः, शोणादित्वात् ङीः ।

**अचल**–पुं–६९८–પહેલા વાસુદેવના મોટાભાઈ બળદેવ

*न चलति सत्वाद् इति अचलः, स्थैर्यादचल इव वा ।

**अचल**–पुं–१०२७–પર્વત

□शैल, अद्रि, शिखरिन् शिलोच्चय, गिरि, गौत्र, सानुमत्, ग्रावन् पर्वत, भूध्र, भूधर, धर, अहार्य, नग, (कुध्र, महीध्र महीधर भूभृद्) [प्रपातिन्; कुट्टार उर्वङ्ग, कन्दराकर, शे. १५८ अग, शि. ९०] ।

*न चलति इति अचलः ।

**अचलभ्रातृ**–पुं–३२–નવમા ગણધરનું નામ

*अचलस्यभ्राता इति अचलभ्राता हारितगोत्रः ।

**अचला**–स्त्री–९३६–પૃથ્વી

□भू, भूमि, पृथिवी, पृथ्वी, वसुधा, ऊर्वी, वसुन्धरा, धात्री, धरित्री, धरणी, (धरणि) विश्वा, विश्वम्भरा, धरा क्षिति, क्षोणी, (क्षोणि) क्ष्मा, अनन्ता, ज्या, कु, वसुमती, मही, गो, गोत्रा, भूतधात्री, क्ष्मा, गन्धमातृ, अवनि, (अवनी), सर्वंसहा, रत्नगर्भा, जगती, मेदिनी, रसा, काश्यपी, पर्वताधारा, स्थिरा, इला, रत्नसू, बीजसू, विपुला, सागरनेमी, सागरमेखला, सागराम्बरा, (समुद्ररशना, समुद्रकाञ्चि, समुद्रवसना) [महाकान्ता, क्षान्ता, मेर्वद्रिकर्णिका, गोत्रकीला, धनश्रेणी, मध्यलोका, जगद्वहा, शे. १५७, देहिनी, केलिनी, मौलि, महास्थाली, अम्बरस्थली शे.१५८; रत्नवती शि ८३]

*न चलति इति अचला ।

**अचिरप्रभा**–स्त्री–११०४વિજળી

तडित्, ऐरावती, विद्युत्, चला, शम्पा, (सम्पा),

आकालिकी, शतह्रदा, चञ्चला, चपला, अशनि, सौदामनी, 'सौदामिनी', क्षणिका, ह्रादिनी, जलवालिका [क्षणप्रभा शि. १००]

*न चिरं प्रभाऽस्य इति अचिरप्रभा क्षणप्रभाऽपि।

**अचिरा**–स्त्री–४०–સોળમા તીર્થંકરની માતા

*पतिव्रतात्वात् न चिरयति धर्मकार्येषु इति अचिरा।

**अचेष्टता**–स्त्री–३०७–મૂર્છા

प्रलय, (मूर्च्छा)।

*अचेष्टता–गतचेतनत्वम्, **यदाहुः**–स्तम्भे विचेतनत्वं प्रलये गतचेतनत्वं अत एव सहसैव निपतनं भुवि भवति महाभुतशैथिल्यात्।

**अच्छ**–न.–१०७१–પ્રસન્ન, નિર્મળ

☐प्रसन्न

*अद्यते इति अच्छम् 'तुदिमदि"·(उणा–१२४) इति छक्, न छाद्यते वा 'क्वचित्" (५।१।१७१) इति डः।

**अच्छभल्ल**–पुं–१२८९–રીંછ

☐भाल्लूक, भालूक, ऋक्ष, भल्लूक भल्लुक

* अच्छेत्याभिमुख्यार्थेऽव्ययं, आभिमुख्येन भल्लते इति अच्छभल्लः।

**अच्छुप्ता**–स्त्री–२४०–ચૌદમી વિદ્યાદેવી

*न पापेन च्छुप्यते स्पृश्यते इति अच्छुप्ता।

**अच्युत**–पुं–२१४–વિષ્ણુ

विष्णु, जिष्णु, जनार्दन, हरि, हृषीकेश, केशव, दाशार्ह, पुरुषोत्तम, अब्धिशयन, उपेन्द्र, अज, ईन्द्रानुज, (वासवावरज), विश्वक्सेन, नरायण, जलशय, जलेशय, नारायण, श्रीपति, लक्ष्मीनाथ, दैत्यारि, पुराणपुरुष, यज्ञपुरुष, तार्क्ष्यध्वज, कृष्ण, (गरुडाङ्क, अधोक्षज, गोविंद, षड्बिन्दु, मुकुन्द, वैकुण्ठ, पद्मेशय, पद्मनाथ, वृषाकपि, माधव, वासुदेव, विश्वंभर, श्रीधर, विश्वरुप, दामोदर, सौरि, (शौरि), सनातन, विधु, पीताम्बर, मार्ज, जिन, कुमोदक, त्रिविक्रम, जह्नु, चतुर्भुज, पुनर्वसु, शतावर्त्त, गदाग्रज, स्वभू, मुञ्जकेशिन्, वनमालिन् पुण्डरीकाक्ष, बभ्रु, शशबिन्दु, वेधस्, पृश्निशृङ्ग, धरणीधर, (महीधर) आत्मभु, पाण्डवायन, सुवर्णबिन्दु, श्रीवत्स, देवकीसूनु गोपेन्द्र, विष्टरश्रवस् 'सोमसिन्धु, जगन्नाथ, गोवर्धनधर, यदुनाथ, गदाभृत्, शार्ङ्गभृत्, चक्रभृत्, श्रीवत्सभृत्, शङ्खभृत्, (गदाधर, शार्ङ्गिन्, चक्रपाणि, श्रीवत्साङ्क, शङ्खपाणि) [तीर्थपाद, पुण्यश्लोक, बलिन्दम शे. ६४, उरुक्रम, उरुगाय, तमोघ्न, श्रवण, उदारथि, लतापर्ण, सुभद्र, पांशुजालिक, शे. ६५ चतुर्व्यूह, नवव्यूह, नवशक्ति, षड्ङ्गजित्, द्वादशमूल, शतक, दशावतार, एकदश, शे. ६६, हिरण्यकेश, सोम, अहि, त्रिधामन्, त्रिककुत्, त्रिपाद्, मानङ्गर, पराविद्ध, पृश्निगर्भ, अपराजित शे. ६७, हिरण्यनाभ, श्रीगर्भ, वृषोत्साह, सहस्रजित्, ऊर्ध्वकर्मन्, यज्ञधर, धर्मनेमि, असंयुत शे. ६८, पुरुष योगनिद्रालु, खण्डास्य, शलिक, अजित, कालकुण्ठ, वरारोह, श्रीकर, वायुवाहन शे. ६९, वर्द्धमान, चतुर्दंष्ट्र, नृसिंहवपुष्, अव्यय कपिल भद्रकपिल, सुषेण, समितिञ्जय, शे. ७०, क्रतुधामन्, वासुभद्र, बहुरुप, महाक्रम, विधातृ, धार, एकाङ्ग, वृषाक्ष, सुवृष, अक्षज शे. ७१, रन्तिदेव, सिन्धुवृष, जितमन्यु, वृकोदर, बहुशृङ्ग, रत्नबाहु, पुष्पहास महातपस्, शे. ७२ लोकनाभ, सूक्ष्मनाभ, धर्मनाभ, पराक्रम, पद्महास, महाहंस, पद्मगर्भ, सुरोत्तम, शे. ७३, शतवीर, महामाय, ब्रह्मनाभ, सरीसृप, वृन्दाङ्क, अधोमुख, धन्विन्, सुधन्वन्, विश्वभुज, स्थिर, शे. ७४, शतानन्द, शरु, यवनारि प्रमर्दन, यज्ञनेमि, लोहिताक्ष, एकपाद्, द्विपद, कपि शे. ७५, एकशृङ्ग, यमकील, आसन्द, शिवकीर्तन, शर्दु, वश, श्रीवराह, सदायोगिन्, सुयामुन शे. ७६ जलेशय शि. १५]

* न च्यवते इति अच्युतः।

**अच्युतज**–पुं–९३–બારમા દેવલોકે ઉત્પન્ન થયેલ દેવ

* अच्युते जातः इति अच्युतजः।

**अच्युतदेवी**–स्त्री–४४३–(शि. ४)–श्री પદ્મપ્રભસ્વામિની યક્ષિણી

Jain Education International For Private & Personal Use Only www.jainelibrary.org

□श्यामा ।

**अच्युताग्रज**–पुं–१७१–ઇન્દ્ર

□इंद्र, हरि, दुश्च्यवन,

वज्रिन, बिडौजस्, मघवत्, पुरन्दर, प्राचीन बर्हिष्, पुरुहूत, वासव, सङ्क्रन्दन, आखण्डल, मेघवाहन, सुत्रामन्, वास्तोष्पति, दल्मि, शक्र, वृषन्, शुनासीर, (सुनासीर), सहस्रनेत्र, पर्जन्य, हर्यश्व, ऋभुक्षिन्, याहुदन्तेय, वृद्धश्रवस्, तुरासाह्, सुरर्षभ, तपस्तक्ष, जिष्णु, वरक्रतु, शतक्रतु, कौशिक, पूर्वदिक्पति, देवपति, आप्सरःपति, स्वर्गपति, शचीपति, (प्राचीश, पूर्वदिगीश, सुरेश, सुरश्रीश, नाकेश, शचीश, पौलोमीश). पृतनासाह्, उग्रधन्वन्, मरुत्वत्, मघवन् [खदिर, नेरीन्, त्रायस्त्रिंशपति, जय शे.३१, गौरावस्कन्दिन्, वन्दीक, वराण, देवदुन्दुभि, किणालात, हरिमत्, यामनेमि, असन्महस् शे. ३२, शपीवि, मिहिर, वज्रदक्षिण, वयुन शे. ३३, सूत्रामन् [शि. १३] ।

* अच्युतस्याग्रजः इति अच्युताग्रजः ।

**अच्युताग्रज**–पु–२२५–બળદેવ

राम, हलिन्, मुसलिन्, सात्वत, कामपाल, सङ्कर्षण, प्रियमधु, बल, रौहिणेय, रुक्मिभिद् प्रलम्बभिद्, यमुनाभिद्, (रुक्मि दारण, प्रलम्बघ्न, कालिन्दी कर्षण), अनंत, काललक्ष्मन्, एककुण्डल, सितासित, रेवतीश, बलदेव, बलभद्र, नीलवस्त्र, [भद्राङ्ग, फाल, गुप्तचर, बलिन्, प्रलापिन्, भद्रचलन, पौर, शेषाहिनामभृत् शे ७७]

*अच्युतस्य अग्रज इति अच्युताग्रज ।

**अज**–पुं–२११–બ્રહ્મા

□द्रुहिण, विरिञ्चि, परमेष्ठिन्, अष्टश्रवण, स्वयंभू, कमन, कवि, सात्विक, वेदगर्भ, स्थविर, शतानंद, पितामह, क, धातृ, विधातृ, विधि, वेधस्, ध्रुव, पुराणग, हंसग, (श्वेतपत्रस्थ) विश्वरेतस्, प्रजापति, ब्रह्मन्, चतुर्मुख, भवांतकृत्, जगत्कर्तृ, विश्वसृज्, सरोरुहासन, शम्भु, शतधृति, स्रष्ट सुरज्येष्ठ, विरिञ्चन, हिरण्यगर्भ, लोकेश, नाभिभू, पद्मभू, आत्मभू, (नाभिजन्मन्, कमलजन्मन्, आत्मयोनि) [क्षेत्रज्ञ, पुरुष सनत् शे. ६४] ।

* न जायते इति अजः ।

**अज**–पुं–२१४–વિષ્ણુ

द्र० अच्युत शब्दः

*न जायते इति अजः ।

**अजा**–पुं–१२७५–બકરો

छगल, छाग, छग, वस्त, 'बस्त', स्तभ, पशु, 'शुभ, स्तुभ' [तुभ शि. ११३]

* अजति इति अजः ।

**अजकाव**–न–२०१–શંકરનું ધનુષ્ય

□पिनाक, आजगव अजगव, अजगाव, शि.१४,

*अजका ग्रहणस्थानं अस्याऽस्ति इति अजकाव "मण्यादिभ्यः"–(७।२।४४) इति वः ।

**अजगर**–पु–१३०५–અજગર

□चक्रमण्डलिन्, पारीन्द्र, वाहस, शयु ।

*अजति क्षीपतीति अजगरः "जठर"–(उणा–४०३) इत्यरे निपात्यते, अजं गिरतीति वा अजो नित्यो गरोऽस्येति वा ।

**अजगव**–न.–१०१ (शि. १४)–શંકરનું ધનુષ્ય

द्र० अजकावशब्द ।

**अजगाव**–न.–१०१– (शि. १४)–શંકરનું ધનુષ્ય

द्र० अजकाव शब्दः ।

**अजजीविक**–पुं–८८९–ભરવાડ

□जावाल ।

*अजेभ्यो जीविकाऽस्य इति अजजीविकः ।

**अजदेवता**–स्त्री (બ. વ.) -११४-પૂર્વાભાદ્રપદ

□पूर्वभद्रपदा, प्रोष्ठपदा ।

*अजपादो अजोभीमवत् अजोदेवता आसां इति अजदेवताः ।

**अजनामक**–पुं–१०५४–માક્ષિકધાતુ

□माक्षिक, कदम्ब, चक्रनामन्, [वैष्णव शि ९२] ।

*अजस्य विष्णोर्नाम अस्य अजनामकः अत एव वैष्णवोऽपि ।

**अजन्य**–पुं.न.–१२६–ઉપદ્રવ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उपलिङ्ग, अरिष्ट, उपसर्ग, उपद्रव, ईति, उत्पात।

*न जने साधु इति अजन्यं पुंक्लीबलिङ्गः।

**अजप**–पुं–८५७–ખોટો જાપ કરનાર

☐असद्ध्येतृ।

* नास्ति जपः स्वाध्यायोऽस्येति अजपः।

**अजमीढ**–पुं–७०७–યુધિષ્ઠિર

☐अजातशत्रु, शल्यारि, धर्मपुत्र, युधिष्ठिर, कङ्क।

*अजास्त्रिवार्षिका यया मीढा अनेन अजमीढः।

**अजर्य**–न.–७३१–મિત્રતા

☐सख्य, सौहृद, सौहार्द, साप्तपदीन, मैत्री, सङ्गत।

* न जीर्यति इति अजर्यम् "संगतेऽजर्यम्" (५।१।५) इति ये साधुः।

**अजस्त्र**–न.१४७१–નિરંતર

अनारत, अविरत, संसक्त; सतत, अनिश, नित्य, अनवरत, असक्त, अश्रान्त सन्तत.

* न जस्यतीत्येवं शीलं इति अजस्रम्, "स्म्यजस" (५।२।७९) इति रः।

**अजिता**–स्त्री–४४ (शि. ४) શ્રી અજિતનાથ ભગવાનની યક્ષિણી

**अजहा**–स्त्री–११५१–કૌવચ

द्र० आत्मगुप्तशब्दः।

**अजा**–स्त्री–१२७५–બકરી

☐छागिका, (छागी) मञ्जा, सर्वभक्षा, गलस्तनी।

* अजति वातं इति अजा।

**अजाजी**–स्त्री–४२२–જીરૂં

☐जीरक, कणा, [जीर, जीरण, जरण शे. १०३]।

* अजं स्वाभाविकं मन्दाग्नित्वं अजति क्षिपतीति अजाजी लिहादित्वादचि अजेर्वीर्न भवति।

**अजातशत्रु**–पुं.–७०७युधिष्ठिर

द्र० अजमीढ शब्दः।

* न जाताः शत्रवोऽस्येति अजातशत्रुः।

**अजित**–पुं–२६–વર્તમાન બીજા તીર્થંકર

*परिषहादिभिर्न जितः इति अजितः यद्वा गर्भस्थेऽस्मिन् द्यूते राज्ञा जननी न जिता इति अजितः।

**अजित**–पुं–४२–નવમા તીર્થંકરના યક્ષ

* न जीयते स्म इति अजितः।

**अजित**–पुं.–२११ (शे. ६९)–વિષ્ણુ–द्र० अच्युत शब्दः।

**अजितबला**–स्त्री–४४–શ્રી અજિતનાથ ભ. ની યક્ષિણી

☐[अजिता शि. ४]।

* बलेन न जिता इति अजितबला राजदन्तादित्वात् पूर्वनिपातः।

**अजिन**–न.–६३०–ચામડી

☐त्वच्, छवि, छादनी, कृत्ति, चर्मन असृग्धरा।

* अजन्ति तदिति अजिनं "विपिनाऽजिना–(उणा २८४) इतीने निपात्यते।

**अमरस्तु**–"अजिनं चर्मकृतिः स्त्री" इति कृत्यादीन् त्रीन् मृगयोनित्वात् पृथगाह, अत एव "मृगा अजिनयोनयः" इत्युक्ताः; **वाचस्पतिरपि**

"तत्राजिनं मृगयोनिर्मृगाश्च प्रियकादयः।

मृगप्रकरणे तेऽथ, प्रोक्ता अजिनयोनयः"॥ इत्याह।

**'अजिनपत्रा'**–स्त्री–१३३६–ચામાચીડીયું

द्र० अजिनपत्रिका शब्दः।

**अजिनपत्रिका**–स्त्री–१३३६–ચામાચીડીયું

☐चर्मचटका, जतुका, 'जतूका, अजिनपत्रा'।

*अजिनं पत्राणि पक्षा अस्या इति अजिनपत्रिका।

**अजिनयोनि**–पुं–१२९३ (शे.–१८६)–હરણ

द्र० कुरङ्गशब्दः।

**अजिर**–न.–१००४–આંગણું

द्र. अङ्गन शब्दः।

*अजन्त्यस्मिन इति अजिरं "स्थविर"–(उणा–४१७ इतीरे निपात्यते।

**अजिह्म**–पुं–१४५६–સરળ

☐ऋजु, प्रगुण।

*न जिह्मोऽजिह्मः।

**अजिह्मग**–पुं–७७८–બાણ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

☐बाणपृषत्क, शिख, खग, गार्ध्रपक्ष, काण्ड, आशुग, प्रदर, सायक, पत्रिन्, ईषु, शिलिमुख, कङ्कपत्र, रोप, कलम्ब, शर मार्गण, चित्रपुङ्ख, [लक्षहन्, मर्मभेदन, वार, वीर, वीरशङ्कु, कादम्ब, अस्त्र, कण्टक, शे. १४३]।

* अजिह्ममृजु गच्छतीति अजिह्मगः।

**अजिह्व**-पुं-१३५४-देडको

मण्डूक, हरि, शालूर, 'सालूर', प्लव, भेक, प्लवङ्गम, वर्षाभू, प्लवग, शालु, व्यङ्ग, दर्दुर।

* नास्ति जिह्वाऽस्येति अजिह्वः ईषदर्थेऽत्र नञ्।

**अज्जुका**-स्त्री-३३४-गणिका

☐गणिका।

*अज्जुकाद्या असत्प्रकृतिप्रत्ययविभागा देशीपदप्रायाः, अर्जयति इति वा अज्जुका "कञ्चुकांशुक" (उणा-५७) इत्यादिना निपात्यते।

**अज्ञ**-पु-३५२-मूर्ख

☐बालिश, मूढ, मन्द, यथाजात, बाल, मातृमुख, जड, मूर्ख, अमेधस्, विवर्ण, वैधेय, मातृशासित, देवानांप्रिय, जाल्म, [अनेड, नामवर्जित शे. ८३ यथोद्गत शे २३]

*प्रश्नोत्तरे न जानाति इति अज्ञः

**अज्ञान**-न.-७३-तीर्थंकरमां न होय ते १८ दोष पैकी १०मो दोष

* अज्ञानं मौढ्यमिति चतुर्दशः।

**अज्ञान**-न.-१३७४-अज्ञान

☐अविद्या, अहंमति।

* विरुद्धज्ञानमिति अज्ञानम्।

**अञ्चल**-पु. न.-६६७-वस्त्रनो छेडो

*अञ्चति वस्त्रं शोभामनेन इति अञ्चलः पुंक्लिबलिङ्गः "मृदिकन्दि"-(उणा-४६५) इत्यलः।

**अञ्चति**-पुं.-११०० (शे. १७०)-अग्नि

द्र० अग्निशब्दः।

**अञ्चित**-पुं.-४४७-पूजाएलो

☐पूजित, अर्हित, नमस्यित, नमसित, अपचित, अर्चित, [अपचायित शि. ३२]।

*अञ्च्यते इति अञ्चितः।

**अञ्जन**-पुं.-१७०-पांचमी दिशाना दिग्गज

*अञ्जनवर्णत्वात् अञ्जनः।

**अञ्जन**-न.-६८६-काजळ

☐कज्जल।

*अज्यतेऽनेन इति अञ्जनम्।

**अञ्जन**-न.-१०५३-मोरथुथु

☐कर्परिकातुत्थ, अमृतासङ्ग।

*अज्यते चक्षुरसेनेति अञ्जनम्।

**अञ्जना**-स्त्री-१३६१ (शे. १९८)-चोथी नरक

☐पंकप्रभा।

**अञ्जनाधिका**-स्त्री-१२९८-आंजणी,गरोळीनी जात

☐हालिनी अञ्जनिका, हलाहल।

*अञ्जनेनाधिका इति अञ्जनाधिका।

**अञ्जनिका**-स्त्री-१२९८-आंजणी गरोळीनी जात

द्र. अञ्जनाधिका शब्दः।

*अञ्जयतीति अञ्जनी के अञ्जनिका।

**अञ्जलि**-पुं.-५९८-खोबो

*अनक्त्यनेनाञ्जलिः लौकिकः पुंलिङ्गः "पाटयञ्ज्यामलिः" (उणा-७०२) अम्यते जलमनेनेतिनैरुक्ताः नाट्ये तु—"पताकाभ्यां हस्ताभ्यां संश्लेषादञ्जलिः स्मृतः।

**अञ्जलिकारिका**-स्त्री-१०१४-पूतळी

☐लेप्यमयी

* अञ्जलिं करोतीति अञ्जलिकारिका।

**अञ्जस**-पुं-३७५-सरळ

☐ऋजु, प्राञ्जल।

*अञ्जोऽस्त्यस्येति अञ्जसः।

**अञ्जसा**-अ.-१५३०-जलदी

☐द्राक्, स्राक्, अरम्, झटिति, आशु, मङ्क्षु, अह्नाय, सत्वरम्, 'सपदि'।

*अञ्जसेति तृतीयान्तप्रतिरूपकमव्ययम्, यथा—"यद्वाञ्जसा जयति ब्रह्मलोकम्"।

**अञ्जसा**-अ.-१५४२ (शे. २०१)-निश्चय

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अद्धा

**(अटनि)**-स्त्री-७७५-ધનુષનો અગ્રભાગ

☐अर्त्ति, अटनी ।

**अटनी**-स्त्री-७७५ ધનુષનો અગ્રભાગ

☐अर्त्ति, (अटनि) अटतीति अटनिः "सदि"-(उणा—६८०) इत्यनिः ङ्यामटनी ।

**अटवी**-स्त्री-१११०-જંગલ

☐अरण्य, सत्र, वार्क्ष, गहन, झप, कान्तार, विपिन, कक्ष, षण्ड, कानन, वन दव, दाव ।

*अटन्त्यस्यां इति अटविः "छविच्छिवि"-(उणा-७०६) इति वौ निपात्यते ङ्यामटवी ।

**(अटरुष)**-पुं. ११४०-અરડુશી

द्र० आटरुषक शब्दः

**अटरुषक**-पुं.-११४० (शि. १०२)-અરડુશી

द्र० आटरुषक शब्दः ।

**'अटा'**-स्त्री-१५०१-પર્યટન

द्र० अटाट्या शब्दः ।

**अटाटा**-स्त्री-१५०१ (शि. १३५)-પર્યટન

द्र० अटाट्या शब्दः ।

**अटाट्या**-स्त्री-१५०१-પર્યટન

☐व्रज्या, पर्यटन, [अटाटा, अट्या—'अटा' शि. १३५]

*कुटिलमटनमटाट्या, "अट्यर्तिसूत्रिमूत्रि"—(३।४।१०) इति यङ् ततो 'वाऽटाट्यात्" –(५।३।१०३) इति यः अटाटाऽपि, "आस्यटि"-(५।३।९७) इति क्यपि अट्यापि, **यन्मनुः**

"तोर्यत्रिकं वृथाट्या च, कामजो दशको गणः ।

**अट्ट**-पुं.-न.-९८१-ઉપલો ભાગ

☐क्षौम, अट्टालक ।

*"अट्टि हिंसातिक्रमयोः" अट्टन्तेऽत्र अट्टः पुंक्लीबलिङ्गः ।

**अट्ट**-पुं. न.-१००२-દુકાન

☐पण्यशाला, (पण्यशाल) निषद्या, हट्ट, विपणि 'विपणी', आपण ।

*अट्टन्तेऽस्मिन् इति अट्टः पुंक्लीबलिङ्गः ।

**अट्टहास**-पुं.-२९७-જોરથી હસવું તે

*महीयसि हासे अट्टेति हसनं इति अट्टहासः ।

**अट्टहासिन्**-पुं-१९७-શંકર

☐शम्भु, शर्व, स्थाणु, ईशान, ईश, रुद्र, उडुीश, वामदेव, वृषाङ्क, (वृषलाञ्छन,) कण्ठेकाल, शङ्कर, नीलकण्ठ, श्रीकण्ठ, उग्र, धूर्जटि, भीम, भर्ग, मृत्युञ्जय, पञ्चमुख, अष्टमूर्ति; श्मशानवेश्मन्, गिरिश, गिरीश, षण्ढ, कपर्दिन्, ईश्वर, ऊर्ध्वलिङ्ग, एकदृश्, त्रिदृश्, (एकनेत्र, विषमनेत्र) भालदृश्, एकपाद्, मृड, घनवाहन, अब्दवाहन), अहिर्बुध्न, विरुपाक्ष, विषान्तक, महाव्रतिन्, बह्निरेतस्, हिरण्यरेतस्, शिव, अस्थिधन्वन्, पुरुषास्थिमालिन्, व्योमकेश, शिपिविष्ट, भैरव, दिग्वासस्, कृत्तिवासस्, (दिग्वस्त्र, चर्मवसन) भव, नीललोहित, सर्वज्ञ, नाट्यप्रिय, खण्डपर्शु, महादेव, महानट, महेश्वर, हर, पशुपति, प्रमथपति, भूतपति, उमापति, (पशुनाथ), गणनाथ, भूतनाथ, गौरीनाथ), पिङ्गजट, पिङ्गेक्षण, पिनाकभृत, शूलभृत्, खट्वाङ्गभृत्, गङ्गाभृत्, अहिभृत्, इन्दुभृत्, कपालभृत्, (पिनाकपाणि, शूलिन्, खट्वाङ्गधर, गङ्गाधर, उरगभूषण, शशिभूषण, कपालिन) गजासुहृत्, पुषासुहृत् पुरासुहृत अनङ्गासुहृत्!, कालासुहृत्, अन्धकासुहृत्, मखासुहृत्, (गजासुरद्वेषिन्, पूषदन्तहर, त्रिपुरान्तक, कामध्वंसिन, यमजित्, अन्धकारि, दक्षाध्वरध्वंसक,) [नन्दिवर्धन शे. ४१, बहुरुप, सुप्रसाद, मिहिराण, अपराजित, कङ्कटीक, गुह्यगुरु, भगनेत्रान्तक, खरु, शे. ४२ परिणाह, दशबाहु, सुभग, अनेकलोचन, गोपाल, वरवृद्ध, अहिपर्यङ्क, पांसुचन्दन. शे. ४३ कूटकृद्, मन्दरमणि, नवशक्ति, महाम्बक, कोणवादिन् शैलधन्वन्, विशालाक्ष, अक्षतस्वन, शे. ४४, उन्मत्तवेष, शबर, सिताङ्ग, धर्मवाहन, महाकान्त, बह्निनेत्र, स्त्रीदेहार्द्ध, नृवेष्टन, शे. ४५, महानाद, नराधार; भूरि, एकादशोत्तम, जोटिन् जोटीङ्ग, अर्धकूट, समिर, धूम्र, योगिन्, शे.४६, उलन्द, जयत, काल, जटाधर, दशाव्यय, संध्यानाटिन्, रेरिहाण, शङ्कु, कपिलाञ्जन, शे. ४७, जगद्रोणि, अर्धकाल, दिशांप्रियतम, अतल, जगत्स्रष्ट कटाटंक कटपू, हीर, हृत्कर शे. ४८]

*अट्टहासोऽस्यास्तीति अट्टहासी ।

**अट्टालक**-पुं-९८१-મેડી



Jain Education International For Private & Personal Use Only www.jainelibrary.org

□क्षौम, अट्ट ।

*"चात्वाल-(उणा-४८०) इत्याले निपातनाद् अट्टालः के अट्टालकः प्राकाराग्रेरणगृहम् ।

**अट्या**-स्त्री-१५०२ (शि.१३५,-પર્યટન

द्र०अटाट्याशब्दः

**अट्टन**-न-७८३-ढाल

□फलक, चर्मन्, खेटक, आवरण, स्फुर, [खेट, फरक, स्फुरक शि. १८]

*अदड्ड अभियोगे अट्टत्यनेन इति अट्टनम् ।

**अणक**-न.-१४४२-અધમ

□अधम, निकृष्ट, गर्ह्य, अवद्य, काण्ड, कुत्सित, अपकृष्ट, प्रतिकृष्ट, याप्य, रेफ, रेप, अवम, बुव, खेट, पाप, अपशद, कुपूय, 'कपूय' चल, अर्वन्, [याव्य, रेपस् शि. १२९]।

*अणति रटतीति अणं कुत्सितमणं अणकम्, "कुत्सिताल्पाज्ञाते" (७।३।३३) इति कप् ।

**अणव्य**-न.-९६६-કાંગનું ખેતર

□आणवीन ।

* अणोः क्षेत्रमणव्यम् "वाऽणुमाषात् (७।१।८२) इति यः ।

**अणि**-पु स्त्री-७५६ ધરીનો ખીલો

□आणि ।

*अणति शब्दायते इति अणिः पुंस्त्रीलिङ्गोऽयम् ।

**अणि**-पु स्त्री-१०१३-ખૂણો

□अश्रि, 'अश्री', कोण, 'अणी', कोटि, 'कोटी', पाली, (पालि), अस्त्र ।

*अणती तीत्याणिः पुंस्त्रीलिङ्गः ।

**अणिमा**-स्त्री-२०२-અત્યંત નાના થવાની સિદ્ધિ

*अणोर्भावोऽणिमा महत्यपि भवत्यणुः ।

**अणी**-स्त्री-१०१३ ખૂણો

द्र० अणिशब्दः ।

**अणीयस्**-न.-१४२८-અત્યંત નાનું

□अत्यल्प, अल्पिष्ठ, अल्पीयस्, कनीयस्, [कनिष्ठ शि.१२८] ।

*अत्यणु इति अणीयः ।

**अणु**-न,-१४२६-નાનું

□स्तोक, क्षुल्ल, तुच्छ, अल्प, दभ्र, तलिन, तनु, क्षुद्र, कृश ।

*अणत्यणुः "भृमृतृ" (उणा-७१६) इत्युः ।

**अण्ड**-पु. न.-६११-અંડકોશ

□पेल, अण्डक, मुष्क अण्डकोश, वृषण, [आण्ड, पेलक शि.४७] ।

* अणत्यत्राहतः प्राणी अण्ड क्लीबलिङ्गः, **वैजयन्तीकारस्तु** :-"अस्त्रियोमुष्ककोशाण्डाः" इति पुंस्यप्याह, "कण्यणि" (उणा-१६९) इति डः आण्डोऽपि ।

**अण्ड**-पु. न.-१३१९-ઈંડું

□पेशीकोश, 'पेशी-पेशि,कोष-कोश' ।

* अमति निःसरत्यस्मादण्डं पुंक्लीबलिङ्गः, "पञ्चमाद्"-(उणा-१६८)इति डः तत्र तिस्रः संज्ञा इति **गौडः** ।

**अण्डक**-पु-६११-અંડકોશ

द्र० अण्डशब्दः ।

* अण्डमेव इति अण्डकः ।

**अण्डकोश**-पु-६१२-અંડકોશ

द्र०अण्डशब्दः ।

* अण्डयोः कोशोऽण्डकोशः ।

**अण्डज**-पु-१३१७-पक्षी

द्र. अगौकस् शब्दः ।

* अण्डाज्जातः इति अण्डजः ।

**अण्डज**-पु-१३४३-માછલું

□मत्स्य, मीन, पृथुरोमन्, झष, वैसारिण, सङ्कचारिन्, स्थिरजिह्व, आत्माशिन्, स्वकुलक्षय, विसार, शकलिन्, शल्किन्, शंवर, (शम्बर) अनिमिष, तिमि, [जलपिप्पक, मूक, जलाशय, शेव, शे. १९१, मत्स शि. १२१ ] ।

* अण्डात् जातः इति अण्डजः ।

**अण्डज**-पु-१३५५-ઈંડામાંથી ઉત્પન્ન થતા સાપ, પક્ષિ વગેરે

**अण्डवर्धन**-न.-४७०-અંડકોશની વૃદ્ધિ

□वृद्धि, कुरण्ड ।

* अण्डस्य वर्धनं वृद्धिः इति अण्डवर्धनम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अतट**-पुं-१०३२-પર્વતનું ઊંચુ સ્થાન.
□प्रपात, भृगु ।
* तटशून्यः इति अतटः ।

**अतल**-पुं-२०० (शे. ४८)-મહાદેવ
द्र. अट्टहासिन् शब्दः ।

**अतलस्पृश्**-त्रि.-१०७०-અત્યંત
द्र० अगाधशब्दः ।
* नास्ति तले अधः स्पृक् स्पर्शोऽस्य इति अतलस्पृक् ।

**अतस्**-અ.-१५४१ (शे. २०२)-એ માટે

**अतसी**-સ્ત્રી-११७९ અળસી
□उमा, क्षुमा ।
*अतत्यनया इति अतसी "तप्यणी"-(उणा-५६९) इति असः न तस्यतीति वा ।

**अति**-અ.-१५४२(शे. २००)-શ્રેષ્ઠવાચક શબ્દ
□सु ।

**अति**-અ.-१५३५ (शि. १३८)-અતિશય
द्र० अतीवशब्दः ।

**अतिकुत्सित**-पुं-३५०-અત્યંત ખરાબ
□कद्वर, (कद्वर) ।
*अतिशयेन अत्यर्थं कुत्सितोऽकुत्सितः ।

**अतिक्रम**-पुं-१५०४-ક્રમનું ઉલ્લંઘન
□अतिपात, उत्पात्यय पर्यय ।
*अतिक्रमणमित्यतिक्रमः ।

**अतिजव**-पुं-४९४-અતિશય વેગ
□जङ्घाल ।
*अतीशायी जवोऽस्येति अतिजवः ।

**अतिथि**-पुं-४९९-મહેમાન
□आवेशिक, आगन्तु, प्राघूर्ण, अभ्यागत, प्राघूर्णक, [आतिथ्य शि. ३९] ।
अतति सततं गच्छति इति अतिथिः पुंलिङ्गः "अतेरिथि"-(उणा-६७३) आतिथ्योऽपि ।
'तिथिपर्वोत्सवाः सर्वे, त्यक्तायेन महात्मना ।
अतिथिं तं विजानीयाच्छेषमभ्यागतं विदुः ॥
इति तु विशेषो नाश्रितः ।

**अतिथिपूजन** न.-८२२-અતિથિ સત્કાર
□नृयज्ञ ।
*अतिथयः पूज्यन्ते अस्मिन्निति अतिथिपूजनम् ।

**अतिदूर**-न.-१४५२-અત્યંત દૂર
□दविष्ठ. दवियम् ।
*अतिशयेन दूरमिति अतिदूरम् ।

**अतिपथिन्**-पुं-સારો માર્ગ
□सत्पथ; सुपथिन् ।
*पूजितः पन्थाः इति अतिपन्थाः "पूजास्वतेः प्राक्" (७।३।७२) इति समासान्तनिषेधः ।

**अतिपात**-पु.-१५०४-ઉલ્લંઘન
द्र० अतिक्रम शब्दः
*अतिक्रम्य पतनमिति अतिपातः ।

**अतिभी**-स्त्री-१८१-વજ્રની જ્વાળા
*अतिशयेन बिभेत्यस्याः इति अतिभीः स्त्रीलिङ्गः।

**अतिमर्याद**-न.-१५०६-અતિશય
□अत्यर्थ, गाढ, उद्गाढ, बाढ, तीव्र, भृश, दृढ, अतिमात्र, नितान्त, उत्कर्ष, निर्भर, भर, एकान्त, अतिवेल, अतिशय ।
*अतिक्रान्तं मर्यादां इति अतिमर्यादम् ।

**अतिमात्र**-न.-१५०६-અતિશય
द्र० अतिमर्याद शब्दः
*अतिक्रान्तं मात्रां इति अतिमात्रम् ।

**अतिमुक्तक**-पु.-११४७-માધવી લતા
□माधवी, लता, वासन्ती, 'पुण्ड्रक' ।
*अतिक्रान्तो मुक्तान् विरक्तानतिमुक्तकः ।

**अतिरिक्त**-न.-१४४९-અધિક
□अधिक, 'समधिक' अतिरिच्यते स्मेति अतिरिक्तम् ।

**अतिवाहिक**-पुं-१३५८-નારકી
□नारक, परेत, प्रेत यात्य, (नारकिक, नारकीय) [नैरयिक शि. १२२] ।
*अतिवाह्यन्ते इति अतिवाहिकाः 'कुशिकहृदिक' —(उणा-४५) इति साधुः ।

**अतिवृष्टि**-स्त्री-६०-અતિવર્ષા ન થાય તેવો ભગવાનનો અતિશય
*अतिवृष्टिर्निरन्तरं वर्षणं न स्यादित्यष्टमोऽतिशयः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अतिवेल**—पुं—१५०६—અતિશય
द्र. अतिमर्याद शब्दः ।
*अतिक्रान्तं वेलामिति अतिवेलः ।

**अतिशय**—१५०६—અતિશય
द्र० अतिमर्याद शब्दः
*अतिशेते जयत्यनेन इति अतिशयः ।

**'अतिशोभन'**—न.—१४३९—શ્રેષ્ઠ
द्र० पुष्कल शब्दः

**अतिसन्धान**—न.—३७९—ઠગવું
□वञ्चन, प्रतारण, व्यलीक ।
*अतिसंधीयतेऽतिसंधानम् ।

**अतिसर्जन**—न.—१५१९—અતિશય દાન
□विलम्भ [समर्पण शि. १३७] ।
*अतिसृज्यते इति अतिसर्जनं समर्पणमित्यर्थः ।

**अतिसारकिन्**—पु.—४६०—અતિસારનો રોગી
□सातिसार, [अतीसारकिन् शि. ३३] ।
*अतिसारोऽस्त्यस्य इति अतिसारकी एकदेश-विकृतस्यानन्यत्वात् अतिसारशब्दादपि "वातातीसार" –(७।१।६१) इत्यादिना इन् कश्चान्तो भवति अतीसारकी अपि ।

**अतिस्थिर**—न.—१४५३—અત્યંત સ્થિર
□स्थेयस्; स्थास्नु, स्थेष्ठ ।
अतिशयेन स्थिरमिति अतिस्थिरम् ।

**अतिस्निग्धमधुरत्व**—न.—६८—અત્યંત મીઠાશ અને સ્નેહવાળી વાણી [પ્રભુની વાણીનો ગુણ]
*अतिस्निग्धमधुरत्वं घृतगुडादिवत् सुखकारित्वम् ।

**अतिहास**—पुं—२९८—મોટેથી હસવું તે
*अनुस्यूतेऽनवच्छिन्ने हासेऽतिशयेन हसनाद् इति अतिहासः ।

**अतीव**—अ०—१५३५—અતિશય
□बलवत्, सुष्ठु, किमुत, [सु, अति शि. १३८] ।
*न तीवतीति अतीव अव्ययः, यथा, "अतीवक्षुत् पिपासितात्" स्वती अपि यथा—"सुसिक्त आम्रः फलति अतिसिक्त" इति ।

**अतीसारकिन्**—पुं—४६० (शि. ३३)—અતિસારના રોગવાળો
□सातिसार अतीसारिकन् ।

**अत्तिका**—स्त्री—३३५—મોટી બહેન
*अत्ता मातेव इति अत्तिका ।

**अत्यन्तकोपन**—पुं—३९२—અતિક્રોધી
□चण्ड ।

**अत्यन्तगामिन**—पुं—४९५—ઘણું ચાલનાર
□अत्यन्तीन ।

**अत्यन्तीन**—पुं—४९५—ઘણું ચાલનાર
□अत्यन्तगामिन्
*अत्यंत भृशंगामीति अत्यन्तीनः ।

**अत्यय**—पुं—३२३—મરણ નાશ
□मृति संस्था मृत्यु, काल, परलोक, पञ्चत्व, निधन, नाश, दीर्घनिद्रा, निमीलन, दिष्टान्त, अस्त, कालधर्म, अवसान ।
*अत्ययनमिति अत्ययः ।

**अत्यर्थ**—न—१५०५—ઘણું
द्र० अतिमर्यादशब्दः ।
*अतिक्रान्तं अर्थं इति अत्यर्थम् ।

**अत्यल्प**—न.—१४२८—અત્યંત થોડું
द्र० अणीयस् शब्दः ।
*अतिशयेनाल्पं इति अत्यल्पम् ।

**अत्याकार**—पुं—४४२—પરાભવ
□न्यक्कार, तिरस्क्रिया, परिभाव, विप्रकार, पराभव, परिभव, अभिभव, निकार ।
*अत्याकरणमिति अत्याकारः ।

**अत्युग्र**—न.—२२२ (शे. १०४)—હીંગ
द्र ०जतुकशब्दः

**अत्रभवत्**—पुं.—३३६—પૂજ્યવાચક નામ પછી લગાડાતો શબ્દ
□पूज्य, तत्रभवत् भगवत् ।

**(अत्रि)**—पुं—१२४—સપ્તર્ષિ પૈકીનું નામ

**अत्रिदृग्ज**—पुं—१०५—ચન્દ્રમા
□चन्द्रमस्, कुमुदबान्धव (कैरवबन्धु, कुमुदसुहृद्, दशवाजिन्, (दशाश्व) श्वेतवाजिन्, (श्वेताश्व, सिताश्व) अमृतसू, (सुधासू, तिथिप्रणी, कौमुदिपति, कौमुदिनीपति, भपति, दक्षजापति, रोहिणीपति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्विजपति निशापति, औषधिपति, (ज्योत्स्नेश कुमुद्वतीश, नक्षत्रेश, दाक्षायणीश, रोहणीश, द्विजेश, निशेश औषधीश,)जैवातृक,अब्ज, कलाभृत् ,शशभृत् ,एणभृत्, छायाभृत्, कलानिधि, शशधर, मृगलाञ्छन, छायाङ्क) इन्दु, विधु, (अत्रिनेत्रप्रसूत) राजन्, निशारत्न, निशाकर, (निशामणि, रजनीकर) चन्द्र, सोम, अमृतद्युति, श्वेतद्युति, हिमद्युति, (सुधांशु, सितांशु, शीतांशु,) ग्लौ, [मास्, तपस्, राज, शुभांशु, श्वेतवाहन शे. ११, जर्ण, सुप्र, राजराज, यजत, कृत्तिकाभव, यज्ञराज, औषधीगर्भ, तपस, शयत, बुध, शे. १२, स्पन्द, खसिन्धु, सिन्धूत्थ, श्रविष्ठारमण, आकाशचमस, पीतु, क्लेदु, पर्वरि, चिक्लिद, शे. १३, परिज्वन्, युवन नेमि, चन्दिर, स्नेहु, एकभू शे. १४, समुद्रनवनीत शि ९.] ।

*अत्रेर्मुनेर्दृशो नेत्राज्जातः इति अत्रिदृग्जः यौगिकत्वात् अत्रिनेत्रप्रसूत इत्यादयः ।

**(अत्रिनयनसमुत्थज्योतिष)**–पुं–१५–(प.)–ચન્દ્ર

**(अत्रिनेत्रप्रसूत)**–पुं–१०५–ચન્દ્રમા–

द्र० अत्रिदृग्जशब्दः ।

**अथर्वन्**–पुं–२४९–ત્રણવેદમાંથી ઉદ્ધૃત વેદ (अथर्ववेद) ।

*न थर्वतीति अथर्वा, पुंलिङ्गः, 'श्वन्मातरिश्वन्' –(उणा–९०२) इत्यन्नन्तो निपात्यते ।

**(अथर्ववेद)**–पुं–२४९-અથર્વવેદ

अथर्वन् ।

**अदन**–न.–४२४–ભોજન

न्याद, स्वदन, खादन, अशन, निघस, वल्भन, अभ्यवहार, जग्धि, जक्षण, भक्षण, लेह, प्रत्यवसान, घसि, आहार, प्सान, अवष्वाण, विष्वाण, भोजन, जेमन, [जमन, जवन शि. २९] ।

*अद्यते इति अदनम् ।

**अदभ्र**–न.–१४२६–ઘણું

☐प्राज्य, प्रभूत, प्रचुर,बहुल, बहु, पुष्कल, भूयिष्ठ, 'पुरुह–पुरुहू,' पुरह, भूयस्, भूरि, पुरु, स्फिर, 'स्फार' ।

*न दभ्रमिति अदभ्रम्.

**अदान**–न.–७३८–નહિ આપવું.

**अदितिज**–पुं.–८८ – દેવો

द्र० अनिमिषशब्दः

**अदृष्ट**–न.–३०२–અગ્નિ પાણી વિગેરેથી થતો ભય

*वह्नितोयाभ्यां आदिशब्दात् पिशाचाऽशन्यादेर्भयमदृष्टम् ।

**अद्धा**–અ.–१५४२ (શે.२०१)યથાર્થ અર્થ જણાવનાર શબ્દ

☐अञ्जसा ।

**अद्भुत**–पुं–२९५–આઠમો રસ

*अद् इत्याश्चर्यार्थमव्ययम्, अद् विस्मितं भवति अनेन अस्मिन् वा मनोऽद्भुतः "अदो भवो ड्डुतः (उणा–२१४) इति ड्डुतः, **गौडस्तुः** श्रृंगारवीरौ बीभत्सं, रौद्रं हास्यं भयानकम् ।

करुणा चाद्भुतं शान्तं, वात्सल्यं च रसा दश ॥

**अद्भुत**–न.–३०३–આશ્ચર્ય

☐विस्मय, चित्र, चोद्य, आश्चर्य, [फुल्लक, मोह, वीक्ष्य शे. ८९] ।

*अद् भवनं इति अद्भुतम् ।

**अद्भुतत्व**–न.–७०–આશ્ચર્યકારી

* अद्भुतत्वं प्रतीतम् ।

**अद्मर**–पुं.३९४–ખાનાર

भक्षक, घस्मर, आशित, [आशिर **शि. २८**] ।

*अत्तीत्येवंशील इति अद्मरः "सृघस्यदो"—(५।२।७३) इति मरक्

**अद्य**–અ.–१५४२ (શે. २०३)–આજ, આજનો દિવસ.

**अद्रि** (અ.વ.)–पुं. ઇન્દ્રનો શત્રુ

☐पाक, वृत्र, पुलोमन्, नमुचि, बल, जम्भ अदन्ति इति अद्रयः

**अद्रि**–पु.–१०२७–पर्वत–પર્વત

द्र. अचलशब्दः !

*अद्यते वज्रेण इति अद्रिः "तङ्किवङ्कि"–(उणा–६९२) इति रिः

**अद्रि**–पुं.–१११४–વૃક્ષ

द्र. अंह्रिपशब्दः ।

*अद्यते इति अद्रिः "तङ्कि"–(उणा–६९२) इति रिः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अद्रिजा**–स्त्री–२०४–પાર્વતી

□गौरी, काली, पार्वती मातृमातृ, अर्पणा, रुद्राणी, अम्बिका, त्र्यम्बका, उमा, दुर्गा, चण्डी, सिंहयाना, (सिंहवाहना) मृडानी कात्यायनी, दक्षजा, आर्या, कुमारी, सती, शिवा, (शिवी), महादेवी, शर्वाणी, सर्वमङ्गला, भवानी, कृष्णस्वसृ, मैनाकस्वसृ, मेनाजा, इश्वरा, निशुम्भमथनी, शुम्भमथनी, महिषमथनी, भूतनायिका, [गौतमी, कौशिकी, कृष्णा, तामसी, बाभ्रवी, जया, कालरात्रि, महामाया, भ्रामरी, यादवी, वरा, शे. ४९, बर्हिध्वजा, शूलधरा, परमब्रह्मचारिणी, अमोघा, विन्ध्यनिलया, षष्डी, कान्तारवसिनी, शे. ५०, जाङ्गली, बदरीवासा, वरदा, कृष्णपिङ्गला, दृषद्वती, इन्द्रभगिनी, प्रगल्भा, रेवती शे. ५१, महाविद्या, सिनीबाली, रक्तदन्ती एकपाटला, एकपर्णा बहुभुजा, नन्दपुत्री, महाजया, शे ५२, भद्रकाली, महाकाली, योगिनी, गणनायिका, हास्या, भीमा, प्रकूष्माण्डी, गविनी वारुणी, हिमा शे. ५३, अनन्ता, विजया, क्षेमा, मानस्तोका, कुहावती, चारणा, पितृगणा, स्कन्दमातृ, धनाञ्जनी, शे ५४, गान्धर्वी, कर्बुरा, गार्गी, सावित्री, ब्रह्मचारिणी, कोटिश्री, मन्दरावासा, केशी, मलयवासिनी, शे. ५५, कालयनी, विशालाक्षी, किराती, गोकुलोद्भवा, एकानसी, नारायणी, शैला, शाकम्भरी, इश्वरी; शे.५६, प्रकीर्णकेशी, कुण्डा, नीलवस्त्रा; उग्रचारिणी; अष्टादशभुजा, पौत्ती, शिवदूती यमस्वसृ, शे. ५७, सुनन्दा, विकचा, लम्बा, जयन्ती, नकुला, कुला, विलंका, नन्दिनी, नन्दा, नन्दयन्ती, निरञ्जना, शे. ५८, कालञ्जरी शतमुखी, विकराला, करालिका, विरजस्, पुरला, जारी, बहुपुत्री, कुलेश्वरी, शे. ५९, कौटमी, कालदमनी, दर्दुरा, कुलदेवता, रौद्री, कुन्द्रा, महारौद्री, कालङ्कमा, महानिशा शे ६०, बलदेवस्वसृ, पुत्री, हीरी, क्षेमङ्करी प्रभा, मारी, हैमवती, गोला, शिखरवासिनी शे. ६१, दाक्षायणी, ईश्वरी, शि. १५] ।

*अद्रेः जाता इति अद्रिजा ।

**अद्रिराज्**–पुं.–१०२७–હિમાલય

□उदगाद्रि, मेनकाप्राणेश, हिमवत्, हिमालय, हिमप्रस्थ, भवानीगुरु ।

*अद्रीणां राजेति अद्रिराट् ।

**(अद्रिद्विष)**–पु.–१७५

□(पाकद्विष्, वृत्रद्विष्, पुलोमद्विष्, नमुचिद्विष्, बलद्विष्, जम्भद्विष्, पाकशासन) ।

**अद्वय**–पु –२३४–બુદ્ધ

□बुद्ध, सुगत, धर्मधातु, त्रिकालविद्, जिन, बोधिसत्व, महाबोधि, आर्य, शास्तृ, तथागत, पञ्चज्ञान, षडभिज्ञ, दशार्ह, दश भूमिग, चतुस्त्रिंशज्जातकज्ञ, दशपारमिताधर, द्वादशाक्ष, दशबल, त्रिकाय, श्रीधन, समन्तभद्र, संगुप्त, दयाकूर्च, विनायक, मारजित्, लोकजित्; खजित्, धर्मराज, विज्ञानकामतृक, महामैत्र, मुनीन्द्र, [भगवत्, योगिन्, बुध, विज्ञानदेशन, महासत्व, लोकनाथ, बोधि, अर्हत, सुनिश्चित शे. ८१ गुणाब्धि, विगतद्वन्द्व शे. ८२, सिद्धार्थ शि. १६.] ।

*न विद्यते द्वयं ज्ञानार्थो किन्त्वेकमेव ज्ञानमस्य इति अद्वयः ।

**अधम**–पुं–१४४१–અધમ હલકું

द्र. अणक शब्दः ।

*अधो भवं इति अधमम्, "अमोऽन्तावोधसः" (६।३। ७४) इत्यमः ।

**अधमर्ण**–पुं–८८२–દેવાદાર

□ग्राहक ।

*ऋणेऽधमोऽधमर्णः, राजदन्तादिवात् पूर्वनिपातः।

**अधर**–पुं–३४७–ઓછું બોલનાર

—हीनवादिन् ।

*अवति गच्छति हिनत्वं इति अधरः "अवेर्धचवा–" (उणा–३९८) इत्यरः ।

**अधर**–पुं–५८१–હોઠ

□ओष्ठ, रदच्छद, दन्तवस्त्र, [दशनोच्छिष्ट, रसालेपिन्, वागूदल शे. १२२] ।

*अवति शोभां इति अधरः अयमधस्तनौष्ठवाचीति कश्चित्

**'अधरेद्युस्'**–अ.–१५४२–ગર્ભકાલે, પહેલે દિવસે.

**अधस्**–अ.–१५२६–નીચેહેઠળ

—अधस्ताद्, (अवाच्) ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*अधरे देशेऽधः, पूर्वापराधरेभ्यो–" (७।२।११५) इत्यस् प्रत्ययः अधादेशश्च यथा–गिरेरधः ।

**अधस्तात्**–अ.–नीचे હેઠળ

☐अधस् , (अवाच्) ।

*अधरे देशे इति अधस्तात् "पूर्वावराधरेभ्यो" –(७।२।११५) इत्यस्तात् प्रत्ययः, अधादेशश्च यथा–गिरेरधस्तात् ।

**अधःक्षिप्त**–न.–१४८२–नीचे ફેંકેલું

☐यञ्चित ।

*अधः क्षिप्यते स्म इति अधःक्षिप्तम् ।

**अधि**–स्त्री–५३५–રજસ્વલા સ્ત્રી

☐रजस्वला, पुष्पवती, आत्रेयी, स्त्रीधर्मिणी, मलिनी, अवी, उदक्या, ऋतुमती, [पुष्पिता शि.४३]।

*अत्ति भूमावित्यधिः, ' तृभ्रम्य–" (उणा–६११) इति इः, अधादेशश्च न धीयते मनोऽस्यामिति वा ।

**अधिक**–न.–१४४९–વધારે

☐अतिरिक्त, 'समधिक'।

*अध्यारुढमाधिकं 'अधेरारुढे-' (७।१।१८७) इति कः, अधिकायतीति वा ।

**अधिकरण**–न –२५५

☐अधिकार

*अधिक्रियतेऽस्मिन् इति अधिकरणम् ।

**अधिकर्मिक**–पुं–७२५–દાણ લેવા નીમાયેલા અધિકારી

––हट्टाध्यक्ष

*अध्युपरि कर्म अस्यास्ति अधिकर्मिकः, व्रीह्यादित्वादिकः ।

**अधिकाङ्ग**–पु. न.–७६७–કેડે બાંધવાનો કમરપટો

☐सारसन, [अधियाङ्ग, धियाङ्ग, शि.११]

*अधिकमङ्गदधिकाङ्गम्, पुंक्लीबलिङ्गः,अधियाङ्गमित्येके **यन्मुनिः** 'अधियाग सारसनम" **दुर्गस्तु**: "तस्य सारसनं ज्ञेयं धियाङ्गं च निबन्धनम्," इत्याह, यत् स कञ्चुकैर्हृदि धार्यते ।

**अधिकार**–पुं.–७४४–વ્યવસ્થા કરવી

☐प्रक्रिया

*अधिक्रियते प्रस्तूयते इति अधिकारः, व्यवस्थास्थापनमित्यर्थः ।

**अधिकृत**–पुं.–७२२–અધિકારી

☐अध्यक्ष ।

*अधिक्रियते उपरि नियुज्यते स्म इति अधिकृतः

**अधिक्रम**–पुं.–१५११–આક્રમણ

☐आक्रम, क्रान्ति

*अधिक्रमण इति अधिक्रमः ।

**अधिक्षिप्त**–पुं.–४४०–તિરસ્કાર પામેલો

☐प्रतिक्षिप्त ।

अधिक्षिप्यते स्म इति अधिप्यते स्म इति अधिक्षिप्तः

**अधित्यका**–स्त्री–१०३५–પર્વત ઉપરની જગ્યા

*पर्वतमधिरुढा ऊर्ध्वभूमिः अधित्यका "उपत्यकाधित्यके (७।१।१३१) इति साधुः ।

**अधिप**–पुं.–३५८–સ્વામી, નાયક

☐ईश, नेतृ, परिवृढ अधिभू, पति, इन्द्र, स्वामिन्, नाथ, अर्य, प्रभु, भर्तृ ईश्वर, विभु, ईशितृ, इन, नायक ।

* अधिकं पाति इति अधिपः ।

**अधिभू**–पुं–३५८–સ્વામી નાયક

द्र, अधिपशब्दः ।

*अधि उपरि भवति इति अधिभूः ।

**अधियाङ्ग**–न.–७६७–કમરપટો

द्र. (शि. ११) अधिकाङ्गशद्बः ।

**अधिरोहिणी**–स्त्री–१०१३–નિસરણી

☐निःश्रेणि,' अधिरोहिणी' ।

*अधिरोहन्त्यव रोहन्ति चांऽनया दारुमय्या इति अधिरोहिणी ।

**(अधिरोहिणी)**–स्त्री–१०१३–નિસરણી

द्र० अधिरोहिणणि शद्बः ।

**अधिवासन**–न.-६३७-ધૂપ વગેરેથી સંસ્કાર કરવો તે

* संस्कारस्तैलादिना गुणाधानं, आदिशद्बात् धूपादिभिरधिवास्यते इति अधिवासनम् ।

**अधिविन्ना**–स्त्री–५२७–પહેલી પરણેલી સ્ત્રી

☐कृत सापत्निका, अध्यूढा

*अधिविन्दत्यस्यामिति अधिविन्ना ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अधिश्रयणी**—स्त्री—१०१८—ચૂલો
□अन्तिका, चुल्ली, (चुल्ली), अश्मन्तक, उद्धान, 'उध्मान' [अन्ती शि. ।
अधिश्रीयतेऽस्यामिति अधिश्रयणी ।

**अधिष्ठान**—न.—९७२—નગર
□नगरी, पुर, पुरी, (पुरि), द्रङ्ग, (उद्रङ्ग, निवेश), पत्तन, पुटभेदन, निवेशन, स्थानीय, निगम, [पट्टन शि. ८५]
※अधितिष्ठन्त्यस्मिन् इति अधिष्ठानम् ।

**अधीन**—पुं—३५६—(शे. ९३)—પરવશ
द्र० गृह्यकशब्द

**अधीश्वर**—पुं—२४—અરિહંત,
□अर्हत्, जिन, पारगत, त्रिकालविद्, क्षीणाष्टकर्मन्, परमेष्ठिन्, शम्भु, भगवत्, जगत्प्रभु, तीर्थंकर, तीर्थकर, जिनेश्वर स्याद्वादिन्, (अनेकान्तवादिन्) अभयद, सार्व, सर्वज्ञ, सर्वदर्शिन्, केवलिन्, देवाधिदेव, बोधिद, पुरुषोत्तम, वीतराग, आप्त, [सर्वीय शि. २]।
※जगतां अधीष्टे इत्येवं शीलः इति अधीश्वरः, "स्थेशभास"—॥५।२।८१॥ इति वरः ।

**अधीश्वर**—पुं.—६९१ (शे. १३८)—ચક્રવતી
□चक्रवर्तिन्, सार्वभौम ।

**अधुना**—पु.—१५३०—હમણાં
□साम्प्रतम्, इदानीम्, सम्प्रति, एतर्हि ।
※अस्मिन् काले इति अधुना, "सदाधुनेदा" —(७।२।९६) इति साधवः, यथा "अधुना तस्य विस्तीर्णविभवान्धस्य के वयम् " ? ।

**अधृष्ट**—पुं—४३३—સરળ
—शालीन, शारद ।
※न धृष्णोतीति अधृष्टः ।

**अधोऽशुक**—न.—६७२—નીચે પહેરવાનું વસ્ત્ર—
—परिधान, अन्तरीय, निवसन, उपसंव्यान ।

**अधोऽक्षज**—पुं—२१४—કૃષ્ણ
द्र अच्युत शब्दः ।
※अधः कृत्वाऽक्षाणि इन्द्रियाणि जातोऽधोक्षजः, अधोऽक्षाणां जितेन्द्रियाणां जायते प्रत्यक्षी—भवति वा अक्षजं ज्ञानमधोऽस्येति वा ।

**अधोभुवन**—न.—१३६३—પાતાળ
□पाताल, वडवामुख, बलिवेश्मन्, नागलोक, रसातल, [रसा, तल, शि.१२२]
※अधस्ताद् द्यावापृथिव्योर्भुवनमधोभुवनम् ।

**अधोमर्मन**—न.—६१२—ગુદા
□अपान, पायु, गुद, च्युति, शकृद्द्वार, त्रिवलीक, बुलि ।
※अधस्ताद् मर्माऽस्याऽधोमर्म ।

**अधोमुख**—पुं.—४५७—નીચા મુખ વાળો
□अवाच् [न्युब्ज शे. १०६] ।
※अधः स्थितं मुखं अस्य इति अधोमुखः ।

**अधोमुख**—पुं.—२२९ (शे.७४) વિષ્ણુ
द्र० अच्युत शब्दः ।

**अधोमुख'**—पुं—७२२—અધિકારી
□अधिकृत ।
अधिकृतोऽक्षेष्वायमुखेषु इति अध्यक्षः, आयमध्यक्ष्णोति व्याप्नोति वा अधियान्यक्षीणीन्द्रियाण्यस्य वा ।

**अध्ययन**—न.—८२२—વેદનું અધ્યયન
□ब्रह्मयज्ञ ।
※अधीयते इति अध्ययनं, स्वाध्यायः ।

**अध्यवसाय**—पुं—३००—ઉત્સાહ
□उत्साह, प्रगल्भता, अभियोग उद्यम प्रौढि उद्योग, कियदेतिका, अर्जस् ।
※अध्यवसीयते इति अध्यवसायः ।

**(अध्याय)**—पुं—३५७—ગ્રંથનો અમુક ભાગ

**अध्याहार**—पु.३२२—વિચારણા
□वितर्क उन्नयन, परामर्श, विमर्शन, तर्क, ऊह (ऊहा) ।
※अध्याहरणम् इति पूर्वोत्प्रेक्षणं अध्याहारः ।

**अध्यूढा**—स्त्री—५२७प्रथम પરણેલી स्त्री
□कृताआपत्निका; अधिविन्ना
※अधि उपरि उह्यते द्वितीया अस्या इति अध्यूढा।

**अध्येषणा**—स्त्री—३८८—માંગણી
□अर्थना, एषणा, अर्दना, प्रणय, याञ्चा, याचना, सनि, [भिक्षणा अभिषस्ति, मार्गणा शे. ९५]।
※अध्येषणं इति अध्येषणा "पर्यधेर्वा—" (५।३।११३) इत्यनः ।

**अध्वग**–पु.–४९३–મુસાફર

☐अध्वनीन, अध्वन्य, पान्थ, पथिक, देशिक, प्रवासिन् ।

अध्वानं गच्छति इति अध्वगः ।

**अध्वन्**–पुं–९८३–માર્ગ

☐पदवी, (पदवि), एकपदी, पद्या, पद्धति, वर्त्मन्, वर्त्तनी, (वर्त्तनि), अयन, सरणि, 'सरणी, शरणी' मार्ग, पविन्, 'पथ' निगम, सृति. ।

*अतन्ति अत्र पान्था इति अध्वा, 'अतेर्धच' (उणा–९०९) इति क्वनिप् ।

**अध्वनीन**–पुं–४९३-મુસાફર

द्र अध्वग शब्दः।

*अध्वानमलं गामीति अध्वनीनः "अध्वानं येनौ–(७।१।१०३) इति साधुः

**अध्वन्य**–पुं–४९३–મુસાફર

द्र. अध्वगशब्दः ।

*अध्वानमलं गामीति अध्वनीनः "अध्वानं येनौ" (७।१।१०३) इति साधुः ।

**अध्वर**–पुं–८२०–યજ્ઞ

☐यज्ञ, याग सव, सत्र, स्तोम मन्यु मख. क्रतु, संस्तर, सप्ततन्तु, वितान, बर्हिष् ।

*न ध्वरतीति अध्वरः. अध्वानं रातीति वा ।

**अध्वरथ**–पुं–७५२–મુસાફરીનો રથ

☐पारियानिक ।

*अध्वनि गमनाय रथः इति अध्वरथः ।

**अध्वर्यु**–पुं–८१९–યજુર્વેદ જાણનાર ઋત્વિજ

☐यजुर्विद् ।

*अध्वरं याति इति अध्वर्युः "केवयुभुरणु" –(उणा–७४६) इति निपात्यते ।

**अनक्षर**-न.-२६६–ન બોલવા લાયક વચન

☐अवाच्य ।

**अनक्षि**–न.–५७६–વિકારવાળી આંખ

*विकृतं अक्षि इति अनक्षि नञ विरोधे अनर्थवत् ।

**अनगार**–पुं–७६–મુનિ, સાધુ

☐मुमुक्षु, श्रमण, यति वाचंयम, यतिन्, साधु, ऋषि, मुनि निर्ग्रन्थ, भिक्षु, [श्रवण शि. ५] ।

*नास्ति अगारमस्येति अनगारः ।

**अनङ्ग**–पुं–२२७–કામદેવ

द्र. अङ्गजशब्दः ।

*न विद्यतेऽङ्गमस्य इति **अनङ्गः**

**अनङ्गासुहृद्**–पुं–२००–શંકર

द्र. अट्टहासिन् शब्दः ।

*अनङ्गस्यासुहृदिति अनङ्गासुहृत्, शंभोस्तृतीयनेत्राग्निना कामस्य दग्धत्वात् ।

**अनच्छ**–न.–१०७१–મલિન

☐आविल, कलुष ।

*न अच्छं इति अनच्छम् ।

**अनडुह**–पुं–१२५७–બળદ

☐ऋषभ वृषभ वृष, वाडवेय, सौरभेय, भद्र, शक्वर, शाक्वार, उक्षन्, ककुद्मत्, गो, बलीवर्द, शाङ्कर ।

*अनो वहतीतिअनड्वान्, "अनसो वहेः क्विप"–सश्च डः (उणा. १००६) इति साधुः ।

**अनडुही**–स्त्री–१२६५–ગાય

द्र० अध्न्या शब्दः ।

*अनडुहशब्दाद् गौरादिपाठसामर्थ्याद् विकल्पेन कृतवाऽऽदेशात् ङीरिति अनडुही ।

**अनड्वाही**–स्त्री–१२६५–ગાય

द्र० अध्न्याशब्दः ।

अनडुहशब्दाद् गौरादि पाठसामर्थ्याद् विकल्पेन कृतवाऽऽदेशात् ङीरिति अनड्वाही ।

**अनतिविलम्बिता**–स्त्री–७०–વિલંબ વિનાની

*अनतिविलम्बिता प्रतीता ।

**अनन्त**–पुं–२९–१४મા ભગવાનનું નામ

☐न विद्यते गुणनामन्तोऽस्य इति अनन्तः, अनन्तजिदेकदेशो वा, अनन्त भीमो भीमसेन इति न्यायात् ।

**अनन्त**–न.–१६३–આકાશ

☐व्योमन्, अन्तरिक्ष, गगन, घनाश्रय, विहायस्, आकाश, पुष्कर, अभ्र, सुरपथ, अभ्रपथ, उडुपथ, मरुत्पथ, (देववर्त्मन्, मेघवर्त्मन्, नक्षत्रवर्त्मन्, वायुवर्त्मन) अम्बर, ख, द्यो, दिव्, विष्णुपद, वियत, नभस्, (विहायसा, महाबिल), (नक्षत्रवर्त्मन्, ग्रहनेमि, अवटिन, छायापथ शे. २८ अन्तरीक्ष शि. १२)



Jain Education International For Private & Personal Use Only www.jainelibrary.org

*नास्त्यन्तोऽस्य इति अनन्तम् ।

**अनन्त**–પું–૨૨૪–બલદેવ

द्र० अच्युताग्रजशब्दः ।

*अनन्तः शेषः तन्मूर्तित्वाद् इति अनन्तः ।

**अनन्त**–પું–૧૩૦૭–શેષનાગ

☐शेष, नागाधिप द्विसहस्राक्ष, आलुक, (एक-कुण्डल शि. ११६)

*नास्त्यन्तोऽस्येति अनन्तः ।

**अनन्तक**–ન.–૮૭૫–પુદ્ગલ, અનંત પદાર્થો.

*नास्त्यन्तोऽस्येति अनन्तकम् ।

**अनन्तजित्**–પું–૨૯–૧૪માં તીર્થંકરનું નામ

☐अनन्त ।

*अनंतकर्मांशान् जयति अनन्तैर्ज्ञानादिभिर्वा जयति इति अनन्तजित् यद्वा गर्भस्थिते जनन्या अनन्तरत्नदाम दृष्टं जयति च त्रिभुवनेऽपि इत्यनन्तजित् ।

**अनन्ततीर्थकृत्**–પું–૨૭–૧૪મા તીર્થંકરનું નામ

☐अनन्त अनन्तजित् ।

*न विद्यते गुणानामन्तोऽस्य इह अनन्तः ।

**अनन्तवीर्य**–પું.–૫૬–ભાવી ચોવીશીના ૨૩મા ભગવાનનું નામ

*अनन्तं वीर्यं बलं अस्य इति अनन्तवीर्यः ।

**अनन्तर**–ન–૧૪૫૧–આંતરા રહિત

☐अव्यवहित, संसक्त, अपटान्तर, 'अपदान्तर' ।

*नास्त्यन्तरमत्रेति अनन्तरम् ।

**अनन्ता**–स्त्री–९३६–પૃથ્વી

द्र० अचलाशब्दः ।

*ना स्त्यन्तो अस्या इति अनन्ता ।

**अनन्ता**–स्त्री–११९२–ધરો

☐दूर्वा, अनन्ता, शतपर्विका, हरिताली, रुहा, 'शतपर्णिका, सहस्रवीर्या, भार्गवी' ।

*अनन्ता दूर प्रसारणात् ।

**अनन्ता**–स्त्री–२०५ (शे. ५४)–પાર્વતી

द्र० अद्रिजाशब्दः ।

**अनन्यज**–પુ–૨૨૭–કામદેવ

द्र० अङ्गजशब्दः ।

*न मनसोऽन्यस्माज्जायते इति अनन्यजः ।

**अनन्यवृत्ति**–પું–૧૪૫૮–એકાગ્ર

एकतान, एकायन, एकसर्ग, एकास, 'एकाग्रय' ऐकाग्र, तद्गत, एकायनगत ।

*अनन्य एक रुपा वृत्तिर्व्यापारोऽस्य इति अनन्यवृत्तिः ।

**अनर्गल**–ન.–૧૪૬૬–અંકુશ રહિત

☐अबाध, उच्छृङ्खल, उद्दाम, अयन्त्रित, निरङ्कुश, [निर्गल शि. १३१] ।

*नास्त्यर्गलाऽस्य इति अनर्गलम्, निर्गलमपि ।

**अनल**–પું–૧૦૯૯–અગ્નિ

द्र० अग्निशब्दः ।

*अनित्यनेन लोक इति अनलः "मृदिकन्दि" (उणा–४६५) इत्यलः ।

**अनवधानता**–स्त्री–१३८२–અસાવધાનપણું

☐प्रमाद ।

*अनवधानस्य भावोऽनवधानता, अनवहितत्वं कार्येष्वतात्पर्यम् ।

**अनवरत**–ન.–૧૪૭૧–નિરન્તર

द्र० अजस्रशब्दः ।

*अवरतशब्देः विरामार्थः ततो नञ् समासः तेन अनवरतम् ।

**अनवराध्य**–ન.–૧૪૩૯–મુખ્ય પ્રધાન

द्र० अग्रशब्दः ।

*अनवरार्द्धे मुख्यभागे भवं इति अनवराध्यम्, "परावरा"–(६।३।७३) इति निपात्यते ।

**अनवस्कर**-ન.–૧૪૩૬–કચરા વિનાનું, સાફ કરેલું

☐चोक्ष, निःशोध्य ।

*अविद्यमानोऽवस्करो वर्चस्कोऽत्र इति अनवस्करम् ।

**अनवस्थिति**–પું–૩૧૫–ચંચલ, અસ્થિર

☐चापल ।

*अनवस्थानमित्यनवस्थातः ।

**अनश्वर**–ન–૧૪૫૩–शाश्वत, नित्य ध्रुव, [सदातन् शि. १२९ शाश्वतिक, शि. १३०] ।

*न नश्वरमित्यनश्वरम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अनस्**–न.–७५३–गाडुं

☐शकट ।

*अनति चित्करोतीत्यनः क्लीबलिङ्गः, "असू" (उणा–९५२) इत्यस् ।

**अनादर**–पुं–१४७९–तिरस्कार

☐रीढा, अवज्ञा, अवहेल, असूक्षण, 'परिभव, परीभाव, तिरस्क्रिया,' [असूक्षण शे. १३२, अवमानन, अवगणन शे. १३३]।

**अनादृत**–न.–१४७९–अपमान करायेलुं

☐अवज्ञात, अवमानित्, अवगणित, अवमत, 'परिभूत' ।

*न आद्रियते स्म इति अनादृतम् ।

**अनामय** न.–४७४–आरोग्य

☐स्वास्थ्य, वार्त, सद्य आरोग्य ।

*आमयस्याभावः इति अनामयम् ।

**अनामिका**–स्त्री–५९•मध्य अने कनिष्ठानी वचली आंगळी

☐सावित्री ।

*नाम ग्रहणाऽयोग्या इति अनामा सैव अनामिका ब्रह्मणोऽनया शिरच्छेदात् अत एवास्यां पवित्रकः क्रियते ।

**अनारत**–न.–१४७१–निरन्तर

द्र० अजस्रशब्दः ।

*आरत शब्दो विरामार्थः, ततो नम समासः तेन अनारतम् ।

**अनार्यज**–न.–६४०–अगर

द्र० अगरुशब्दः ।

*अनार्यदेशे जातमित्यनार्यजम् ।

**अनालम्बी**–स्त्री–२८८–शिवनी वीणा

☐न आलम्बते इति अनालम्बी ।

**अनाविल**–न.–१४३६–उज्ज्वल, निर्मळ

☐विमल, विशद, वीध्र अवदात, विशुद्ध, शुचि ।

* न आविलमित अनाविलम् ।

**अनासिक**–पुं–४५०–नाक विनानो

☐विख, विखु, विग्र ।

अनासिको नासिकारहितः ।

**अनाहत**–न.–६७१–नवुं वस्त्र

☐तन्त्रक, निष्प्रवाणि ।

*छेदः क्षालनं भोगश्चेत्याहतं तद्रहितं इति अनाहतं नवं वस्त्रम् ।

**अनिन्द्रिय**–न.–१३६९ (शि. १२४)–चित्त, मन

द्र० अन्तःकरणशब्दः

**अनिमिष**–पुं–८८–देव

☐स्वर्गसद्, (द्युसद्मन) अमर, देव, सुपर्वणम्, सुर, निर्जर, देवता, ऋभु, बर्हिर्मुख, दैवत, नाकिन्, (स्वर्गिण, त्रिदिवाधीश), लेख, वृन्दारक, सुमनस्, त्रिदश अमर्त्य, स्वाहाभुज्, स्वधाभुज् क्रतु-भुज्, सुधाभुज्, (स्वाहाशन, स्वधाशन, यज्ञाशन, अमृतान्धस्,) आदितेय, (आदित्य, अदितिज,) गीर्वाण, मरुत्, अस्वप्न, विबुध, दानवारि, (दनुजद्विष) [निलिम्प, कामरूप, साध्य, शोभ, चिरायुष, पुजित, मर्त्यमहित, सुवाल वायुभ शे० ४) ।

*न निमिषति इति अनिमिषः

**अनिमिष**–पुं.–१३४४–माछलुं

द्र० अण्डजशब्दः ।

*न निमिषति लोचने इति अनिमिषः ।

**अनिरुद्ध**–पुं.–२३०–कामदेवनो पुत्र

ऋष्याङ्क, (ऋष्यकेतु) उषेश,(उषारमण) ब्रह्मसू ।

* न निरुध्येते स्मेति अनिरुद्धः ।

**अनिल**–पुं–५२–गई चोवीशीमां थई गयेल २७ मा तीर्थंकर

*अनिल इव महाबलत्वाद् अनिलः

**अनिल**–पुं.–११०६–पवन, वायु.

☐वायु, समीर, समिर, पवन, आशुग, नभःश्वास, नभस्वत्, श्वसन, समीरण, वात, अहिकान्त, पवमान, मरुत्, प्रकम्पन, कम्पाक, नित्यगति, गन्धवह, प्रभञ्जन, मातरिश्वन्, जगत्प्राण, पृषदश्व महाबल, मारुत, स्पर्शन, दैत्यदेव, [सुरालय, प्राण संभृत, जलभूषण शे. १७१, शुचि, वह, लोलघण्ट, पश्चिमदिक्पति, उत्तरदिक्पति अङ्कति, क्षिपणु, मर्क, ध्वज प्रहरण, चल, शे. १७२, शीतल, जलकान्तार, मेघारि, सुमर, शे. १७३, गन्धवाह, सदागति शि. १००] ।

*अनन्त्येनेनेति अनिलः, "कल्यनि"-(उणा-४८१) इतीलः न निलति इति वा ।

**अनिलकुमार** (भ. ५.)–पुं–९०–भवनपतिना छट्ठा देवनुं नाम.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अनिल सख**–पुं–१०९९–અગ્નિ
द्र० अग्नि शब्दः
*अनिलः सखाऽस्येति अनिलसखः

**(अनिश अनिशम्)**–न. અ. १४७२–નિરન્તર
द. अजस्र शब्दः ।
* नास्ति निशाऽत्रेति अनिशम्, सा हि विरति-स्थानम्, अनिशमित्यव्ययमपि ।

**अनिशम्**–અ–१५३१–હંમેશા, નિત્ય
☐सदा, सना, शश्वत्, [सर्वदा, सनत्, सनात् शि. १३७] ।
* न निशाम्यतीति अनिशं "गमिजमि-" (उणा-९३७) इति डिदम् यथाः–"येनमन्त्यनिशं जिनम्" इति ।

**अनिष्ट–दुष्टधी**–पुं–४३८–ખરાબ બુદ્ધિવાળો
☐विवश ।
* अनिष्टा दुष्टा च धीर्यस्य स अनिष्टदुष्टधीः

**अनीक**–पुं–७४६–લશ્કર
☐वाहिनी, पृतना, सेना, बल, सैन्य, अनीकिनी, कटक, ध्वजिनी, तन्त्र, दण्ड, पताकिनी, वरूथिनी, चमू, चक्र, स्कन्धावार (शिबिर शि. ६४) ।
*अनिति इति अनीकं पुंक्लिबलिङ्गः "स्यमिकषि–" (उणा–४६) इतीकः ।

**अनीक**–पुं–७९७–લડાઈ
☐युद्ध, सङ्ख्य, कलि, सङ्ग्राम, आहव, सम्प्रहार, समर; जन्य, युध्, आयोधन संस्फोट, कलह, मृध, प्रहरण, संयत्, रण विग्रह, द्वन्द्व, समाघात, समाहय, अभिसम्पात, संमर्द, समित्, प्रघात, आस्कन्दन, आजि प्रधन अभ्यागम, प्रविदारण समुदाय, समुदय, राटि समिति, सङ्गर, अभ्यामर्द, सम्पराय, सतीक, साम्परायिक, आक्रन्द, संयुग, (संस्फेट संफेट, शि. ७०) ।
* अनन्ति जीवान्त सुभटा अनेन इति अनीकं पुंक्लीबलिङ्गः अनीकं सैन्यमस्त्यत्र वा, अभ्रादित्वाद् ।

**अनीकस्थ**–पुं–७२२–રક્ષક વર્ગ
☐रक्षिवर्ग ।
*अनीकेन तिष्ठतीति अनीकस्थः ।

**अनीकिनी**–स्त्री–७४५–લશ્કર
द्र० अनीकशब्दः ।
अनीकं संग्रामोऽस्त्यस्यां इति अनीकिनी ।

**अनीकिनी**–स्त्री७४९-ચમૂથી ત્રણ ગુણી અનીકિની
*चमूस्त्रिगुणा अनीकिनी, अनीकिनी संख्या तु हस्ति २१८७, रथ २१८७ अश्व ६५६१, पदाति १०९३५, एवमनीकिन्यां सर्वसंख्या २१८७०, **यदाहुः**
—पत्ती सेणासेणामुहं च, गुम्मं च वाहिणी चेव ।
पियणा चमू अणीगणी, दसगुणीआ अक्खोहिणी होइ ॥

**अनुक**–पुं–४३४–કામી
☐कामुक, कमितृ, कम्र, कामयितृ, अभिक, अभीक, कामन, कमर, (कमन शि. ३१)
*अनुकामयते इति अनुकः "अनोः कमि तरि" (७।१।१८८) इति कः ।

**अनुकम्पा**–स्त्री–३६९–દયા
☐दया, शूक, कारुण्य, करुणा, घृणा, कृपा, अनुक्रोश ।
*अनुकम्पनं इति अनुकम्पा ।

**अनुकर्ष**–पुं–७५७–ધારી, રથની નીચેનું લાકડું
*अनुकृष्यते इति अनुकर्षः ।

**अनुकामीन**–पुं–४९५–સ્વેચ્છાચારી
☐कामंगामिन ।
अनुकामं यथेच्छं गामीति अनुकामीनः "यथाकामा" (७।१।१००) इति ईनः ।

**अनुकार**–पुं.–१४६३–ઉપમા, સમાનપણું
☐औपम्य, अनुहार, साम्य, तुला, उपमा, कक्षा; उपमान (उपमति) ।
*अनुकरणमिति अनुकारः ।

**अनुकूलता**–स्त्री–१३७७–સરળતા
☐दाक्षिण्य ।

**अनुक्रम**–पुं–१५०३–પરિપાટી
☐पर्याय, क्रम, परिपाटी (परिपाटि), आनुपूर्वी, आवृत्, (आवृत्ति,) [आनुपूर्व्य शि. १३५] ।
* अनुक्रमणं इति अनुक्रमः

**अनुक्रोश**–पुं–३६९–દયા

Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

द्र० अनुकम्पा शब्दः ।

※ अनुक्रोशन्ति समदुःखा भवन्त्यनेन इति अनुक्रोशः ।

**अनुग**-न.-१४५७-પાછળ પછી

☐अनुपद, अन्वक्ष अन्वच् ।

*अनुगच्छत इति अनुगम् ।

**अनुग**-पुं.-४९६-સેવક

द्र० अनुगामिन्शब्दः ।

**(अनुगत)**-न.-२९२-મધ્યમ ગતિવાળું નૃત્યાદિ घन (मध्य) ।

**अनुगामिन्**-पुं.-४९६-સેવક

☐सहाय, अभिचर, अनुजीविन्, अनुचर, अनुप्लव, सेवक, [अनुग शि. ३८] ।

**अनुग्रह**-१५०८-મહેરબાની

☐अभ्युपपत्ति ।

※अनुग्रहणमिति अनुग्रहः ।

**अनुचर**-पुं.-४९६-સેવક

द्र० अनुगामिन्शब्दः ।

**अनुज**-पु-५५२

☐जघन्यज, यविष्ठ, कनिष्ठ, अवरज, यवीयस्, कनीयस्, (कन्यस शे. ११६)

※ अनु पश्चाज्जात इति अनुजः ।

**अनुजीविन्**-पुं.-४९६-સેવક

द्र० अनुगामिन्शब्दः

**अनुतर्ष**-पु.-९०६ (शि. ७९)-મદિરા પીવાનું પાત્ર

द्र० अनुतर्षणशब्दः ।

**अनुतर्षण**-न.-९०६-મદિરા પીવાનું પાત્ર

☐गल्वर्क, चषक, सरक, (अनुतर्ष शि.७९) ।

※अनुतृष्यन्त्यनेन इति अनुतर्षणं, पान पात्रं अनुतर्षोऽपि, **अमरस्तु**-"सरकानुतर्षशब्दौ सुरापरिवेषणपर्यायावाह ।

**अनुताप**-पुं-१३७८-પશ્ચાતાપ

☐विप्रतिसार, अनुशय, पश्चात्ताप, (विप्रतीसार शि. १२५)।

※अनुपश्चात् तपनमिति अनुतापः ।

**अनुत्तम**-न.-१४३९-મુખ્ય

द्र० अग्रशब्दः ।

☐नास्ति उत्तमोऽस्माद् इति अनुत्तमम् ।

**अनुत्तर** (ब. व.)-पुं-९४-પાંચ અનુત્તર દેવલોક

※ नविद्यते उत्तरो येभ्यस्ते अनुत्तराः, विजयवैजयन्तापराजितसर्वार्थसिद्धनामानः ।

**अनुत्तर**-न.-पुं.-ફાવે તેમ બોલનાર

☐यद्वद ।

※नास्त्युत्तरमस्येति अनुत्तरः ।

**अनुत्तर**-न.-१४३८-મુખ્ય, પ્રધાન

द्र० अग्रशब्दः ।

※नास्त्युत्तरमास्यादिति अनुत्तरम् ।

**अनुत्तरोपपातिकदशा** । (ब. व.)-स्त्री-२८८-નવમા અંગનું નામ

※ न विद्यते उत्तरः प्रधानोऽस्मात् इत्यनुत्तरः उपपतनं इति उपपातः जन्म अनुत्तरः प्रधानसंसारेऽन्यस्य तथाविधस्याभावात् उपपातोऽस्त्येषामित्यनुत्तरोपपातिकाः विजयाद्यनुत्तरविमानपञ्चक जन्मानो देवाः तद्वक्तव्यता प्रतिबद्धा दशा दशाऽध्ययनोपलक्षिता अनुत्तरोपपातिकदशाः ।

**अनुनय**-पुं-१५०३-નમસ્કાર, પ્રણામ

☐प्रगति, प्रणिपात ।

※अनुनयनं इति अनुनयः ।

**अनुपद**-नं. अ.-१४५७-પગલે-પગલે

द्र० अनुगशब्दः ।

※पदस्य क्रमस्य पश्चादनुपदं पश्चादर्थे अव्ययीभावः ।

**अनुपदिन्**-पुं-४९१-પાછળ જનાર

☐अन्वेष्टृ ।

※अनुपदं इति अनुपदी "अनुपद्यन्वेष्टा"—(७।१।१७०) इतीनि साधुः ।

**अनुपदीना**-स्त्री-९१५-મોજડી

※अनुपदं पदायामेनबद्धा इति अनुपदीना "अनुपदं"-(७।१।९६) इतीनः ।

**अनुप्लव**-पुं-४९६ સેવક

द्र० अनुगामिन् शब्दः ।

**अनुभव**-पु-१५२०-સાક્ષાત્કાર

☐उपलम्भ ।

※अनुभवनं इति अनुभवः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अनुभाव**–पुं–३२६–વિભાવનું કાર્ય

**अनुमति**–स्त्री–१५०–પૂર્ણચન્દ્ર ન હોય તે પુનમ
*अनुमन्यते इति अनुमतिः ।

**अनुयोग**–पुं–२६३–પ્રશ્ન
द्र० अनुयोजनशब्दः ।

**अनुयोगकृत्**–पुं–७८ વ્યાખ્યાકાર
□आचार्य ।
*अनुयोगं व्याख्यां करोति इति अनुयोगकृत् ।

**अनुयोजन**–नं.–२६३–પ્રશ્ન
□पृच्छा, (अनुयोग, पर्यनुयोग) कथंकथिकता ।
*अनुयुज्यते इति अनुयोजनम् ।

**अनुरति**–स्त्री–२९६–રાગ
□रति, राग, अनुराग ।
*अनुरमणं इति अनुरतिः ।

**अनुराग**–पुं.–२९६–રાગ
द्र० अनुरतिशब्दः ।
* अनुरञ्जनं इति अनुरागः ।

**अनुराधा**–स्त्री–११३–અનુરાધા નક્ષત્ર
□मैत्री, [अनुराधा शि. १०] ।
* अनुराध्नोतीति अनुराधा एकदेश विकृतत्वादनूराधेत्यपि ।

**अनुरोध**–पुं–७३३–ઈચ્છા પ્રમાણે વર્તવું
□अनुवृत्ति ।
*अनुरोधनमिति अनुरोधः ।

**अनुलाप**–पुं.–२७४–વારંવાર બોલવું.
□वत्सर, संवत्सर, परिवत्सर, उद्वत्सर, वर्ष, हायन, समा, शरत् [ऋतुवृत्ति, युगांशक, कालग्रन्थि, मासमल, संवत्, सर्वर्तु, शारद शे. २६, वत्स, इद्वत्सर, इडावत्सर, परवाणि शे. २७] ।

**अनुवृत्ति**–स्त्री–७३३–ઈચ્છા પ્રમાણે વર્તવું.
□अनुरोध ।
*अनुवर्तनं इति अनुवृत्तिः इच्छानुवर्तनमित्यर्थः ।

**अनुशय**–पुं.–१३७८–પશ્ચાત્તાપ
द्र० अनुताप शब्दः ।
*अनुशयनमिति अनुशयः ।

**अनुष्ण**–पुं–३८४–આળસુ
□आलस्य, शीतक, अलस, मन्द, तुन्दपरिमृज
*न उष्णः इति अनुष्णः ।

**अनुहार**–पुं–१४६३–ઉપમા, સમાનતા
द्र० अनुकारशब्दः ।
*अनुहरणं इति अनुहारः ।

**अनूचान**–पुं.–७८–આચારાંગ વગેરે પ્રવચન જાણનાર
□गणि ।
*अनुवाचेत्यनूचानः, "वेयिवदना"–(५।२।३) इति काने साधुः ।

**अनून**–न.–१४३३ (शि. १२८)–અખંડ
द्र०अखण्ड शब्दः ।

**अनूप**–पुं–९५३–બહુ પાણીવાળો દેશ
□अम्बुमत् ।
अनुगता आपोऽत्र इति अनूपः "ऋक्पू":—(७।३।७६) इत्यत् समा सान्तः "अनोर्देशे" (२।२।११०) ऊत्युपादेशः ।

**अनूराधा**–स्त्री–११३–शि. १० અનુરાધા નક્ષત્ર
□अनुराधा, मैत्री ।

**अनूरु**–पुं–२०२–સૂર્યના સારથિ
□सूरसूत, (रविसारथि), काश्यपि, विनतासूनु (वैनतेय), अरुण, गरुडाग्रज [वपुलस्कन्ध, महासारथि, आश्मन शे. ९१] ।
*न विद्यते अरु अस्य इति अनूरुः ।

**अनृजु**–पुं–३७६–શઠ, માયાવી
□शठ, निकृत, [शण्ठ शि. २५] ।
*न ऋजुः इति अनृजुः ।

**अनृत**–न.–२६५–અસત્ય
□अलीक,वितथ, (असत्य, सत्येतरत्, मृषा, मिथ्या) ।
*न ऋजुः इति अनृतम् यौगिकत्वात् असत्यम्, सत्येतरद् इत्यादि ।

**अनृत**–न.–८६६–ખેતી
□कृषि [प्रमृत शि.७६]
*न ऋतं इति अनृतम्, पापिष्ठत्वात् प्रमृतमित्यन्ये ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अनेकजातिवैचित्र्य**–ન.- ७०–ભગવાનની વાણીનો ૩૦ મો ગુણ

*अनेकजाति वैचित्र्यं जातयो वर्णनीयवस्तु–स्वरुपवर्णनानि तत्संश्रयाद्विचित्रत्वम् ।

**अनेकप**–पुं–१२१७–હાથી

□हस्तिन्, मतजङ्ग, गज, द्विप, करिन्, मातङ्ग-वारण, महामृग, सामयोनि, स्तम्बेरम, द्विरद, सिन्धुर, नाग, दन्तिन्, दन्तावल, करटिन्, कुञ्जर, कुम्भिन्, पील, इभ, करेणु गर्ज, [पेचकिन्, पुष्करिन् पद्मिन्, पेचिल, सूचिकाधर, शे. १७५, विलोम-जिह्व, अन्तःस्वेद, महाकाय, महामद, सूर्पकर्ण, जलाकाङ्क्ष, जटिन्, षष्टिहायन, शे. १७६ असुर, दीर्घ-पवन, शुण्डाल, कपि शे. १७७, करि शि. १०९] ।

*न एकेन पीबति इति अनेकपः ।

**अनेकलोचन**–पुं–२०० (शे. ४३)–મહાદેવ

द्र० अदहासिन्शब्दः ।

**अनेकान्तवादिन्**–पुं–२५–અરિહંત

द्र० अधीश्वरशब्दः ।

**अनेकान्तवादिन्**–पुं–८६१–(शि.७६) સ્યાદ્વાદ-વાદી, જૈન

द्र० आर्हतशब्दः ।

**अनेड**–पुं-३५३–(शे.९३) મૂર્ખ

द्र० अज्ञशब्दः ।

**अनेडमूक**–पुं-३४८ (शि.२२) શઠ, જડ, આંધળો

**अनेडमूक**–पुं-४५७ (शे.१०६) આંધળો

द्र० अन्धशब्दः ।

**अनेडमूक**-पुं–३४८ મુંગો

□एडमूक, अवाक्श्रुति, (कलमूक) ।

* अनेडोऽपि मूकः इति अनेडमूकः "अन्धो ह्यनेडमूकः स्यात्" इति **हलायुधः** "अनेडमूकस्तु जडः इति **वैजयन्ती**, "शठो ह्यनेड मूकः स्यात्" इति भागुरिः, तदयमनेकार्थो द्रष्टव्यः ।

**अनेहस्**–पुं–१२६–સમય

□काल, समय, दिष्ट, सर्वमूषक ।

*न ईहते चेष्टते अनेनाग्रात इत्यनेहाः पुंलिङ्गः "नञ्ञ् ईहे"–(उणा–९७५) इत्यस्, न ईहत इति वा ।

**अनोकह**–पुं–१११४ વૃક્ષ

द्र० अंह्रिपशब्दः ।

अनित्यम्भोमिः इति अनोकहः, "अनेरोकह" (उणा–५९५) अनसः शकटस्य अकं गतिं हन्तीति निर्वचनाद्वा ।

**अन्त**–पु.–९६२–મર્યાદા, સીમા

□आघाट, घट, अवधि, अवसान, सीमा, मर्यादा, सीमन् ।

*अमत्यनेनेति अन्तः ।

**अन्त**-पुं–१३७४–નિર્ણય

□निर्णय, निश्चय ।

*अमति सन्देहाभावमिति अन्तः ।

**अन्त**–पुं–१४५९-છેલ્લું

□अन्तिम, जघन्य, अन्त्य, चरम, पाश्चात्य, पश्चिम ।

*अमतीति अन्तः, "दम्यमि"(उणा०–२००) इति तः धर्मिवृत्तित्वेप्ययमस्त्रीलिङ्गः यथा–कुलस्यान्तः प्रभुस्त्रियः इति ।

**अन्तःकरण**–न.–१३६९–મન

□मानस, मनस्, हृद्, चेतस्, हृदय, चित्त, स्वान्त, गूढपथ, उच्चल, [अनिन्द्रिय शि १२४] ।

*अन्तर्गतं करणं करणानामन्तर्गतं वा इति अन्तःकरणम्, "आत्मा मनश्च तद्विदैरन्तःकरणमुच्यते" इति **कामान्दकिः** मनो-बुद्धिरहंकार इत्यन्तः करणं त्रिधेत्यन्ये ।

**अन्तःपुर**–न.–७२७–રાજાનું અંતઃપુર

□शुद्धान्त, अवरोध, अवरोधन ।

*अन्तर्गतं पुरस्य गृहस्येति अन्तपुरम्, अयं कपुरुषपरिगृहीते स्त्रीसमुदाये वर्तते तन्निवासे तूपचारात् ।

**अन्तःपुराध्यक्ष**–पु-७ ६-અંતઃપુરનો અધિકારી

□अन्तर्वेशिक, अवरोधिक,(आवरोधिक), [शुद्धान्ताध्यक्ष, आन्तर्वेश्मिक, आन्तःपुरिक शि. ६३] ।

*अन्तःपुरेष्वधिकृतोऽन्तःपुराध्यक्ष ।

**अन्तःस्वेद**–पुं.–१२१८ (शे. १७६) હાથી

द्र. अनेकपशब्दः ।

**अन्तक**–पुं.–१८४–યમરાજ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

☐यम, कृतान्त, पितृपति, दक्षिणाशापति प्रेतपति, दण्डधर, अर्कसूनु, कीनाश, मृत्यु, समवर्तिन् काल, शीर्णाङ्घ्रि, (शीर्णाङ्घ्रि), हरि, धर्मराज, यमराज, (यमराज), श्राद्धदेव, शमन, महिषध्वज, कालिन्दीसोदर, [यमुनाग्रज शे ३६ महासत्व, पुराणान्त, कालकूट शे. ३७] ।

*अन्तयतीति अन्तकः ।

**(अन्तकारिन्)**-पुं. (१० परि.)-વધ્યવધ્યક ભાવ સંબંધમાં વધ્યથી જોડવા યોગ્ય શબ્દ

☐भिद्, द्विषिन्, जिद्, घातिन्, द्रुह, अरि, ध्वंसिन्, शासन, दमन, दर्पच्छिद्, मथन ।

**अन्तकृद्दशा**-(બ.વ.)-स्त्री-२४४-આઠમું અંગ

* अन्तो विनाशः स च कर्मणः, तत्फलभूतस्य वा संसारस्य, तं कुर्वन्ति ये तीर्थकरादयस्तेऽन्तकृतः तेषां दशाः प्रथमवर्गे दशाऽध्ययनानि इति तत्संख्यया अन्तकृद्दशा ।

**अन्तर**-अ.-१५३८-વચમાં

☐अन्तरेण, अन्तरे, अन्तरा ।

*अमतीत्यन्तः, 'पूसनि'-(उणा-९४७) इत्यर अन्तादेशश्च, यथा-गृहस्यान्तर्विगाहते"

**अन्तर**-न.-१३६४-છિદ્ર, બિલ

☐रन्ध्र बिल, निर्व्यथन, कुहर शुषिर, 'सुषिर' शुषि, 'सुषि' छिद्र, रोप, विवर, निम्न रोक, वपा 'श्वभ्र' ।

*अनित्यनेनेति अन्तरम् ।

**अन्तर**-पुं. न.-१४६०-અવકાશ

☐मध्य ।

अनितीत्यन्तरम् पुंक्लीबलिङ्गः, "अनिकाभ्यांतरः (उणा-४३७) ।

**अन्तर**-न.-१५०९-સમય, પ્રસંગ

☐समय, क्षण, वेला, वार, अवसर, प्रस्ताव, प्रक्रम ।

अनितीति अन्तरम अन्तरातीति वा

*अन्तरमस्त्यत्रेति वा ।

**अन्तरा**-अ.-१५३८-મધ્યે વચમાં,

द्र. अन्तरशब्दः ।

अन्तो रातीति अन्तरा 'डित्" उणा-६७५) इत्याः **यथा** "अन्तरा निषधं नीलं च विदेहाः" इति ।

**अन्तरादण्ड** (બ.વ.)-पुं. ८७८-વહાણના વચલા દાંડા

☐पोलिन्द ।

*नौकाया मध्ये दण्डा इति अन्तरादण्डाः ।

**अन्तराय**-पुं.-१५०९ વિઘ્ન

☐विघ्न, प्रत्यूह, व्यवाय ।

*अन्तरा अयनं कार्यव्यवधानमिति अन्तराय. ।

**अन्तराल** न. १४६० વચ્ચે

☐अभ्यन्तर, विचाल

*अन्तरमलत्यालाति वेति अन्तरालम् ।

**अन्तरिक्ष**-न.-१६३-આકાશ

द्र. अनन्तशब्दः ।

अन्तर्मध्ये ऋक्षाण्यस्य द्यावापृथिव्योरन्तरीक्षते वा अन्तरिक्षं पृषोदरादित्वादन्तरीक्षमित्यपि ।

**अन्तरीक्ष**-न.-१६३ (शि. १२)-આકાશ

☐अनन्तशब्दः ।

**अन्तरीप**-न.-१०७८-द्वीप, બેટ

☐द्वीप ।

*अन्तर्गता आपोऽस्मिन् इति अन्तरीपम् ।

**अन्तरीय**-न.-६७३-નીચે પહેરવાનું વસ્ત્ર

द्र. अधोंऽशुकशब्दः ।

*अन्तरे कायस्यभवमित्यन्तरीयं, गहादित्वादीयः ।

**अन्तरे**-अ.-१५३८-વચમાં

द्र० अन्तरशब्दः ।

*अन्तरे सप्तम्यन्तप्रतिरुपकम् ,**यथा**-"आवयोरन्तरे जाता पर्वताः सरितो द्रुमा" ।

**अन्तरेण**-अ.-१५२७-વિના સિવાય

☐ऋते, हिरु, नानाकू, पृथक्, विना ।

अन्तरेणेति तृतीयान्त प्रतिरुपकमव्ययम्, यथा-'त्वामन्तरेण नहि संप्रति कश्चिदीशः"

**अन्तरेण**-अ.-१५३८-વચમાં

द्र. अन्तरशब्दः ।

*अन्तरेणेति विभक्त्यन्तप्रतिरुपकम् ; **यथा**—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"अन्तरेण गन्धमादनं माल्यवन्तं चोत्तराः कुरवः" ।

**अन्तर्गत**–न.–१४९५ ભૂલી જવાયેલું

☐विस्मृत, [प्रस्मृत शि.१३५] ।

*अन्तर्गच्छति स्मेति अन्तर्गतम् ।

**अन्तर्गडु**-पुं.–१५१६–નકામું

☐निरर्थक ।

*अन्तर्गडत्यन्तर्गडु "भृमृत्–" (उणा–७१६) इत्युः ।

**अन्तर्द्धा**–स्त्री-१४७७-ढांकण

अन्तर्द्धि, अपवारण, छदन, व्यवधा, पिधान स्थगन, व्यवधान, तिरोधान ।

*अन्तर्द्धानमन्तर्द्धा "मृगयेच्छा"–(५।३।१०१) इत्यङ् ।

**अन्तर्द्धि**–पुं.–१४७७–ढांकण

द्र० अन्तर्द्धाशब्दः ।

*अन्तर्द्धानमन्तर्द्धि पुंलिङ्गः "अन्तर्द्धि" (५।३।८९) इति कौ साधुः ।

**अन्तर्द्वार**–न.–१००७–ગુપ્ત દરવાજો

☐प्रच्छन्न ।

गृहस्य मध्यद्वारम् एकमेतदिति. कात्यो यदाह– "प्रच्छन्नमन्तर्द्वारं यत् पक्षद्वारं तदुच्यते" ।

**अन्तर्मनस्**-पुं-४३५–દુષ્ટ ચિત્તવાળો

☐विचेतस्, दुर्मनस्, विमनस् ।

*अन्तर्लीनं मनोऽस्येति अन्तर्मनाः ।

**अन्तर्वत्नी**–स्त्री–५३८–ગર્ભવતી સ્ત્રી

☐गुर्विणी, गर्भवती, उदरिणी, आपन्नसत्वा, गुर्वी ।

*अन्तर्विद्यतेऽस्यामन्तर्वत्नी, 'पतिवत्न्यन्तर्वत्न्यौ' (२।४।५३) इतिङ्या साधुः ।

**अन्तर्वंशिक**–पुं.–७२६–અંતઃપુરનો અધિકારી

☐द्र. अन्तःपुराध्यक्षशब्दः ।

*वंशस्यान्तर्वंश कुलस्त्रियः ताः सन्त्यस्यामन्तर्वंशिकः, आन्तर्वेश्मिकोऽपि ।

**अन्तर्वाणि**–पुं.–३४५–ન બોલી શકે એવો

☐शास्त्रविद् ।

*अन्तर्हृदयमध्ये न तु मुखे वाणिर्वागस्येति अन्तर्वाणिः ।

**अन्तर्वेदि**–स्त्री–९४९–ગંગા જમનાનો વચલો પ્રદેશ

*समस्थली ।

गंगा यमुनयोश्च नद्योर्मध्यभूमिरन्तर्मध्येवेदिरिवान्तर्वेदिः ।

**अन्तर्विगाहन**–न.–१५००–અંદર જવું

☐प्रवेश ।

*पदार्थानामन्तमध्यस्य विगाहनमिति अन्तर्विगाहनम् ।

**अन्तर्हित**–न.–१४७७-ढांकायेलुं

☐संवीत, रुद्ध, आवृत संवृत, पिहित, छन्न, स्थगित, अपवारित, तिरोहित, [छादित अपिहित शि. १३२] ।

*अन्तर्धत्ते स्मेति अन्तर्हितम् ।

**अन्तावसायिन्**–पुं–९२३–હજામ

☐नापित, चण्डिल, क्षुरिन्, क्षुरमर्दिन्, दिवाकीर्ति, मुण्डक, [ग्रामणी, भण्डिवाह, क्षौरिक, भाण्डिक शे. १५६] ।

*अन्तमवस्यतीति अन्तावसायी ।

**अन्तावसायिन्**–पुं–१३३–ચંડાલ

☐चण्डाल, अन्तेवासिन्, श्वपच, बुक्कस, (पुष्कस), निषाद, प्लव, मातङ्ग, दिवाकीर्ति, जनङ्गम, [चाण्डाल, पुक्कस शि. ८२] ।

*अन्तमवस्यतीति अन्तावसायी ।

**अन्तिक**–नं–१४५०- નજીક

*पार्श्व, समीप, सविध, ससीम, अभ्याश, 'अभ्यास', सवेश, सन्निकर्ष, सदेश, अभ्यग्र, सनीड, सन्निधान, उपान्त, निकट, उपकण्ठ, सन्निकृष्ट, समर्याद, अभ्यर्ण, आसन्न, सन्निधि, अभितस् ।

*अन्तोऽस्त्य स्येति अन्तिकम् ।

**अन्तिक**–पुं–७५ (शे. २) મોક્ષ

द्र० अक्षर शब्दः ।

**अन्तिकतम**–न–१४५२–અત્યંત નજીક

☐नेदिष्ठ [नेदियस् शि. १३०] ।

*अतिशयेनान्तिकं अन्तिकतमम्, "प्रकृष्टे–" (७।३।५) इति तम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अन्तिका**-स्त्री-१०१८-चूलो

द्र० अधिश्रयणीशब्दः ।

*अन्तोऽस्त्य स्यामन्तिका, "अन्त्यधिश्रयणी भवेत्" इति तु माला ।

**अन्तिकाश्रय**-पुं-१००२ पाडोशीनुं

☐ उपघ्न ।

*अन्तिक आसन्ने आश्रयोऽन्तिकाश्रयः ।

**अन्तिम**-न-१४५९ छेल्लुं

द्र० अन्तशब्दः ।

*अन्ते जातमन्तिमम्, "पश्चादाद्यन्त-" (६।३ ७५) इतीमः ।

**अन्ती**-स्त्री-१०१८ शि. ८९-चुलो

द्र० अधिश्रयणी शब्दः ।

**अन्तेवासिन**-पुं-७९-शिष्य

☐शिष्य, विनेय, [छात्र, शे. २, अन्तेषद् शि. ६ ]।

*गुरोरन्ते वसत्यवश्यं इति अन्तेवासी, "शयवासि" -(३।२।२५) इति सप्तम्या अलुप् ।

**अन्तेवासिन्**-पुं-९३३-चंडाल

द्र० अन्तावसायिन्शब्दः ।

*अन्ते दुरे वसतीति अन्तेवासी, "शयवासि" (३।२।२५) इति सप्तम्या अलुप् ।

**अन्तेषद्**-पुं-७९ (शि.६)-शिष्य

द्र०अन्तेवासिन्शब्दः ।

**अन्त्य**-नं-८७४-दश समुद्र प्रमाण

*दश वार्द्धयोऽन्त्यम् ।

**अन्त्य**-न.-१४५९-छेल्लुं

द्र० अन्तशब्दः ।

* अन्तेभवमन्त्यम् ।

**अन्त्यवर्ण**-पु-८९४-शुद्र

☐शूद्र, वृषल, पद्य, पज्ज, जघन्यज, ।

*अन्त्यश्चासौ वर्णश्चान्त्यवर्णः ।

**अन्त्र**-न.-६०५-आंतरडुं

☐पुरीतत् ।

*अमत्यनेनान्त्रं "हुयामा-" (उणा-४५१) इति त्रः ।

**अन्दुक**--१२२९-हाथीना पगमां बांधवानी सांकळ

☐शृङ्खल, निगड, हिञ्जीर, पादपाश, [निगल अन्दू शि. ११०] ।

*अन्दति बध्नातीति अन्दूः, "कृषिचमि-" (उणा ८२९) इत्यूः, स्वार्थे केऽन्दूक, 'ङ्या दीदूतः के" (२।४।१०४) " इति ह्रस्व ।

**अन्दू**-स्त्री-१२२९ (शि. ११०)-हाथीना पगमां बांधवानी सांकळ

द्र० अन्दुकशब्दः ।

**अन्दोलन**-न. १४८१ (शि. १३३) हींचको

द्र० दोला शब्दः ।

**अन्ध**-पुं-४५७-आंधळो

☐गताक्ष, (चक्षुर्विकल) [अनेडमूक शे. १०६]

*अमति गच्छति अनेनेति अन्ध, "स्कन्धमि-भ्याम्" (उणा-२५१) इति धः, "अन्धण् दृष्ट्युपसंहारे" इत्यस्य वा ।

**अन्ध**-न.-१०७० शे. १६६-मेलुं पाणी

द्र० अपूशब्दः ।

**अन्ध**-न.-१०७० (शि. ९५) पाणी

द्र० अपूशब्दः ।

**अन्धकार**-पुं न.-१४६-अंधारुं

☐तमिस्र, तिमिर (पुन) तमस्, ध्वान्त, भूच्छाया, (भूच्छाया), सन्तमस, अवतमस, अन्धतमस, [वृत्र, रजोबल, शे २०, रात्रिराग, नीलपङ्क, दिनाण्ड, दिनकेसर, खपराग, निशावर्म, वियद्भूति, दिगम्बर शे. २१, अन्धातमस शि. १२] ।

* अन्ध करोतीति अन्धकारम्, पुक्लीबलिङ्गः ।

**(अन्धकारि)**-पुं-२००-महादेव

द्र०अट्टहासिन् शब्दः ।

**अन्धकासुहृद्**-पुं-२००-

द्र० अट्टहासिन्शब्दः

*अन्धकस्यासुहृदिति अन्धकासुहृदत अन्धको हि समरे शूलेन शूलिना प्रोतः ।

**अन्धतमस**-न-१४६-अंधारुं

द्र० अन्धकारशब्दः ।

*अन्धयतीति अन्धं तच्च तत्तमश्च अन्धतमसम्, "समवान्धात्तमसः" (७।३।८०) इत्यत्

बाहुलकाद्दीर्घत्वे अन्धतमसमित्यपि अमरस्तु "ध्वान्ते गाढेऽन्धतमसम् क्षीणेऽवतमसं तमः विष्वक् संतमसमिति विशेष माह ।

**अन्धस्**-न-३९५-भोजन

☐भक्त, अन्न, कूर, भिस्सा, दीदिवि, ओदन, अशनजीवनक, याज, वाज, प्रसादन ।

*अद्यते इति अन्धः, "अदेरन्ध च वा" (उणा-९६३) इत्यस् ।

**(अन्धस्)**-पुं-७-परि.-भोजय शब्दथी जोवा योग्य शब्द

**अन्धातमस**-न.-१४५ (शि.१२)-अंधारुं

द्र० अन्धकारशब्दः ।

**अन्धु**-पुं-१०९१-कुवो

☐कूप, उदपान, प्रहि, ।

*अन्धयतीति अन्धुः "भृमृतृ-" (उणा-७१६) इत्युः ।

**अन्न**-नं-३९५-भोजन

द्र० अन्धस्शब्दः ।

*अनित्यनेनेति अन्नं, "प्याधापन्यनि-" (उणा २५८) इति नः, अद्यते वा ।

**अन्नकोष्टक**-पुं-१०९२-अन्नने। कोठार

☐कुसूल, [कुशूल शि.८] ।

कृष्णातीति कोष्टः, "कृषेर्वा" (उणा-१६४) इति टः अन्नस्य कोष्टोऽन्नकोष्टकः ।

**अन्यद्**-नं-१४६८-भिन्न

☐अन्यतरत्, भिन्नत्वम, 'त्वे, एक, इतरत्, 'अन्यतर, एकतर' ।

*अनितीत्यन्यद्, 'स्थाछामा-" (उणा-३५७) इति यः ।

**अन्यतरद्**-न.१४६८-भिन्न

द्र०अन्यत्शब्दः ।

*बहूनां मध्येऽन्यदन्यतरद् "बहूनां प्रश्ने ऽतमश्चवा ।(७।३।५४)। इति उतरः ।

**'अन्यतरद्युस्'**-अ. १५४२-अेमांथी अेक दिवस

**अन्यथा**-अ. १५४२ (शे. २ ५)-बीजी रीते

☐इतरथा ।

**अन्यदा**-अ.-१५४२ (शे. २०४)-बीजी वखते

☐एकदा ।

**अन्यभृत**-पुं-१३२२-कागडो

☐काक, अरिष्ट, सकृत्प्रज, आत्मघोष, चिरजीविन्, घूकारि, करट, द्विक, एकदृश, बलिभुज्, ध्वाङ्क्ष, मौकुलि, वायस, 'परभृत,' [बीलपुष्ट शि.११८] ।

*अन्यान् पिकान् बिभर्ति पुष्णातीति अन्यभृत् ।

**अन्यभृत**-पुं-१३२१ (शि. ११७)-कोयल

द्र०कल कण्ठशब्दः ।

**अन्यशाखक**-पुं-८५७-पोतानी वेदशाखाना कर्म छोडनार

☐शाखारण्ड ।

* अन्याः शाखाऽस्येति अन्यशाखकः ।

**अन्युन**-न-१४३३-समस्त, बधुं

द्र०अखण्डशब्दः ।

*नास्ति न्यूनमस्येति अन्यूनं, अनूनमपि ।

**'अन्येद्युस्'**-अ.-१५४२-बीजा दिवसे

**अन्योन्य**-न-१४९९-परस्पर

☐परस्पर, इतरेतर, (मिथः) ।

**अन्योन्योक्ति**-स्त्री-२७५-परस्पर न्यायपूर्वक वात करवी ते.

☐संलाप, संकथा ।

*अन्योऽन्येन उक्तिर्भाषणं इति अन्योऽन्योक्तिः ।

**अन्वक्ष**-न.-१४५७-पाछळ

द्र. अनुगशब्दः ।

*अक्षस्य रथस्य पश्चादन्वक्षम् ।

**अन्वच**-१४५७-पाछळ

☐द्र. अनुगशब्दः ।

*अन्वञ्चत्यन्वक् ।

**अन्वय**-पुं-५०३-कुळ, वंश

☐गोत्र, सन्तान, अन्ववाय, अभिजन, कुल, जनन, वंश, [संतति शि. ३९] ।

*अन्वीयते इति अन्वयः ।

**अन्ववाय**-पुं-५०३-कुळ, वंश

☐द्र. अन्वयशब्दः ।

*अन्ववैतीति अन्ववायः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अन्विष्ट**–न.–१४९१–शोधेलुं

☐मृगित, मार्गित, अन्वेषित, गवेषित ।

*'ईषत् इच्छायाम्' अन्विष्यते इति अन्विष्टम् ।

**अन्वेषित**–न.–१४९२–शोधेलुं

द्र. अन्विष्टशब्दः ।

"एषृङ् गतौ" अन्वेष्यते इति अन्वेषितम् ।

**अन्वेष्टृ**–पुं–४९१–पाछळ जनार

☐अनुपदिन्

**अप्** (ब. व.)–स्त्री–१०६९–पाणी

☐नीर, नार, वारि, वार, जल, दक, क, उदक, पानीय, अम्भस्, कुश, तोय, जीवन, जीवनीय, सलिल, अर्णस्, अम्बु, वार, संवर, शम्बर, शंवर,' क्षीर, पुष्कर, मेघपुष्प, कमल, पयस्, पाथस्, कीलाल, भुवन, वन, घनरस, यादोनिवास, अमृत, कुलीनस, कबन्ध, 'कमन्ध', प्राणद, सर्वतोमुख, [दिव्य, इरा, सेव्य, कृपीट, घृत, अङ्कुर, शे. १६४, विष, पिप्पल, पाताल, नलिन, कम्बल, पावन, षडस, पल्लूर शे. १६५] ।

*आप्यन्ते सुखादिति आपः, स्त्रियां बहुवचनान्तः "आपः क्विप् ह्रस्वश्च" (उणा–९३१) इति साधुः ।

**अपकृष्ट**–न.–१४४२–अधम

द्र. अणकशब्दः ।

*अपकृष्यते इति अपकृष्टम् ।

**अपक्रम**–पुं–८०३–पलायन थवुं, भागी जवुं

☐पलायन, अपयान, सन्द्राव, द्रव, विद्रव, संद्राव, उद्द्राव, प्रदाव, [निशान, शि. ७०] ।

* अपावृत्य क्रमणमिति अपक्रमः ।

**अपक्रिया**–स्त्री–१५१५–अपकार

☐द्रोह ।

* अपकारोऽपक्रिया ।

**अपघन**–पुं–५६६–शरीरना अवयव

☐प्रतीक, अङ्ग, अवयव, [गात्र शे. ११८] ।

*अपहन्यतेऽनेनेत्यपघनः, "निघोद्घ–" (।५।३।३६।) इत्यलि निपात्यते ।

**अपचय**–पुं–१५२४–हानि, अपहरण

☐अपहार, (हानि) ।

*अपचयनमित्यपचयः हानिरित्यर्थः, उपसर्गवैचित्र्यादर्थभेदः ।

**अपचायित** पुं–४४७–(शि. ३२) पूजायेलो

द्र. अञ्चितशब्दः ।

**अपचित**–पुं–४४७–पूजायेलो

द्र. अञ्चितशब्दः ।

*अपचाय्यतेऽपचितः, "अपचितः" (।४।४।७७।) इति क्ते निपात्यते, अपचायितोऽपि ।

**अपचिति**–स्त्री–४४७–पूजा

द्र. अर्चाशब्दः ।

**अपटान्तर**–न.–१४५१–संलग्न

द्र. अनन्तरशब्दः ।

*नास्ति पटेन तिरस्करिण्या अन्तरं व्यवधानमस्येति अपतन्तरम् ।

**अपटी**–स्त्री.–६८०–पडदो, कनात

काण्डपट, प्रतिसीरा, जवनी, तिरस्करिणी, (यमनी शि. ५६) ।

*प्रावरितुमयोग्यत्वाद् न पटीति अपटी ।

**अपटु**–पुं–४५९–रोगी

☐आमयाविन्, ग्लान, ग्लास्नु, विकृत, आतुर व्यधित, अभ्यमिति, अभ्यान्त, (रोगित) ।

*न पटुरिति अपटुः

**अपतर्पण**–न.–४७३–लांघणुं

☐लङ्घन ।

*अपतृप्यते इति अपतर्पणम् ।

**अपत्य**–नं–५४२–संतति

☐तोक, प्रसूति, तुक, प्रजा, (सन्तान, सन्तति शे. ११५) ।

*न पतन्ति येन जातेन पूर्वजास्तदपत्यं "नञो हलिपतेः" (उणा–६५७) इति यः ।

**अपत्यपथ**–पुं–६०९–स्त्रीनुं चिन्ह

☐वराङ्ग, च्युति, बुलि, भग, योनि, स्मरमन्दिर, स्मरकूपिका, स्त्रीचिह्न ।

*अपत्यस्य निस्सरणे पन्था इति अपत्यपथः ।

**अपत्रपा**–स्त्री–३११–बीजाथी थती शरम

*अपरस्माद् लज्जावहे जातेऽपत्रपा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अपत्रपिष्णु** पुं-३९०--શરમાળ

□लज्जाशील, (लज्जालु) ।

*अपत्रपते इति अपत्रपिष्णुः

**अपथ**-न.९८४-ઉન્માર્ગ

□अपथिन् ।

*नञा निर्दिष्टस्य अनित्यत्वात् समासान्ते सति अपथम्, "पथ सङ्ख्याऽव्ययोत्तरः" (हैमलिङ्गानु. नपुं. श्लो. ८) इति क्लीबत्वम्, पथोऽभाव इति अव्ययीभावो वा ।

**अपथिन्**-पुं-९८४-ઉન્માર્ગ

□अपथ ।

*न पन्थाः अपन्थाः "नञ्तत्पुरुषात्" (७।३।७१) इति समासान्तनिषेधः

**'अपदांतर'**-नं-१४५१-સંલગ્ન

द्र. अनन्तरशब्दः

**अपदिश**-न.-१६७-દિશાના ખૂણા

विदिश्, प्रदिश् ।

*दिशोर्दिशमपदिशम्, विभक्त्यर्थेऽव्ययीभावे "शरदादे" (७।३।९२) इत्यत् समासान्तः

**अपध्वस्त**-पुं-४४०-ધિક્કારાયેલ

□न्यक्कृत, धिक्कृत

*अपध्वस्यते स्मेति अपध्वस्त

**(अपभ्रंश)**-पुं-२८५-ભાષા વિશેષ

**अपयान**-न.-८०२-પલાયન થવું

द्र० अपक्रम शब्द : ।

*अपसृत्य यापते इति अपयानम् ।

**अपररात्र**-पुं-१४५-રાત્રિનો અંતિમ ભાગ

□उच्चन्द्र

*रात्रेरपरो भागः इत्यपररात्रः ।

**अपरा**-स्त्री. १६७-પશ્ચિમદિશા

□प्रतीची, पश्चिमा, [पूर्वेतरा शे. ३०] ।

*न पृणाति रविश्चिरमेताऽपरा । शेषश्चात्र–"यथाऽपरेतरा पूर्वाऽपरापूर्वेतरा तथा ॥" इति ।

**अपरा**-स्त्री न.-१२२८ હાથીનો પાછળનો ભાગ

□'अवर', [अवरा शि. ११०] ।

गजस्य पश्चाद्भागः

अपरभागभवत्वादपरा, स्त्री क्लिब लिङ्गः जघावित्वाद् वत्वेऽवराऽपि' ।

**अपराजित**-पुं-२०० (शे. ४२) શંકર

□द्र० अट्टहासिन् शब्दः ।

**अपराजित**-पुं-२१९ (शे. ६७) વિષ્ણુ

□द्र० अच्युतशब्दः ।

**(अपराजित)**पुं-९४-टी.-ચોથા અનુત્તર વિમાનનું નામ

□**अपराजिता**-स्त्री-११५६-ગરણી

गिरिकर्णी, [अप्रतिहता, आस्फोटा, आस्फोता, विष्णुक्रान्ता

*न पराजीयते रक्षाहेतुत्वादपराजिता अप्रतिहतेत्यर्थः ।

**अपराद्धेषु** पुं.-७५२-નિશાન ચૂકેલો

□(भ्रष्टबाण)

*अपराध्दा अलब्धलक्षा इषवो बाणा अस्य अपराद्धेषुः ।

**अपराध**-पुं-७४४-અપરાધ, ગુનો

□मन्तु, व्यलीक, । विप्रिय, आगस् ।

*अपराधनमिति अपराधः ।

**अपर्णा** स्त्री-२०३ -પાર્વતી

□द्र० अद्रिजाशब्दः ।

*न विद्यते पर्णान्यस्या अपर्णा, तपसि पर्णा नामप्यनशनात् ।

**अपरेतरा**-स्त्री-१६७ (शे. ३०) પૂર્વદિશા

□पूर्वा, प्राची ।

**'अपरेद्युस्'**-અ-१५४२-બીજા દિવસે

**अपलाप**-पुं-२७६-છુપાવવાનું વચન

□निह्नव ।

*अपलपनमिति अपलापः ।

**अपलासिका**-स्त्री-३९३-તરસ

□तृष्णा, तर्ष, पिपासा, तृट्, तृषा, उदन्या, धीति, पान ।

अपकृष्टं लसत्यनया इति अपलासिका "नाम्नि पुंसि च" (५।३।१२१) इति णकः ।

**अपवरक**-पुं.-९९५शयनगृह

□ गर्भागार, वासौकस, शयनास्पद ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*अपवृणोति आच्छादयतीति अपवरकः, (दृकृनृ उणा–२७) इत्यकः ।

**अपवर्ग**–पुं–७५–મોક્ષ

द्र० अक्षर शब्दः ।

कर्मभिरपवृज्यतेऽत्रेति अपवर्गः ।

**अपवन**–न–११११–બગીચો

☐उपवन, वेल, आराम ।

अपावृत्तं वनमपवनम्

**अपवर्जन**–न–३८७–દાન

द्र० अंहतिशब्दः ।

*अपवृज्यते इति अपवर्जनम् ।

**अपवाद**–पुं–२७१–નિંદા

☐अवर्ण, उपक्रोश, निर्वाद, परिवाद, गर्हणा, (गर्हा) धिक्क्रिया, निन्दा, कुत्सा, क्षेप, जुगुप्सन, जुगुप्सा, (गर्हा, जुगुप्सा शि.१७] ।

अपादुपसर्गात् परो वादः इति अपवादः ।

**अपवारण**–न–१४७७–ઢાંકવું

द्र० अन्तर्द्धाशब्दः ।

*अपवार्यते इति अपवारणम् ।

**अपवारित**–न–१४७६–ઢાંકેલું

द्र० अन्तर्हितशब्दः ।

अपवार्यते इति अपवारितम् ।

**अपविद्ध**–न.–१४७४–નિરાકરણ કરેલું

प्रत्याख्यात, निराकृत, प्रत्यादिष्ट, प्रतिक्षिप्त, निरस्त ।

*अपविध्यते स्मेति अपविध्धम् ।

**अपशद**–न.–१४४३–અધમ

द्र० अणकशब्दः ।

*अपशीयते इति अपशीदम् ।

**अपष्ठ**–न–१२३१–અંકુશનો આગળનો ભાગ

*अपकृष्टं तिष्ठत्यपष्टं "गोऽम्बाऽम्ब–"(२।३।३०) इति षत्वम् ।

**अपष्टु**–न–१४६५–વિપરીત

☐प्रतिकूल, विलोम, अपसव्य, अपष्टुर, वाम, प्रसव्य, प्रतीप, प्रतिलोभ ।

*अपावृत्य तिष्ठतीत्यपष्टु, "दुःस्वपवनिभ्यः स्थः (उणा–७२२) इति किदुः, भीरुष्ठानादित्वात् षत्वम् ।

**अपष्टुर**–न.–१४६५–વિપરીત

द्र०अपष्टुशब्दः

अपावृत्य तिष्ठतीति अपष्टुरम्, "श्वसुर–" (उणा–४२६) इत्युरे निपात्यते, अपष्टुत्वं इति वा ।

**अपसव्य**–न विपरीत

द्र० अपष्टुशब्दः ।

अपगतं सव्यादपसव्यं, वाममित्यर्थः सव्यशब्दो हि दूरान्तिकार्थाऽऽराच्छब्दवत् वामदक्षिणार्थः ।

,, न–१४६६–જમણું અંગ

☐दक्षिण ।

*अपक्रान्तं सव्यादित्यपसव्यम् ।

**अपस्कर**–(अ. व.)–पुं–७५८–રથ સિવાયના રથના અંગો

☐रथाङ्ग ।

*अपकुर्वन्त्यपकीर्यन्ते वा अपस्कराः, वर्चस्कादित्वात् साधुः ।

**अपस्नान**–न.–३७५–મરેલાનું સ્નાન

☐मृतस्नान ।

*अपकृष्टं स्नानमित्यपस्नानम् ।

**अपस्मार**–पुं–३२१–ધાતુઓના વૈષમ્યથી થતો આવેશ

☐आवेश ।

*अपस्मरणमिति अपस्मारः, धातु वैषम्यादेरावेशः ।

**अपहार**–पुं–१५२४–વ્યય, નાશ

☐अपचय, (हानि) ।

*अपहरणमिति अपहारः ।

**अपहास**–पुं–२९८–કારણ વિના હસવું તે

*अपकृष्टं हसितमिति अपहासः । [कारणं विनाकृते हासः] ।

**(अपांनाथ)**–पुं–१८८ જલદેવતા

द्र. अर्णवमन्दिरशब्दः ।

**अपाङ्ग**–पुं–५७९–આંખ પાસેના બહાર અને અંદરના ખૂણા

*नेत्रयोरुपान्तप्रदेशौ अपकृष्टौ अङ्गौ अपाङ्गौ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अपाङ्गदर्शन**-न.-५७८-કટાક્ષ
द्र०अक्षिविकूणितशब्दः ।
*अपाङ्गेन दर्शनमिति अपाङ्गदर्शनम् ।

**अपाच**-न-१६८-દક્ષિણ દિશામાં ઉત્પન્ન થયેલું
☐अपाचीन ।
*अपाञ्चतीति अपाक् ।

**अपाची**-स्त्री-१६७-દક્ષિણ દિશા
दक्षिणा, (अवाची) [उत्तरेतरा शे. ३१]।
*अपाञ्चत्यस्यां रविरित्यपाची, जपादित्वाद् वत्वे अवाची इत्यपि ।

**अपाचीतरा**-स्त्री-१६७ (શે. ૩૧)ઉત્તર દિશા
☐उत्तरा, उदीची ।

**अपाचीन**-न.-१६८-દક્ષિણદિશામાં ઉત્પન્ન થયેલું
☐अपाच ।
*अपागेवाऽपाचीनम्, "अदिक्स्त्रियां वाऽञ्चः" ॥७।१।१०७॥ इति स्वार्थे ईनः ।

**अपाटव**-न.-४६२-રોગ
☐रोग, रुजा, रुज, आतङ्क, मान्द्य, व्याधि, आम. (आमन), आमय, आकल्य, उपताप, गद ।
*न पाटवमिति अपाटवम् ।

**अपान**-न.-६१२-ગુદા
द्र०अधोमर्मन्शब्दः ।
अपाऽनित्यनेनेति अपानम् ।

**अपान**-पुं-११०८-ડોકની આગળનો ભાગ અને ગુદા અને પગની પાની સુધીનો પવન
*मूत्रपुरीषगर्भादीनपानयतीति अपानः अपसरणेन अनित्यनेन वा ।

**अपावृत**-पुं-३५५-સ્વચ્છંદી
☐स्वतन्त्र निरवग्रह, यथाकामिन्, स्वरुचि, स्वच्छन्द, स्वैरिन ।
*अपगतमावृत्तं नियंत्रणमस्येति अपावृतः ।

**अपावृत**-न.-१२४५-ઘોડાનું જમીન ઉપર આળોટવું તે.
☐परावृत्त, लुठित, वेल्लित ।
*अपावर्तनमिति अपवृतम् ।

**अपाश्रय**-पुं-१०१२-ગોખ
मत्तालम्ब, प्रग्रीव, मतवारण ।
अपाश्रीयते इति अपाश्रयः ।

**अपासन**-न-३७२-હિંસા
☐व्यापादन, विशरण, प्रमय, प्रमापण, निग्रन्थन, प्रमथन, कदन, निबर्हण, निस्तर्हण, विशसन, क्षणन, पराशन, प्रोज्जासन, प्रशमन, प्रतिघातन, वध, प्रवासन, उद्वासन, घात, निर्वासन, संज्ञप्ति, निशुम्भ, हिंसा, निर्वापण, आलम्भ, निषूदन, निर्यातन, उन्मथ समापन,वर्जन, मार, पिञ्ज, निष्काण, क्राथ, विशारण ।
*अपादस्यतेरपासनम् ।

**अपिनद्ध**-पुं-७६५-કંચુક ધારણ કરવું તે
☐आमुक्त, प्रतिमुक्त, पिनद्ध ।
*अपि नह्यते स्म इति अपिनद्धः ।

**अपिहित**-न-१४७७ (શિ. ૧૩૨)-ઢંકાયેલું
द्र०अन्तर्हितशब्दः ।

**अपुनर्भव**-पुं-७४-મોક્ષ
द्र० अक्षरशब्दः ।
*न पुनर्भवो जन्म अत्र इति अपुनर्भवः न पुनर्भवतीति वा ।

**अपूप**-पुं-३९८-માલપૂડા
☐पिष्टक, पुप, [पारिशोल शे ९६] ।
*अश्नुते इति अपुपः "अशऊपः पश्च" (उणा ३१२) 'इत्युपः अश्निरुप्यते' इति नैरुक्ताः ।

**अपोह**-पुं-३११-બુદ્ધિના આઠ ગુણ પૈકી છઠ્ઠો ગુણ
*अपोहनमिति अपोहः असत्पक्षनिराकरणम् ।

**अप्पित्त**-न.-१०९८-અગ્નિ
द्र०अग्निशब्दः ।
*अपां पित्तं सारमिति अप्पित्तम् ।

**अप्रकीर्णप्रसृतत्व**-न.-६८-સંબંધવાળી અને અતિવિસ્તાર વગરની વાણી
*अप्रकीर्णप्रसृतत्वं सुसम्बद्धस्य सतः प्रसरणं, अथवा असम्बध्धधिकात्वातिविस्तरयोरभावः ।

**अप्रतिचक्र**-स्त्री-४४ (શિ. ૪)-શ્રી ઋષભદેવ પ્રભુનો શાસન દેવી
☐चक्रेश्वरी ।

☐विलक्षण ।

द्र.अपराजिता शब्दः ।

**अप्रधान**—न.–१४४१ ગૌણ

☐गुण, उपसर्जन, उपाग्र, 'अप्राग्य' ।

*न प्रधानमिति अप्रधानम् ।

**अप्रहत**—न.–९४० નહિ ખેડેલા ખેતરની ભૂમિ.

☐खिल ।

*न प्रहण्यते स्मेति अप्रहतं हलादिभिरकृष्टं क्षेत्रं केदारादि ।

**'अप्राग्य'**—न.–१४४१–ગૌણ

द्र० अप्रधानशब्दः ।

**अप्सरःपति**–पुं–१७३–ઈન્દ્ર

द्र० अच्युताग्रजशब्दः ।

*अप्सरसां पतिरिति अप्सरःपतिः यौगिकत्वात् सुरस्त्रीशः ।

**अप्सरस्**–स्त्री–१८३–ઈન્દ્રાણી

☐स्वर्वधू, स्वर्गिवधू, (स्वर्गस्त्री, सुरस्त्री, अप्सरा), स्वर्वेश्या, देवगणिका) ।

*आप्यन्ते पुण्यैरिति अप्सरसः "आपोपाप्ता" (उणा–९६४) इत्यस, आपोऽप्सरा देशश्च, अपः सरन्ति स्मेति वा समुद्र जातत्वाद् वा बहुवचनान्तः स्त्रीलिङ्गोऽयं तेनाऽप्सरा इत्यपि ।

**अफल**—न –१५१६–વ્યર્થ

☐वन्ध्य, (बन्ध्य), मोघ, मुधा ।

*नफलतीति अफलम् ।

**अबकेशी**–पुं-१११६-જેને ફળ ન આવે તેવું વૃક્ષ

☐फलवन्ध्य (अवकेशिन्) ।

*नास्ति बकोऽप्यत्राबकं शून्यं तदीष्टेऽबकेशी) ।

**अबद्ध**—न.–२६७—અર્થ વિનાનું બોલવું તે

☐(असबद्ध), निरर्थक ।

*अबद्धं असंबद्ध, दशदाडिमादिवाक्यं समुदायार्थशून्यम् ।

**अबद्धमुख** वि.–३५१–અપ્રિય બોલનાર

☐दुर्मुख । (दुष्टवचन,) मुखर ।

*अबद्धमनियन्त्रितं निरर्थकं वा मुखमस्येति अबद्धमुखः ।

**अबला**-स्त्री–५०४–નારી

* स्त्री, नारी, वनिता, वधू, वशा, सीमन्तिनी, वामा, वर्णिनी, महिला, योषा, योषित्, [महेला, योषिता, शि. ३९] ।

नास्ति बलमस्या इति अबला

**अबाध**—न.–१४६६–અંકુશ રહિત

द्र० अनर्गलशब्दः ।

*नास्ति बाधाऽस्येति अबाधम् ।

**अब्ज**—न.–४७–કમલ છઠા ભગવાનનું લંછન

**अब्ज**–पुं–१०५–ચન્દ્રમા

द्र० अत्रिद्दग्जशब्दः ।

*अप्सु जातोऽब्जः, समुद्रजातत्वात् समुद्रनवनीतमपि ।

**अब्ज**—न.–८७४–(અબજ, સો ક્રોડ)

* दशार्बुदानि इति अब्जम् ।

**अब्जबान्धव**–पुं–९६–સૂર્ય

द्र० अंशुशब्दः ।

*अब्जस्यबान्धवः इति अब्जबान्धवः यौगिकत्वात् पद्मबन्धुः ।

**अब्जहस्त**–पुं–९६–સૂર્ય

*अब्जानि हस्ते यस्य स तथा अब्जहस्तः यौगिकत्वात् पद्मपाणिः ।

**अब्जिनीपति**–पुं–९७–સૂર્ય

द्र० अंशुशब्दः ।

*अब्जिनीनां पतिरिति अब्जिनीपतिः यौगिकत्वात् पद्मिनीशः ।

**अब्द**–पुं–न.–१५९–વર્ષ

द्र० अनुवत्सरशब्दः ।

*आप्यते इति अब्दः "आपोऽचपू" (उणा–२३८) इति दः अयं पुंक्लीबलिङ्गः ।

**(अब्दवाहन)**–पुं–१९७–શંકર, મહાદેવ

द्र० अट्टहासिनूशब्दः ।

**अब्धिकफ** पुं–१०७७–સમુદ્રના ફેણ

☐डिण्डीर, फेन, (सागरमल), हिण्डीर हिण्डिर ।

*अब्धेः कफद इवाधिक्ये बहिः प्रसरादब्धिककः सागरमलाख्यः नद्यादौ तुपचारात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अब्धिज**–(द्वि. व.) पुं–१८२–स्वर्गना वैद्य

*स्वर्वैद्य, अश्विनीपुत्र, अश्विन्, वडवासुत, नासिक्य, अर्कज, दस्र, नासत्य, यम, [नासत्यदस्र, प्रवरवाहन, गदान्तक, यज्ञवह शे. ३१, आश्विनेय शि १४]।

☐अब्धेर्जातौ इति अब्धिजौ नित्यद्विवचनान्तोऽयम्।

**अब्धिजा**–स्त्री–९०३–मदिरा

☐मद्य, मदिष्ठा, मदिरा, परिस्रुता, कश्य, परिस्रुत् मधु, कापिशायन, गन्धोत्तमा कल्य, इरा, परिप्लुता, कादम्बरी, स्वादुरसा, हलिप्रिया, शुण्डा, हाला, हारहूर, प्रसन्ना, वारुणी, सुरा, माध्वीक, मदना, देवसृष्टा, कापिश, [मार्द्वीक शि. ७९]।

**अब्धिमण्डूकी**–स्त्रं–१२०४–मोतीनी छीप

☐मुक्तास्फोट, शुक्ति।

*अब्धेर्मण्डूकीति अब्धमण्डूकी।

**अब्धिशयन**–पुं–२१४–विष्णु

द्र० अच्युतशब्दः

*अब्धौ शयनमस्येति अब्धशयनः।

**अब्ध्यग्नि**–पुं–११००–वडवानल

☐और्व, ऊर्व, संवर्तक, वाडव, वडवामुख, (वडवानल)।

*अब्धेरग्निरित्यब्ध्यग्निः।

**अब्रह्मण्य**–न.-३३५–अवध्य ब्राह्मणना पोकारमां बोलातो शब्द

* वधानर्हस्य ब्राह्मणस्य पूत्करणे न ब्राह्मणे साधु अब्राह्मण्यम् इति वर्तते "प्राग्यङ्गरथ"–(७।१।३७) इति यः अवधयाच्चार्थमित्येके।

**'अभय'**–न.–११५८काळा वाळानुं मूळ

द्र० उशीरशब्दः।

**अभयद**–पुं–२५–जिनेश्वर भगवान

द्र० अधीश्वरशब्दः।

१ २ ३ ४ ५ ६ ७

*भयं इहपरलोकादानाकस्मादाजीवमरणाश्लाघाभेदेन सप्तधा, एतत्प्रतिपक्षतोऽभयं विशिष्टमात्मनः स्वास्थ्यं निःश्रेयसधर्मनिबन्धनभूमिकाभूतं तत् गुणप्रकर्षादचिन्त्यशक्तियुक्तत्वात् सर्वथा परार्थकारित्वात् ददाति इति अभयदः।

**अभया**–स्त्री–११४६–हरडे

☐हरीतकी, पथ्या, अव्यथा, कायस्था, (वयस्था) पूतना, अमृता, हैमवती, चेतकी, श्रेयसी शिवा'।

*नास्ति भयमस्या इति अभया।

**अभाव**–पुं–१५१७–नाश

☐नाश।

*न भावः सत्तेति अभावः

**अभाषण**–न.–७५–मौन

☐नमौ।

*न भाष्यते इति अभाषणम्।

**अभिक**–पुं–४३४–कामी

द्र. अनुक शब्दः।

*अभिकामयते इति अभिकः।

**अभिक्रम**–पुं–७९१–युद्धमां निर्भय थई शत्रु सामे जवुं ते.

*अभिमुख्येन अभिभूय अरीनभि वा क्रमणं इति अभिक्रमः।

**अभिक्रम**–पुं–१५१०–सामे जवुं.

☐आरोहण।

*अभिमुखं क्रमणमिति अभिक्रमः।

**अभिख्या**–स्त्री–२६०–नाम

☐आह्वय, अभिधा, गोत्र, संज्ञा, नामधेय, आख्या, आह्वा नामन्।

*अभिख्यायतेऽनया इति अभिख्या।

**अभिख्या**–स्त्री–२७३–यश, कीर्ति

☐श्लोक, कीर्ति, यशस्, समाज्ञा, [समाख्या शि. १८]

*अभिख्यानं इति अभिख्या।

**अभिख्या**–स्त्री–१५१२–कान्ति, शोभा

☐आभा, राढा, विभूषा, श्री, कान्ति, विभ्रम, लक्ष्मी, छाया, शोभा, 'द्युति, छवि'।

*अभिख्यायतेऽनया इति अभिख्या।

**अभिचर**–पुं–४९६–सेवक

द्र० अनुगामिन् शब्दः।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

* आभिमुख्येन चरति इति अभिचरः।

**अभिचार**-પું-८३०-ઉચ્ચાટન, મારણ વગેરે

*अभिभवितुं चरणमिति अभिचारः।

**अभिज**-પું-५०२ (શિ. ३९)-કુળવાન, ખાનદાન.

द्र० अभिजात शब्दः।

**अभिजन**-પું-५०३-વંશ

द्र० अन्वयशब्दः।

अभिजन्यतेऽनेनेति अभिजनः "व्यञ्जनाद् घञ्" (५।३।१३२) इति निपात्यते।

**अभिजात**-પું-५०२-કુળવાન

☐कुल्य, कुलीन, कौलेयक, महाकुल, जात्य, [अभिज शि. ३९]।

*अभिजायते स्मेति अभिजातः, अभिजोऽपि।

**अभिज्ञ**-પું-३४३-હોંશિયાર

☐प्रवीण, शिक्षित, निष्णात, निपुण, दक्ष, कृतकर्मन्, कृतहस्त, कृतमुख, कुशल, चतुर, विज्ञ, वैज्ञानिक, पटु [क्षेत्रज्ञ, नदीष्ण, निष्ण शे. ९२, कृतकृत्य, कृतार्थ, कृतिन् शि. २२]।

*अभिजानाति इति अभिज्ञः।

**अभिज्ञान**-ન.-१०६-લાંછન, ચિહ્ન

द्र० अङ्कशब्दः।

*अभिज्ञायतेऽनेनेत्यभिज्ञानम्।

'**अभितस्**'-અ.-१४५१-સમીપ, પાસે

**अभिधा**-स्त्री-२६०-નામ

द्र० अभिख्याशब्दः।

*अभिधीयतेऽनया इति अभिधा।

**अभिधान**-ન.-२४१ (શે. ८२)-વાણી, વચન

द्र० भाषित शब्दः।

**अभिध्या**-સ્ત્રી-४६१-પરધન લેવાની ઇચ્છા

☐परस्वेहा, (विषमस्पृहा, विषमप्रार्थना)।

अभिचारेणध्यानमित्यभिध्या, **यत्कात्य** "विषमप्रार्थनाऽभिध्या"।

**अभिनन्दन**-પું-२६-ચોથા ભગવાનનું નામ

*अभिनन्द्यते देवेन्द्रादिभिरित्यभिनन्दनः, मुज्यादित्वादनट्, यद्वागर्भात् प्रभृत्येव अभीक्ष्णं शक्रेणाभिनन्दनाद् अभिनन्दनः।

**अभिनय**-પું-२८२-હાથથી હૃદયનો ભાવ જણાવવો તે

☐व्यञ्जक।

*आभिमुख्यं नीयन्तेऽर्था अनेनेति अभिनयो भावसूचकः।

**अभिनव**-ન.-१४४८-નવીન

☐नव, नवीन, सद्यस्क, प्रत्यग्र, नूत्न, नूतन, नव्य।

*अभिनूयते इति अभिनवम्।

**अभिनिर्मुक्त** પું-८६०-સૂર્યાસ્ત પહેલા સુનાર.

*अभिभूयनिर्मुक्तोऽस्तमितोऽर्कोऽस्य सुप्तस्येति अभिनिर्मुक्तः।

**अभिनिर्याण**-ન.-७८९ પ્રયાણ

☐प्रस्थान, गमन व्रज्या, निर्याण, प्रयाणक, यात्रा।

*अभिनिर्यायते इति अभिनिर्याणम्।

**अभिनिवेश**-પું-१५००-આગ્રહ

☐निर्बन्ध।

*अभिनिवेशनमिति अभिनिवेशः।

**अभिनीत**-ન.-७४३-યોગ્ય

☐न्याय्य, उचित, युक्त, साम्प्रत, लभ्य, प्राप्त, भजमान, औपयिक।

*अभिमुख्यं नीयते स्मेति अभिनीतम्।

**अभिपन्न**-પું-४७९-શરણાર્થી

☐शरणार्थिन्।

*अभिमुखं पद्यते स्मेति अभिपन्नः।

**अभिप्राय**-પું-१३८३-અભિપ્રાય

☐छन्द, आकूत, मत, भाव, आशय।

*आभिमुख्येन प्रयत्यनेनेति अभिप्रायः।

**अभिभव**-પું-४४१-પરાભવ

द्र० अत्याकारशब्दः।

**अभिभूत**-પું-४४०-પરાભવ પામેલો

☐आत्तगन्ध।

*अभिभूयते स्मेति अभिभूतः।

**अभिभूत**-પું-८०५-હારેલ

☐पराभूत, परिभूत, जित, भग्न, पराजित।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*अभिशब्दात् परोभूतः इति अभिभूतः ।

**अभिमन्त्रण**-न.-२६२-બોલાવવું તે.

□आह्वान, आकारण, (आकारणा), हव, हूति, [हक्कारक, आकार शे. ८३] ।

**अभिमाति**-पुं-७२९-શત્રુ

□शत्रु, प्रतिपक्ष, पर, रिपु, शात्रव प्रत्यवस्थातृ, प्रत्यनीक, अभियाति, अरि, दस्यु, सपत्न, असहन, विपक्ष, द्वेषिन् द्विषत् वैरिन्, अहित, जिघांसु, दुहृद् परिपन्थक, परिपन्थिन्, द्विष् प्रत्यर्थिन्, अमित्र, अराति, [असुहृद् शि. ६३] ।

*अभिमाति क्रुध्यतीति अभिमातिः "अभेर्या"-(उणा-६६२) इत्यादिः ।

**अभिमान**-पुं-३१७-ગર્વ

□गर्व, अहङ्कार, अवलिप्तता, दर्प, ममता, मान, चित्तोन्नति, स्मय,

*अभिमाननं इति अभिमानः, **वैजयन्तीकारस्तुः** -"अभिमानस्त्वहङ्कारो गर्वोऽस्त्री" इत्याह ।

**अभिमुख**-न.-१४३७-સન્મુખ

□सम्मुखीन ।

*अभिव्याप्तं मुखेनेति अभिमुखम् ।

**अभियाति**-पुं-७२८-શત્રુ

द्र०अभिमातिशब्दः ।

*अभिमुख पातीत्यभियातिः "अभेर्यामाभ्याम्" (उणा-६६३) इत्यादिः ।

**अभियोग**-पुं-३००-ઉત્સાહ

द्र०अध्यवसायशब्दः ।

□अभि योजनमिति अभियोगः ।

**अभिराम**-न.-१४४४-સુન્દર

□चारु, हारिन्, रुचिर, मनोहर, वल्गु, कान्त, बन्धुर, वाम, रुच्य, सुषम, शोभन, मञ्जु, मञ्जुल, मनोरम, साधु, रम्य, मनोज्ञ, पेशल, हृद्य, सुन्दर, काम्य, कम्र, कमनीय, सौम्य, मधुर, प्रिय, [लडह रमणीय शि. १२९] ।

*अभिरमते मनोऽत्रेति अभिरामम् ।

**अभिरूप**-पुं-३४२-પંડિત

□विद्वस्, सुधी, कवि, विचक्षण, लब्धवर्ण, ज्ञ, प्रातरुप, कृतिन, कृष्टि, धीर, मेधाविन् कोविद, विशारद, सूरि, दोषज्ञ, प्राज्ञ, पण्डित, मनीषिन् । (धी मत्, मतिमत्) बुध, प्रबुद्ध, व्यक्त, विपश्चित्, संख्यावत्, सत्, [कवितृ शि. २२] ।

*अभिगतं रुपं येन स इति अभिरुपः ।

**अभिलाव**-पुं-१५२१-કાપવું તે

□लव, लवन ।

*अभिलवनमिति अभिलावः "निरभेः पूल्वः" (५।३।२१) इति घञ ।

**अभिलाष**-पुं-४३१-ઈચ્છા

□लोभ, तृष्णा, लिप्सा, वश, स्पृहा, काङ्क्षा, आशंसा, गर्द्ध वाञ्छा, आशा, इच्छा, ईहा, (ईह) तृष्. मनोरथ, काम, [धनाया, रुचि, ईप्सा, कामना शे० १०४, मनोराज्य, मनोगवी शि. ३०] ।

*अभिलषणमिति अभिलाषः ।

**अभिलाषुक**-पुं-४२९-લોભી

गृध्नु, गर्धन, तृष्णज् लिप्सु, लुब्ध, लोलुप लोलुभ, [लालस, लम्पट, लोल शे. १०४] ।

*अभिलषणशीलःइति अभिलाषुकः ।

**अभिवादक**-पुं-३४९-વંદન કરનાર

□वन्दारु ।

*अभिवादयते इति अभिवादकः ।

**अभिवादन**-न.-८४४-પગમાં પડવું તે.

□पादग्रहण, उपसङ्ग्रह ।

*अभिवाद्यते आशिषं कार्यतेऽनेन इति अभिवादनम् ।

**अभिव्याप्ति**-स्त्री-१५१७-સર્વ તરફ વ્યાપવું.

□संमूर्च्छन ।

*अभिव्यापनमिति अभिव्याप्तिः सर्वतो वृत्तिः ।

**अभिशस्त**-पु-४३६-કલંક લાયક

□वाच्य, क्षारित, दूषित, [आक्षारिति शि. ३१] ।

अभिशस्यते स्मेति अभिशस्तः ।

**अभिषव**-पुं-९०५-મદિરા બનાવવાની ક્રિયા

□मद्यसन्धान, आसुति, आसव ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*अभिसवनमिति अभिषवः ।

**अभिषस्ति**-स्त्री-३८८ (शे. ९५)-યાચના કરવી

द्र०अध्येषणा शब्दः ।

**(अभिषुत)** (टी)-नं-४१५-કાંજી

☐द्र०अवन्तिसोमशब्दः ।

**अभिषेणन**-७९०-સેના સહિત શત્રુ સામે જવું.

द्र०अवन्तिसोम शब्दः ।

*सेनयारिपूनभियानमभिषेणनं, "णिज् बहुलं"-(३।४।४२) इति णिज्यनटिच," स्थासेनि"-॥२।३।४०॥ इति षत्वम् ।

**अभिसंपात**-पुं-७९७-યુદ્ધ

द्र०अनीकशब्दः ।

*अभिसम्पतन्त्यत्रेति अभिसंपातः ।

**अभिसारिका**-स्त्री-५२९-કામની ઇચ્છાથી પ્રિય પાસે જનારી સ્ત્રી

*मदनेन मदेन वाया श्लिष्टा प्रियमभिसरति अभिसारयति वा सा अभिसारिका, यद्: भरतः "हित्वा लज्जाभये श्लिष्टा, मदेन मदनेन वा. अभिसारयते कान्तं सा भवेदभिसारिका ।

**अभीक**-पुं-४३४-કામુક

द्र०अनुकशब्दः ।

*अभि कामयते इति अभिकः अभीकश्च, 'अभेरीश्च वा" ॥७।३।१८९॥ इति के साधुः ।

**अभीक्ष्णम्**-अ. १५३१ વારંવાર

☐भूयस् पुनः पुनर् असकृत मुहुस्

अभीक्ष्यते इति अभीक्ष्णम्, "भ्रूणतृण-(उणा-१८६) इति बाहुलकान्मान्तो निपात्यते, यथा-"तक्ष्णोतीव तथाऽन्योऽभीक्ष्णक्षरक्षारैः ।

**अभीशु**-पुं-९९-કિરણ

द्र०अंशुशब्दः ।

*अभ्यश्नाति तमांसि इति अभीशुः पुंलिङ्गः, "केवयुभूरण्."-(उणा-७४६) इति उदन्तो निपात्यते अभीषुरिति:गोडः ।

**अभिषङ्ग**-पुं-२७२-નિંદા શાપ

☐आक्रोश, आक्षेप, शाप ।

*अभिषञ्जनं पराभिमुख्येन वाक्ययोजनं अभीषङ्गः "घञ्युपसर्गस्य"-(३।२।८६) इति दीर्घः ।

**(अभीषु)** (टी)-पुं-९९-કિરણ

द्र०अंशुशब्दः ।

**अभ्यग्र**-नं.-१४५०समीप, પાસે

द्र०अन्तिकशब्दः

*अभिमुखं अग्रमस्येति अभ्यग्रम् ।

**अभ्यञ्जन**-नं-४२७-તેલ

म्रक्षण, तैल, स्नेह ।

अभ्यज्यतेऽनेनेति अभ्यञ्जनम् ।

**अभ्यन्तर**-न-१४६०-મધ્યે

☐अन्तराल, विचाल ।

*अभ्यधिकमन्तरमिति अभ्यन्तरम् ।

**अभ्यमित**-पुं-४५९-રોગી

द्र० अपटुशब्दः ।

*अभितोऽम्यतेःस्मेति अभ्यमितः

**अभ्यमित्रीण**-पुं-७९२-શત્રુ સામે જનાર

☐अभ्यमित्र्य, अभ्यमित्रीय ।

*आभिमुख्येनाऽमित्रानलं गामी अभ्यमित्रीणः "अभ्यमित्रमीयश्च" (७।३।१०४) इति ईनः ।

**अभ्यमित्रीय**-पुं-७९२-શત્રુ સામે જનાર

☐अभ्यमित्र्य, अभ्यमित्रीण ।

*अभिमुख्येना मित्रानलंगामी अभ्यमित्रीयः "अभ्यमित्रमीयश्च' ॥७।२।१०४॥ इति ईयः ।

**अभ्यमित्र्य**-पुं-७९१-શત્રુ સામે જનાર

☐अभ्यमित्रीय, अभ्यमित्रीण ।

आभिमुख्येनामित्रानल गाभी अभ्यमित्र्यः "अभ्यमित्र"-॥७।१।१०९॥ इति यः ।

**अभ्यर्ण**-न.-१४५२-પાસે

द्र०अन्तिकशब्दः ।

*अभ्यर्द्यते इति अभ्यर्णम्, "अविदूरेऽभेः" (४।४।६४) इतीड्भावः ।

**अभ्यवस्कन्द**-पुं-८००-ધાડ

☐प्रपात, धाटि, (धाटी, अभ्यासादन, [अवस्कन्द शि. ७०] ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अभ्यवस्कन्दनमिति अवस्कन्दोऽपि

**अभ्यवहार**–पुं–४२३–ખાવું

द्र०अदनशब्दः ।

*अभ्यवहरणमिति अभ्यवहारः ।

**अभ्याख्यान**–न.–२६८–અસત્ય આક્ષેપ

☐मिथ्याभियोग ।

*अभ्याख्यायते इति अभ्याख्यानम् ।

**भ्यागत**–पु–४९९–अतिथि

द्र०अतिथिशब्दः ।

*अभ्यागच्छति अभ्यागम्यते स्म वा अभ्यागतः "तिथिपर्वोत्सवाः सर्वे, त्यक्ता येन महात्मना । अतिथिं तं विजानीयात्, शेषमभ्यागतं विदुः ॥

**अभ्यागम**–पुं–७९७–લડાઈ

द्र०अनीक शब्दः ।

*अभ्यागच्छन्त्यस्मिन्नभ्यागमः ।

**अभ्यागारिक**–पुं–४७८–કુટુંબનું પોષણ કરવામાં ઉદ્યત

☐उपाधि, कुटुम्बव्यापृत ।

*अभ्यागारमस्यास्तीति अभ्यागारिकः "अतोऽनेक स्वरात्"–(७।२।६) इतीकः ।

**अभ्यादान**––न.–१५१०–સામે ગ્રહણ કરવું.

☐उपोद्घात, आरम्भ, प्रक्रम, उपक्रम्, [उद्घात शि. १३६] ।

*आभिमुख्येनादानं इति अभ्यादानम् ।

**अभ्यान्त**–पुं–४५९–રોગી

द्र०अपटुशब्दः ।

*अभ्यान्तः "श्वसजव"–(४।४।७५) इति विकल्पेनेट् ।

**अभ्यामर्द**–पुं–७९८–લડાઈ

द्र० अनीक शब्दः ।

अभ्यामृद्नन्ति अस्मिन्निति अभ्यामर्दः ।

**अभ्याश**–न.–१४५०–પાસે

द्र० अन्तिक शब्दः ।

अभ्यश्यते व्याप्यते इति अभ्याशं तालव्यान्तः ।

**अभ्यास**–पुं–७८८–શસ્ત્રકળાનો અભ્યાસ

☐खुरली, श्रम, योग्या, [शराभ्यास, उपासन शे. १५२] ।

*शस्त्राणामभ्यसनमिति अभ्यासः ।

**'अभ्यास'**–पुं–१४५०–સમીપ, નિકટ

द्र०अन्तिकशब्दः ।

**अभ्यासादन**–न.–८००–ધાડ

द्र० अभ्यवस्कन्दशब्दः ।

*अभ्यासाद्यते इति अभ्यासादनम् ।

**अभ्युत्थान**–न.–५०२–ઉભા થઈ સત્કાર કરવો તે

☐गौरव ।

*अभिमुखमुत्थीयते इति अभ्युत्थानम् ।

**अभ्युदित**–पुं–८६०–સુતો હોય ને સૂર્યોદય થાય.

*अभिभूय उदितोऽर्कोऽस्येति अभ्युदितः ।

**अभ्युपगत**–न.–१४८९–સ્વીકાર કરેલું

द्र०अङ्गीकृतशब्दः ।

*अभ्युपगम्यते स्मेति अभ्युपगतम् ।

**अभ्युपगम**–पुं–२७८–સ્વીકાર

द्र०अङ्गीकारशब्दः ।

*अभ्युपायनमिति अभ्युपगमः ।

**अभ्युपपत्ति**–स्त्री–१५०८–મહેરબાની

☐अनुग्रह ।

*अभ्युपवदनमिति अभ्युपपत्तिः ।

**अभ्युपाय**–पुं–२७८–અંગીકાર

द्र०अङ्गीकारशब्दः ।

*अभ्युपायनमिति अभ्युपायः ।

**अभ्युष**–पुं–३९९–ઘીમાં તળેલી પુરી

☐अभ्योष, पौलि ।

*अभ्यूषति भजतीति अभ्यूषः ।

**अभ्योष**–पुं–३९९–ઘીમાં તળેલી પુરી

☐अभ्यूष, पौलि ।

*अभ्यूष्यते पच्यते इति अभ्योषः ।

**अभ्र**–न.–१६३–આકાશ

द्र०अनन्तशब्दः ।

*अभ्राण्यस्य सन्तीति अभ्रं "अभ्रादिभ्यः" ॥ (५।२।४६) इति अः ।

**अभ्र**–न.–१६४१–વાદળ

☐नभ्राज, तडित्वत्, मुदिर, घनाघन, धूमयोनि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्तनयित्नु, मेघ, जीमूत, पर्जन्य, बलाहक, घन, धाराधर, जलवाह, जलद, जलमुच्, वारिद, वारिमुच्, वारिधर), [व्योम धूम नभोध्वज, गडयित्नु, गदयित्नु, वार्मसि, वारिवाहन शे. २८ खतमाल शे. २९]।

*अभ्रतीति अभ्रं न भ्रश्यन्त्यापोऽस्मादित्येके. यदुक्तम्-"न भ्रश्यन्ति यतस्तेभ्यो जलान्यभ्राणि तान्यतः। आप्नोति सर्वादिश इति वा अभ्रं "खुर क्षुर"-(उणा-३९६) इति साधुः।

**अभ्रक**-न.-१०५१-અબરખ

☐स्वच्छपत्र ख, (गगन), मेघ, (अम्बुद), गिरिजामल (गिरिज, अमल)।

*अभ्रप्रतिकृतिरिति अभ्रकम्।

**अभ्रपथ**-पुं-१६३-આકાશ

द्र०अनन्तशब्दः।

*अभ्राणां मेघानां पन्थाः इति अभ्रपथः यौगिकत्वात् मेघवर्त्म।

**अभ्रपिशाच**-पुं-१२१ (शि. ११)-રાહુ

द्र०भरणीभूशब्दः।

**'अभ्रपुष्प'**-पुं-११३७-નેતર

द्र०रथशब्दः।

**अभ्रमातङ्ग**-पुं-१७७-ઐરાવણ હાથી

☐ऐरावण, (अभ्ररुप) चतुर्दन्त, अर्कसोदर, एरावत, हस्तिमल्ल, श्वेतगज, अभ्रमुप्रिय, [मदाम्बर, सदादान, भद्ररेणु, शे. ३५]।

*अभ्रस्यत्वात् अभ्रमातङ्गः अभ्ररुप इत्येके **यत् कात्यः**-ऐरावतं विजानीयात् नागमंबुदगोचरम्।

**अभमुप्रिय**-पुं-१७७-ઐરાવણ હાથી

द्र०अभ्रमातङ्गशब्दः।

*अभ्रतीति अभ्रमुः "भ्रेरमुः"-(उणा-८००) अभ्रे खे माति न भ्राम्यति वा मन्थरगामित्वात्

**यल्लक्षम्**—

अभ्रम्वां जघनान्तदोलितकरः तस्याः प्रियोऽभमुप्रियः।

**(अभ्ररुप)**-पुं-२७७-ઐરાવણ હાથી

द्र० अभ्रमातङ्गशब्दः

**अभ्रि**-स्त्री-८७८-લાકડાની-કોદાળી

*काष्ठकुद्दाल।

*अभ्रतीति अभ्रिः स्त्रीलिङ्गः "पदिपठि (उणा ६०७) इति इः।

**अभ्रेष**-पुं-७४३-ન્યાય

☐न्याय, देशरुप, समञ्जस, कल्प, नय, [नीति शि. ६४]।

*यथोचिताद् रुपाद् भ्रंशो भ्रेषः, नास्ति भ्रेषोऽस्मिन्नभ्रेषः।

**अमत्र**-न-१०२४-વાસણ

☐पात्र, भाजन।

*अमति आधेयमस्मिन् इति अमत्रं "वृगृनक्षि" -(उणा-४५६) इति अत्रः।

**अमम**-पुं-५५-ભાવિ ૧૨ માં તીર્થંકર

*नास्ति ममताऽस्येतिअममः।

**अमर** (અ. ૧)-पुं-८७-દેવતા

द्र०अनिमिषशब्दः।

न म्रियते इति अमरः, अमरशब्दश्चिरस्थायित्वादिलक्षणया देवेषु यौगिको रुढश्च।

**अमरावती**-स्त्री-१७८-ઈન્દ્રપુરી

☐ [सुदर्शन शे. ३५]।

*अमराः सन्त्यस्यामिति अमरावती, "अनजिरादि" (३।२।७८) इत्यादिना मतौ दीर्घत्वम्। शेषश्चात्र-"पुरे त्वैन्द्रे सुदर्शनम्"।

**अमर्त्य** (અ.૧)-पुं-८८-દેવતા

द्र० अनिमिषशब्दः।

*न म्रियते इति अमर्त्यः, "मृशी पसि"-(उणा-३६०) इति तकारादिर्प्रत्ययः म्रियते इति मर्तः "लूम्रो वा" (उणा-२०२) इति तप्रत्ययः मर्त एव मर्त्यः "मर्तादिभ्यो यः" (७।२।१५९) इति स्वार्थे यः न मर्त्य अमर्त्यः इति वा।

**अमर्त्यनिकायकोटि**-स्त्री-६३-ભગવાનનો ૩૩ મો અતિશય, ક્રોડ દેવો સેવા કરે તે.

*भवनपत्यादि चतुर्विधदेवनिकायानां जघन्यतोऽपि समीपे कोटिर्भवतीति।

**अमर्मवेधिता**-स्त्री-६९-બીજાના મર્મને પ્રગટ ન કરનારી વાણી

*अमर्मवेधिता-परमर्मानुदघट्टनस्वरुपत्वम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अमर्ष**-पुं-પ્રતિકાર ઇચ્છાવાળો ક્રોધ.

*क्रोधाद् जातो जिगीषोसोत्साहयुक्तो गुणो न मर्षन' इति अमर्ष, प्रतिचिकीर्षारूपः ।

**अमर्षण**-३९२-पुं-ક્રોધી

☐क्रोधिन्, रोषण, क्रोधन, [कोपन शि. २७]

*न मृष्यति इति अमर्षणः ।

**(अमल) (टी)**-न.-१०५१-અબરખ

☐द्र० अभ्रकशब्दः ।

**अमा**-स्त्री-१५०-અમાસ

☐अमावसी, अमावस्या, दर्श, सूर्येन्दुसङ्गम, अमावस्या, अमावासी ।

*अमेति अमावस्याशब्दैकदेशोऽयं भीमवत्, न विद्यते माश्चन्द्रमा अस्यामिति वा पृषोदरादित्वात् ।

**अमा**-અ.-१५२७-સાથે

☐साकं, सत्रा, सम, साधं र, सह,

*न माति इति अमा "डित्" (उणा-६०५) इति आ प्रत्ययः ।

**अमांस**-पुं-४४९-દુર્બળ

☐दुर्बल, कृश, क्षाम, क्षीण, तनु, छात, तलिन, पेलव ।

*नास्तिमांसमस्येति अमांसः ।

**अमात्य**-पुं-७१४-મંત્રી, રાજ્યના ૭ અંગો પૈકી બીજું અંગ

*अमात्यो मन्त्री ।

**अमात्य**-पुं-७१९-પ્રધાન, રાજાને સલાહ આપનાર

☐सचिव, मन्त्रिन्, धीसख, सामवायिक [बुद्धिसहाय शि. १२] ।

*अमा सह, समीपे वा भवोऽमात्यः "क्वेहामात्रतस" ।(६।३।१६)। इति त्यच् अमा सह अततीति वा ।

**'अमानस्य'**-न.-१३७१-દુઃખ, પીડા

द्र० अर्तिशब्दः ।

**अमालसी**-स्त्री-१५०-અમાસ

द्र० अमाशब्दः ।

*अमा सह वसतोऽस्यां चन्द्राअर्कावितियमावसी औणादिके अप्रत्यये ङीः ।

**अमावस्या**-स्त्री-१५०-અમાસ

द्र० अमाब्दः ।

*अमावस्या "वाऽऽधारेऽमावास्या" - (५।१।२१) इति घ्यणन्तो निपात्यते ।

**अमावासी**-स्त्री-१५०-અમાસ

☐द्र० अमाशब्दः ॥

*अमावस्येव बाहुल्कादुदीर्घत्वे अमावासी ॥

**अमावास्या**-स्त्री-१५०અમાસ

द्र० अमाशब्दः ।

*अमावस्याया विकल्पपक्षे अमावास्या ॥

**अमित्र**-पुं-७२९-શત્રુ

द्र० अभिमातिशब्दः

*अमतीति अमित्रः "बन्धिवहि"—(उणा-४५९) इति इत्र प्रत्ययः; न मित्रमिति वा पुंल्लिङ्गोऽयम् असुहृदपि

**अमुक्त**-न.-७७४-હાથમાં રહેલો છરી

☐शस्त्रिका ।

*अमुक्तं हस्तस्थितमेव वा यथा शस्त्रिकादि

**अमुत्र**-અ.-१५२८-પરલોક

☐प्रेत्य ।

*अमुस्मिन्निति अमुत्रः । यथा—

"अमुत्र भविता यत् ते तच्चिन्तय शुभाशुभम् " ।

**अमुष्यपुत्र**-पुं-५०२-પ્રખ્યાત પિતાનો પુત્ર

☐आमुष्यायण, प्रख्यातवप्तृक ।

*अमुष्यपुत्रः, अत्र चोरादिपाठसामर्थ्यात् समासे षष्ठ्यलुप् ।

**'अमृणाल'**-न.-११५८-કાળા વાળાનું મૂળ

द्र० उशीरशब्दः ।

**अमृत**-न.-७४-મોક્ષ

द्र० अक्षरशब्दः ।

*नास्ति मृतमत्रेति अमृतम् ।

**अमृत**-न.-८९-અમૃત

पीयूष, सुधा, [पेयूष, समुद्रनवनीत शि. ७]

*नास्ति मृतमत्रेति अमृतम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अमृत**-न-८३४-યજ્ઞ કરતાં બચેલું દ્રવ્ય
☐ यज्ञशेष ।
*न म्रियतेऽनेन न नश्यतीति अमृतम् ।

**अमृत**-न.-८६६-માંગ્યા વિના મળેલું
☐ अयाचित, (अविनश्वर)।
*अमृतं अविनश्वरम् ।

**अमृत**-न.-१०६९-પાણી
द्र० अपूशब्दः ।
न विद्यते मृतमस्मादिति अमृतम् ।

**अमृत** न.४०४ (शि. १००) તરત દોહેલું દૂધ

**अमृतद्युति**-पु-१०५-ચન્દ્રમા
द्र० अत्रिदृग्जशब्दः ।
*अमृतं द्युतयो यस्य स इति अमृतद्युतिः यौगिकत्वात् सुधांशुः ।

**(अमृतप)**-पुं-દેવ।
☐अमृतभुज्, अमृतान्धस् अमृतव्रत, अमृतलिह् अमृतपायिन्, अमृताश, अमृताशन ।

**अमृतपायिन्**-पुं-७-परि-દેવ।
☐द्र० अमृतपशब्दः ।

**(अमृतभुज्)**-पुं-७-परि-દેવ।
द्र० अमृतपशब्द ।

**अमृतलिह्)**-पुं-७-परि-દેવ।
द्र० अमृतपशब्द

**(अमृतव्रत)**-पुं-७-परि.-દેવ।
☐अमृतपशब्द ।

**अमृतसू**-पुं-१०४-ચંદ્રમા
☐अत्रिदृग्जशब्द ।
*अमृतं सूते इति अमृतस् यौगिकत्वात् सुधासूरित्यादयः ।

**अमृता**-स्त्री-१४५७-ગળો
वत्सादनी गुडूची, 'छिन्नरुहा, गडुची, तन्त्रिका, जीवन्तिका, सोमवल्ली, विशल्या, मधुपर्णी ।
*नम्रियते इति अमृता छिन्नप्ररोहत्वात्

**'अमृता'**-स्त्री-११४५-આમળા
द्र० आमलकी शब्द

**अमृता**-स्त्री-११४६-હરડે

द्र० अभयाशब्दः

**अमृतान्धस्**-पुं-७-परि.-દેવ।
द्र० अमृतपशब्दः ।

**अमृतान्धस्** (બ. વ.)-पु.-८८-દેવ।
द्र० अनिमिषशब्दः ।

**अमृताश**-पुं-७-परि-દેવ।
द्र० अमृतपशब्दः ।

**अमृताशन**-पुं-७-परि-દેવ।
द्र० अमृतपशब्दः ।

**अमृतासङ्ग**-न.-१०५३-મોરથુથુ
कर्परिका तुत्थ, अञ्जन
*अमृतमा सजत्यनेन इति अमृतासङ्गम् ।

**अमेधस्**-पुं-३५२-મૂર્ખ
द्र० अज्ञशब्दः ।
*नास्ति मेधाऽस्येति अमेधाः "मन्दाल्पाच्च" (३।३।१३८) इति अस् समासान्तः ।

**अमोघा**-स्त्री-२०५ (शि. ५०)-પાર્વતી
द्र० अद्रिजाशब्दः ।

**'(अमोघा)**-स्त्री-११४४-કાકચ
द्र० पाटलाशब्दः ।

**अम्बक**-न.-५७५-આંખ
द्र० अक्षिशब्दः ।
* अम्बते इति अम्बकम् ।

**अम्बर**-न-१६३-આકાશ
द्र० अनन्त शब्दः ।
* अमन्त्यत्र देवा इति अम्बरं "जठरक्रकर"-(उणा-४०३) इत्यारान्तो निपात्यते अम्बते शब्दायते इत्यन्ये ।

**अम्बर**-न.-६६६-વસ્ત્ર
द्र० अंशुक शब्दः ।
* अमत्यनेन शोभां इति अम्बरं "जठर"-(उणा-४०३) इति अरे निपात्यते ।

**अम्बरस्थली**-स्त्री-९३८-(शि. १५८)પૃથ્વી
द्र० अचलाशब्दः ।

**अम्बरीष**-पुं न.-१०२०-કડાઈ
☐ भ्राष्ट्र ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

* अम्यते इति अम्बरीषः "अमेर्वरादिः"-(उणा–५५५) इति ईषः पुंक्लीबलिङ्गोऽयम् ।

**अम्बष्ठ**–पुं–८९६–બ્રાહ્મણ અને વૈશ્યાથી ઉત્પન્ન થયેલો

*अम्बायां तिष्ठतीति अम्बष्ठः, "गोऽम्बाऽऽम्ब" (२।३।३०) इति षत्वं, "ङ्यापो बहुलं नाम्नि" (२।४।९७) इति ह्रस्वः ।

**'अम्बष्ठा'**–स्त्री–११४८–જુઈ

द्र० मागधीशब्दः ।

**अम्बा**–स्त्री–३३५–માતા, નાટકમાં વપરાતો શબ્દ

* अमति वात्सल्यं गच्छतीति अम्बा "शम्यमेर्णिद्वा"–(उणा–३१८) इति बः अम्बते अपत्यं जल्पतीति वा ।

**अम्बा**–स्त्री–५५७–માતા

□मातृ, जननी, प्रसू, सवित्री, जनयित्री, [जानी शे. ११७, जनित्री शि. ४५] ।

* अमति याति वात्सल्यं इति अम्बा, "शम्यमेर्णिद्वा"–(उणा–३१८) इति बः अम्बते जल्पतीति वा ।

**अम्बिका**–स्त्री–४६–શ્રી નેમિનાથ પ્રભુની શાસન દેવી

□(कुष्माण्डी) ।

* लोकानामम्बेव इति अम्बिका ।

**अम्बिका**–स्त्री–२०३–પાર્વતી

द्र० अद्रिजाशब्दः ।

* अम्बैव इति अम्बिका, जगन्मातृत्वात् ।

**अम्बु**–न.–१०६९–પાણી

द्र० अप्शब्दः ।

*अमतीति अम्बु क्लीबलिङ्गः "कम्यमिभ्याम्"–(उणा–७९९) इति बुः प्रत्ययः ।

**अम्बुकूर्म**–पुं–१३५०–જળવાંદરો, શિશુમાર મચ્છ

□शिशुमार, (जलकपि), उष्णवीर्य, महावस ।

* अम्बुनः कूर्मः इति अम्बुकूर्मः ।

**अम्बुघन**–पुं–१६६ (शे. ३०)–પાણીના કરા ।

द्र०–करक शब्दः ।

**'अम्बुज'**–पुं–११४५–સમુદ્ર ફળ, પાણીમાં થતું નેતર

द्र० इज्जलशब्दः ।

**अम्बुतस्कर**–पुं–९८ (शे. १०)–સૂર્ય

द्र० अंशुशब्दः ।

**(अम्बुद) (टी)**–पुं–१०५१–અભ્રખ

द्र० अभ्रकशब्दः ।

**अम्बुवत्**–पुं–९५३–બહુ પાણીવાળો દેશ

□अनूप ।

* अम्बुमान् जलप्रायः ।

**अम्बूवृद्धि**–स्त्री–१०८७–જળવૃદ્ધિ

□पूर, प्लव ।

*अम्बुनो वृद्धिराधिक्यं इति अम्बुवृद्धिः

**अम्बुकृत**–न.–२६७–થુંક ઉડે તેવું વચન

सथूत्कार, (सनिष्ठेव) ।

*अनम्बुनो अम्बुनः करणं इति अम्बूकृतम् ।

**अम्ल**–पुं–१३३८ (शि. १२१)-ખાટોરસ

द्र० अम्लशब्दः ।

**अम्भस्**–न.–१०६९–પાણી

द्र० अप्शब्दः ।

*अमति निपनप्रदेशामिति अम्भः, क्लीबलिङ्गः, "अमेर्भहौ"–[उणा–९६२) इति अस् ।

**अम्भःसू**–पुं–११०४–ધૂમાડો

द्र० अग्निवाह शब्दः ।

*अम्भः सूते धूमजत्वाद् मेघानामिति अम्भःसूः।

**अम्ल**–पुं–१३८८–ખાટો રસ

□पाचन, दन्त शठ, [अम्ल शि. १२१] ।

* अमति इति अम्लः, "शामाश्या"–(उणा–४६२) इति लः अम्ब्लोऽपि ।

**अम्लवेतस**–पुं–४१७–આંબલી, કોકમ

□ तिन्तिडीक, चुक्र, वृक्षाम्ल ।

* अम्लवेतसवृक्षनिर्यासः इति अम्लवेतसः ।

**अम्लिका**–स्त्री–११४३-આંબલીનું વૃક્ષ

□तिन्तिडी, 'तिन्तिली, चिञ्चा, अम्बलिका,



Jain Education International For Private & Personal Use Only www.jainelibrary.org

आम्लीका' ।

* अम्लैव इति अम्लिका ।

**'अम्लिका'**—स्त्री-११४३—આંબલીનું વૃક્ષ

द्र० अम्लिकाशब्दः ।

**अय**—पुं-१३७९—સારું નસીબ

* शुभं एति इति अयः "अच्"-(५।१।४९) इति निपात्यते ।

**अयःकण्टकसंच्छन्ना**-स्त्री-७८७ (शे. १५०) —મહાશિલા, શસ્ત્ર વિશેષ, મોટી તોપ.

☐ [महाशिला शे. १५०]

**अयप्रतिमा**—स्त्री-१४६४—લોઢાની પ્રતિમા

सूर्मी, (सूर्मि), स्थूणा ।

अयोमयी प्रतिमेति अयःप्रतिमा ।

**अयन**—न.-१५८-શિશિર વિગેરે ત્રણ ત્રણ ઋતુનું અયન.

* अयतेऽर्कोऽनेन इति अयनम् ।

**अयन**—न.-९८३—માર્ગ

द्र० अध्वन्शब्दः ।

* अयन्तेऽनेन इति अयनम् ।

**अयन्त्रित**—न.-१४६६—અંકુશ રહિત

द्र० अनर्गल शब्दः ।

* न यन्त्रितमिति अयन्त्रितम् ।

**अयस्**—न.-१०३८-લોઢું

☐लोह, कालायस, शस्त्र, पिण्ड, पारसव, घन, गिरिसार, शिलासार, तीक्ष्ण, कृष्णामीस, [धीन, धीवर, शे. १५९] ।

* अयते मेयमिति अयः क्लीबलिङ्गः "असू" -(उणा-९५२) इति असू प्रत्ययः ।

**अयाचित**—न.-८६६—માંગ્યા વિના મળેલ

☐ अमृत, (अविनश्वर) ।

* नयाचितमिति अयाचितम् ।

**अयि**-अ.-१५३७-સંબોધન

द्र० अङ्गशब्दः ।

एतीति अयि 'स्वरेभ्यः इः"-(उणा-६०६) इति इ प्रत्ययः, यथा- अयि ! जीवितनाथ ! जीवसि ।

**(अयुग्)**-१५ (परि.) એકી સંખ્યા વાચી શબ્દ

**अयुक्छद**-पुं-११३३-સપ્તપર્ણ

☐सप्तपर्ण, 'विशालत्वच्, शारद, (शारदी), विषमच्छद' ।

*अयुञ्जि विषमाणि च्छदान्यस्यायुक्छदः ।

**अयुक्पलाश**-पुं-१६(परि)-સપ્તપર્ણ

☐(सप्तपलाश, विषमपलाश-(परि) ।

**अयुक्शक्ति**—पुं-२६ परि—મહાદેવ

☐(नवशक्ति, विषमशक्ति-(परि.) ।

**अयुगिषु**—पुं-१६ (परि)-કામદેવ

*(पञ्चेषु. विषमेषु) ।

**अयुङ्नेत्र**—पु-१६ परि—મહાદેવ

☐(त्रिनेत्र, विषमनेत्र) ।

**अयुत**—पुं न.-८७३-દશ હજાર

*दश सहस्राणि इति अयुतम्, अयं पुंक्लीबलिङ्गः ।

**अयोऽग्र**-पुं न.-१०२७-સાંબેલું

☐मुसल, मुशल, मुषल,[अयोनि शि.८९] ।

*अयः अग्रे मुखे अस्येति अयोऽग्रम्, पुंक्लीबलिङ्गः, अयोनिरित्येके यद् **वैजयन्ती**-"अयोनिर्मुसलोऽस्त्री स्यात्" इति ।

**अयोघन**-पुं-९२०-લોઢાનાં ઘણ

☐घट ।

*अयो हन्यतेऽनेनेति अयोघनः ।

**अयोध्या**—स्त्री-९७५—નગરીનું નામ

☐साकेत, कोसला, (कोशला) ।

*न योध्यते परैरिति अयोध्या ।

**अयोनि**-पुं-१०२७ (शि. ८९)-સાંબેલું

द्र०अयोऽग्रशब्दः ।

**अर**—पुं-२८-१८માં તીર્થંકર

"सर्वो नाम महासत्त्वः, कुले य उपजायते ।
तस्याभिवृद्धये, वृद्धैरसावर उदाहृतः" ॥

इति वचनादरः, तथा गर्भस्थे भगवति जनन्या स्वप्ने सर्वरत्नमयोऽरो दृष्ट इति अरः ।

**अर**-पुं-१२८-આરો

*इयर्ति गच्छति इति अरः ।

**अर**-पुं-६९३-સાતમાં ચક્રી

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*"सर्वोनाम महासत्वः, कुले य उपजायते ।
तस्याभिवृद्धये वृद्धे, रसावर उदाहृतः ॥"

इति वचनादरः, तथा गर्भस्थे भगवति जनन्या स्वप्ने सर्वरत्नमयोऽरोःदृष्ट इति अरः ।

**'अरग्वध'**-पुं ११४०-गरमाळो

**अरघट्टक**-पुं-१०९३-रेंट

☐पादावर्त ।

*अरान् घट्टयति अरा घट्टन्तेऽत्रेति वा अरघट्टः केऽरघट्टकः ।

**अरजस्**-स्त्री-५२०-नववर्षनी छोकरी

☐गौरी, नग्निका ।

*नास्ति रजोऽस्या इति अरजा, अप्राप्तर्तुः ।

**अरणि**-पुं. स्त्री-८२५-अग्नि उत्पन्न थाय तेवुं काष्ठ

☐निर्मन्थदारु ।

*इयर्ति वह्निरस्मिन् इति अरणिः पुंस्त्रीलिङ्गः, ऋद्रुसृ'-(उणा६३८) इति अणिः ।

**अरण्य**-पुं-न.-१११०-वन

द्र० अटवीशब्दः ।

*इयति भ्राम्यन्ति अस्मिन्निति अरण्यं पुंक्लीबलिङ्गः "धाग्राजि"-(उणा-३७९) इति अन्य महत्वविवक्षायां तु अरण्यानी ।

**अरण्यश्वन्**-पुं-१२९२ वरु

☐कोक, ईहामृग, वृक ।

*अरण्यस्यश्वा इति अरण्यश्वा ।

**अरण्यानी**-स्त्री-११३०-मोटुं वन

☐महारण्य ।

इयर्ति भ्राम्यति अस्मिन्निति अरण्यं पुंक्लीबलिङ्गः "भ्राग्राजि"-(उणा-३७९) इति अन्य महत्व विवक्षायां तु अरण्यानी ।

**अरति**-स्त्री-७२-तीर्थंकरमां न होय ते अढार दोष पैकी आठमो दोष

*अरतिः रति विपर्यय इति अष्टमो दोषः ।

**अरति**-स्त्री-३१४-उत्कंठा

☐औत्सुक्य, रणरणक, उत्कण्ठा, उत्कण्ठ, आयल्लक, हृल्लेख, उत्कलिका ।

*इयर्ति सुखमस्यामिति अरतिः स्त्रीलिङ्गः "खल्यमि"-(उणा-६५३) इति अति न रति इति अरतिः इति वा ।

**अरत्नि**-पुं स्त्री.-५९९-कोणीथी कनिष्ठा सुधीनुं माप.

*इयर्ति प्रमाणतां इति अरत्निः पुंस्त्रीलिङ्गः 'अर्तेरत्नि" (उणा-६८२) न रत्नि इति वा ।

**अर**-न. १५३० जलदी

द्र. अञ्जसा शब्दः ।

*इयर्ति इति अरं, बाहुलकाद् अम् प्रत्ययः, यथा -"अरं याति तुरङ्गमः" ।

**(अर)**-न.-१४७०-जलदी

द्र० अविलम्बित शब्दः ।

*इयर्ति इति अरं बाहुलकाद् अम्प्रत्ययः यथा "अरंयाति तुरङ्गमः" ।

**अरविन्द**-न.-११६०-कमळ

☐कमल, नलिन, पद्म, कुशेशय, शतपत्र, सहस्रपत्र राजीव, पुष्कर, बिसप्रसूत, (बिसप्रसूत), नालीक, तामरस महोत्पल, जलरुह, जलजन्मन्, जलज, सरोरुह, सरोरुह, सरोजन्मन्, पङ्करुह, पङ्करुह, पङ्कजन्मन्, पङ्कज, (वारिज, सरसिरुह), [बिसप्रसून शि. १०६] ।

*अरान् विन्दतीति अरविन्दं, "निगवादेर्नाम्नि" (५।१।६१) इति शब्दः ।

**अरर**-न.-१००६-बारणुं

☐कपाट, अररि, कुवाट, [कवाट शि. ८७]।

*इयर्ति इति अररम् "ऋच्छिचाटि"-(उणा-३९७) इति अरप्रत्ययः ।

**अरर**-पुं-१००७-बारणुं

द्र. अरर शब्दः ।

*इयर्तीति अररिः पुंक्लीबलिङ्गः "नदिवल्लि"-(उणा-६९८) इति अरिः ।

**(अररे!)**-अ.-१५३७-संबोधन

द्र० अङ्गशब्दः

**अराति**-पुं-७२९-शत्रु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्र० अभिमातिशब्दः ।

☐इयर्ति इति अरातिः "वस्यर्तिभ्या" (उणा-६६३) इति आयिः

**अराफल**-पुं-७८७(शे.-दुःस्फोट नामनुं शस्त्र

☐दुःस्फोट, (अराफल) ।

**अराल**-न.-१४५७-वांकुं

☐कुञ्चित, नत, आविद्ध, कुटिल, वक्र, वेल्लित वृजिन, भङ्गुर, भुग्न, जिह्म, ऊर्मिमत् ।

*इयर्ति इति अरालं "ऋकृमृ-" (उणा-४७५) इति अलः अरानालाति वा ।

**अरसञ्चित**-न.-७८७-(शे १४९) चक्र

☐चक्र, (वलयप्राय) ।

**(अरि)**-पुं-१०-(परि)-वध्य-वधक भाव संबंधमां वध्यथी जोडवा योग्य शब्द

**अरि**-पुं-७२८-शत्रु

द्र. अभिमाति शब्दः ।

*इयर्ति इति अरिः, "स्वरेभ्यः इः" (उणा-६०६) इति इः प्रत्ययः ।

**अरित्र**-न.८७९-वहाणनुं सुकान

☐केनिपात, कोटिपात्र, [कर्ण शि. ७८] ।

इयर्ति अनेन नौः इति अरित्रं, "लू-धू-सू-(५।२।८७) इति इत्रः प्रत्ययः ।

**अरि**--न.-७५५-पैडुं

☐रथाङ्ग, रथपाद, चक्र ।

*आराः सन्ति अस्मिन् इति अरि ।

**अरिषड्वर्ग**-पुं-१४२३-कामादि ७ आंतर शत्रु

**अरिष्ट**-न.-१२५-उत्सव

द्र०अजन्यशब्दः ।

*नास्ति रिष्टं क्षेमं अत्रेति अरिष्टम् ।

**अरिष्ट**-पुं-२२०-विष्णुनो शत्रु

☐मधु, धेनुक, चाणूर, पूतना, यमलार्जुन, कालनेमि, हयग्रीव, शकट, कैटभ, कंस, केशिन्, मुर, साल्व, मैन्द, द्विविद, राहु, हिरण्यकशिपु, बाण, कालिय, नरक, बलि, शिशुपाल ।

*न विद्यते रिष्टं क्षेमं अस्मादिति अरिष्टः ।

**अरिष्ट**-न.-४०८-छास वलोवेलुं दही

☐दण्डाहत, कालशेय, घोलत, गोरस, रसायन ।

*न रेषति हिनस्तीति अरिष्टम् ।

**अरिष्ट**-न.-९६७-सुवावडनुं घर

☐सूतिकागृह ।

*न रिष्यते हिंस्रैः कृतरक्षत्वादिति अरिष्टम् ।

**अरिष्ट**-पुं-११३८-अरिठानुं वृक्ष

☐केनिल ।

*नास्ति रिष्टमशुभं अस्मादिति अरिष्टो रक्षाहेतुः ।

**अरिष्ट**-पुं-१०३९-लींमडो

☐निम्ब, पिचुमन्द, 'सर्वतोभद्र, हिङ्गुनिर्यास मालक,' ।

*न रिष्यते इति अरिष्टः ।

**अरिष्ट**-पुं-११८६-लसण

☐रसोन, लशुन, म्लेच्छकन्द, महौषध, महाकन्द, 'लशून' ।

*न रिष्यते इति अरिष्टः ।

**अरिष्ट**-पुं-१३२१-कागडो

द्र०अन्यभृत्शब्दः ।

* नास्ति रिष्टं मरणमस्य अमृतभुक्तत्वाद् अरिष्टः ।

**अरिष्टनेमि**-पुं.-३०-बावीसमां तीर्थंकर

☐नेमि, [नेमिन् शि. २] ।

*अरिष्टस्य अशुभस्य नेमिरिव प्रध्वंसकत्वाद् अरिष्टनेमिः यद्वागर्भस्थे भगवति जनन्यारिष्टरत्नमयो महानेमिर्दृष्ट इति रिष्टनेमिः अपश्चिमादिशब्दवत् नञ्पूर्वत्वे अरिष्टनेमिः ।

**(अरिष्टहन्)**-पुं-२२१-विष्णु

द्र०अच्युतशब्दः ।

**अरुण**-पुं-९५-सूर्य

द्र०अंशुशब्दः ।

* अरुणः सारथिरस्यास्ति इति अरुणः, अभ्रादित्वाद् अप्रत्ययः अरुणवर्णत्वाद्वा अरुणः ।

**अरुण** पुं-१०२-सूर्यनो सारथि

द्र०अनूरुशब्दः ।

*अरुणवर्णत्वात् अरुणः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अरुण**-पुं-१३९६-રાતોવર્ણ

☐बालसन्ध्याभ ।

*इयर्ति इति अरुणः "ऋकृवृ"—(उणा-१४६) इति उणः प्रत्ययः ।

**अरुणसारथि**-पुं ९८—સૂર્ય

द्र०अंशुशब्दः ।

*अरुणः सारथिरस्य इति अरुण सारथिः ।

**अरुणावरज**-पुं-२३०-ગરુડ

☐गरुड, (गरुल), शाल्मलिन्, विष्णुवाहन, सौपर्णय, वैनतेय, सुपर्ण, सर्पाराति, वज्रिजित्, वज्रतुण्ड, पक्षिस्वामिन्, काश्यपि, स्वर्णकाय, तार्क्ष्य, कामायुष्, गरुत्मत्, सुधाहृत् [ विषापह शे. ७९ पक्षिसिंह, मापक्ष, महावेग, विशालक, उन्नतीश, स्वमुखभू, शिलाऽनीह, अहिभुज् शे ८०] ।

*अरुणस्य अवरजः इति अरुणावरजः ।

**अरुणोपल**-पु-१०६४—માણેક

☐पद्मराग, लोहितक, लक्ष्मीपुष्प [शोणरत्न शि. ६४] ।

*अरुणः शोण उपलः इति अरुणोपलः शोणरत्नमपि ।

**अरुन्तुद**-पुं-५०१-પીડા કરનાર

☐व्यथक, मर्मस्पृश् ।

* अरुस्तुदतीति अरुन्तुदः "बहुविद्वरु- (५।१।१२४) इति खश् ।

**अरुन्धती**-स्त्री-८४९ વસિષ્ઠનીપત્ની

☐अक्षमाला ।

* न रुणद्धि इति अरुन्धती ।

**अरुन्धतीजानि** पुं. ८४९ વસિષ્ઠઋષિ

☐वशिष्ठ ।

* अरुन्धती जायाऽस्य इति इति अरुन्धतीजानिः " जायायाजानिः " (७।३।१६४) इति जान्यादेशः ।

**अरुष**-न-४६५-ઘા, નહિ રુઝાતું ઘારું

☐क्षत, व्रण, ईर्म, क्षणनु ।

* इयर्ति व्यथामनेनेति अरुः क्लीबलिङ्गः "रुधर्ति-(उणा ११७) इति उस् प्रत्यय ।

**अरे!**-अ.-१५३७-સંબોધન

द्र० अङ्गशब्दः ।

*न रिणाति इति अरे, विचू यथा अरे ! क्षत्रियखेट् ।

**अर्क**-पु-९२-પાંચ જ્યોતિષી દેવો પૈકી બીજા જ્યોતિષી દેવ.

**अर्क**-पुं-९५-સૂર્ય

द्र० अंशुशब्द ।

अर्च्यते स्तूयते इति अर्कः अर्च्यत इति वा "भीण्शलि" (उणा- २१) इति कः ।

**अर्क**-पुं-८९(शे.५)-ગણદેવતા

**अर्कज**-पुं-२८२-સ્વર્ગનાવૈદ્ય

द्र०अश्विजशब्दः ।

☐अर्काज्जातौ इति अर्कजौ नित्यद्विचनान्तोऽयम् ।

**अर्कतनय**-पुं-७११-કર્ણ

द्र० अङ्गराजशब्दः ।

☐अर्कस्य तनयः इति अर्कतनयः ।

**अर्कबान्धव**-पुं-२३६-શાક્યસિંહ સાતમાં બુદ્ધ

☐शाक्यसिंह, (शक्य), राहुलसू, सर्वार्थसिद्ध, गौतमान्वय, मायासुत, शुद्धोदनसुत, देवदत्ताग्रज, (शौध्धोदनि) ।

*अर्कस्य बान्धवः सूर्यवंश्यत्वादिति अर्कबान्वः ।

**अर्करेतोज**-पुं-१०३-સૂર્યપુત્ર

☐रेवन्त, प्लवग, हयवाहन ।

*अर्करेतसो जातः इति अर्करेतोजः, "अजातेः" —(५।३।१७०) इति डः ।

**अर्कसूनु**-पुं-१८४-યમ

द्र० अन्तकशब्दः ।

*अर्कस्य सूनुः इति अर्कसूनुः ।

**अर्कसोदर**-पुं-१७७ ઇન્દ્રનો ઐરાવણ હાથી

द्र० अभ्रमाङ्गशब्दः ।

* अर्कस्य सोदरः इति अर्कसोदरः समुद्रजातत्वात् ।

**अर्गल**-त्रि.-१००४-ભૂંગળ

☐परिघ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*इयर्ति इति अर्गला त्रिलिङ्गः, "ऋजनेर्गोऽन्तश्च" (उणा ४६७) इति अलः अरेण कर्षणेन गलतीति वा।

**अर्गलिका**–स्त्री ५–१००५–नानी भूगळ

☐सूचि, (सूची)।

*अल्पा अर्गला इति अर्गलिका।

**'अर्ग्वध'**–५–११४०–गरमाळो

द्र० आरग्वधशब्दः।

**अर्घ**–५ं–८६८–किंमत

☐मूल्य, वस्न, वक्रय, [भाटक शे. १५४]।

*अर्यते पण्यमस्मिन् इति अर्घः "स्थार्ति"–(उणा–१०९) इति घः अर्थति पण्यमनेति वा।

**अर्घ्य**–न.–५००–पूजा माटेनुं पाणी

* अर्घार्थमर्घ्यं वारि "पाद्यार्घ्ये" (७।१।२३) इतियः प्रत्ययः।

**(अर्घ्य)**–न.–१२१४ (टी) एक जातनुं मध

**अर्चा**–स्त्री–४४७–पूजा

☐पूजा, अर्हणा, सपर्या, [अपचिति शे१०५]

*अर्चनमिति अर्चा।

**अर्चा**–स्त्री–१४६३ प्रतिबिंब

☐ प्रतिमा, प्रतियातना, प्रतिनिधि, प्रतिच्छाया, प्रतिच्छन्द प्रतिकाय, प्रतिरुप, प्रतिबिम्ब, प्रतिमान, प्रतिकृति।

*अर्च्यते इति अर्चा।

**अर्चित** ५ं. ४४७ पूजाएलो

द्र० अपचितशब्दः।

*अर्च्यते इति अर्चित।

**अर्चिष**–स्त्री न. ९९ किरण

द्र० अंशुशब्दः।

*अर्च्यते इति अर्चिः स्त्रीक्लीबलिङ्गः।

**अर्चिष्**–स्त्री न.–११०२–अग्निनी ज्वाळा

☐हेति, कीला, शिखा, ज्वाला।

*अर्च्यते इति अर्चिः स्त्रीक्लीबलिङ्गः "रूचर्चि (उणा–९८९) इति इस् प्रत्यय।

**अर्चिष्मत्**–५ं–१०९८–अग्नि

द्र० अग्नि शब्दः

☐अर्चींषि विद्यन्तेऽस्येति अर्चिष्मान्।

**अर्च्य**–५ं–४४६ पूज्य

☐प्रतीक्ष्य।

*अर्चनीयः इति अर्च्यः पूज्यः।

**अर्जुन**–५ं–७०२ कार्तवीर्य, कृतवीर्यनो पुत्र

—हैहय, कार्त्तवीर्य दोः सहस्रभृत्।

*अर्जति कीर्तिमिति अर्जुनः 'यम्यजि"–(३०॥२८८) इति उनप्रत्ययः।

**अर्जुन**–५ं–७०८ अर्जुन

☐फाल्गुन, पार्थ, सव्यासाचिन्, धनञ्जय, राधावेधिन्, किरीटिन्, ऐन्द्रि, विष्णु, श्वेतह्वय, नर, बृहन्नट, गुडाकेश, सुभद्रेश, कपिध्वज, बीभत्स, (बीभत्सु), कर्णजित्, (कर्णारि), [विजय, चित्रयोधिन् चित्राङ्गसूदन शे १३८, योगिन्, धन्विन्, कृष्णपक्ष, शे. १३९, बीभत्सु शि. ६०]।

*अर्जतिकीर्तिमिति अर्जनः।

**अर्जुन**–न.–१०४४–सोनुं

☐सुवर्ण, स्वर्ण, हेमन्, हेम, हिरण्य, हाटक, वसु, आष्टापद, काञ्चन, कल्याण, कनक, महारजत, रै, गाङ्गेय, रुक्म, कलधौत, लोहोत्तम, वह्निबीज, गारुड, गैरिक, जातरुप, तपनीय, चामीकर, चन्द्र, भर्मन् निष्क, कार्तस्वर, कर्बुर, (कर्वुर), 'कर्बुर, कर्चुर,' जाम्बूनद, शातकुम्भ, रजत, भूरि, भूत्तम, [लोमन, शुक्र, तारजीवन, औजस, दाक्षायण, रक्तवर्ण, श्रीमत्कुम्भ, शिलोद्भव शे. ११३, वैणव, कर्णिकार-च्छाय, वेणुतटीभव शे. ११४, शातकौम्भ शि. ९१]।

*अर्ज्यते पुण्यैः इति अर्जुनम्।

**अर्जुन**–५ं–११३५–अर्जुन नामनुं वृक्ष.

☐ककुभ, 'नदीसर्ज, वीरतरु, इन्द्रद्रु'।

* अर्ज्यते इति अर्जुनः शौक्ल्याद् वा।

**अर्जुन**–न.–११९५–सर्व जातनुं घास

☐तृण।

*अर्ज्यते इति अर्जुनम्, "सर्वं च तृणमर्जुनं' इति भागुरिः।

**अर्जुन**–५ं–१३९३–श्वेतवर्ण

☐श्वेत, श्येत, सित, शुक्ल, हरिण, विशद, शुचि, अवदात, गौर, शुभ्र, वलक्ष, '(अवलक्ष)', धवल, पाण्डुर, पाण्डर, पाण्डु।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*अर्ज्यते इति अर्जुनः ।

**अर्जुनध्वज**-पुं-७०५-હનુમાન

☐हनुमत्, वज्रकङ्कट, मारुति, केशरिसुत, आञ्जनेय, [हमनूत् शि. ६] ।

*अर्जुनस्य पार्थिवस्य ध्वजः ।

**अर्जुनी**-स्त्री-१२६५-ગાય

द्र० अहन्या शब्दः ।

*अर्ज्यते इति अर्जुनी ।

**अर्णव**-पुं-१०७३-સમુદ્ર

द्र० अकूपार शब्दः ।

*अर्णांसि सन्त्यस्येति अर्णवः "तमिस्त्रार्ण-"(७।२।५२) इति साधुः ।

**अर्णवमन्दिर**-पुं-१८८-જલદેવતા

☐वरुण, प्रचेतस्, जलपति, यादःपति, (अपांनाथ यादोनाथ) पाशिन्, (पाशपाणि), मेघनाद, जलकान्तार, परञ्जन, [प्रतीचीश, दुन्दुभि, उद्दाम, संवृत शे. ३९] ।

*अर्णवो मन्दिरमस्य इति अर्णवमन्दिरः ।

**अर्णस**-न.-१०६९-જળ

द्र०अपूशब्दः ।

☐अर्यते तदिति अर्णः, "अतीर्णभ्याम्"-(उणा-९६९) इति नस् प्रत्ययः, ऋणोतीति वा "अस्" (उणा-९५२) इति अस प्रत्ययः ।

**अर्ति**-स्त्री-७७५-ધનુષ્યનો અગ્રભાગ

☐अटनी, (अटनि) ।

*अर्यतेऽनया इति अर्तिः स्वादित्वात् क्तिः ।

**अर्ति**-स्त्री-१३७१-દુઃખ

☐दुःख, असुख, वेदना, व्यथा, पीडा, बाधा, आभील, कृच्छ्र, कष्ट, प्रसूतिज, आमनस्य, (वैमनस्य) प्रगाढ 'अमानस्य,' [वाध शि. १२५] ।

*अर्दनमिति अर्तिः ।

**अर्थ**-पुं-१९२-ભંડાર, નિધાન

☐वित्त, रिक्थ, स्वापतेय, रै, सार, विभव, वसु द्युम्न, द्रव्य, पृक्थ,, ऋक्थ स्व, ऋक्ण, द्रविण, धन, हिरण्य ।

*अर्यतेऽसौ इति अर्थः, "कमिपृगार्तिभ्यस्थः" (उणा-२२५) इति थः, अर्थ्यते इति वा ।

**अर्थ**-१५१४ पुं-કાર્ય

☐कार्य, कृत्य, प्रयोजन ।

*अर्थ्यते इति अर्थः ।

**अर्थ**-(प. व.)-पुं-१३८४ (शि. १२५)-સ્પર્શ વગેરે પાંચ વિષયો

द्र० इन्द्रियार्थशब्दः ।

**अर्थ-दूषण**-न.-७३८-આદાન-વિગેરે ચાર પ્રકારના અર્થના દૂષણો

*अर्थस्य दूषणं इति अर्थदूषणं चतुर्धा आदानं अदानं, विनाशः परित्यागश्चार्थस्य ।

**अर्थना**-स्त्री-३३८-યાચના

द्र० अध्येषणा शब्दः ।

*अर्थनमिति अर्थना ।

**अर्थप्रयोग** पुं-८८०-વ્યાજનો ધંધો

☐कुसीद, 'कुशीद, कुषीद', वृद्धिजीवन ।

*अर्थस्य प्रयोगः कालांतरेण दानमिति अर्थप्रयोगः।

**अर्थवाद**-पुं-२७०-પ્રશંસા વખાણ

☐वर्णना, ईडा, स्तव, स्तोत्र, स्तुति, नुति, श्लाघा, प्रशंसा ।

*अर्थस्य प्रशस्यस्य वदनमित अर्थवादः ।

**अर्थ-विज्ञान**-न-३११-બુદ્ધિના આઠ ગુણ પૈકી એકગુણ

अर्थस्य यथावस्थतया विज्ञानमिति अर्थविज्ञानम् ।

**अर्थव्ययज्ञ**-पुं-३८७-દાની અને ભોગી

☐सुकल ।

*अर्थव्ययं जानाति इति अर्थव्ययज्ञः दाता भोक्ता च ।

**अर्थिक**-पुं-७९४-બંદીજન

☐वैतालिक, बोधकर, सौखसुप्तिक' [सौखशायिनक सौखशाय्यक शि ६९] ।

*अर्थिन एव अर्थिकाः ।

**अर्थिन्**-पुं-३८८-યાચક

☐याचक, वनीपक, मार्गण, याचनक, तर्कुक ।

*अर्थनशीलः इति अर्थी अर्थोऽस्यास्तीति वा, "अर्थान्ता"-(७।२।८) इति इन् ।

**अर्थ्य**-न.-१०६२-શિલાજિત

□शिलाजतु, गिरिज, गैरेय, अश्मज ।
*अर्थ्यते रसायनार्थिभिः इति अर्थ्यम् ।

**अर्दना**-स्त्री-३८८ યાચના
द्र० अध्येषणाशब्दः ।
*अर्दनमिति अर्दना ।

**अर्ध**-पुं-१४३४-ટુકડો, અડધો ભાગ.
□खण्ड, शकल, भित्त, नेम, शल्क, दल. [खण्डल शि. १८२]।
*ऋध्नोति इति अर्धः आविष्टलिङ्गः पुंस्ययं यथा ग्रामार्धः अर्धपटी, अर्धो नगरं वाच्यलिङ्गः इत्येके यट्टीका- "खण्डमात्रवृत्तितायां त्वभिधेयलिङ्गः इति समप्रविभागे त्वर्द्धं नपुंसकम् ।

**अर्धकाल**-पुं-२०० (शि. ४८)-શંકર
द्र०अट्टहासिनूशब्दः ।

**अर्धकूट**-२०० (शि ४१) શંકર
द्र० अट्टहासिन्शब्दः ।

**अर्धगुच्छ**-पुं-६६०-ચોવીશ શેરનો હાર
*गुच्छस्य अर्धमिति अर्धगुच्छः ।

**अर्धजाह्नवी**-स्त्री-१०८४-કાવેરી નદી ।
□कावेरी ।
*अर्धं जाह्नवीति अर्धजाह्नवी ।

**अर्धतूर**-पुं-२९४ (शि ८७)-યુદ્ધ સમયનું વાદ્ય

**(अर्धनाराच)**-पुं-७८० (टी) બાણનો એક પ્રકાર

**अर्धमाणव**-पुं-६५९-સોળ સેરનો હાર
*अर्धेन माणव इव लघुत्वादर्धमाणवः ।

**अर्धरात्र**-पुं-१४५-અડધી રાત.
□निशीथ, महानिशा, [निःसंताप शि. ११]।
अर्धेन रात्रेरिति अर्धरात्रः ।

**अर्धलोटिका**-स्त्री-४०० (शि. ९७)-નાની રોટલી
□शष्कुली ।

**अर्धवीक्षण**-न.-५७७-વાંકી નજરે જોવું તે
द्र० अक्षिविकूणित शब्दः ।
*अर्धं वीक्षणमस्येति अर्धविक्षणम् ।

**अर्धहार**-पुं-६६०-६४ સેરનો હાર
*अर्धं हारस्येति अर्धहारः ।

**अर्धेन्दु**-पुं-७८०-અર્ધચન્દ્રની આકૃતિવાળું બાણ
*अर्धेन्दु सदृशमुखलीहत्वात् इति अर्धेन्दुः अर्धचन्द्रः।

**(अर्बुद)**-पुं-४७१ (टी).-વ્યાધિનો એક પ્રકાર

**अर्बुद**-पुं न.-८७४-દશ કરોડ
*दशकोटयोऽर्बुदम् , पुंक्लीबलिङ्गः ।

**अर्भ**-पुं-३२८-નાનું બાળક
□बाल, पाक, शिशु, डिम्भ, पोत, शाव, स्तनन्धय, पृथुक, उत्तानशय, क्षीरकण्ठ, कुमारक (कुमार), [स्तनप, क्षीरप [शि. २१] ।
*इयर्ति वृद्धिमिति अर्भः, "गृदृरमि"-(उणा-३२७) इति भः, ऋम्यत इति वा ।

**अर्य**-पुं-३५९-સ્વામી, નાયક
द्र०अधिपशब्दः ।
*अर्यते सेव्यते इति अर्यः । "स्वामिवैश्येऽर्य (५।१।३३) इति साधुः ।

**अर्य** (બ.વ.)-पुं-८६४-वैश्य
□भूमिस्पृश्, वैश्य, ऊरव्य, ऊरुज, विश् ।
*अर्यन्ते इति अर्याः, "स्वामिवैश्येऽर्यः । (५।१।३३) इति साधुः ।

**अर्यमदेवा**-स्त्री-११२-ઉત્તરા ફાલ્ગુની નક્ષત્ર
□उत्तरफाल्गुनी ।
*अर्यमा देवोऽस्या इति अर्यमदेवा ।

**अर्यमन्**-पुं-९५-સૂર્ય-
द्र० अंशुशब्दः ।
*अरीनामयतीति अर्यमा, "श्वन्मातरिश्वन्"-(उणा-९०२) इत्यादिना अन् निपात्यते ।

**अर्या**-स्त्री-५२४-વૈશ્ય જાતિમા ઉત્પન્ન થયેલી સ્ત્રી
□अर्याणी ।
* स्वतः पुंयोगं विना स्त्री "अर्यक्षत्रियाद्वा"-(२।४।६६) इति विकल्पेन ङीः तत्सन्नियोगे आन्-चान्तः पक्षे आपिति अर्या ।

**अर्याणी**-स्त्री-५२४-वैश्य જાતિમાં ઉત્પન્ન થયેલી સ્ત્રી
□ अर्या
*स्वतः पुंयोगं विना स्त्री, "अर्यक्षत्रियाद्वा"-(२।४।६६) इति विकल्पेन ङीः, तत्सन्नियोगे आन् चान्तः इति अर्याणि, पक्षे आप् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अर्या**—स्त्री—५२३—વૈશ્યની સ્ત્રી

*अर्यस्य भार्या इति अर्या ।

**अर्वती**—स्त्री—१२३३ (शे. १८०)—ઘોડી

द्र० अश्वाशब्दः ।

**अर्वन्**—पुं—१२३३—ઘોડો

□घोटक, तुरग, तार्क्ष्य तुरङ्ग, अश्व, तुरङ्गम, गन्धर्व, सप्ति वीति, वाह, वाजिन्, हय हरि, [क्रमण, कुण्डिन्, प्रोथिन्, हेषिन्, सकीर्णक, पालक, परुल, किण्विन्, कुटर, सिंहविक्रम शे. १७८, माषाशिन्, केसरिन्, हंस, मुद्गभुज्, गूढभोजन, वासुदेव, शालिहोत्र, लक्ष्मीपुत्र, मरुद्रथ शे. १७९, चामरिन्, एकशफ शे.१८०] ।

*इयर्ति इति अर्वा "स्नामदिपदि"—(उणा—९०४) इति वन् ।

**अर्व**—न.—१४४३—અધમ, હલકું

द्र० अणकशब्दः ।

*इयर्तीति अर्व, अयं वाच्यलिङ्गः ।

**अर्वाक्**—अ.—१५४२—પહેલા

□अवरमञ्चतीति अर्वाक् पृषोदरादित्वात्, यथा—षोडशादर्वाक् ।

**अर्शस्**—न.—४६८—મસા

□दुर्नामन्, गुदाङ्कुर, [गुदकील शि. ३४]

*इयर्ति पीडामनेनेति अर्शः अयं क्लीबलिङ्गः "अर्तेरुराशौच" (उणा ९६७) इति अस् प्रत्ययः ।

**अर्शस**—पु—४६१—મસાના રોગવાળો

□अर्शोयुज् ।

* अर्शोऽस्त्यस्येति अर्शसः, अभ्रादित्वाद् अः ।

**अर्शोघ्न**—पुं—११८९—સૂરણકન્દ

□सूरण, (सुरण), कन्द ।

*अर्शांसि हन्तीति अर्शोघ्नः ।

**अर्शोघ्न**—न. ४०९ (शे. १०१)—પા ભાગના પાણી વાળું દહીં

द्र० तक्रशब्दः ।

**अर्शोयुज्**—पुं—४६१—હરશના રોગવાળો.

□अर्शस ।

*अर्शसा युज्यते इति अर्शोयुक् ।

**अर्हणा**—स्त्री—४४९—પૂજા

द्र० अर्चाशब्दः ।

*अर्हणमिति अर्हणा ।

**अर्हत्**—पुं—२४—અરિહંત ભગવાન

द्र० अधीश्वरशब्दः ।

* चतुस्त्रिंशदतिशयान् सुरेन्द्रादिकृतां पूजां वार्हतीत्यर्हन् "सुगद्विषार्हः"—(५।२।२६) इति अतृशप्रत्ययः अरिहननात् रजोहननात् रहस्याभावच्चेति वा पृषोदरादित्वात् ।

**अर्हत्**—पुं—२३५ (शे. ८१)—બુદ્ધ

द्र० अद्वय शब्दः ।

**(अर्हभट्टारक)**—पुं—२३६—પૂજ્ય અરિહંત

**अर्हित**—पुं—४४६—પૂજિત

द्र० अपचितशब्दः ।

*अर्ह्यते इति अर्हितः ।

**अल**—न.—१२११—વીંછીનો આંકડો

*अलतीति अलम् ।

**अलक**—पुं. न.—५६९—ગુંચડાવાળા વાળ

□कर्कराल, खङ्गर, चुर्णकुन्तल, (कुटिलकेश) ।

*अलयति भूषयतीति अलकः पुंक्लीबलिङ्गः, "दकन"—(उणा—२७) इति अकः ।

**अलका** स्त्री १९१—કુબેરની નગરી

□प्रभा, वस्वौकसारा [वसुसारा, वसुप्रभा शे. ४१]।

*अलति भूषयतीति अलका, 'दकन"—(उणा—२७) इति अकः क्षिपकादित्वादित्वाभावः ।

**अलक्त**—पुं—६८६—લાખનો રસ

□याव, [यावक, अलक्तक शि. ५८] ।

*न लजते अलति वा अलक्तः "पुतपित्त"—(उणा—२०४) इति ते निपात्यते यद्वा ईषद्रक्तोऽरक्तस्ततो रस्य लत्वं के अलक्तकोऽपि ।

**अलक्तक**—पुं—६८६—(शि. ५८)—લાખનો રસ

द्र०—अलक्तशब्दः ।

*न लजते अलति वा अलक्तः "युतपित्त"—(उणा—२०४) इति ते निपात्यते, यद्वा ईषद्रक्तोऽरक्तस्ततोरस्य लत्वं केऽलक्तकोऽपि ।

**अलक्ष्मी**—स्त्री—१३८०—દરિદ્રતા, અશુભ, ભાગ્ય

* निर्ऋतिं कालकर्णिका न लक्ष्मीरिति लक्ष्मीः



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अलगर्द**-पुं-१३५०-પાણીનો સર્પ

☐'अलगर्द्ध', अलीगर्द [शि. ११६], जलव्याल ।

*न लान्नर्दयति निर्विषत्वादिति अलगर्दः, "अलीव गर्दतीति अलीगर्दः इत्यन्ये ।

**'अलगर्द्ध'** पुं-१३०५-પાણીનો સર્પ

द्र० अलगर्दशब्दः ।

**अलङ्करिष्णु**-पुं-३८९-શોભા બનાવનાર

☐मण्डन ।

*अलंकरोति इत्येवं शीलः इति अलङ्करिष्णुः, "भाज्यलङ्कृञ्"-(५।२।२८) इति इष्णुः प्रत्ययः ।

**अलङ्कर्मीण**-पुं-३५४-કાર્ય કરવામાં સમર્થ

☐कर्मक्षम ।

*अलं कर्मणे इति अलंकर्मीणः "अषडक्षाशितंग्वलङ्ककर्मा-(७।१।१०६) इति ईन प्रत्ययः ।

**अलङ्कार**-पुं-६४९-ભૂષણ

☐भूषण, परिष्कार, आभरण ।

*अलं क्रियतेऽनेन इति अलङ्कारः कटककेयूरादिः ।

**अलङ्कारसुवर्ण**-न.-१०४६-અલંકાર માટેનું સોનું

☐शृङ्गीकनक, आयुध ।

*अलङ्काराय सुवर्णमिति अलङ्कारसुवर्णम् ।

**अलम्**-અ.-१५२७-બસ,પર્યાપ્ત

☐कृतं, भवतु, अस्तु, किम् ।

*अलनमिति अलं बाहुलकाद् अम्, यथा

**द्वयाश्रय**-''गोत्रेण पुष्करावर्त, किं त्वया गर्जितैः कृतम् ? । विद्युताऽलं भवत्वद्भिर्महसाऊचुर्बिलंघनम् ।।

**अलम्भूष्णु**-पुं-४९१ (शे.१०८)-સમર્થ, સહનશીલ

द्र०क्षमशब्दः ।

**अलर्क**-पुं-१२८०-રોગી કુતરો

*अल्यते वार्यते दशनभयादिति अलर्कः, उन्मत्तः श्वा, "निष्कतुरुष्क" (उणा-२६) इति के निपात्यते ।

**अलस**-पुं-३८३-આળસ

द्र०अनुष्णशब्दः ।

*नलसतीति अलसः अलतीति वा "तय्यणि" उणा-५६९) इति असः ।

**अलसेक्षणा**-स्त्री-५०६-મદપાનથી મસ્ત નેત્રવાળી સ્ત્રી

*अलसमीक्षणमालोकोऽस्या अलसेक्षणा, अत्र ईक्षणलक्षणाया क्रियाया अलसत्वं असाधारणः, स्वकीयो गुणः ।

**अलात**-न.-११०३-અંગારો કોયલો.

☐उल्मुक ।

*अलति दीप्त्या मण्डयतीति अलातं, "कृवृकलि"-(उणा-२०९) इत्यातक् ।

**अलातज्वाला**-स्त्री-१२०३-જ્વાલા રહિત અગ્નિ

☐उल्का ।

*अलातस्य ज्वालेति अलातज्वाला ।

**अलाबू**-स्त्री. न.-११५५-તુંબડી

☐तुम्बी, तुम्बि, तुम्बा, अलाम्बू, (आलाबू), आलाबु, लाबू, लाबु ।

*न लम्बते इति अलाबूः स्त्रीक्लीबलिङ्गः काक्वाऽत्र नञ् नञोलम्बे"-(उणा-८३८) इति उः प्रत्ययः

**'अलाम्बू'**-स्त्री-११५५-તુંબડી

द्र०अलाबूशब्दः ।

**अलि**-पुं-१२११-વીંછી

द्र०आलिशब्दः ।

**अलि**-पुं-१२२२-ભમરો

☐भ्रमर, मधुकृत्, भृङ्ग, चञ्चरीक, शिलीमुख, इन्दिन्दिर, (अलिन्), रोलम्ब, द्विरेफ [भसल, मधुकर शि. १०९] ।

*अलति इति अलिः, "कुशिकुटि"-(उणा-६१९) इति णिदिः अली नकारान्तो वा ।

**अलिक**-न.-५७३-કપાળ

☐भाल, गोधि, अलीक, ललाट ।

*अल्यते भूष्यते तिलकादिभिः इति अलिकम्, कीकल्यलि"- (उणा-३८) इति इकः प्रत्ययः ।

**अलिञ्जर**-पुं. न. १०२२-પાણી ભરવાનું મોટું પાત્ર

☐मणिक ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*अलं जरयति जलं इति अलिञ्जरः पुं–क्लीबलिङ्गोऽयम्, पृषोदरादित्वात् ।

**(अलिन्)**–पुं–१२१२–ભમરો

द्र०अलिशब्दः ।

**अलिन्द्**–पुं. न.–१०१०–બારણા આગળનો ઓટલો

☐प्रघाण, प्रघण, (उपलिन्दक), 'प्राघाण, आलिन्द' ।

*अलति भूषयति द्वारं इति अलिन्दः पुंक्लीबलिङ्गः "कल्यलि"–(उणा–२४६) इति इन्दक् ।

**अलीक**–न.–२६५–અસત્ય વચન

द्र०अनृतशब्दः ।

*अलति वारयति सद्गतिं इति अलिकम्, "स्यमिकषि"–(उणा–४६) इतीकः ।

**अलीक**–न.–५७३–કપાળ

द्र०अलिकशब्दः ।

*अल्यते भूष्यते तिलकादिभिः इति अलिकं "क्रीकल्यलि"–(उणा–३८) इति ईकः, "स्यमिकषि" (उणा–४६) इतीकेऽलीकम् ।

**अलीगर्द**–पुं–१३०५ (शि.११६)–પાણીનો સર્પ

द्र०अलगर्दशब्दः ।

*अतीवगर्दतीति अलीगर्दः ।

**अलोक**–पुं.–१३६५ લોક સિવાયનો પ્રદેશ.

* लोकादन्यः इति अलोकः आकाशस्वरुपः ।

**अल्प**–न.–१४२६–થોડું

द्र०अणुशब्दः ।

*अलति इति अल्पम्, "भापाचणि"–(उणा–२९६) इति पः प्रत्ययः ।

**अल्पतनु**–पुं–४५३–નાના શરીરવાળો

☐पृश्नि, [किरात शे.१०५] ।

*अल्पातनुः अस्य इति अल्पतनुः ।

**अल्पमारिष**–पुं ११८४–તાંદળજો, (ખાવા લાયક શાક વિશેષ).

☐तण्डुलीय, तण्डुलेर, मेघनाद ।

*अल्पं मृणाति हिनस्तीति अल्पमारिषः "अभिमृभ्यां णित्"–(उणा–५४९) इति इषः प्रत्ययः ।

**अल्पिष्ठ**–न.–१४२८–ઘણું થોડું

द्र०अणीयस्शब्दः ।

*अतिशयेनाल्पं इति अल्पिष्ठम्, "गुणाङ्गाद्" (७।३।९) इति इष्ठप्रत्ययः ।

**अल्पियस्**–न.१४२८–ઘણું થોડું

द्र०अणीयस्शब्दः ।

*अतिशयेनाल्पं इति अल्पियः "गुणाङ्गाद्"–(७।३।९) इतीयसुः ।

**अल्लुका**–स्त्री–४२९ (शे. १०१–ધાણા, કોથમીર

द्र०कुस्तुम्बुरुशब्दः ।

**अवकटिका**–स्त्री–३२४–(शे.५०)–આકાર છુપાવવો

द्र०अवहित्थाशब्दः ।

**अवकर**–पुं–१०१६–કચરો

☐सङ्कर

*अवकीर्यते बहिः क्षिप्यते इति अवकरः ।

**अवकीर्ण**–न.–१४७६–વીખરાયેલું

☐अवध्वस्त

*अवकीर्यते इति अवकीर्णम् ।

**अवकीर्णिन**–पुं–८५४–વ્રતભંગ કરનાર બ્રહ્મચારી

☐क्षतव्रत ।

*अवान्तरे कीर्णं रेतोऽस्यऽस्ति इति अवकीर्णी यत् स्मृतिः –"ब्रह्मचार्यवकीर्णी स्यात् कामतस्तु स्त्रियं व्रजन्" ।

**अवकुटारिका**–स्त्री–३२४(शे.५०)આકાર છુપાવવો

द्र०अवहित्थाशब्दः ।

**अवकृष्ट**–पुं–४४०–બહાર કાઢેલ

☐निष्कासित, (निस्सारित) ।

*अवकृष्यते दूरीक्रियते स्म इति अवकृष्टः ।

**(अवकेशिन्) (टी)**–पुं–१११६–વાંઝયું વૃક્ષ

☐फलवन्ध्य, अवकेशिन् ।

**अवक्षेपणी**–स्त्री–१२५२–લગામ, દોરી.

☐रश्मि, वल्गा कुशा, [वल्ग, वागा शि.१११]।

*अवक्षिप्यतेऽनया इति अवक्षेपणी ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अवगण**-पुं.-१४५७(शि. १३०) એકલો
द्र० एकशब्दः ।

**अवगणना**-स्त्री-१४७९ (शि. १३३) તિરસ્કાર
द्र० अनादरशब्दः ।

**अवगणित**-न.-१४७९ અપમાન કરાયેલું
द्र० अनादृतशब्दः ।
* अवगण्यते इति अवगणितम् ।

**अवगत**-न.-१४९६-જાણેલું
☐विदित, बुधित, बुद्ध, ज्ञात, अवसित, मनित, प्रतिपन्न ।
*अवगम्यते इति अवगतम् ।

**अवग्रह**-पुं-१६६-વરસાદનો અંતરાય
☐ अवग्राह (वग्रह, वग्रह)
*वृष्टिविघ्ने अवात्परो ग्रहः इति अवग्रहः, "वर्षविघ्ने"-(५।३।५०) इति वा अल् ।

**'अवग्रह'**-पुं-१२२६ હાથીનું કપાળ
☐अवग्राह ।
*अवगृह्यतेऽङ्कुशेनेति अवग्रह

**अवग्राह**-पुं-१६६-વરસાદનો અંતરાય
द्र० अवग्रह शब्दः ।
*वृष्टिविघ्ने अवात्परो ग्राहः इति अवग्राहः, "वर्षविघ्ने"-(५।३।५०) इति वा अल ।

**'अवग्राह'**-पुं.-१२२६-હાથીનું કપાળ
अवग्राह

**अवघात**-पुं-१०१७-ધાન્ય વગેરેનું ખાંડવું
☐कुण्डन ।
*मुसलेन अवहननमिति अवघातः ।

**अवचूल**-पुं-७५० ધ્વજાની નીચેનો ભાગ.
*अवाङ्मुखा चूलाऽस्येति अवचूलः ।

**अवज्ञा**-स्त्री-१४७९ અપમાન, તિરસ્કાર
द्र० अनादरशब्दः ।
*अवज्ञानमिति अवज्ञा, अवमाननाऽवगणने अपि ।

**अवज्ञात**-न.-१४७९-તિરસ્કાર કરાયેલું
द्र० अनादृतशब्दः ।
*अवज्ञायते इति अवज्ञानम् ।

**अवट**-पुं.-९३१ મૃગાદિને પાડવા માટે કરેલો ખાડો
☐अवपात ।
*अव्यन्तेऽनेनेति अवटः "दिव्यवि"—(उणा-१४२) इति अटः प्रत्ययः ।

**अवट**-पुं-१३६४ ભૂમિનો ખાડો
द्र० अगाधशब्दः ।
*अवत्यस्मादवटः "दिव्यवि-" (उणा-१४२) इत्यटः, न वटतीति वा अवाक्, अटन्ति अस्मिन् बाहुलकात् "पुंनाम्नि-(५।३।१३०) इति घे पृषोदरादित्वात् साधुः ।

**'अवटि'**-स्त्री-ભૂમિનો ખાડો
द्र० अगाधशब्दः ।

**अवटी**-स्त्री-१६३ (शे. २७) આકાશ
द्र० अनन्तशब्दः ।

**अवटीट**-पुं-४५१ ચપટા નાકવાળો, ચીબો.
☐अवनाट, अवभ्रट, (नतनासिक, चिपिटनासिक), [चिपिट, नम्रनासिक शे. १०५] ।
*अवनता नासिकाऽस्या इति अवटीटः "नासानति"- (७।१।१२७) नासायां नासानमनेऽप्यय वर्तते ।

**अवटु**-पुं-स्त्री-५८६ ડોક અને માથાની સંધિનો પાછલો ભાગ
☐घाटा, कृकाटिका शिरःपीठ [शे. १२४]
*अवतीति अवटुः पुं-स्त्रीलिङ्गः "अव्यर्ति-गृभ्योऽटुः"- (उणा-७६२) इति अटुः निपात्यते ।

**अवतंस**-पुं-न.-६५४ મસ્તક ઉપર મુગટના આકારે નાંખેલી માળા
☐आपीड, शेखर, उत्तंस, [वतंस शि. ५३] ।
*अवतंस्यतेऽनेन इति अवतंसः, अवतनोति शोभामिति वा "व्यवाभ्यां"-(उणा-५६५) इति सः प्रत्ययः, "वाऽवाप्यो"-(३।२।१५६) इति अवस्य वादेशे वतंसोऽपि पुंक्लीबलिङ्गः ।

**अवतंस**-पुं-६५४ કાનનું આભૂષણ
☐उतंस, कर्णपूर ।
*अवतंस्यतेऽनेन इति अवतंसः अवतनोति शोभामिति वा, "व्यवाभ्यां"- (उणा-५६५) इति सः, "वाऽवाप्यो"-(३।२।१५६) इति अवस्य वादेशे वतंसोऽपि पुंक्लीबलिङ्गोऽयम् ।

**अवतमस**-न.-१४६ અંધકાર
द्र० अन्धकारशब्दः ।
*अवगतं अवहीनं वा तमः इति अवतमसं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"समवान्धात्तमसः" (७।३।८०) इति अत्, अमरस्तु:-"ध्वान्ते गाढेऽन्धतमसम्, क्षीणेऽवतमसं तमः विश्वक्‌ संतमसम् इति विशेषमाह ।

**अवतार**-पुं-१०८७ तीर्थ, घाट

☐घट्ट, तीर्थ ।

*अवतरन्त्यनेनाऽस्मिन् वा अवतारः, नद्या· दीनामवतरणमार्गः, "अवात्"--(५।३।१३३) इति घञ् ।

**अवतोका**-स्त्री-१२६७ वत्स मरी जतो होय तेवी गाय.

☐स्रवद्‌गर्भा, 'वतोका' ।

*अवस्रुतं तोकमपत्यं अस्या इति अवतोका अपप्रसववती, "मृतवत्सा स्रवद्‌गर्भा" इति **माला**।

**अवदंश**-पुं-९०७ मदिरा पीवानी प्रीति उत्पन्न करे तेवो भक्ष्य पदार्थ

☐उपदंश, चक्षण, मद्यपाशन ।

*अवदश्यते इति अवदंशः ।

**अवदात**-पुं-१३९३ सफेद

द्र० अर्ज्जुन शब्दः ।

*अवदायते शोध्यते इति अवदातः ।

**अवदात**-न.-१४३६ उज्वळ

द्र० अनाविल शब्दः ।

*अवदायते इति अवदातम् ।

**अवदान**-न. सारुं आचरण

☐शुद्धकर्मन् ।

*अवदीयतेऽनेन इति अवदानम् ।

**अवदारण**-न.-८९२ पावडो, कोदाळो.

☐खनित्र ।

*अवदार्यतेऽनेन इति अवदारणम् ।

**'अवदाह'**-न.-११५८-काळा वाळानुं मूळ

द्र०उशीरशब्दः ।

**अवद्य**-न.-१४४२-अधम, हलकुं

द्र०अणकशब्दः ।

*नोद्यते इति अवद्यम्, "वर्येपसर्यावद्य"-(५। १।३२) इति साधुः ।

**(अवधयाज्ञा)**-स्त्री-३३५-अवध्य ब्राह्मणना पोका-रमां वपरातो शब्द

☐अब्रह्मण्य ।

**अवधान**-न.-१३७८-समाधि.

☐समाधान प्रणिधान, समाधि ।

*अवधीयते इति **अवधानम्**।

**'अवधान'**-न.-१५१८-अवधान देखरेख.

☐अवेक्षा, प्रतिजागर ।

**अवधि**-स्त्री-९६२-मर्यादा

द्र० अन्तशब्दः ।

*अवधीयते इति अवधिः ।

**अवध्वस्त**-न.-१४७६-विखरायेलुं

☐अवकीर्ण ।

अवध्यस्यते इति अवध्वस्तम् ।

**अवन**-न.-१५०२-खुश करवुं, तृप्त

☐प्रीणन, तर्पण ।

*अवः प्रीतावत्र अव्यते इति अवनम् ।

**अवनत**-न.-१४५६-नमेलुं, अधोमुख

☐अवाग्र, 'अधोमुख', आनत ।

*अवनं स्मेति अवनतम् ।

**(अवनद्ध)**-न.-२८७-मृदंग, ढोल

द्र० आनद्धशब्दः ।

*अवनह्यते स्मेति अवनद्धम्

**अवनाट**-पुं-४५१-चपटा नाकवाळो, चीबो

द्र०अवटीटशब्दः ।

*अवनता नासिकाऽस्य इति अवटीटः, "नासा· नति"-(७।१।१२७) इति अवात् प्रत्ययः नासायां नासानमनेऽप्ययं वर्तते ।

**अवनि**-स्त्री-९३६-पृथ्वी

द्र०अचलाशब्दः ।

*अवति प्रजाः, अव्यते भूपैरिति वा अवनिः "सदिवृति"-(उणा-६८९) इति अनिः प्रत्यय ।

**(अवनी)**-स्त्री-९३६-पृथ्वी

द्र०अचलाशब्दः ।

**अवन्ति** (ब.व)-९५६-मालवदेश

☐मालव ।

*अव्यन्ते इति अवन्तयः पुंसि "वद्यवि"-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(उणा -६६५) इति अन्तिः प्रत्ययः ।

**अवन्तिसोम**-न.-४१५-કાંજી, રાબ

☐काञ्चिक, काञ्जिक, धान्याम्ल, आरनाल, तुषोदक, कुल्माषाभिषुत, (कुल्माष, अभिषुत), शुक्त, कुञ्जल, चुक्र, धातुघ्न, उन्नाह, रक्षोघ्न, कुण्डगोलक, महारस, सुवीराम्ल सौवीर, [गृहाम्बु, मधुरा शे. १०१] ।

*अवन्तिषु सूयते इति अवन्तिसोमम् ।

**अवन्ती**-स्त्री-९७६-ઉજ્જયિની નગરી

☐उज्जयनी, विशाला, पुष्पकरण्डिनी ।

*अव्यते इति अवन्ती ।

**अवन्ध्य**-न.-२४८ (शि. १७) ૧૪ પૂર્વ પૈકી ૧૧માં પૂર્વનું નામ

☐कल्याण ।

**अवपात**-पुं-९३१-હરણાદિને પાડવા માટે કરાયેલો ખાડો

☐अवट ।

*अवपतन्ति मृगा अत्रेति अवपातः ।

**अवभृथ**-पुं-८३४-યજ્ઞ પછી કરાતું સ્નાન

☐यज्ञान्त ।

*अवभ्रियते पूर्यतेऽनेन इति अवभृथः, "अवभृ-(उणा २२८) इति कित् थः ।

**अवभ्रट**-पुं-४५१-ચપટા નાકવાળો ચીબો

द्र०अवटीटशब्दः ।

*अवनता नासिकाऽस्य इति अवभ्रटः, "नासा-नति"-(७।१।१२७) इत्यवात्प्रत्ययः, नासायां नासा-नमनेऽप्ययं वर्तते ।

**अवम**-न.-१४४२-અધમ, હલકું

द्र०अणकशब्दः ।

*अवोभवं इति अवमम् ।

**अवमत**-न.-१४७९-અપમાન કરાયેલું

द्र०अनादृतशब्दः ।

*अवमन्यते इति अवमतम् ।

**अवमताङ्कुश**-पुं-१२२२-અંકુશને નહિ ગણનારો હાથી

☐गम्भीरवेदिन् ।

*अवमतमवगणितमङ्कुशमनेन इति अवमताङ्कुशः ।

**अवमर्द**-पुं-८००-પીડવું, શત્રુસૈન્યથી દેશને થયેલી પીડા

☐पीडन ।

*अवमर्दनमिति अवमर्दः ।

**अवमानन**-न.-१४७९ (शि.१३३)-તિરસ્કાર

द्र०अनादरशब्दः ।

**अवमानित**-न.-१४७९-અપમાનિત થયેલું

द्र०अनादृतशब्दः ।

*अवमान्यते इति अवमानितम् ।

**अवरोधन**-न.-७२७-અંતઃપુર

द्र० अन्तःपुर शब्दः ।

*अवरुध्यते इति अवरोधः, भुज्यादित्वात् कर्मण्यनटयवरोधनम् ।

**अवयव**-पुं-५६६-શરીરના અવયવ

द्र० अङ्गशब्दः ।

*अवयौति इति अवयवः ।

**'अवर'**-न.-१२२८-હાથીની પાછલી જાંઘ વગેરેનો ભાગ

☐अपरा, [अवरा शि. ११०] ।

**(अवरज)**-पुं-९-(પરિ)-પછી ઉત્પન્ન થયેલ

**अवरज**-पुं-५५२ નાનોભાઈ

द्र० अनुजशब्दः ।

*अवरे जातः इति अवरजः ।

**अवरति**-स्त्री-१५२२-निर्वृत्ति, અટકવું તે

☐निवृत्ति, उपरम, विरति, उपरति, आरति ।

*अवात् परा रतिः इति अवरतिः ।

**अवरा**-स्त्री-१२२८ (शि. ११०)-હાથીનો પાછળનો ભાગ

☐अपरा 'अवर' ।

**अवरोध**-पुं-७२७-અંતઃપુર

द्र० अन्तःपुरशब्दः ।

*अवरुध्यते इति अवरोधः, अयं एकपुरुषपरिगृहिते स्त्रीसमुदाये वर्तते तन्निवासे तु उपचारात् ।

**अवरोधिक**-पुं-७२६-અંત પુરનો અધિકારી

द्र० अन्तःपुराध्यक्षशब्दः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*अवरोधे नियुक्त इति अवरोधिकः, आवरोधिकोऽपि ।

**अवर्ण**-पुं-२७१-निंदा

द्र० अपवादशब्दः ।

*विपरीतं वर्णनमिति अवर्णः ।

**'अवलक्ष'**-पुं-१३९३-सफेदवर्ण

द्र० अर्जुनशब्दः ।

**अवलग्न**-पुं न.-६०७-शरीरनो मध्यभाग

□मध्य, विलग्न मध्यम ।

*अवलग्ति इति अवलग्नम्, पुंक्लीबलिङ्गोऽयम् ।

**अवलम्बित**-न.-१४७८-अवलंबन वाळुं

□उच्चण्ड, 'अविलम्बित' ।

*अवलम्ब्यते स्मेति अवलम्बितम् ।

**अवलिप्तता**-स्त्री-३१६-अभिमान

द्र० अभिमानशब्दः ।

*अवलिप्तस्यभावः इति अवलिप्तता, अवलेपः इति ।

**अवलोकन**-न.-५७७-जोवुं, देखवुं.

□ईक्षण, निशामन, निभालन, निशमन, निध्यान, दर्शन द्योतन, निर्वर्णन ।

*अवलोक्यते इति अवलोकनम् ।

**अववाद**-पुं-२७७-आज्ञा, हुकम

□आज्ञा, शिष्टि, निर्देश, आदेश, निदेश, नियोग, शासन ।

*अवनम्य वदनमिति अववादः ।

**अवश्य**-न.-१५४०-निश्चय

□नूनम् ।

*अवश्यायते इति अवश्यं बाहुलकात्डिदम्, यथा-"अवश्यं यातारश्चिरतरमुषित्वाऽपि विषयाः" ।

**अवश्याय**-पुं-१०७२-हिम

□तुहिन, प्रालेय, मिहिका, 'महिका,' हिम, तीहार, तुषार,

*अवश्यायते इति अवश्यायः "तन्व्यधीण्" (५।१।६४) इति णः ।

**अवष्वाण**-पुं-४२४-भोजन करवुं ते

द्र० अदनशब्दः ।

*अवष्वणनमिति अवष्वाणः, "व्यवात्स्वनोऽशने (२।३।४३) इति षत्वम् ।

**अवसक्थिका**-स्त्री-६७९-पलांठी

□पर्यस्तिका, परिकर, पर्यङ्क, [पल्यङ्क शि. ५६] ।

*अवनध्धे अवकृष्टे वा सक्थिनी अस्यामवसक्थिका "सक्थ्यक्ष्णः" (७।३।१२६) इति टसमासान्ते ङीः ततः स्वार्थे कः ।

**अवसक्थिका**-स्त्री-६८३ (शि.५६)खाटलो, पलंग

द्र० खट्वाशब्दः ।

**अवसर**-पुं-१५०९-समय, प्रसंग

द्र० अन्तरशब्दः ।

*अवसरति इति अवसरः ।

**अवसर्प**-पुं.-७३३-गुप्तचर

□हेरिक, गूढपुरुष, प्रणिधि, यथार्हवर्ण, मन्त्रविद् चर, वार्त्तायन, स्पशाचार ।

*अवच्छन्नं सर्पति इति अवसर्पः ।

**अवसर्पिणी**-स्त्री-१२७-हानिकाळ

*अवसर्पो भावानां पतत्प्रकर्षता सोऽस्यामस्ति इति अवसर्पिणी ।

**अवसाद**-पुं.-३१२-मननी पीडा

□विषाद, साद, विषण्णता ।

*अवसदनमिति अवसादः ।

**अवसान**-न.३२४-मृत्यु

द्र० अत्ययशब्दः ।

*अवसीयते इति अवसानम् ।

**अवसान**-न.-९६२-सीमा, हद

द्र० अन्तशब्दः ।

*अवसीयतेऽनेन इति अवसानम् ।

**अवसित**-न.-१४९६-जाणेलुं

द्र० अवगतशब्दः ।

*अवसीयते इति अवसितम, "दोसोमास्थ"-(४।४।११) इति इत्वम् ।

**अवसेकिम**-पुं-४००-खाद्य वस्तु वडां

□बटक ।

*अवसेकेन निवृत्तो अवसेकिमः, "भावादिमः"

(६।४।२१) इति इमः भक्ष्यविशेषः ।

**अवस्कन्द**-पुं-८०० (शि. ७०) धाड, छलकपटथी एकदम छापो मारवो.

द्र० अभ्यवस्कन्दशब्दः ।

**अवस्कर**-पुं-६३४-विष्ठा, मळ

□विश्, विष्ठा, शकृत् गूथ, पुरीष, शमल, उच्चार, वर्चस्क, वर्चस्, [विष्, अशुचि शि. ५०] ।

*अव-अधः कीर्यते इति अवस्करः, वर्चस्कादित्वात् साधुः ।

**अवस्था**-स्त्री-१३७७-दशा

□दशा, स्थिति ।

*अवस्थानं इति अवस्था ।

**अवहस्त**-पुं-५१३-हाथनी पाछळनो भाग

*हस्तपृष्ठेऽवकृष्टो हस्त इति अवहस्तः ।

**अवहार**-पुं-१३५१-ग्राह, मगर

□ग्राह, तन्तु, तन्तुनाग, नाग, (जलसर्प), तन्तुण, [वरुणपाश शि. १२१] ।

*अव हरति इति अवहारः "अवहसासंस्रोः" (५।१।६३) इति णः ।

**अवहित्था**-स्त्री. न.-३१४-आकार छुपाववो

□आकारगोपन, [आकारगूहन, अवकटिका, अवकुटारिका शे. ९०, गूहजालिका शे. ९१] ।

*न बहिः स्थं चित्तमस्यां इति अवहित्था स्त्री-क्लीबलिङ्गः पृषोदरादित्वात साधुः ।

**अवहेल**-त्रि-१४७९-तिरस्कार, अनादर.

द्र० अनादरशब्दः ।

"हेडृङ् अनादरे" अवलेहनमिति अवहेलं त्रिलिङ्ग ।

**अवाक्श्रुति** पुं-३४८-बहेरो अने मुंगो

□एडमूक, अनेडमूक, (कलमूक) ।

* न विद्यते वाक्श्रुतिश्चास्येति अवाक्श्रुतिः ।

**अवाग्र**-न.-१४५६-अधोमुख, नमेलुं.

द्र० अवनतशब्दः ।

*अवनतं अग्रं अस्य इति अवाग्रं अधोमुखमित्यर्थः ।

**अवाच्**-पुं-३४९-मुंगो

□मूक, [जड, कड शे. ९३] ।

*न विद्यते वागस्येति अवाक् ।

**अवाच**-पुं-४५७-नीचा मुखवाळो

□अधोमुख, [न्युब्ज शे. १०६] ।

*अवाञ्चति इति अवाङ् ।

**अवाच्**-अ.-१५२६-नीचे

□अधस्ताद्, अधस् ।

**अवाची**-स्त्री-१६७-दक्षिण दिशा

द्र० अपाचीशब्दः ।

*अपाञ्चत्यस्यां रविः इति अपाची, जपादित्वाद् वत्वे अवाची इत्यपि ।

**अवाच्य**-न.-२६६-न बोलवा लायक वचन

□अनक्षर ।

*न वाच्यमिति अवाच्यम् ।

**अवार**-पुं.न.—१०७९—आ तीर, आ तरफनो कांठो.

*समुद्रादेरर्वाक् पार्श्वे तटं न वार्विद्यतेऽस्येति अवारं पुंक्लीबलिङ्गः न व्रियते इति वा ।

**अवारपार**-पुं-१०७३-समुद्र

द्र० अकूपारशब्दः ।

*अवारमिव पारं परतटस्याऽवारपारः ।

**अवि**-पुं-१२७६-घेटुं

□मेष, ऊर्णायु, हुड, उरण, उरभ्र, मेण्ढक, (मेण्ढ), वृष्णि, एडक, रोमश, हुडु, संफाल, शृङ्गिण, मेड ।

*अव्यते इति अविः "पदिपठि-" (उणा-६०७) इति इः ।

**अवित**-न.-१४९७-रक्षण करायेलुं

□गुप्त, गोपायित, त्रात, त्राण, रक्षित ।

*अव्यते इति अवितम् ।

**अविदुग्ध**-न.-१२७८-घेटीनुं दूध

□अविसोढ, अविदूस, अविमरीस ।

*अवेःदुग्धं इति अविदुग्धम् ।

**अविदूस**-न.—१२७८—घेटीनुं दूध

द्र० अविदुग्धशब्दः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*अवेः दुग्धमिति अविदूसं "अवेर्दुग्धे (६।२।६४) इति साधुः ।

**अविद्या**—स्त्री १३७४-અજ્ઞાન

☐अहंमति, अज्ञान ।

*विरुद्धवेदनमविद्या अधर्मानर्थवद् विपर्ययेऽत्र नञ् यदाह—"अनित्याशुचिदुःखात्मसु नित्यशुचिसुखात्मख्यातिरविद्या" ।

**अविनीत**-पुं-४३१-ઉદ્ધત, વિનય વગરનો

☐उद्धत ।

*न विनीतोऽविनीतः ।

**अविनीता**—स्त्री–५२८–અસતી, કુલટા સ્ત્રી

☐असती, इत्वरी, पुंश्चली, चर्षणी, बन्धकी, पांसुला, स्वैरिणी, कुलटा, [दुःश्रृङ्गी, बन्धुदा, कलकूणिका, घर्षणी, लाञ्छनी, खण्डशीला, मदनमालिका, शे. ११२, त्रिलोचनां, मनोहारी शे. ११३] ।

*न विनीता इति अविनीता ।

**(अविनश्वर)**—न.–८६६–ભાગ્ય વિના મળેલું

☐अयाचित, अमृत ।

**अविमरीस**—न.–१२७८–ઘેટીનું દૂધ

द्र० अविदुग्धशब्दः ।

*अवेःदुग्धमिति अविमरीसम्, "अवेःदुग्धे—" (६।२।६४) इति साधुः ।

**अविरत**—न.–१४७१–નિરંતર, નિત્ય

द्र० अजस्रशब्दः ।

*न विरतमिति अविरतम् ।

**अविरति**-स्त्री–७३–અરિહંતોને ન હોય તેવા ૧૮ દોષ પૈકી ૧૬મો દોષ

*अविरतिः अप्रत्याख्यानं इति षोडशःदोषः ।

**अविरल**—न.–१४४७-નિરંતર

☐निबिड, निरन्तर, निबिरीस, घन, सान्द्र, नीरन्ध्र, वहल, (बहल), दृढ, गाढ ।

*न विरलं इति अविरलम् ।

**(अविरूढक)**—न.–११८३ (टी.)–તાડના ફળના બીજ

*"अविरूढकं तालास्थिमज्जा" इति गौडाः ।

**अविलम्बित**—न.–१४७० –શીઘ્ર, જલદી

☐त्वरित, सत्वर, तूर्णं शीघ्र, क्षिप्र, द्रुत, लघु, चपल, (अर, आशु, मङ्क्षु, 'अञ्जसा, झटिति, स्राक्, अह्नाय, द्राक्, सपदि) ।

*न विलम्बितमिति अविलम्बितम् ।

**'अविलम्बित'**—न.–१४७८–અવલંબનવાળું, શીઘ્ર

☐उच्चण्ड, अवलम्बित ।

**अविला**—स्त्री–१२७७–ઘેટી

☐मेषी, कुररी, रुजा, जालकिनी, वेणी ।

*न विलति भिनत्ति इति अविला, अवीन् लातीति वा ।

**(अविसंवादिवाच्)**—पुं ७३४–વિશ્વાસુ

☐आप्त, प्रत्ययित ।

**अविसोढ**—न.–१२७८–ઘેટીનું દૂધ

द्र० अविदुग्धशब्दः ।

*अवेःदुग्धमिति अविसोढम्, "अवेःदुग्धे—" (६।२।६४) इति साधुः ।

**अविस्र**—न.–५७–દુર્ગંધ વિનાનું

* अविस्रं अनामगन्धि ।

**अवी**—स्त्री–५३५–રજસ્વલા સ્ત્રી

द्र० अधिशब्दः ।

*अव्यते रक्ष्यते इति अवीः "तॄस्तॄतन्द्रि–" (उणा–७११) इति ईः ।

**अवीरा**—स्त्री–५३० (शि.४३) –પુત્ર વિનાની વિધવા સ્ત્રી

☐निर्वीरा, निष्पतिसुता ।

**अवृष्टि**-स्त्री–६०–ભગવાનના ૩૪ અતિશયો પૈકી ૯ મો અતિશય

*अवृष्टिः सर्वथा वृष्ट्यभावो न स्यादिति नवमोऽतिशयः ।

**अवेक्षा**-स्त्री–१५१८દેખરેખ, તપાસ

☐'अवधान', प्रतिजागर ।

*अवेक्षणमवेक्षा अवधानमित्यर्थः ।

**'अव्यण्डा'**—स्त्री–११५१–કૌવચ

द्र० आत्मगुप्ताशब्दः ।

**'अव्यथा'**—स्त्री–११४६–હરડે

द्र० अभयाशब्दः ।

**अव्यय**-पुं–२१९ (શે.७०)–વિષ્ણુ, નારાયણ

द्र० अच्युतशब्दः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अव्यवहित**–न.-१४५१-संલગ્ન આંતરા રહિત

द्र० **अनन्तरशब्दः** ।

*न व्यवधीयते स्मेति अव्यवहितम् ।

**अव्याहतत्व**–न.-६६-પૂર્વાપર વિરોધ રહિત અર્થ, પ્રભુની વાણીનો નવમો ગુણ

*अव्याहतत्वं पूर्वापरवाक्यार्थाविरोधः ।

**अव्युच्छित्ति**-સ્ત્રી-७१-અર્થસિધ્ધિ સુધી રહેનારી

* अव्युच्छित्तिर्विवक्षितार्थसम्यक्सिद्धिर्यावदव्यवच्छिन्नवचनप्रमेयता ।

**(अश)**–पुं-(७-પરિ)-ભોજ્યભોજક ભાવ સંબંધમાં ભોજ્યથી લગાડાતો શબ્દ

द्र० अन्धसूशब्दः ।

**(अशन)**–पुं-(७-પરિ)-ભોજ્ય ભોજકભાવ સંબંધમાં ભોજ્યથી લગાડાતો શબ્દ

द्र० अन्धसूशब्दः ।

**अशन**–पुं. न.-३९५-ભોજન

द्र० **अन्धसूशब्दः** ।

*अश्यते एतदिति अशनं पुंक्लीबलिङ्गोऽयम् भुज्यादित्वादनट् ।

**अशन**–न.-४२३-ખાવું, ભોજન કરવું તે

द्र० अदनशब्दः ।

*अश्यते इति अशनम् ।

**अशनाया**–स्त्री-३९३-ભૂખ

☐बुभुक्षा, जिघत्सा, रोचक, रुचि, [क्षुधा, क्षुध् शे. ९५] ।

*अशनेच्छेति अशनाया ।

**अशनायित**–पुं-३९२-ભુખ્યો

☐बुभुक्षित, क्षुधित, जिघत्सु ।

*अशनं इच्छति आत्मनः इति "अमाव्ययात्" (३।४।२३) इति क्यनि 'क्षुतृड्"- (४।३।१२३) इति आत्वं ततः क्तेऽशनायितः ।

**अशनि**–पुं-स्त्री-१८०-વજ્ર

☐वज्र, ह्रादिनी, स्वरु, शतकोटि, पवि, शव, दम्भोलि, भिदुर, भिदु, व्याधाम, कुलिश, [शतार, शतधार शि. १३] ।

*अश्नुते व्याप्नोति रिपून्, ज्वालाभिः इति अशनिः पुंस्त्रीलिङ्गः, "सदिवृत्यमि"–(उणा–६८०) इति अनिः ।

**अशनि**–पुं स्त्री-११०५-વિજળી

द्र० अचिरप्रभाशब्दः ।

*अश्नुते इति अशनिः पुंस्त्रीलिङ्गः, "सदिवृत्ति" (उणा–६८०) इति अनिः

**अशिरस्**–पुं-१८८ शे.-રાક્ષસ

द्र० असृक्पशब्दः ।

**अशिश्वी**–स्त्री-५२९-પુત્ર વિનાની સ્ત્રી

*नास्ति शिशुः अस्या इति अशिश्वी, "अशिशोः" (२।४।८) इति ङीः ।

**अशुचि**-स्त्री-६३४ (शि. ५०) વિષ્ઠા, મળ

द्र० अवस्करशब्दः ।

**अशुभ**-न.-१३८०-પાપ

द्र० अंहस्शब्दः ।

*न शुभं इति अशुभम् ।

**अशेष**–न.-१४३३-બધું, સમસ્ત

द्र० अखण्डशब्दः ।

*न विद्यते शेषोऽस्येति अशेषं निःशेषमपि ।

**अशोक**–पुं-११३५-અશોકવૃક્ષ

☐कङ्केल्लि, 'वञ्जुल' ।

*न शवतीति अशोकः "भीण्"-(उणा–२१) इति कः, नास्ति शोकोऽस्मादिति वा ।

**(अशोक)**–न.-२२९ (टी)–કામદેવનું બાણ

**अशोका**–स्त्री-४५–શીતલનાથ ભગવાનની શાસન દેવી

*अविद्यमानः शोकोऽस्या इति अशोका ।

**अश्मगर्भ**–न.-१०६४-મરતકમણિ

☐मरकत, गारुत्मत, हरिन्मणि, (अश्मयोनि) ।

*अश्मनो गर्भः इति अश्मगर्भम्, अश्मयोनिरित्यर्थः ।

**अश्मज**–न.-१०६२-શિલાજીત

द्र० अर्घ्यशब्दः ।

*अश्मनो जायते इति अश्मजम् ।

**अश्मन्**–पुं-१०३५-પથ્થર

Jain Education International For Private & Personal Use Only www.jainelibrary.org

□पाषाण, प्रस्तर, दृषद्, ग्रावन्, शिला, उपल ।

*अश्नुते इति अश्मा, पुंलिङ्गः, "मन्"—(उणा–९११) इति मन् ।

**अश्मन्तक**–न.–१०१८–चुलो

द्र० अधिश्रयणीशब्दः ।

*अश्नुते इति अश्मन्तं "सीमन्त"-(उणा–२२२) इति अन्ते निपात्यते केऽश्मन्तकम् ।

**(अश्मयोनि)**–पुं–१०६४–મરતક મણિ

द्र० अश्मगर्भशब्दः ।

**अश्मरी**–स्त्री–४७०–મૂત્રાશયમાં પથરીનો રોગ

□मूत्रकृच्छ्र ।

*अश्माभं शुक्रं राति ददातीति अश्मरी ।

**अश्रान्त**–न.–१४७१–નિરંતર

द्र० अजस्रशब्दः ।

*न श्राम्यति स्मेति अश्रान्तम् ।

**अश्रि**–स्त्री–१०१३ ખૂણો

द्र० अणिशब्दः ।

*अश्नुते इति अश्रिः स्त्रीलिङ्गः, "तङ्किवङ्कि"—(उणा-६९२) इति रिः ।

**'अश्री'**–स्त्री–१०१३–ખૂ[illegible]

द्र० अणिशब्दः ।

**अश्रु**-न.–३०७–આંસુ

□बाष्प, नेत्राम्बु, रोदन, अस्तु, अस्र, दृग्जल लोत शे. ८५] ।

*अश्नुते आकण्ठं इति अश्रु क्लीबलिङ्गः "चिनीपी"–(उणा-८०६) इति रुः ।

**(अस्रु)**–न.–३०७–આંસુ

द्र० अश्रुशब्दः ।

*अस्यते इति अश्रु कलीबलिङ्गः "चिनीपी-" (उणा–८०६) इत्यादि बहुवचनाद् रुः ।

**अश्लील**–न –२६६–બીભત્સવચન

□ग्राम्य ।

*न श्रियं लातीति अश्लीलं, न श्रीरस्यास्तीति वा, सिध्मादित्वाद् ले, ऋफिडादित्वाद् रस्य लः, तत्तु व्रीडाजुगुप्साऽमङ्गलव्यञ्जकत्वेन त्रेधा अलङ्कारकृतां तु ग्राम्यं अश्लीलं च पृथगेव ।

**अश्लेषा**–पुं. स्त्री–१११–અશ્લેષા નક્ષત્ર

□सार्पी ।

*न विद्यते श्लेषोऽस्यां जातापत्यस्य इति अश्लेषा पुंस्त्रीलिङ्गः ।

**अश्लेषाभू**–पुं–१२२–કેતુ ગ્રહ

□आहिक, शिखिन्, केतु, [ऊर्ध्वकच शे. १७] ।

*अश्लेषायां भवति इति अश्लेषाभूः ।

**अश्व**-पुं–४७–ઘોડો શ્રીસંભવનાથ ભગવાનનું લંછન

**अश्व**-पुं–१२३२–ઘોડો

द्र० अर्वन्शब्दः ।

*अश्नुतेऽध्वानमिति अश्वः, "लटिखरि"—(उणा–५०५) इति वः प्रत्ययः । शेषश्चात्र—
"अश्वे तु क्रमणः कुण्डी, प्रोथी हेषी प्रकीर्णकः ।
पालकः परुलः किण्वी, कुटरः सिंहविक्रमः (१)
माषाशी केशरी हंसो, मुद्गभुक् गृहभोजनः ।
वासुदेवः शालिहोत्री, लक्ष्मीपुत्रो मरुद्रथः (२)
चामर्येकशकोऽपि स्यात् " इति ।

**'अश्वकर्णक'**–पुं–११३८–શાલ

द्र० सर्जशब्दः ।

**अश्वकिनी**–स्त्री–१०८–અશ્વિની નક્ષત્ર

□अश्विनी, दस्रदेवता, अश्वयुज्, बालिनी ।

*अज्ञातोऽश्वः इति अश्वकः सोऽस्या अस्तीति अश्वकिनी ।

**(अश्वगोयुग)**–न.–१४२४(टी.)–ઘોડાઓનું યુગલ

**अश्वग्रीव**-पुं.–६९९–પહેલા પ્રતિવાસુદેવનું નામ

*अश्वस्येव ग्रीवाऽस्येति अश्वग्रीवः ।

**अश्वतर**–पुं–१२५३–ખચ્ચર

□वेसर, वेगसर ।

*अश्वेन अश्वायां जातः अश्वः स गर्दभपितृकतया संजात ह्रासोऽश्वतरः, "वत्सो"—(७।३।५१) इति तरट् प्रत्ययः ।

**अश्वतर**–पुं–१३११–નાગની જાતિ–

*अश्ववत् तरति इति अश्वतरः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अश्वत्थ**–पुं–११३१–પીપળો.

□पिप्पल, श्रीवृक्ष, कुञ्जराशन, कृष्णावास, बोधितरु, (बोधिमत्व), 'चलदल' ।

*अश्वेषु तिष्ठतीति अश्वत्थः पृषोदरादित्वात् ।

**अश्वमेधीय**–पुं–१२४३–અશ્વમેધ યજ્ઞનો ઘોડો

□ययु ।

*अश्वमेधाय हितः इति अश्वमेधीयः ।

**अश्वयुज्**–स्त्री–१०८–અશ્વિની નક્ષત્ર

द्र० अश्वकिनीशब्दः ।

*अश्वान् युङ्क्ते इति अश्वयुक् स्त्रीलिङ्गः अश्वकर्मण्याम्नानात् ।

**अश्ववार**–पुं–७६१–ઘોડેસવાર

□अश्वारोह, सादिन्, तुरगिन् ।

* अश्वं वृणोति वारयति वा इति अश्ववारः।

**अश्ववारण**–पुं–१२८६–રોઝ

□गवय, वनगव, गोसदृक्ष ।

* अश्वान् वारयति इति अश्ववारणः ।

**(अश्वषड्गव)**–न–१२२४–७ ઘોડા

*पशुनामभ्यः परंषट्त्वे वाच्ये षड्गवमिति प्रयुज्ये यथा—अश्वानां षट्त्वं"इति अश्व षड्गवं, सदत्वे—(७।१।१३५) इति षड्गव प्रत्ययः ।

**अश्वसेन**–पु–३८–પાર્શ્વનાથ ભગવાનના પિતાનું નામ

*अश्वप्रधाना सेनाऽस्य इति अश्वसेनः ।

**अश्वसेन—नृपनन्दन**—पुं—६९२— ચોથા ચક્રવર્તિનું નામ

□सनत्कुमार।

*अश्वसेननृपस्य नन्दनः इति अश्वसेननृपनन्दनः।

**अश्वा**–स्त्री–१२३३–ઘોડી

□वडवा, प्रसू, वामी, [अवर्ती शे. १८०]।

*अश्वते इति अश्वा "अजादे:"–(२।४।१६) इति आप् ।

**अश्वारोह**–पुं–७६१– ઘોડેસવાર

द्र० अश्ववारशब्दः।

*अश्वं आरोहति इति अश्वारोहः ।

**अश्विन** (द्वि. व.)–पुं–१८१–સ્વર્ગના વૈદ્ય

द्र० अब्धिजशब्दः ।

*अश्वो विद्यतेऽनयोः इति अश्विनौ सदाऽश्वारुढावित्यर्थः ।

**अश्विनी** स्त्री–१०८–અશ્વિની નક્ષત્ર

द्र० अश्वकिनी शब्दः ।

*अश्वोऽस्या अस्तीति अश्विनी ।

**अश्विनीपुत्र** (द्वि व. पुं.–१८१–સ્વર્ગના વૈદ્ય

द्र० अब्धिजशब्दः।

*अश्विन्याः पुत्रौ इति अश्विनीपुत्रौ यौगिकत्वात् आश्विनेयौ ।

**अश्वीय**–न.–१४२०–ઘોડાનો સમુદાય

□आश्व ।

*अश्वानां समूहः इति अश्वीयं, "वाऽश्वादीयः" (६।२।१९) इति निपात्यते ।

**अषडक्षीण**–न.–७४१–ત્રીજો માણસ ન જાણી શકે તેવી વાત

*न षडक्षीण्यत्राषडक्षीणं, मन्त्रक्रिडादि, "अषड" (७।१।१०६) इति ईनः ।

**अष्टतालायता**–स्त्री–७८७–શક્ત નામનું શસ્ત્ર (શે. १४८)

□कासू, महाफला।

**अष्टपाद्**–पुं–१२१०–કરોળીયો

□ऊर्णनाभ, तन्त्रवाय, 'तन्तुवाय' जालिक, जालकारक, कृमि, मर्कटक, लूता, लालास्राव, [क्रिमि शि. १०८]।

*अष्टौ पादा अस्य इति अष्टपाद् ।

**अष्टपाद्**–१२८६–અષ્ટાપદ પશુ વિશેષ

□शरभ, कुञ्जराराति उत्पादक, [अष्टापद शि. ११४] ।

*अष्टौ पादा अस्य इति अष्टपाद्, "सुसंङ्ख्यात्"—(७।३।१५०) इति पाद्भावः अष्टापदोऽपि ।

**अष्टमङ्गल**–पुं–१२३७–પૂંછડું, છાતી, ખરી, વાળ અને મુખ એ આઠ શ્વેત હોય તેવો ઘોડો

*पुच्छाद्यैः सितैः अष्टभिः मङ्गलः कल्याण इति अष्टमङ्गलः ।

**अष्टमूर्ति**–पुं–१९६–શંકર

द्र० अट्टहासिन् शब्दः ।

*अष्टौ मूर्तयः क्षितिजलपवनहुताशनयजमानाकाश सूर्य चन्द्रलक्षणा अस्येति अष्टमूर्तिः ।

**अष्टश्रवण**–पुं–२११–બ્રહ્મા

द्र० अजशब्दः

*अष्टौ श्रवणानि अस्य चतुर्मुखत्वात् इति अष्ट श्रवणः।

**अष्टादशभुजा**–स्त्री–२०५ (शे. ५७)–પાર્વતી

द्र० अद्रिजाशब्दः ।

**अष्टापद**–पुं न.–४८७–ચોપાટ વગેરે રમવાનું ખાનાવાળું લુગડું

☐शारिफल, [शारिफलक शि. ३७] ।

*अष्टौ पदानि अत्रेति अष्टापदः "नाम्नि"—(३।२।७५) इति दीर्घत्वं पुंक्लीबलिङ्गोऽयम् ।

**अष्टापद**–पुं–१०२८–અષ્ટાપદ, કૈલાસ પર્વત

☐रजताद्रि, कैलास, स्फटिकाचल [धनदावास, हराद्रि, हिमवद्धस शे. १५९] ।

*अष्टौ पदानि सन्ति अस्मिन् इति अष्टापदः "नाम्नि" (३।२।७५) इति दीर्घः ।

**अष्टापद**–पुं–न. १०४३–સોનું

द्र० अर्जुनशब्दः ।

*अष्टसु लोहेषु पदं प्रतिष्ठा अस्य इति अष्टापद पुंक्लीबलिङ्गः "नाम्नि"—(३।२।७५) इति दीर्घः।

**अष्टापद**–पुं–१२८६ (शि. ११४)–અષ્ટાપદ પશુ વિશેષ.

द्र० अष्टपादशब्दः ।

**अष्ठीवत्**–पुं–६२४–ઢીંચણ

☐जानु, नलकील ।

*अस्थीनि सन्त्यत्र इति अष्ठीवान्, पुंक्लीबलिङ्गः "चर्मण्वत्यष्ठीव" (२।१।९६) इति साधुः ।

**असंयुत**–पुं–२१९–નારાયણ

द्र०अच्युतशब्दः ।

**असकृत्** અ.–१५३१–વારંવાર

द्र०अभीक्ष्णशब्दः ।

*एको वारोऽस्य इति सकृत् "एकात्"–(७।२।१११) इति साधुः, न सकृत् इति असकृत् यथा· "गन्तव्यमस्ति कियदित्यसकृद् ब्रुवाणा ।

**असक्त**–न.–१४७१–હંમેશા

द्र०अजस्रशब्दः ।

*न सजति स्मेति असक्तम् ।

**असङ्कुल** पुं–९८६–રાજમાર્ગ

☐घण्टापथ, संसरण, श्रीपथ, राजवर्त्मन. उपनिष्क्रमण, उपनिष्कर, महापथ ।

*असङ्कुलः गजादीनां मार्गः ।

**असङ्ख्य**–नं–८७५–અસંખ્ય, સંખ્યા ન કરી શકાય તેટલી વસ્તુ

*न विद्यते संख्या सङ्ख्यानं अस्य इति असङ्ख्यम् ।

**असती**–સ્ત્રી–५२८–કુલટા સ્ત્રી

द्र०अविनीताशब्दः ।

*न सति इति असती ।

**असतीसुत**–पु.–५४८ વ્યભિચારિણી સ્ત્રીનો પુત્ર

☐बन्धुल, बान्धकिनेय, कौलहेर, (कौलटेय) ।

*असत्याः सुतः इति असतीसुतः ।

**(असत्य)**–न.–२६५–અસત્ય

द्र०अनृतशब्दः ।

**असदध्येतृ**–पुं–८५७–ખોટો જાપ કરનાર

☐अजप ।

*असदधीते इति असदध्येता ।

**असन**–पुं न.–११४४–વૃક્ષનું નામ

☐पीतसाल, प्रियक, 'पीतसारक, सर्जक, (आसन) बन्धूकपुष्प, जीवक' ।

*अस्यतीति असनः पुंक्लीबलिङ्गः ।

**असन्महस्**–पुं–१७४ (शे. ३२)–ઇન્દ્ર

द्र०अच्युताग्रजशब्दः ।

**(असंबद्ध)**–न.–२६७–અર્થ વગરનું બોલવું તે

☐अबद्ध, निरर्थक ।

**असम्मत**–पुं–४९१–વિરુદ્ધ

☐प्रणाय्य ।

**असह**–न.–६०३–હૃદય

द्र०स्तनान्तरशब्दः ।

**असहन**–पुं–७२९–શત્રુ

द्र०अभिमातिशब्दः ।

*न सहते इति असहनः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**असार**–न.–१४४६–નકામું

☐फल्गु ।

*नास्ति सारः अस्मिन् इति असारम् ।

**असि**–पुं–७८२–તલવાર

☐चन्द्रहास, करवाल, निस्त्रिंश, कृपाण, खठा, तरवारि, कौक्षेयक, मण्डलाग्र, ऋष्टि, रिष्टि, [सायक, श्रीगर्भ, विजय, शास्तृ, व्यवहार, प्रजाकर शे. १४४ धर्मपाल, अक्षर, देव तीक्ष्णकर्मन्, दुरासद, त्रसङ्ग, रुद्रतनय, मनुज्येष्ठ, शिवङ्कर, शे. १४५, करपाल, विशसन, तीक्ष्णधार, विषाग्रज, धर्मप्रचार, धाराङ्ग, धाराधर, करालिक शे. १४६, चन्द्रभास शस्त्र शे. १४७] ।

*अस्यते इति असिः पुंलिङ्गः "पदिपठि"–(उणा–६०७) इति इः प्रत्यय. । **शेषश्चात्र**–

"असिस्तु सायकः ।

श्रीगर्भो विजयःशास्ता, व्यवहारः प्रजाकरः ।

धर्मपालोऽक्षरोदेवस्तीक्ष्णकर्मा दुरासदः ॥१॥

प्रसङ्गो रुद्रतनयो, मनुज्येष्ठ शिवङ्करः ।

करपालो विशसनस्तीक्ष्णधारो विषाग्रजः ॥

धर्मप्रचारो धाराङ्गो, धाराधरकरालिकौ ॥२॥

चन्द्रभासश्चशस्त्रः ॥" इति ।

**असिक**–न.–५८१–હોઠનો નીચલો ભાગ

*अधरस्याऽधो भागोऽस्यते इति असिकं "क्रीकलि"–(उणा–३८) इति बहुवचनाद् इकः प्रत्ययः ।

**असिक्नी**–स्त्री–५२१–અંતપુરમાં નિમાયેલી સ્ત્રી

*असिनाऽसिक्नि; "क्नः पलितासितात्" (२।४।३७) इति ङ्यां साधुः ।

**असित**–पुं–१२०–શનિ

☐शनैश्चर, शनि, छायासुत, सौरि, सप्तार्चिष रेवतीभव, मन्द, क्रोड, नीलवासस [पङ्गु श्रुतकर्मन्, महाग्रह शे. १५, श्रुतश्रवोऽनुज, काल, ब्रह्मण्य, यम, स्थिर, क्रूरात्मन् शे. १६ सौर शि. १०] ।

*असितः कृष्णाङ्गः ।

**असित**–पुं–१३९७–શ્યામવર્ણ

☐कृष्ण, मेचक, राम, श्यामल, श्याम काल, नील, शिति ।

*सितविरुद्धः इति असितः ।

**(असितपक्ष)**–पुं–१४७–કૃષ્ણપક્ષ

☐बहुल ।

**असितानन**–पुं–१२९२–કાળા મુખવાળો વાંદરો

☐गोलाङ्गूल ।

**असिधावक**–पुं–९१६–સરાણિયો, શસ્ત્ર વગેરે ઘસનાર

☐शाणाजीव, शस्त्रमार्ज, भ्रमासक्त ।

*असीन् धावति शोधयतीति असिधावकः ।

**असिधेनु**–स्त्री–७८४–છરી

☐क्षुरी, छुरी, कृपाणिका, कृपाणी, शस्त्री, असिपुत्री [अस्त्री, कोशशायिका, पत्र, धेनुका शे. १४७ क्षुरिका, छुरिका शि. १८] ।

*चिन्तितार्थप्रदायित्वाद् असिरुपा धेनुः इति असिधेनुः ।

**असिपत्रक**–पुं–११९८–શેરડી

☐इक्षु, रसाल ।

*अस्याकाराणि पत्राणि अस्येति असिपत्रकः ।

**असिपुत्री**–स्त्री–७८४–છરી

द्र०असिधेनुशब्दः ।

*असेः पुत्रीव ह्रस्वत्वाद् असिपुत्री ।

**असु** (ब.व.)–न.–१३६७–પ્રાણ

☐जीव, जीवित, प्राण, [जीवातु शि १२४:] ।

*अस्यन्ते इति असवः पुंसि बहुवचनान्तः 'भृमृतृ"–(उणा–७१६) इति उसःप्रत्ययः ।

**असुख**–न.–१३७०–દુઃખ

द्र०अर्तिशब्दः ।

*न सुखं इति असुखम् ।

**असुमत**–पुं–१३६६–જીવ

☐भविन्, जीव, सत्व, देहभृत्, जन्यु, जन्तु, (संसारिन्, शरीरिन्, देहभाज्), [प्राणिन् शि.१२३]।

*असवः प्राणाः सन्ति अस्येति असुमान् प्राणी इत्यपि ।

**असुर** (ब.व)–पुं–२३८–અસુર દાનવ

☐दितिज, दनुज, (दैतेय, दानव), पातालौकस्, सुरारि, पूर्वदेव, शुक्रशिष्य ।

*अस्यन्ति देवान् इति असुराः "वाश्यसि"–(उणा–४२३) इति उरः सुरविरुद्धा वा अनर्थवत् सुरायाः अपनाद् वा ।

**असुर**–पुं–१२१८ (शे.१७७)–હાથી
द्र०अनेकपशब्दः ।

**असुरकुमार** (૫૧)–પું–૯૦–ભવનપતિ દેવ પૈકી પહેલા ભવનપતિ

**(असुराचार्य)**–पुं–१२०–શુક્ર
द्र०उशनस्शब्दः ।

**असुराह्व**–ન.–१०४९–કાંસું
☐कांस्य, विद्युत्प्रिय, घोष, प्रकाश, वङ्ग शुल्वज, घण्टाशब्द, (कंस), खण, लोहज, मल ।
*असुरस्य कंसनाम्न आहवाऽस्य इति असुराहवं कंसमित्यर्थः ।

**असुरी**–स्त्री–४१९–રાઈ
☐क्षव, क्षुताभिजनन, राजिका, राजसर्षप, कृष्णिका ।
*अस्यते शाकादौ इति असुरी "वाश्यसि"–(उणा-४२३) इति उरः असुरस्त्रीव वा ।

**असुहृद्**–पुं–७२९ (शि. ६३)–શત્રુ
द्र०अभिमातिशब्दः ।
*न सुहृदिति असुहृत् ।

**असूया**–स्त्री–३२३–બીજાના ગુણોમાં દોષારોપણ
*असूयनमिति असूया ।

**असूक्षण**–न.–१४७९ (शि.१३२)–અનાદર
द्र०अनादरशब्दः ।

**असूर्क्षण**–न.–१४७९–અનાદર
द्र०अनादरशब्दः ।
*न सूक्ष्र्यंये इति असूर्क्षणम् ।

**असृक्कर**–पुं–६२०–રસધાતુ
द्र०अग्निसंभवशब्दः ।
*असृग् रक्तं करोति इति असृक्करः "हेतुतच्छील" (५।१।१०३) इति टः ।

**असृकप**–पुं–१८८–રાક્ષસ
☐राक्षस, पुण्यसंभव, नृचक्षस, यातु, आशर, कौणप, यातुधान, रात्रिञ्चर, रात्रिचर, पलाद, कीनाश, रक्षस, निकसात्मज, (नैकसेय, क्रव्याय, क्रव्याद, कर्बुर नैर्ऋत, [पलप्रिय, खसापुत्र, कर्बर, नरविष्वण शे.३७ अशिर, हनुष, शंकु, विथुर, जललोहित, उद्धर, स्तब्धसंभार, रक्तग्रीव, प्रवाहिक शे. ३८, संध्याबल, रात्रिबल, त्रिशिरस्, समितीपद शे. ३९] ।
*असृक् पिबतीति असृकपः ।

**असृक्संज्ञ**–पुं–६४५ (शि. ५१)–કેશર
द्र० कश्मीरजन्मन्शब्दः ।

**(असृक्पर्याय)**–पुं–६४५–કેશર
द्र० कश्मीरजन्मन्शब्दः ।

**असृग्धरा**–स्त्री–६३०–ચામડી
द्र० अजिनशब्दः ।
*असृग् धरति इति असृग्धरा ।

**असृग्**–न.–६१९–લોહી

**असृग्**–न.–६२१–લોહી
☐रक्त, रुधिर, आग्नेय, विस्र, रसतेजस्, रसभव, शोणित, लोहित, वाशिष्ठ, प्राणद, आसुर, क्षतज, मांसकारिन्, अस्त्र, [शोध्य, कीलाल शे. १२८] ।
*अस्यति अनेनेति असृक् क्लीबलिङ्गः, बहुलम् (५।१।२) इति ऋक्प्रत्ययः नसृज्यते वा ।

**असौम्यस्वर**–पुं. ३४९–ખરાબ સ્વરવાળો
☐अस्वर ।
*न सौम्यः स्वरोऽस्य इति असौम्यस्वरः ।

**अस्त**–न.–३२४–મરણ
द्र० अत्ययशब्दः ।
*अस्यते इति अस्तम् ।

**अस्त**–पुं–१०२७–અસ્તાચલ પર્વત
☐चरमाद्रि ।
*अस्यत्यर्कादीन् अस्यते वा इति अस्तः "दम्यमि"–(उणा–२००) इति तः ।

**अस्तम्**–न.–१४८२–ફેંકી દીધેલું
☐नुन्न, नुत्त, निष्ठ्युत, 'निष्ठूत', आविद्ध, क्षिप्त, ईरित [चोदित शि. १२४]
*अस्यते स्म इति अस्तम् ।

**अस्त**–अ.–१५६९–અદૃશ્ય
*अस्यते इति अस्तं बाहुलकात् तम् यथा– "अस्तंगते शशिनीति" ।

**अस्ताग**–पुं–५२–ગત ચોવિશીના પંદરમાં

तीर्थंकर

□न विद्यते गाम्भीर्यात् स्तागो लब्धं अध्वा-ताऽस्येति अस्तागः ।

**अस्ताघ**–न.–१०७०-અત્યંત ઊંડું

द्र० अगाधशब्दः ।

*तिष्ठतीति स्ताघं पृषोदरादित्वात्, न स्ताघं इति अस्ताघम् ।

**अस्ति**–અ.–१५४१–હોવાપણું

*सत्त्वे सत्तायां अस्तीति तिवन्त प्रतिरूपकः, यथा– "अस्तिक्षीरा ब्राह्मणी" ।

**अस्तिनास्तिप्रवाद**)–ન.–२४७–ચોથા પૂર્વનું નામ.

*यल्लोके यथाऽस्ति यथा वा नास्ति, अथवा स्याद्वादाभि प्रायेण तदेवाऽस्ति नास्तीति प्रवदति इति अस्तिनास्तिप्रवादम् ।

**अस्तिमत्**–પું–४७७–ધનવાન

□धनिन् ।

*अस्ति इति अव्ययं धनार्थे, अस्ति धनं अस्यास्तीति अस्तिमान् ।

**अस्तु**–અ.–१५२८–બસ, સર્યું

द्र० अलम्शब्दः ।

* अस्तु इति तीवन्तप्रतिरूपकोऽव्ययः ।

**अस्तेय**–न.–८१–ચોરીનો ત્યાગ, ત્રીજો યમ

*स्तेयमदत्तादानं तद्भावोऽस्तेयम् ।

**अस्त्र**–न.–(६–પરિ)–ધાર્યવાચક શબ્દથી લગાડતો શબ્દ

**अस्त्र**-न.–२२८–કામદેવનું પુષ્પ

*अस्त्रं आयुधम् ।

**अस्त्र**–न. ७७३–શસ્ત્ર

□आयुध, हेति, प्रहरण, शस्त्र ।

*अस्येति इति अस्त्रं "त्रट्" (उणा–४४६) इति त्रट् ।

**अस्त्र**–न.–७७५–ધનુષ્ય

□धनुष्, चाप, इष्वास, कोदण्ड, धन्वन्, कार्मुक, द्रुण, आस, [धनू, धनु, शरासन शि. ६७]।

*अस्यन्ते बाणा अनेन इति अस्त्रम् ।

**अस्त्रकण्टक**–પું–७७८ (શે. १४३ બાણ)

द्र० अजिह्मग शब्दः ।

(**अस्त्रग्राम**)–પું–१४१४–શસ્ત્ર સમૂહ

*अस्त्राणां व्रजः इति अस्त्रग्रामः ।

**अस्त्रशेखर** न.–७८७ (શે. १५२)–ફલપત્રના અગ્રભાગ જેવું શસ્ત્ર

[हुल, मुनय शे. १५२] ।

**अस्त्रसायक**–પું–७७९ (શે. १४४)–લોઢાનું બાણ

द्र० एषणशब्दः ।

**अस्त्री**–७८४ શે. १४७–છરી

द्र० असिधेनु शब्दः ।

**अस्थाग**–न.-१०७०–અત્યંત ઊંડું

द्र० अगाधशब्दः ।

*स्थग्यते इति स्थागं न स्थागमिति अस्थागम् ।

**अस्थाघ**–न.–१०७०–અત્યંત ઊંડું

द्र० अगाध शब्दः ।

*तिष्ठति जनोऽत्र इति स्थाघम्, "स्थार्ति-(उणा-१०९) इति घः न स्थाघमिति अस्थाघम् ।

**अस्थि**–न.–६१९–હાડકું

□ कुल्य, भारद्वाज, मेद स्तेजस्, मज्जकृत्, मांसपित्त, श्वदयित, कर्कर, देह, धारक, मेदोज, कीकस, सार, [हड्ड शि. ४८.] ।

*अस्यते इति अस्थि क्लीबलिङ्गः, "वीसञ्जि" -(उणा–६६९) इतिथिक् ।

**अस्थिकृत्**–પું–६२४–મેદ, ચરબી

□मेदस्, वपा, मांसतेषस्, मांसज, गौतम, वसा ।

*अस्थीनि करोतीति अस्थिकृत् ।

**अस्थितेजस्**–પું–६२८ (शि.४९)–મજ્જા હાડકાની ચરબી

द्र०अस्थिसंभवशब्दः ।

**अस्थिधन्वन्**–પું–१९७–મહાદેવ

द्र०अट्टहासिन्शब्दः ।

*अस्थिमयं धन्वाऽस्य इति अस्थिधन्वा ।

**अस्थिपञ्जर**–પું–६२८–હાડપિંજર

□करङ्क, कङ्काल ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

□अस्थ्नां पञ्जरं इति अस्थिपञ्जरः ।

**अस्थिभुज्**–पुं–१२७९–કૂતરો

□कुक्कुर, 'कुकुर', वक्रवालधि, भषण, सारमेय, कौलेयक, शुन, शुनि, श्वान, गृहमृग, कुर्कुर, रात्रिजागर, रसनालिट्, रतकील, रतशायिन्, रतव्रण, रतान्दुक, शालावृक, मृगदंश, श्वन्, [क्रोधिन्, रसापायिन्, शिवारि, सूचक, रुरु, शे. १८१, वनंतप, स्वजातिद्विष्, कृतज्ञ, भल्लह, दीर्घनाद, पुरोगामिन्, इन्द्रमहकामुक शे. १८२, मण्डल, कपिल, ग्राममृग, इन्द्रमह शे. १८३, भषक शि. ११३] ।

*अस्थीनि भुङ्क्ते इति अस्थिभुक् ।

**अस्थिर**–पुं–४३७–ચપળ

□संकसुक ।

*अस्थिरः चपलः ।

**अस्थिर**–न.–१४५५–અનિત્ય

□चञ्चल, तरल, कम्पन, कम्प्र, परिप्लव, चलाचल, चटुल, चपल, लोल, चल, पारिप्लव 'चलन' ।

*न स्थिरं इति अस्थिरम् ।

**अस्थिविग्रह**–पुं–२१०–શંકરનો ભૃંગીગણ

□भृङ्गिन्, भृङ्गिरिटि, भुङ्गिरीटि, नाडीविग्रह, [चर्मिन् शे ६४] ।

**अस्थिसंभव**–पुं–६२८–મજ્જા

□मज्जन्, (मज्जा), कौशिक, शुक्रकर, अस्थिस्नेह, [अस्थितेजस् शि.४९] ।

**अस्थिस्नेह**–पुं.–६२८–મજ્જા

द्र०अस्थिस्नेहशब्दः ।

**(अस्पष्ट)**–न–२६६–અસ્પષ્ટ વચન

□म्लिष्ट, अस्फुट ।

**अस्फुट**–न.–२६६–અસ્પષ્ટ વચન

□म्लिष्ट, (अस्पष्ट) ।

*अस्फुटं अस्पष्टम् ।

**अस्फुटभाषिन्**–पुं–३४९ (शे. ९२)–અસ્પષ્ટ બોલનાર

□लोहल अस्फुटवाच्, [काहल शे. ९२] ।

**अस्फुटवाच्**–पुं–३४९–અસ્પષ્ટ બોલનાર

□लोहल, [काहल, अस्फुटभाषिन् शे.९२] ।

*अस्फुटा अव्यक्ता वागस्येति अस्फुटवाक् ।

**अस्र**–न.–३०७–આંસુ

द्र०अश्रुशब्द. ।

*अस्यते इति अस्रं, "भीवृधि"–(उणा–३८७) इति रः ।

**अस्र**–पुं–५६८ (शे.११९)–વાળ

द्र०कचशब्दः ।

**अस्र**–न.–६२२–લોહી

द्र०असृग् शब्दः ।

*अस्यते इति अस्रम् "भीवृधि"–(उणा–३८७) इति रः ।

**अस्र**–पुं–१०१३–ખૂણો

द्र०अणिशब्दः ।

*अस्यतेऽस्मिन् इति अस्रः "भीवृधि"–(उणा-३८७) इति रः ।

**अस्रपा**–स्त्री–१२०३–જળો

□(विचका), जलौकस्, जलालोका, जलूका, जलौका, जलसर्पिणी, 'रक्तपा' ।

*अस्रं पिबति इति अस्रपा विचका इत्येके ।

**अस्वप्न** (બ.વ.)–पुं–८९–દેવતા

द्र०अनिमिषशब्दः ।

*नास्ति स्वप्नो येषां ते अस्वप्नाः ।

**असौम्यस्वर**–पुं–३४९–ખરાબ સ્વરવાળો

□असौम्यस्वर ।

*विपरीतः स्वरोऽस्येति अस्वरः नञ् विरुद्धेऽनर्थवत् ।

**अस्वश्लाघान्यनिन्दिता**–स्त्री–६८–બડાઈ અને પરનિંદા વિનાની પ્રભુની વાણી નો ૧૮મો ગુણ

*आत्मोत्कर्षपरनिन्दा विप्रयुक्तत्वम् ।

**अहंयुस** पुं–४३३–અહંકારી

□अहंकृत, (अहंकारिन्) ।

*अहमिति अव्ययम्, अहं अस्यास्तीति अहंयुः ।

**अहङ्कार**–पुं–३१६–અભિમાન

द्र०अभिमानशब्दः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

*अहङ्कृतिः इति अहङ्कारः, **वैजयन्तीकारस्तु** "अभिमानस्तु अहङ्कारो गर्वोऽस्त्री" इत्याह ।

**(अहंकारीन्)**-पुं-४३३-અહંકારી

☐अहंयुस्, अहंकृत ।

**अहङ्कृत** पु-४३३-અભિમાની

☐अहयुंस (अहङ्कारिन्)

*अहङ्कृतः अहङ्कारी ।

**अहन्**-पुं-१३८-દિવસ

☐दिवस, दिन, दिव, द्यु, वासर, घस्त्र (दिवा) ।

*अंहते गच्छति इति अहः "श्वन्"-(उणा-९०२) इति अन् निपात्यते ।

**अहमग्रिका**-સ્ત્રી-३१८-હું પહેલો હું પહેલો એમ જે ક્રિયામાં વિચારાય તે.

☐अहंपूर्विका, [अहंप्रथमिका शि.२०] ।

**अहमहमिका**-સ્ત્રી-३१७-હું શક્તિમાન છું, હું શક્તિમાન છું તેવો ગર્વ.

*परस्परमहं शक्तोऽहं शक्त इत्यस्यां अहमहमिका ।

**अहंपूर्विका**-સ્ત્રી-३१८-शि. १९ હું પહેલો હું પહેલો એવું વિચારે તે.

☐(अहमग्रिका), [अहंप्रथमिका शि २०] ।

*अहंपूर्वमित्यस्यां अहंपूर्विका ।

**अहंप्रथमिका**-સ્ત્રી-३१८ (शि.१९)-હું પહેલો હું પહેલો એવું વિચારવું તે

☐अहंपूर्विका,(अहमग्रिका) ।

**अहंमति**-पुं-१३७४-અજ્ઞાન

☐अविद्या, अज्ञान ।

*अहं इत्यस्य मननमित्यहंमतिः, अनात्मन्यात्माभिमानात् अहं विभक्त्यन्तप्रतिरुपकमत्राऽव्ययम् ।

**अहर्बान्धव**-पुं-९६-સૂર્ય

द्र० अंशुशब्दः ।

*अह्नः बान्धवः इति अहर्बान्धवः, यौगिकत्वात् दिनबन्धुः ।

**अहर्मणि**-पुं-९९-સૂર્ય

द्र० अंशुशब्दः ।

*अह्नो मणिः इति अहर्मणिः यौगिकत्वात् दिनरत्नम् ।

**अहर्मुख**-न.-१३८-પ્રભાતકાળ

☐प्रभात, व्युष्ट, विभात, प्रत्यूष, कल्य, प्रत्युषस्, उषस् काल्य, (प्रातर्, प्रगे, प्राह्णे, पूर्वेद्युस्, गोस,) [निशात्यय, गोसर्ग शे १८] ।

*अह्नो मुखं आरंभः इति अहर्मुखम्

**अहस्कर**-पुं-९७-સૂર્ય

द्र० अंशुशब्दः ।

*अहः करोतीति अहस्करः, 'संख्या"-(५।१।१०२) इत्यादिना टः यौगिकत्वात् वासरकृद्, दिनप्रणीः दिनकृदित्यादयः ।

**अहार्य**-पुं-१०२७-પર્વત

द्र० अचलशब्दः ।

*हर्तुं अशक्यः इति अहार्यः ।

**अहि**-पुं-२१९ (शे. १७) વિષ્ણુ

द्र० अच्युतशब्दः ।

*अंहते इति अहिः पुंस्त्रीलिङ्गः, "अग्भिकुण्ठि" (उणा-६१४) इति इः, न लोपश्च ।

**अहि**-पुं. સ્ત્રી-१३०२-સર્પ

☐सर्प, पवनाशन, भोगिन्, भुजङ्ग, भुजग, उरग, द्विजिह्व, व्याल, (व्याड), भुजङ्गम, सरीसृप, दीर्घजीह्व, काकोदर विषधर, फणभृत्, पृदाकु, दृक्कर्ण, चक्षुःश्रवस्, कुण्डलिन्, बिलेशय, दन्दशूक, दर्वीकर, कञ्चुकिन्, चक्रिन्, गूढपाद्, पन्नग जिह्मग लिहान, कुम्भीनस, आशीविष, 'आशीर्विष', दीर्घपृष्ठ, द्विरसन, फणधर हरि, भोगधर, (गोकर्ण शे. ११५) ।

**अहिंसा**-સ્ત્રી-८२ કોઈ જીવને ન મારવું તે પ્રથમ યમ.

*हिंसा प्राणव्यपरोपणं तदभावोऽहिंसा ।

**अहिकान्त**-पुं-११०६-પવન

द्र० अनिलशब्दः ।

*अहिभिः काम्यते इति अहिकान्तः ।

**अहिकाय**-पुं-१३१५-સર્પનું શરીર

☐भोग ।

**अहिकोश**-पुं-१३१५-સાપની કાંચળી

☐निर्ल्वयनी, निर्मोक, कञ्चुक, (अहित्व च्)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निर्लयनी [श. ११६]

*अहेः कोश इव अहिकोशोऽहित्वक् ।

**अहिच्छत्रा**–स्त्री–९६०–એક દેશનું નામ

☐प्रत्ययग्रथ ।

*अहिच्छत्रमस्त्येषु इति अहिच्छत्राः अभ्रादित्वाद् अः ।

**अहिच्छत्र**–पुं.११९७–એક પ્રકારનું ઝેર

द्र० अङ्कोल्लसारशब्दः ।

*अहिच्छत्रदेशे भवत्वाद् अहिच्छत्रः ।

**अहित**–पुं–७२९–શત્રુ

द्र० अभिमातिशब्दः ।

*न हितोऽहितः ।

**अहितुण्डिक**–पुं–४८८–ગારૂડી–સાપ પકડનાર

☐व्यालग्राहिन्, आहितुण्डिक ।

**(अहित्वच)**–स्त्री–१३१५–સાપની કાંચળી

द्र० अहिकोशशब्दः ।

**(अहिदंष्ट्रा)**–स्त्री—१३१५—તાળવામાં રહેલી સર્પની દાઢ

☐आशिष्, (आशी शि. ११६) ।

*अहेः दंष्ट्रा इति अहिदंष्ट्रा ।

**अहिपर्यङ्क**–पुं २०० (शे ४३)–શંકર

द्र० अट्टहासिन्शब्दः ।

**अहिभय**–न.–३०१–રાજાઓને સ્વપક્ષથી થતો ભય.

*स्वपक्षात् राजपुत्रादेः अहेरिव गृहस्थितात् भयं इति अहिभयम् ।

**(अहिभुज्)**–पुं–(१४–परि.)–મોર, ભોજ્ય ભોજક ભાવ સંબંધથી બનેલ શબ્દ.

☐(अहिरिपु) ।

**अहिभुज**–पुं–२३१ (शे ८०)–ગરૂડ પક્ષી

द्र० अरुणावरजशब्दः ।

**अहिभृत्**–पुं–१९९–શંકર

द्र० अट्टहासिन्शब्दः ।

*अहिं बीभर्ति इति अहिभृत् यौगिकत्वात् उरगभूषणः ।

**अहिरणिन्**–पुं–१३०४ (शे. १८७)–બે મુખવાળો સર્પ, રાજસર્પ.

☐राजसर्प, भुजङ्गभोजिन् ( द्विमुख शे. १८७) ।

**अहिरिपु**–पुं–१४–મોર, વધ્યવધક ભાવથી સંબંધ બનેલ શબ્દ

☐(अहिभुज्) ।

**अहिर्बुध्न**–पुं–१९७–શંકર

द्र० अट्टहासिन्शब्दः ।

*अहिः शेषनागोबुध्नेऽस्य भूमूर्तेः इति अहिर्बुध्न पृषोदरादित्वाद् रेफागमः द्वाभ्यांपृथक् पदाभ्यां प्रथमैकवचनान्ताभ्यां एकं नामेत्यन्ये विभक्त्यन्तरेऽपि, –**यथा** "अहये बुध्नाय नमो बुध्नाय नमो नमो नमोऽस्तु गणपतये" ।

**अहिर्बुध्नदेवता**–स्त्री–११४–ઉત્તરા ભાદ્રપદનક્ષત્ર

☐उत्तरभद्रपदा, प्रोष्ठपदा ।

*अहिर्बुध्नश्च देवता आसां इति अहिर्बुध्नदेवताः ।

**अहो**–અ.–१५३७ (શિ. १३८) આશ્ચર્ય વાચક શબ્દ

द्र० अङ्गशब्द ।

**अहो**-अ.–१५४२ (शे.२००)-આશ્ચર્ય વાચક શબ્દ

द्र० अङ्गशब्दः ।

**अहोरात्र**–पुं न.–१३८–રાતદિવસ

*अहश्च रात्रिश्च इति अहोरात्रः पुंक्लीबलिङ्गः, "ऋक्साम"–(७।३।९७) इति द्वन्द्वे अदन्तो निपात्यते ।

**अह्नाय**–અ.–१५३०–જલદી

द्र० अञ्जसाशब्दः ।

*अह्नायेति विभक्त्यन्त प्रतिरुपकमव्ययम् **यथा**– "अह्नाय सा नियमजं, क्लममुत्ससर्ज" इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# "आ"

**आ**–स्त्री–२२६ (शि.१५)–લક્ષ્મી

द्र०इन्दिराशब्दः ।

*अटति अतति वा आ "क्वचित्"(५।१।१७१) इति डः ।

**आकर**–पुं–१०३६–ખાણ

☐खनि, खानि, गञ्जा ।

*आकीर्यन्ते धातवोऽस्मिन्नाकरः ।

**आकर**–पुं–१४१२ (शि.१२७)–સમુહ

द्र०उत्करशब्दः ।

**आकल्प**–पुं–६३५–વસ્ત્ર

☐वेष, नेपथ्य [वेश (श.५०] ।

*आकल्पते इति आकल्पः ।

**आकल्य**–पुं–४६२–રોગ

द्र०आपाटवशब्दः ।

*अकल्यस्य भावः इति आकल्यम् ।

**आकार**–पुं–२६१ (शे ८३)–બોલાવવું

द्र० अभिमन्त्रणशब्दः ।

**आकार**–पुं–१५१३–હૃદયનો ભાવ જણાવનાર ઈશારો

☐इङ्ग, इङ्गित ।

*आकृत्तिः इति आकारः ।

**आकारगुहन**–नं–३१४ (शे.९०)–આકાર છૂપાવવો

द्र०अवहित्थाशब्दः ।

**आकार गोपन**–न.–३१४–આકાર છુપાવવો

द्र०अवहित्थाशब्दः ।

*आकारस्य भ्रूविकारमुखरागादेर्गोपनमाच्छादनमाकारगोपनम्

**आकारण**–न.–२६१–બોલાવવું

द्र०–अभिमन्त्रणशब्दः ।

**(आकारणा)**–स्त्री–२६१–બોલાવવું

द्र० अभिमन्त्रणशब्दः ।

**आकालिकी**–स्त्री–११०५–વીજળી

द्र० अचिरप्रभाशब्दः ।

*आकालमुत्पत्तिकालं यावद् भवति इति आकालिकी क्षणिकत्वात् "आकालिकमिकश्चाद्यन्ते" (६।४।१२८) इति इकण् ।

**आकाश**–न.–१६३–આકાશ

द्र० अनन्तशब्दः ।

*आकाशन्ते सूर्योदयोऽस्मिन्निति आकाशं न काशते वा बाहुलकाद् दीर्घः ।

**आकाशचमस**–पुं–१०५-(शे. १३)–ચન્દ્ર

द्र० अत्रिदृग्जशब्दः ।

**(आकाश-स्फटिक** કિ. ૧.–पुं–१०६८ સૂર્યકાંત અને ચંદ્રકાંત મણિ.

☐खस्फटिक ।

*सूर्यकान्त चन्द्रकान्तौ द्वौ अपि आकाशस्फटिकाख्यौ इत्यर्थः, यद् **वाचस्पतिः**–

स्फटिकास्तु त्रयस्तेषामाकाशस्फटिको वरः,
द्वौक्षीरतैलस्फटिकावाकाशस्फटिकस्यतु ॥
द्वौ भेदौ सूर्यकान्तश्च चन्द्रकान्तश्च तत्र च इति ।

**आकीर्ण**–न.–१४७३–ભરપુર

☐संकीर्ण, सङ्कुल, आकुल, कीर्ण ।

*आकीर्यते इति आकीर्णम् ।

**आकुल**–न.–१४७३–ભરપુર

द्र० आकीर्ण शब्दः ।

*आकोलति इति आकुलम् ।

**आकूत**–न.–१३८३–અભિપ્રાય

द्र० अभिप्रायशब्दः ।

*आकूयते इति आकूतम् ।

**आक्रन्द**–पुं–७९९–લડાઈ, યુદ્ધ.

द्र० अनीकशब्दः ।

*आक्रन्दन्त्यत्र कातरा इति आक्रन्दः ।

**आक्रम**–पुं–१५११–આક્રમણ

☐अधिक्रम, क्रान्ति ।

*आक्रमणं इति आक्रमः ।

**आक्रीड**–पुं–१११२–બાગ, ગાર્ડન

☐उद्यान ।

*आक्रीडन्तेऽस्मिन्नाक्रीडः ।

**आक्रोश**–पुं–२७२–નિંદા

द्र० अभीषङ्गशब्दः ।

*आक्रोशनं इति आक्रोशः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**आक्षपाटलिक्**–पुं–४७९ (शि. ३५)–પરીક્ષા કરનાર
□कारणिक, परीक्षक ।

**आक्षपाद्**–पुं–८६२–નૈયાયિક
□न्यायिक, यौग ।
*अक्षस्तृतीयनेत्रं पादेऽस्य इति आक्षपादः, अक्षपादस्यायमाक्षपादः ।

**आक्षारणा**–स्त्री–२७२ (शि. १७)–મૈથુન વિષયક અપવાદ મૂકવો તે.
□क्षारणा (दूषण)

**आक्षारित**–पुं–४३६ (शि. ३१) ઠપકા લાયક
द्र० अभिशस्तशब्दः ।

**आक्षेप**–पुं–२७२ નિંદા
द्र० अभीषङ्गशब्दः ।
* आक्षेपणं इति आक्षेपः ।

**आखण्डल**–पुं–२ (परि.)–ઇન્દ્ર (રુદ્રશબ્દ)

**आखण्डल**–पु–१७१–ઈન્દ્ર
द्र० अच्युताग्रजशब्दः ।
*आखण्डयति इति आखण्डलः ।

**आखनिक**–पुं–१२८८–ભુંડ
□किर, किरि, भूदार, सूकर (सुकर) कोल, वराह, क्रोड, पोत्रिन्, घोणिन् वृष्टि (गृष्टि) स्तब्धरोमन्, दंष्ट्रिन्, किटि, आस्यलाङ्गल, शिरोमर्मन्, स्थूलनास, बहुप्रज, [कुमुख, कामरूपिन्, सलिलप्रिय, तलेक्षण, वक्रदंष्ट्र, पङ्कक्रीडनक, शे. १८५/१८६] ।
*आखनति इति आखनिकः, "आङःपणिपमि"–(उणा–३९) इति बहुवचनादिकः, आखनः खातविशेषः सोऽस्यास्तीति वा ।

**आखु**–पुं. स्त्री–१३००–ઉંદર
□मूषिक, मूषक (मुषक), वज्रदशन, खनक, उन्दुर, उन्दुरु, वृष, सूच्यास्य, वृषलोचन, [उन्दर शि. १५५] ।
*आखनति इति आखुः पुंस्त्रीलिङ्गः 'पराङ्भ्यां शूखनिभ्याम्" (उणा–७४२) इति डिदुः ।

**आखुग**–पुं–२०७–ગણપતિ
□हेरम्ब, गणेश, विघ्नेश, (प्रमथाधिप, विघ्नराज), पर्शुपाणि, (परशुधर) विनायक, द्वैमातुर, गजास्य, एकदन्त, लम्बोदर, (मूषिकरथ) [पृश्निगर्भ, पृश्निशृङ्ग, द्विशरीर, त्रिधातुक, हस्तिमल्ल, विषाणान्त शे. ६२/६३] ।
*आखुणा गच्छति इति आखुगः, यौगिकत्वाद् मूषिकरथोऽपि ।

**आखेट**–पुं.–९२७–શિકાર
□पापर्द्धि, मृगया, मृगव्य, आच्छोदन ।
*आखेट्यन्ते उत्त्रास्यन्ते प्राणिनोऽस्मिन् इति आखेटः ।

**आखोर**–पुं–१५७ (शे. २६)–ઉનાળો
द्र० उष्णशब्दः ।

**आख्या**–स्त्री-२६०–નામ
द्र० अभिख्याशब्दः ।
* आख्यायतेऽनया इति आख्या ।

**आगन्तु**–पुं–४९९-મહેમાન
द्र०अतिथिशब्दः ।

**आगम**–पुं–२४२–આગમ, શાસ્ત્ર
□राद्धान्त, सिद्धान्त, कृतान्त, आप्तोक्ति, संमय ।
*आगम्यते इति आगमः ।

**आगस्**–ન.–७४४–અપરાધ
द्र०अपराधशब्दः ।
*अगति कुटिलं गच्छत्येनेनाऽऽगः क्लीबलिङ्गः "वस्त्यगिभ्यां णित्" (उणा–९७०) इत्यस् ।

**आगू**–સ્ત્રી–२७८–સ્વીકાર
द्र०अङ्गीकारशब्दः ।
*आगच्छत्यनया पौरुषं इति आगूः स्त्रीलिङ्गः "भ्रमिगमितनिभ्यो डित्" (उणा–८४३) इति ऊः ।

**आग्निमारुत**–पुं.१२३–અગસ્ત્યઋષિ
द्र० अगस्तिशदः ।
*अग्निश्च मरुच्च तयोरपत्यं इति आग्निमारुतः तदंशत्वात् अणि "देवतानामात्वादौ"(७।४।२८) इत्युभयपदवृद्धौ, "इवृद्धिमत्यविष्णौ," (३।२।४३) इति आत्वापवादः इः, पीताब्ध्यादयो यौगिकाः ।

**आग्नीध्रा**-स्त्री–८१४–હવિષ વગેરે આપી અગ્નિ-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

સળગાવવો તે.

द्र० अग्निकारिका शब्दः ।

*अग्निमिन्धेऽग्नीध् ऋत्विग्विशेषः तस्येयमाग्नीध्रा "गृहेऽग्नीधो रण् धश्च (६।३।१७४) इति रण् प्रज्ञादित्वात् स्वार्थेऽणि आग्नीध्रीत्यपि ।

**आग्नीध्री**-स्त्री.-८१४ (शि. ७१)-હવિષ વગેરે આપી અગ્નિ સળગાવવો તે.

*द्र० अग्निकारिकाशब्दः ।

**आग्नेय**-पुं-१२३-અગસ્ત્યઋષિ

द्र० अगस्तिशब्दः ।

*अग्नेरपत्यं इति आग्नेयः तदंशत्वात् "कल्यग्नेरेयण्" (६।१।१७) इत्येयण् ।

**आग्नेय**-न.-६२१-લોહી

द्र० असृज्शब्दः ।

*अग्नये हितं इति आग्नेयं "कल्यग्नेरेयण्" (६।१।१७) इत्येयण् ।

**(आग्नेयी)** स्त्री-१६९-અગ્નિ ખૂણો.

**आग्रहायणिक**-पुं-१५३-માગસર માસ

□वत्सरादि, मार्गशीर्ष (मार्ग) सह, सहस् ।

*आग्रहायणी पौर्णमास्यस्य आग्रहायणिकः, "आग्रहायण्यश्वत्थादिकण्" (६।२।९९) इति निपात्यते ।

**आग्रहायणी**-स्त्री-१५०-માગશર પુનમ.

□मार्गशीर्षी ।

*अग्रहायनस्य "पूर्वपदस्था"-(२।३।६४) इति णत्वे अग्रहायणमेव प्रज्ञादित्वा दणि ङ्याम् आग्रहायणी मार्गशीर्षादाराभ्य वत्सरप्रवृत्तेः ।

**आघाट**-पुं-९३२-મર્યાદા, હદ.

द्र. अन्तशब्द; ।

*आघटते जनोऽत्र इति आघाटः

**आघार**-पुं-४०७-ઘી

□घृत, हविष्य, आज्य हविष्, सर्पिष् ।

*आघारयति इति आघारः ।

**आङ्गिक**-पुं-२८३-અંગથી કરાયેલ અભિનય.

**आङ्गिरस**-पुं-११९-ગુરુબૃહસ્પતિ

□बृहस्पति, सुराचार्य, (देवगुरु) जीव, चित्रशिखण्डिजवाचस्पति, द्वादशार्चिस्, धिषण, फल्गुनीभव, गीःपति, बृहतीपति, उतथ्यानुज, गुरु, [महामति, प्रख्यस्, प्रचक्षस्, वाच्, वाग्मिन्, गौर, दीदिवि, गीरथ शे.१४/१५, सप्तर्षिज, शि. १०] ।

**आचाम**-पुं-३९६-ઉકાળેલા અનાજનું ધોવણ, ઓસામણ

□निःस्राव, मासर, [भक्तमण्ड, प्रस्राव, प्रस्रव, आच्छोदन, आस्रव शे. ९६] ।

* आचाम्यते इति आचामः ।

**आचार**-पुं-८४३-શુદ્ધાચાર શિયલ, ચારિત્ર

□चरित्र, चरित, चारित्र, चरण, वृत्त, शील ।

*आचरणं इति आचारः ।

**आचारवेदी**-पु.-९४८-તીર્થંકરાદિ ૬૩ શલાકા પુરૂષોની જન્મભૂમિ

□आर्यावर्त्त, पुण्यभू ।

*आचारस्य वेदीव इति आचारवेदी विन्ध्यादः हिमाद्रेश्च मध्यभागः **यदुव्याडिः**-

आसमुद्राच्चवैपूर्वादासमुद्राच्चपश्चिमात् ।

हिमवद्विन्ध्ययोर्मध्यमार्यावर्तं विदुर्बुधाः ॥ इति ।

**आचाराङ्ग**-न.-२४३-પ્રથમ અંગનું નામ.

*आचरणं इति आचारः, आचर्यते इति वा शिष्टाचरितो ज्ञानाद्या सेवनविधिरित्यर्थः, तत्प्रतिपादको ग्रन्थोऽपि आचारः, स चासौ अङ्गं च इति आचाराङ्गम ।

**आचार्य**-पुं-७८-આચાર્ય, વ્યાખ્યાકાર.

□अनुयोगकृत् ।

*आचर्यते-सेव्यते इति आचार्यः, आचारे साधुरिति वा, आचारं ग्राहयतीति नैरुक्तः मन्त्रव्याख्याकृदाचार्य इत्यन्ये ।

**आचार्या**-स्त्री-५२४-સ્ત્રી આચાર્ય

*स्वतः पुंयोगं विना स्त्री आचार्या ।

**आचार्यानी**-स्त्री-५२३-આચાર્યની સ્ત્રી

□आचार्यी ।

*पुंसायोगः पुंयुक् तत्र, आचार्यस्य भार्या इति आचार्यानी "मातुलाचा" (२।४।६३) इति ङीः पक्षे तत्सन्नियोगे आन् चान्तः क्षुभ्नादित्वाद् णत्वाभावः ।

**आचार्यी**-स्त्री-५२३-આચાર્યની સ્ત્રી

□आचार्यानी ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*पुंसा योगः पुंयुक् तत्र आचार्यस्य भार्या इति आचार्यी "मातुल" (२।४।६३) इति ङीः

**आचित**—पुं—८८५—वीसतुला प्रमाण वस्तु

*पुंसा हि द्वे पलसहस्रे वोढुं शक्यते आचीयते स्म इति आचितः ।

**आचित**—पुं—८८५—दशभार प्रमाण सोनुं

*ते भारा दश संख्याः आचीयते स्म इति आचितः क्लीबेऽयमित्यन्ये ।

**आचित**—न.—१४७३—पुर्णुं भरेलुं

☐पूर्ण, छन्न पूरित, भरित, निचित, व्याप्त । [छादित शि.१३२]

*आचीयते स्म इति आचितम् ।

**आच्छाद**—पुं—६६६ वस्त्र

द्र० अंशुकशब्दः ।

*आच्छाद्यतेऽनेनाऽऽच्छादः "युवर्ण"—(५।३।२८) इत्यलः आच्छादनमपि ।

**आच्छादन**—न.—६६६—(शि.५४) वस्त्र

द्र० अंशुकशब्द ।

*आच्छाद्यतेऽनेनाऽऽच्छादः "युवर्ण—(५।३।२८, इत्यलः आच्छादनमपि ।

**अच्छुरितक**—न.—२९८—क्रोध थाय तेवुं हास्य

*उत्प्रास्यते सामर्षोऽन्यः क्रियतेऽनेनोत्प्रास उपहास, उत्प्रास सहिते हासे आच्छुरणमाच्छुरितकम्, 'परच्छेदनं अवच्छुरितम्" इति **कात्यः** ।

**आच्छोदन**—न.—९२७—शिकार

द्र०आखेटशब्दः ।

*आचोद्यन्ते प्राणिनोऽस्मिन् इति आच्छोदनं पृषोदरादित्वाच्चस्य छत्वम् ।

**आच्छोदन-नं**—३९६ (शे ९६)—उकाळेला अनाज नुं धोवण

द्र०आचामशब्दः ।

**आज**—पुं—१३३५ (शे. १९५)—गीधपक्षी

द्र०गृध्रशब्दः ।

**आजक**—१४१७—बकरानो समुह

**आजगव**—न.—२०१—शंकरनुं धनुष्य

☐पिनाक, अजकाव । [अजगव—अजगाव शि.१४]

*अजगवोऽस्थिविकारः तस्येदं आजगवं **यत्कात्यः** धनुर्वेदन्त्याजगवं पिनाकिकरगोचरम् ।

**आजानेय**—पुं—१२३४—कुलीन घोडो.

☐कुलीन ।

*आजेन क्षेपेण आनीयते वशीक्रियते इति आजानेयः ।

**आजि**—स्त्री—७९७—लडाई

द्र०अनीकशब्दः ।

*अजन्त्यधिक्षिपन्त्यस्यां इति आजिः, स्त्रीलिङ्गः 'पादाच्चात्यजि"—(उणा—६२ ) इति णिदिः ।

**आजिभिष्मभू**—पुं—८०९—भयंकर युद्धभूमि

☐वीराशंसन, (वीराशंसनी) ।

*आजेः सङ्ग्रामस्य भिष्माऽतिघोरा भूमिः इति आजिभिष्मभूः ।

**आजीव**—पुं—८६५—आजीविका

☐जीवन, वार्त्ता, जीविका, वृत्ति, वेतन ।

*आजीवनं इति आजीवः आजीवन्त्यनेनेति वा ।

**आजू**—१६५८—बळात्कारे नरकमां नांखवुं

☐विष्टि ।

*आजवति इति आजूः "दिद्युदद्द" (५।२।८३) इति क्विपि निपात्यते ।

**आज्ञा**—स्त्री—२७७—हुकम आज्ञा

द्र०अववादशब्दः ।

*आज्ञापनं इति आज्ञा चुरादिणिचो ऽनित्यत्वात् 'उपसर्गादातः (५।३।११०) इत्यङ ।

**आज्य**—न —४०७—घी

द्र० आघारशब्दः

* आ अज्यतेऽनेन इति आज्यं 'कुप्यभिद्य" —(५।१।३९) इति क्यपि निपात्यते ।

**आज्यवारि**—पुं—१०७५—घीनो दरियो

☐आज्योद ।

*आज्यं वारि यस्य स इति आज्यवारिः ।

**आज्योद**—पुं.—१०७५—घीनो दरीयो

☐आज्यवारि ।

*आज्यं उदकं यस्य स इति आज्योदः ।

**आञ्जनेय**—पुं—७०५—हनुमान

द्र०अर्जुनध्वजशब्दः ।

*अञ्जनाया अपत्यं इति आञ्जनेयः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**(आटरुष)**-पुं-११४०-અરડુશી (વનસ્પતિ વિશેષ)

द्र०आटरूषकशब्दः ।

*आ अटति इति आटरूषः "कोरदूष"-(उणा-५६१ इत्यूषे निपात्यते ।

**आटरूषक**-११४०-પું-અરડુશી-(વનસ્પતિ વિશેષ)

☐वृष, वासा, (आटरूष, अटरूष) वैद्यमातृ, सिंही, वाशिका, सिंहास्य, वासक, वाजिदन्तक [वाशा, अटरूषक शि.१०२] ।

*आ अटति इति आटरूषः आटरूषः एव इति आटरूषकः स्वार्थे कः ।

**आटि**-स्त्री-१३३८-એક પ્રકારનું પક્ષીશરારી

☐आति, 'आटी आडी' शरारि 'शरालि, शराली, शराति, शराटि, शराडि' ।

*आतति इति आटिः बाहुलकात् णिदिः ।

**'आटी'**-स्त्री-१३३८-શરારી એકજાતનું પક્ષી

द्र०आटिशब्दः ।

**आटोप**-पुं-१४९९-આવેશ, અહંકાર

☐आवेश, संरम्भ ।

*'टुपः सौत्रः' आटोपनं इति आटोपः ।

**आडम्बर**-पुं. न.-७९९-યુદ્ધનો પડહ, ઢોલ

☐पडह ।

*आदम्यते इति आडम्बरः "जहर"-(उणा-४०३) इत्यपरे निपात्यते पुंक्लीबलिङ्गः ।

**'आडी'**-स्त्री-१३३८-એકપ્રકારનું પક્ષી, શરારી

द्र०आटिशब्दः

**आढक**-त्रि-८८६-ચાર પ્રસ્થ પ્રમાણ અનાજ વગેરે

चतुर्भि प्रस्थैः आढौक्यते इति आढकः त्रिलिङ्गः "कीचल"-(उणा-३३) इत्यके निपात्यते ।

**आढकवाप**-पुं-९६९-એક આઢક ધાન્ય વાવી શકાય તેવું ખેતર.

☐आढकिक ।

**आढकिक**-पुं.-९६९-એક આઢક ધાન્ય વાવી શકાય તેવું ખેતર.

☐आढकवाप ।

**आढकी**-स्त्री-१७५१-તુવેર

☐तुवरी, वर्णा ।

*आ ढौकते इति आढकी "कीचक"-(उणा-३३) इत्यके निपात्यते ।

**आढकी**-स्त्री-१०५६-સૌરાષ્ટ્રની માટી, ફટકડી.

☐सौराष्ट्री, पार्वती, काक्षी, कालिका, पर्पटी, सती, तुवरी, कंसोद्भवा, काच्छी, मृदाह्वया-मृद् (मृत्तिका, मृत्स्ना, मृत्सा) ।

*आढौकते इति आढकी ।

**आढ्य**-पुं-३५७-ધનવાન, ધનાઢ્ય

☐इभ्य, धनिन् ईश्वर, ऋद्ध, (समृद्ध) ।

*अध्यायन्ति इति आढ्यः पृषोदरादित्वात् आढौकते इति 'शिक्यास्याढ्य"-(उणा-३६४) इति यान्तो निपात्यते ।

**आणवीन**-न.-९६६-કાંગનું ખેતર

☐अणव्य ।

*अणोः क्षेत्रं इति आणवीनं "वाऽणुमाषात्" (७।१।८२) इति यः पक्षे ईनञ् च ।

**आणि**-पुं. स्त्री-७५६-ધરીનો ખીલો

☐अणि ।

*अणति शब्दायते इति आणिः 'कृशृकुटि"-(उणा-६१९) इति वा णिदिः पुंस्त्रीलिङ्गः, अक्षस्य नाभि क्षेप्यस्य काष्ठस्याऽग्रेऽन्ते बन्धार्थं कीलः इत्यर्थः ।

**आण्ड**-पुं-६१२ (शि.४७)-અંડકોશ

द्र०अण्डकशब्दः ।

**आतङ्क**-पुं-३०१-ભયાનક રસનો સ્થાયી ભાવ ભય

☐भय, भी, भीति, आशङ्का, साध्वस, दर, भिया ।

*आतङ्कनं इति आतङ्कः ।

**आतङ्क**-पुं.-४६२-રોગ

द्र०अपाटवशब्दः ।

*आतङ्कत्यनेन इति आतङ्कः ।

**आततायिन्**-पुं-३७२-વધ કરવાને તૈયાર થયેલો

☐घातोद्यत ।

*वधोद्युक्तः संनद्धः सन् यो वधार्थमुद्युतः स आततः तादृशः सन् एति वधार्थं धावति इति आततायी आततं पलायमानं वा तयते आततायी, वध

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उपलक्षणं, यत्स्मृतिः
अग्निदो गरदश्चैव शस्त्रपाणिर्धनापह ।
क्षेत्रदारहरश्चैव षडेते आततायिनः ॥

**आतप**–पुं–१०१–તડકો
☐प्रकाश, तेजस्, उद्योत, आलोक, वर्चस् (द्योत)।
*आतपति इति आतपः ।

**(आतपत्र)**–न.–७१७–छत्री
द्र० आतपवारण शब्दः ।

**आतपवारण**–न.–७१७–छत्री
☐छत्र, (आतपत्र उष्णवारण) [नृपलक्ष्मन्, शे. १४१] ।
*आतपः वार्यतेऽनेन इति आतपवारणम् ।

**आतर**–पुं–८७९–વહાણનું ભાડું
☐तरपण्य ।
*आतरन्ति अनेन इति आतरः ।

**आतापी**–पुं–१३३४–સમડી
☐चिल्ल, शकुनि, 'आतायिन्' ।
*आतयति इति आतापी ।

**'आतायिन्'**–पुं–१३३४–સમડી
द्र० आतापीशब्दः ।

**आति**–स्त्री–१३३८–શરારી, એક પ્રકારનું પક્ષી
द्र० आटिशब्दः ।
*अतति इति आतिः "पादाच्चा"–(उणा–६२०) इति णिदिः ।

**आतिथेयी**–स्त्री–४९९–મહેમાનગિરી
☐आवेशिक, आतिथ्य ।
*अतिथौ साधुः इति आतिथेयी स्त्रीक्लीबलिङ्गः 'पथ्यतिथि"–(७।१।१६) इति एयण् ।

**आतिथ्य**–न.–४९९–મહેમાનગિરી
☐आवेशिक, आतिथेयी ।
*अतिथये इदं इति आतिथ्यम्, 'ण्योऽतिथेः" (७।१।२४) इति ण्यः ।

**आतिथ्य**–पुं. (शि. ३९)–४९९–મહેમાન
द्र० अतिथिशब्दः ।

**आतुर**–पुं–४५९–રોગી
द्र० अपटुशब्दः ।

*'तुरत्वरणे" सौत्रः आतोरति इति आतुरः ।

**आतोद्य**–न.–२८६–વાજિંત્ર
☐वाद्य, वादित्र, तूर्य, तूर, स्मरध्वज ।
*आतुद्यते इति आतोद्यम् ।

**आत्तगन्ध**–पुं–४४०–પરાભવ પામેલ
☐अभिभूत ।
*आत्तो गृहीतो गन्धोऽभिमानोऽस्य इति आत्तगन्धः ।

**आत्मगुप्ता**–स्त्री–११५१–કૌવચ
☐कपिकच्छू' अजहा, जहा, अव्यण्डा, कण्डुरा, कण्डूरा, प्रावृषायणी, ऋष्यप्रोक्ता, शूकशिम्बि, शूकशिम्बा, कपिकच्छु, 'मर्कटी' ।
*आत्मना गुप्ता इति आत्मगुप्ता स्पर्शाविषयत्वात् ।

**आत्मघोष**–पुं–१३२२–કાગડો
द्र० अन्यभृत्शब्दः ।
*आत्मनः स्वनाम्नो घोषोऽस्य इति आत्मघोषः काकेति भाषणात् ।

**आत्मज**–पुं–९–(परि.)–જ્ઞાતિવાચક શબ્દને આ શબ્દ લગાડવાથી કુંટુંબી વાચક શબ્દ બને.

**आत्मज**–पुं–५४२–पुत्र
द्र० अङ्गजशब्दः ।
*आत्मनः जायते इति आत्मजः, "अजातेः"–(५।१।१७०) इति डः ।

**आत्मज**–पुं.–६ (परि.)–બ્રહ્મા
☐[आत्मयोनि, आत्मरुह, आत्मजन्मन्, आत्मभू आत्मसूति आत्मसंभव (परि)]

**आत्मजन्मन्**–६ (परि) બ્રહ્મા
[द्र० आत्मजशब्दः परि]

**आत्मजा**–स्त्री–५४२ पुत्री
द्र० अङ्गजाशब्दः ।
*आत्मनः जायते इति आत्मजा ।

**आत्मदर्श**–पुं–६८४–આરીસો
☐मुकुर, आदर्श, दर्पण, [मुकुर शि ५७] ।
*आत्मा दृश्यतेऽनेन इति आत्मदर्शः ।

**आत्मन्**–पुं–१३६६–આત્મા જીવ.



Jain Education International For Private & Personal Use Only www.jainelibrary.org

☐क्षेत्रज्ञ, पुरुष, चेतन [जीव शि. १२३]।
*अतति संसरति इति आत्मा पुंलिङ्गः।
"सात्म"-(उणा-९१६) इति मनि निपात्यते।

**आत्मन्**-पुं-१३७६-स्वभाव स्वरूप.
☐स्वरूप, स्वलक्षण, स्वभाव, प्रकृति, रीति सहज, धर्म, रूपतत्त्व, सर्ग, निसर्ग, शील, सतत्त्व, संसिद्धि, ।
*अतति अनेन इति आत्मा ।

**आत्मप्रवाद्**-न.-२४७-सातमुं पूर्व
*नयदर्शनैरात्मानं प्रवदति इति आत्मप्रवादम्।

**आत्मभू**-पुं-२१३-ब्रह्मा
द्र० अजशब्दः ।
*आत्मनः भवति इति आत्मभूः यौगिकत्वात् आत्मयोनिः इत्यर्थः ।

**आत्मभू**-पुं-२१७-विष्णु
द्र० अच्युतशब्दः ।
*आत्मनः भवति इति आत्मभूः ।

**आत्मभू**-पुं-६ (परि)-विष्णु
[द्र० आत्मज शब्दः । (परि.)]

**(आत्मभू)**-पुं-२२९-कामदेव
☐(मनोयोनि, चेतोभव, शृङ्गारयोनि शृङ्गार-जन्मन्, सङ्कल्पयोनि, स्मृतिभू, आत्मयोनि)।

**आत्मंभरि**-पुं-४२७-पेटभरो
☐स्वोदरपुरक, कुक्षिम्भरि, उदरम्भरि ।
*आत्मानं एव बिभर्ति इति आत्मंभरिः "कुक्ष्यात्मो"- (५।१।९०) इति खिः ।

**(आत्मयोनि)** पुं-२२९-कामदेव
द्र० आत्मभूशब्दः ।

**आत्मयोनि**-पुं-६-(परि)-ब्रह्मा
द्र० आत्मजशब्दः ।

(**आत्मयोनि**) पुं.-२१३-ब्रह्मा
द्र० अजशब्दः ।

**आत्मरुह**-पुं-६ (परि.)-ब्रह्मा
द्र० आत्मजशब्दः ।

**आत्मसंभव**-पुं-६ (परि.)-ब्रह्मा
द्र० आत्मजशब्दः ।

**आत्मसूति**-पुं-६ (परि.)-ब्रह्मा
द्र० आत्मजशब्दः ।

**आत्माशिन्**-पुं-१३४४-माछली
द्र० अण्डजशब्दः।
*आत्मैव आत्मा मत्स्यजातिः तां अश्नाति इति आत्माशी ।

**आत्मीय**-त्रि-५६२-पोतानुं
☐निज, स्व, स्वकीय
*आत्मनोऽयं इति आत्मीयः "दोरीयः" (६।२।३२) इति ईयः निपात्यते ।

**आत्रेय**-पुं-६२०-रसधातु
द्र० अग्निसम्भवशब्दः ।
*अत्रेरपत्यमिव तज्जन्यत्वात् आत्रेयः ।

**आत्रेयी**-स्त्री-५३५-रजस्वला स्त्री
द्र० अवीशब्दः ।
*आत्रायते इति आत्रेयी "य एच्चातः" (५।१।२८) गौरादित्वाद् ङीः, अत्रेरपत्यमित्येके ।

**आथर्वण**-न.-९९७-अथर्वण वेदपाठीनुं शांतिघर
☐शान्तिगृह [शान्तीगृह शि. ८७] ।
*आथर्वणिकानां धर्म आम्नायः सङ्घो वा आथर्वणः "आथर्वणि"-(६।३।१६७) इति अणि साधुः सोऽत्रास्ति आथर्वणम् अभ्रादित्वात् अः ।

**आदर्श**-पुं.-६८४-आरसो.
द्र० आत्मदर्शशब्दः ।
*आदृश्यते रूपमस्मिन् इति आदर्शः ।

**आदान**)-न.-७३८-सर्व पासेथी ग्रहण करवुं.

**आदि**-पुं-१४५९-प्रथम पहेलुं
द्र० अग्रशब्दः ।
*आदीयते प्रथमतयेत्यादिः पुंलिङ्गः धर्मवृत्ति-त्वेऽपि अजहल्लिङ्गः यथा-आदिर्गंगंकुलम् ।

**आदिकवि**-पुं-८४६-(शि. ७४)-वाल्मीकि ऋषि

द्र० कविशब्दः ।

**आदितेय** (ब.व.)-पुं-८८-देव
द्र० अनिमिषशब्दः ।
*न ददाति दुःखमित्यदितिः "नञोदागो-" (उणा-६६७) इति डितिः अदितेर्ङ्यामदिती तस्या

Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

अपत्यानि आदितेयाः 'ङ्याप्त्यूङ' - (६।१।७०) इति एयण् यौगिकत्वात् आदित्या अदितिजा इत्यादयोऽपि ।

**आदित्य**–પું–९५–સૂર્ય
द्र० अंशुशब्द ।
*अदितेरपत्यं लोकरूढया आदित्यः "अनिदमि"· (६।१।१५) इत्यादिना ञ्यः ।

**आदित्य** (द्वि. व)–पुं–१११–પુનર્વસુનક્ષત્ર.
☐पुनर्वसु, यामक ।
*अदितिर्देवता अनयोरादित्यौ ।

**(आदित्य)** (બ. વ.)–पुं–८५–દેવ
द्र० अनिमिषशब्दः ।

**आदित्यसूनु**–पुं–७०५–સુગ્રીવ
☐सुग्रीव ।
*आदित्यस्य सूनुः इति आदित्यसूनुः ।

**आदिम**–ન.–१४५८–પ્રથમ પહેલું
द्र० अग्रशब्दः ।
*आदौ जातं इति आदिमम् ।

**आदिराज**–पुं–७००–પૃથુરાજા આદિરાજ
☐पृथु, वैन्य ।
*आदिश्चासौ राजश्च इति आदिराजः ।

**आदीनव**–पुं–१३७५–દોષ, કષ્ટ, દુઃખ
☐दोष, आस्रव, आश्रव ।
*आसमन्तात् दीयन्ते क्षीयन्ते गुणा अस्मिन्नादीनवः "कैरव"—(उणा–५१९) इति अवे निपात्यते ।

**आदेश**–पुं–२७७–આજ્ઞા, હુકમ
द्र० अववादशब्दः ।
*आङः परो देशः
इति आदेशः ।

**आदेशिन्**–पुं–४८२–જ્યોતિષી, દૈવજ્ઞ
☐सांवत्सर, ज्यौतिषिक, मौहूर्तिक, निमित्तविद्, दैवज्ञ, गणक, ज्ञानिन्, कार्तान्तिक विप्राश्निक, ईक्षणिक, [नैमित्तिक, नैमित्त, मौहूर्त शि. ३६] ।
*शुभाशुभमादिशतीत्येवं शीलः इति आदेशी ।

**आदिष्टृ**–पुं–८१७–યજમાન, યાગ કરનાર
☐यष्टृ, व्रतिन्, याचक, यजमान ।
*आदिशति स्वाम्येन इति आदेष्टा ।

**आद्य**–ન.–१४५८–પ્રથમ પહેલું
द्र० अग्रशब्दः ।
*आदौ भवं इति आद्यं, आदिर्धर्ममात्रेऽत्र दिगादित्वाद् यः ।

**आद्यून**–पुं–४२८–ઉત્કર્ષની ઈચ્છારહિત
☐औदरिक ।
*ईषद्दीव्यति स्म इति आद्युनः, 'पुदि"—(४।२।७२) इति क्तस्य नत्वे "अनुना"–(४।१।१०८) इति व ऊट् ।

**आधार**–पु–१०९६–પાણીનો બંધ
*आध्रियन्तेऽम्भांसि अस्मिन् इति आधारः क्षेत्रादिसेकार्थं यत्राम्भः संचीयते इत्यर्थः ।

**आधि**–स्त्री–३१२–માનસિક પીડા
☐व्याधि, रुजाकर ।

**आधि**–स्त्री–८८२–લેણદારને ઘરે ગીરવે મુકેલી વસ્તુ
☐बन्धक ।
*आधीयतेऽसौ इति आधिः ।

**आधि**–स्त्री–१३७१–માનસિક પીડા

**आधोरण** (બ. વ.)–पुं–७६२–મહાવત
☐हस्तिपक, गजाजीव, इभपालक (मण्ठ दे.) ।
*आधोरयन्ति हस्तिनं इति आधोरणाः नन्द्यादित्वादनः ।

**आध्यान**–ન.–३०८–સ્મરણ, સ્મૃતિ ।
☐स्मरण, स्मृति ।

**आघ्राण** ન.–४२६–તૃપ્તિ, ધરાવવું
☐तृप्ति, सौहित्य ।
*आघ्रायते इति आघ्राणम् ।

**आघ्राण**–पुं.–४२६–(शि.३०)–તૃપ્ત ધરાયેલ
द्र० आघ्रातशब्दः ।

**आघ्रात**–पुं–४२६–તૃપ્ત ધરાયેલ
☐तृप्त, सुहित, आशित [आघ्राण शि.३०] ।
*आघ्रायति स्म इति आघ्रातः, आघ्राणोऽपि ।

**आन**–पुं–१३६८–અંદરનો શ્વાસ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

□उच्छ्वास, आहर ।

*अनित्यनेन इति आनः ।

**आनक**–पुं–२९३–દુન્દુભિ, ઢોલ

□भेरी, दुन्दुभि, पटह ।

*अणति शब्दायते इति आनक "अणेङ्ति्" (उणा–७२) इति आनकः पुंलिङ्गः **वाचस्पतिस्तुः**– "पटहस्त्वानकोऽस्त्रियाम्" इत्याह ।

**आनकदुन्दुभि**–पुं–२२३–વાસુદેવ (વિષ્ણું પિતા)

□वसुदेव, भूकश्यप, दिन्दु ।

*हरौ जाते आनका दुन्दुभयश्चास्य गृहे नेदुरिति आनकदुन्दुभिः, आनकदुन्दुभो वसुदेवपितेत्**वेके**।

**आनत**–ન.–१४५६–નમેલું

द्र०अधोमुखशब्दः ।

*आ नमति स्म इति आनतम् ।

**आनतज** (બ.વ.)–પું–९३–નવમા દેવલોકના દેવો

*आनतकल्पे जाताः इति आनतजाः ।

**आनद्ध**–ન.–२८७–મૃદંગ, ઢોલ

*आनह्यते स्म इति आनद्धं अवनद्धं च ।

**आनन**–ન–५७२–મુખ

□तुण्ड आस्य, मुख, वक्त्र, लपन, वदन, [दन्तालय तेर, घन, चर, घनोत्तम, शे.१२०] ।

*आ समन्तादनित्यनेन इति आननम् ।

**आनन्द**–पुं–३१६–હર્ષ, આનંદ

□हर्ष, चित्तप्रसन्नता, ह्लाद, प्रमोद, प्रमद, मुद्, प्रीति, आमोद, सम्मद, आनन्दथु ।

*आनन्दनं इति आनन्दः पुंलिङ्गः ।

**आनन्द**–पुं–६९८–બલદેવ

द्र० अचलशब्दः।

*आनन्दयति लोकं इति आनन्दः ।

**आनन्दथु**–पु–३९६–હર્ષ, આનન્દ

द्र० आनन्दशब्दः ।

*आनन्दनं इति आनन्दथुः पुंलिङ्गः ।

**आनन्दन**–ન.–७३९–મિત્ર વગેરેને આલિંગનાદિથી આનંદ ઉપજાવવો તે

□आप्रच्छन, सभाजन, 'स्वभाजन' ।

*आनन्द्यते इति आनन्दनम् ।

**आनन्दप्रभव**–ન–६२९–વીર્ય, શુક્ર.

□शुक्र, रेतस्, बल, बीज, वीर्य, मज्जसमुद्भव, पुंस्त्व, इन्द्रिय, किट्टवर्जित, पौरुष, प्रधानधातु ।

*आनन्दात् प्रभवति इति आनन्दप्रभवम् ।

**आनय**–पुं–८१४–જનોઈ સંસ્કાર

□उपनाय उपनय, वटूकरण ।

*आनयनं इति आनयः ।

**आनाय**–पुं–९२९–માછલા પકડવાની જાળ

□मत्स्यजाल ।

*आनयन्ति अनेन इति आनयः "अनायो जाल"-(५।३।१३६) इति घञ् ।

**आनाह** पु–४७१–આફરો (ઝાડા પેશાબનું રોકાણ)

□विबन्ध ।

*आनहन विण्मूत्रनिरोधः इति आनाहः ।

**आनाह**–पुं–१४३१–લંબાઈ

□दैर्ध्य, आयाम ।

*आनह्यतेऽनेन इति आनाहः ।

**आनिली** સ્ત્રી.–११२ સ્વાતિ નક્ષત્ર

□स्वाति ।

*अनिलो देवताऽस्याः इति आनिली ।

**आनुपूर्वी**–સ્ત્રી ન.–१५०४–અનુક્રમ, પરિપાટી

द्र० अनुक्रमशब्दः ।

*पूर्वानुक्रमेण अनुपूर्वं तद्भावः आनुपूर्वी स्त्रीक्लीबलिङ्गः क्लीबे आनुपूर्व्यम् ।

**आनुपूर्व्य**–ન.–११(શ. १३५)–અનુક્રમ પરિપાટી

द्र० अनुक्रम शब्दः ।

**आन्तःपुरिक**–पुं–७२६ (શિ. ६३)–અન્તઃપુરનો અધિકારી

द्र० अन्तःपुराध्यक्षशब्दः ।

**आन्तःवेंश्मिक**–पुं–७२३ (શિ.६३)–અન્તઃપુરનો અધિકારી

द्र० अन्तःपुराध्यक्षशब्दः ।

**आन्दोलित**–ન.–१४८१–હલાવેલું કંપેલું

□प्रेङ्खोलित, तरलित, लुलित, प्रेङ्खित, धुत, चलित, कम्पित, धूत, वेल्लित, ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*आन्दोल्यते स्म इति आन्दोलितम् ।

**आन्वीक्षिकी**-स्त्री-२५१-न्याय शास्त्र

□तर्कविद्या ।

*प्रत्यक्षागमाभ्यामीक्षितस्य पश्चात् ईक्षणं इति अन्वीक्षा सा प्रयोजनं अस्यां इति आन्वीक्षिकी ।

**आन्वीक्षिकी**-स्त्री-२५३-બારમી વિદ્યા

**आपगा**-स्त्री-१०८०-નદી

□नदी, हिरण्यवर्णा, रोधोवक्रा, तरङ्गिणी, सिन्धु, शैवलिनी, वहा, ह्रदिनी, स्रोतस्विनी, 'स्रोतस्वती', निम्नगा, स्रोतस्, निर्झरिणी, सरित्, तटिनी, कूलङ्कषा, वाहिनी, कर्षू, द्वीपवती, समुद्रदयिता, धुनी, धुनि, स्रवन्ती, सरस्वती, पर्वतजा, जलधिगा, कूल्या, जम्बालिनी, [ह्रादिनी शि. ९६]

*आ अपगच्छति इति आपगा, आपमब्धिं गच्छतीति वा, अप् सम्बन्धिना वेगेन आपेन वेगेन गच्छतीति वा "नाम्नो"-(५।१।१३१) इति डः ।

**आपण**-पुं-१००२-દુકાન

द्र० अट्टशब्दः ।

*एत्य पणायन्त्यस्मिन् इति आपणः "गोचर"-(५।३।१३१) इति घः ।

**आपणिक**-पुं-८६७-વેપારી

□वाणिज, वणिज्, क्रयविक्रयिक, पण्याजीव, नैगम, वैदेह, सार्थवाह [प्रापणिक शि.७७] ।

*आ पणायति इति आपणिकः 'आङः पणिपनि"-(उणा-३९) इति इकः आपणः प्रयोजनं अस्येति वा, प्रापणिकोऽपि ।

**आपद्**-स्त्री-४७८-આપત્તિ

□विपत्ति, विपद् ।

*आपदनं इति आपत् ।

**आपन्न**-पुं-४७८-આપત્તિમાં આવેલ

*आपद्यते विपदं गच्छति स्म इति आपन्नः ।

**आपन्नसत्त्वा**-स्त्री-५३९-ગર્ભવતી સ્ત્રી

द्र० अन्तर्वत्नीशब्दः

*आपन्नं गृहीतं सत्त्वं गर्भोऽनया इति आपन्नसत्त्वा ।

**आपमित्यक**-न.-८८१-બદલાથી ખરીદેલ વસ્તુ

*परिवृत्त्या आप्तं अपमित्य प्रतिदानेन निर्वृत्तमापमित्यकम् "याचिता"-(६।४।२३) इति कण् ।

**आपान**-न-९०७ ભેગા મળી દારૂ પીવાનું સ્થાન

□पानगोष्ठिका ।

*आपिबन्ति अस्मिन् इति आपानम् ।

**आपी**-स्त्री-११३-પૂર્વાષાઢા નક્ષત્ર

□पूर्वाषाढा ।

*आपो जलं देवताऽस्या इति आपी ।

**आपीड**-पुं-६५४-માથા ઉપર મુકુટના આકારે નાખેલી માળા

द्र० अवतंसशब्दः ।

*आपीड्यते शिरसि इति आपीडः ।

**आपीन**-पुं न.-१२७२-આંચળ

□ऊधस् ।

*आप्यायते स्म आपीनं पुंक्लीबलिङ्गः, "सूयत्यादि"-(४।२।७०) इति क्तस्य नत्वं "आङोऽन्धूधसोः" (४।१।९३) इति प्यादेशः ।

**आपुपिक**-न.-१४१८-રોટલી કે પૂડલાનો સમૂહ

*अपूपानां समूह इति आपुपिकम्, अचित्तत्वाद् इकण् ।

**आपृच्छा**-स्त्री-२७४-એકબીજાને સંબોધીને વાતચીત કરવી તે

□आलाप, सम्भाष ।

*आप्रच्छनं इति आपृच्छा भिदादित्वाद् अङ् ।

**आप्त**-पुं-२५-અરિહંત તીર્થંકર

द्र०अधीश्वरशब्दः ।

*हितोपदेशकत्वात् आप्त इव इति आप्तः ।

**आप्त**-पुं-७३४-વિશ્વાસુ, અવિસંવાદી

□प्रत्ययित, (अविसंवादिवाच्) ।

*आप्यते स्म इति आप्तः अविसंवादिवाक् ।

**आप्तोक्ति**-स्त्री-२४२-આગમ સિદ્ધાન્ત

द्र० आगमशब्दः ।

*आप्तानां उक्तिः इति आप्तोक्तिः ।

**आप्रच्छन**-न.-७३१-મિત્ર વગેરેને આલિંગન આદિથી આનંદ ઉપજાવવો તે.

द्र०आनन्दनशब्दः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*आपृच्छ्यते इति आप्रच्छनम्, आङ्पूर्वः प्रच्छि-रालिङ्गनादिनाऽऽनन्दनार्थः, **यथा**—
"आपृच्छस्व प्रियसखममुम्" इति ।

**आप्रपदीन**–ન.–૬૭૮–પગની પાની સુધી સર્વ અંગ ઢંકાય તેવું પહેરવાનું વસ્ત્ર

*प्रगतं पदं प्रपदं पादाग्रमित्यर्थः, प्रपदाद् आ आप्रपदं तद् व्याप्नोति इति आप्रपदीनम्, 'आप्रपदम्"––(७।१।९५) इति इनः ।

**आप्लव**–પું–૬૩૮–સ્નાન

☐स्नान, सवन, [आप्लाव शि.५०] ।

*आप्लवनं इति आप्लवः आप्लावोऽपि ।

**आप्लाव**–પું.–૬૬૮(શિ ૫૦) સ્નાન

द्र०आप्लवशब्दः ।

*आप्लवनं इति आप्लावः ।

**आबन्ध**–પુ–૮૯૩ -જોતર

☐योत्र, योक्त्र, ।

*आबध्यतेऽनेन इति आबन्धः ।

**आभरण**–ન.–૬૫૦–અલંકાર, ઘરેણા

द्र०अलङ्कारशब्दः ।

*आ समन्ताद् भ्रियते शोभाऽनेन इति आभरणम् ।

**आभा**–સ્ત્રી–૧૫૧૨–શોભા કાંતિ

द्र०अभिख्याशब्दः ।

*आभानं इति आभा "उपसर्गादातः (५।३।११०) इत्यङ् ।

**आभास्वर** (બ.વ.)–પુ–૮૯ (શે.૭)–ગણદેવતા

**आभिजात्य**–ન.–૬૮–પ્રભુવાણીનો ૧૯મો અતિશય (વક્તા અને પ્રતિપાદ્ય ભાવને ઉચિત)

*आभिजात्यं वक्तुः प्रतिपाद्यस्य वा भूमिकानुसारिता इति आभिजात्यम् ।

**आभीर**–પું–૮૮૯–ગોવાળ, ભરવાડ

☐गोपाल, गोधूह, गोप, गोसङ्ख्य, वल्लव ।

*आ अभित ईरयति इति आभीरः, आप्नोतीति वा "जम्बीर"–(उणा–४२२) इतीरे निपात्यते ।

**आभीरपल्लिका**–સ્ત્રી–૧૦૦૨–ગોવાળોનું રહેઠાણ

☐घोष ।

*आभीराणां गोपानां पल्लिर्गृहाली आभीरपल्लिका 'कुटीग्रामकयोः पल्लिः" इति तु **शाश्वतः** ।

**आभीरी**–સ્ત્રી–૫૨૨–ભરવાડની સ્ત્રી

☐महाशूद्री ।

*आभीरजातीया आभीरस्य स्त्री वा आभीरी ।

**आभील**–ન.–૧૩૭૧–દુઃખ, પીડા

द्र० अर्त्तिशब्दः ।

*आ समन्ताद् भियं लाति इति आभीलम् ।

**आभील**–ન. ३०३ (શે. ८९)–ભયાનક

द्र० घोरशब्दः ।

**आभोग**–પું–૧૪૩૨–વિસ્તાર

☐प्रपञ्च, विस्तार, व्यास ।

*आभुज्यतेऽनेन इति आभोगः ।

**(आभोगिक** )પું–૨૯૩–ઊંચા મુખવાળું મૃદંગ

☐ऊर्ध्वक ।

*ऊर्ध्वं कृत्वैकेन मुखेन वदनाद् ऊर्ध्वं कायति आभोगिकः, **आहुश्च**:-
हरीतक्याकृतिस्त्वङ्क्योर्यवमध्यस्तथोर्ध्वकः ।
आलिङ्ग्यश्चैव गोपुच्छो, मध्यदक्षिणवामगः ॥१॥

**आम्**–અ–૧૫૪૦–સ્વીકાર જણાવનાર, હા

☐ओम् परमम् ।

*"अमण् रोगे" आमयति इति आम्, यथा–आं कुर्मः ।

**आम**–પું.–૪૬૩–રોગ

द्र० अपाटवशब्दः ।

*आमयति रुजति इति आमः आमनं वा ।

**आमन**–ન.–૪૬૩–રોગ

द्र० अपाटवशब्दः ।

*आमयति रुजति इति आमनम् ।

**आमगन्धि**–त्रि.–१३९२–કાચા માંસ વગેરેની ગંધ

☐विस्र ।

*आमोऽपक्वो मलः तस्येव गन्धोऽस्य इति आमगन्धिः "वोपमानात्"—(७।३।१४७) इति इत् ।

**आमनस्य**–ન.–૧૩૭૧–દુઃખ, પીડા

द्र० अर्त्ति शब्दः ।

*अमनसो भावः इति आमनस्यं वैमनस्यमित्यर्थः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**आमन्त्रण**–न.–२६१–સંબોધન

☐सम्बोधन ।

*आमन्त्र्यतेऽनेन इति आमन्त्रणम् ।

**आमय**–पुं–४६३–રોગ

द्र० अपाटवशब्दः ।

*"कुगुवलि"–(उणा–३६५) इति अये आमयः आमीनाति इति वा ।

**आमयाविन्**–पुं–४५९–રોગી

द्र० अपटुशब्दः ।

*आमयोऽस्त्यस्य इति आमयावी, "आमयादीर्घश्च" (७।२।४८) इति विन् ।

**आमलकी**–त्रि.–११४५–આમળા

☐धात्री, शिवा 'तिष्यफला, अमृता, वयस्था' ।

*आमलते धारयति गुणान् इति आमलकी "कीचक"–(उणा–३३) इत्यके निपात्यते त्रिलिङ्गोऽयम् ।

**(आमावास्य)**–पुं–८२३–કૃષ્ણ પક્ષને અંતે થતો યજ્ઞ

☐दर्श ।

*कृष्णपक्षान्ते यज्ञः इत्यर्थः ।

**आमिक्षा**–स्त्री–८३१–યજ્ઞમાં પાકેલું અને ગરમ દૂધમાં નાંખેલું દહીં.

☐क्षीरशर, पयस्या ।

*आमृद्नाति चित्तम्, आमीयते क्षिप्यते दध्यत्रेति वा आमिक्षा, "लाक्षाद्राक्षा"–(उणा–५९७)इति निपात्यते ।

**आमिष**–न.–५७–માંસ અને લોહી દૂધ જેવા સફેદ હોવા રૂપ પ્રભુનો મૂળાતિશય પૈકી ત્રીજો અતિશય.

**आमिष**–पुं. न.–६२२–માંસ

☐मांस, पलल, जङ्गल, रक्ततेजस्, रक्तभव, क्रव्य, काश्यप, तरस, मेदस्कृत् पिशित, कीन, पल [उद्ध, समारट, शे. १२८ लेपन, शे. १२९] ।

*अमति गच्छति काश्यमनेन इति आमिषः पुंक्लीबलिङ्गः, "अमिमृभ्यां"–(उणा–५४९) आमिषतीति वा ।

**आमिष**–पुं न.–७३७–લાંચ, ભેટ

☐प्राभृत ढौकन लञ्चा, उत्कोच, कौशलिक, उपचार, उपप्रदान, उपदा, उपहार, उपग्राह्य, उपायन ।

*आमिषमिव इति आमिषः पुंक्लीबलिङ्गः, परप्रतिलोभनात्, अमत्यनेन स्वच्छभावं वा ।

**अक्त**–पु–७६५–કંચુક ધારણ કરેલ સૈનિક

द्र० अपिनद्धशब्दः ।

*आमुच्यते बध्यते स्म इति आमुक्तः ।

**आमुष्यायण**–पुं–५०२–પ્રખ્યાત પિતાનો પુત્ર

☐अमुष्यपुत्र, प्रख्यातवप्तृक ।

*अमुष्यापत्यमामुष्यायणः नडादित्वादायनणि "अदसोऽकञायणोः" (३।२।३३) इति षष्ठ्यलुप् ।

**आमोद्**–पुं–३१६–મનની પ્રસન્નતા

द्र० आनन्दशब्दः ।

*आमोदनं इति आमोदः ।

**आमोद्**–पुं–१३१०–ઘણે દૂર સુધી જાય તેવી સુગંધ.

☐विदूरग ।

*आसमन्तात् मोदतेऽनेन इति आमोदः ।

**आमोदिन्**–पुं–१३९१–સુવાસ, મુખવાસ વિગેરેની ગન્ધ.

☐मुखवासन, इष्टगन्ध, सुगन्धि ।

*आमोदः अस्ति अस्य आमोदी ।

**आम्नाय** पुं–८० ગુરુ પરંપરાગત ઉપદેશ

☐पारम्पर्य, सम्प्रदाय, गुरुक्रम ।

*आम्नायते इति आम्नायः ।

**आम्नाय**–पुं–२४९–વેદ

☐स्वाध्याय, श्रुति, छन्दस्, वेद ।

*आम्नायते पारम्पर्येण इति आम्नायः ।

**आम्र**–पुं–११३३–આંબો

☐चूत, सहकार [माकन्द, रसाल, शि. १०१] ।

*अम्यतेऽभिलष्यते इति आम्रः "चिजि"—(उणा–३९२) इति रो दीर्घश्च ।

**आम्रातक**–पुं–११५२–જંગલી આંબો, અમૃતવૃક્ષ

☐वर्षपाकिन्, 'पीतन, कपीतन, (अम्रातक)' ।

*अमति इति आम्रातकः "श्लेष्मातका"–(उणा–८३) इति निपात्यते आम्रं अतति कपिचूत-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्वादिति वा ।

**आम्रेडित**–न.–२६७–એકનો શબ્દ બે–ત્રણવાર બોલાય તે.

*आम्रेड्यते स्म इति आम्रेडितं, द्वौ वारौ द्विः त्रीन् वारान् त्रिः यथा– सापः सापः इति ।

**'आम्लीका'**-स्त्री–११४३-આંબલીનું વૃક્ષ

द्र० अम्लिकाशब्दः ।

**आयत**–न.–१४२८–લાંબું

□दीर्घ ।

*आयच्छति स्म इति आयतम् ।

**'आयतन'**–न.–९९४–જિનાલય

द्र० चैत्यशब्दः ।

**आयति**–स्त्री–१६२–આવતી કાલ

*आयमनं इति आयतिः, एष्यति इति आयतिः इत्यन्ये ।

**आयत्त**–पुं–३५६ (शे. ८०) આધીન, પરવશ

द्र० गृह्यकशब्दः ।

**आयल्लक**–न.–३१४–ઉત્સાહ

द्र० अरतिशब्दः

*आयत आगच्छतो लकति आसादयति इति आयल्लकम् ।

**आयसी**–स्त्री–७६९–લોઢાનું બખ્તર

द्र० अङ्गरक्षणीशब्दः ।

□लोहमयीत्यर्थ. ।

**आयःशूलिक**–पुं–३५४–તીક્ષ્ણ ઉપાય વડે કાર્ય કરનાર.

□तीक्ष्णकर्मकृत् (रामसिक)।

*तीक्ष्ण उपायोऽयःशूलसाम्पादयः, शूलं तेन अन्वेष्टा आयःशूलिकः "दाण्डाजिनिकाय"–(७।१।१७१) इति निपात्यते ।

**आयाम**-पुं–१४३१–લંબાઈ

□दैर्घ्य, आनाह

*आयति इति आयामः ।

**आयास**–पुं–३२०–થાક, પરિશ્રમ.

□श्रम, क्लम, क्लेश, परिश्रम, प्रयास, व्यायाम ।

*आयासनं इति आयासः

**आयु**–न.–१३६९ (शि. १२४)–આયુષ્ય, ઉમર

□आयुष्, जीवितकाल ।

*एति इति आयुः "कृवापनी"–(उणा–१) इत्युणि आयुरुकारान्तः ।

**आयुक्त**–पुं–७१९–મંત્રી સિવાયના કામ માટે નીમેલા મંત્રીઓ

□नियोगिन्, कर्मसचिव, (कर्मसहाय), व्यापृत ।

*आयुज्यते स्म इति आयुक्तः ।

**आयुध**–पुं न –७७३–શસ્ત્ર

द्र० अस्त्रशब्दः ।

*आयुध्यन्तेऽनेन इति आयुधः पुंक्लीबलिङ्गः स्थादित्वात्कः ।

**आयुध**–न.–१०४६–અલંકાર માટેનું સોનું

*अलङ्कारसुवर्ण, शृङ्गीकनक ।

*आयुधमिव इति आयुधम् ।

**आयुधिक**–पुं–७७०–શસ્ત્રો વડે આજીવિકા ચલાવનાર

□आयुधीय, शस्त्रजीविन्, काण्डपृष्ठ ।

*आयुधेन जीवति इति आयुधिकः "आयुधा"–(६।४।१८) इति इकः ।

**आयुधीय**–पुं–७७०–શસ્ત્રો વડે આજીવિકા ચલાવનાર

द्र० आयुधिकशब्दः ।

*आयुधेन जीवति इति आयुधिकः "आयुधा"–(६।४।१८) इति ईयः ।

**आयुर्वेदक**–पुं–४७२–वैद्य

द्र० अगदङ्कारशब्दः ।

*आयुः वेत्ति इत्येवंशीलः इति आयुर्वेदकः ।

**आयुर्वेदिक**–पुं–४७२ (शि.३४)-वैद्य

द्र० अगदङ्कारशब्दः ।

*आयुः वेत्ति इत्येवंशीलः इति आयुर्वेदिकः ।

**आयुर्वेदिन**–पुं–४७२–वैद्य

द्र० अगदङ्कारशब्दः ।

*आयुः वेत्ति इत्येवंशीलः इति आयुर्वेदी ।

**आयुष्**–न.–१३६९–આયુષ્ય

□जीवितकाल [आयु शि. १२४]

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*एति इति आयुः "इणोणित्"-(उणा-९९८) इति उस् ।

**आयुष्यमत्**-पुं-४७९-(शि. ३५)-લાંબા આયુષ્યવાળો

☐जैवातृक, दीर्घायुस् ।

*दीर्घमायुः अस्य स इति आयुष्यमान् ।

**आयोगव**-पुं-८९७-શૂદ્ર પુરુષ અને વૈશ્યસ્ત્રીથી ઉત્પન્ન થયેલ.

*शूद्राद् वेश्यायां जातः अयोवद् गौरस्य अयोगुस्तस्याऽयं इति आयोगवः ।

**आयोधन**-न.-७९६-લડાઈ

द्र० अनीकशब्दः ।

*आयुध्यन्तेऽस्मिन् इति आयोधनम् ।

**आर**-पुं-११६-મંગલગ્રહ

द्र० अङ्गारकशब्दः ।

*आ समन्तात् इयर्ति नक्षत्रेषु इति आरः ।

**आर**-पु. न.-१०४७-પિત્તળ વિશેષ

☐पित्तला ।

*आ इयर्ति इति आरः पुंलिङ्गस्तत्र **वाचस्पतिस्तु**:- "पित्तलं त्वारमस्त्रियाम्" क्लीबेऽप्याह ।

**आरकूट**-पुं न.-१०४७-પિત્તળ

☐कपिलोह, सुवर्णक, रिरी, रीरी, रीति 'रीती' पीतलोह, सुलोह, (सुलोहक) ।

*आ इयर्ति आर तस्य कूटः इति आरकूटः पुंक्लीबलिङ्गः, **कश्चिदमुं** पित्तलापर्यायमाह ।

**आरक्ष**-पुं-१२२६-હાથીના કુંભસ્થળનો નીચેનો ભાગ

*आरक्ष्यते इति आरक्षः ।

**आरग्वध**-पुं-११४०-ગરમાળો

☐कृतमाल, 'अरग्वध, (अग्वेध), राजवृक्ष, शम्पाक, (सम्पाक), चतुरङ्गुल, आरेवत, व्याधिघात, सुवर्णक, (सुपर्णक)' ।

*आ समन्ताद् रुजन्ति शङ्कन्तेऽस्मादारग्वधः "आरगेः"-(उणा-२५४) इति वधः आ रुजयन्त्यारजो मलास्तेषां वधोऽत्रेति वा ।

**आरणज** (પ.વ.)-पुं-९३-અગીયારમાં દેવલોકના દેવો

*आरणकल्पे जाताः इति आरणजाः ।

**आरणिन्**-पुं-१३२५ (शे. १९२)-કુકડો

द्र० कुक्कुटशब्दः ।

**आरनाल**-न.-४१५-કાંજી, રાબ

द्र० अवन्तिसोमशब्दः ।

*अरनालोऽरमक्तं तज्जमारनालम् ।

**आरति**-स्त्री-१५२२-અટકવું, નિવૃત્તિ

द्र० अवरतिशब्दः ।

*आङः परा रतिः इति आरतिः ।

**आरभटी**-स्त्री-२८५-**અભિનયનો** પ્રકાર

☐भारती, सात्वती, कैशिकी ।

*इयर्तीति अरा भटाः सोत्साहा अनलसास्तेषामियं इति आरभटी अङ्गिकाभिनयप्राधान्यात् ।

**आरम्भ**-पुं-१५१०-જ્ઞાનપૂર્વક આરમ્ભ,શરૂઆત

द्र० अभ्यादानशब्दः ।

*आरम्भणं इति आरम्भः ।

**आरव**-पुं-१४००-શબ્દ, ધ્વનિ

☐शब्द, निनाद, निर्घोष, स्वान, ध्वान, स्वर, ध्वनि, निर्ह्राद, निनद, ह्राद, निःस्वान, निःस्वन, स्वन, रव, नाद, स्वनि, घोष, संराव, विराव, आराव, क्वणन, निक्वण, क्वण, निक्वाण, क्वण, रण, 'निस्वान, निस्वन' [राव शि. १२६] ।

'रोः उपसर्गात्' ॥५।३।२२॥ इति घम् ।

*"आङ्गो रूप्लोः (५।३।४९) इति वाऽलि आरवः

**आरा**-स्त्री-९१५-ચામડું કાપવાનું હથિયાર

☐ चर्मप्रभेदिका, (चर्मसीवनी) ।

*इयर्ति तन्तुरनया इति आरा भिदादित्वादङि साधुः ।

**आराधना**-स्त्री-४९७-સેવા, ભક્તિ

☐सेवा, भक्ति, परिचर्या, प्रसादना, शुश्रूषा, उपास्ति, वरिवस्या, परीष्टि, उपचार, [पर्येषणा, उपासना शि. ३८] ।

*आराधनं इति आराधना ।

**आराफल**-पुं-७८७ (शे. १४९)-દુઃસ્ફોટ નામનું શસ્ત્ર

[दुःस्फोट शे० १४९] (अराफल) ।

**आराम**-पु-११११-બાગ



Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्र० अपवनशब्दः

*आरमन्ति अस्मिन् इति आरामः ।

**आरालिक**-पुं-७३३-રસોઈયો

सूद, औदनिक, गुण, भक्तकार, सूपकार, सूप, वल्लव ।

**आराव**-पुं-१४००-શબ્દ, ધ્વનિ

द्र० आरवशब्दः ।

*आरावः "रोरुपसर्गात्-(५।३।२२) इति घञ् ।

**आरेक**-पुं-१३७५-સંદેહ

□सन्देह, द्वापर, विचिकित्सा, संशय ।

*आरेचनं इति आरेकः ।

**'आरेवत'**-पुं.-११४०-ગરમાળો

द्र० आरग्वधशब्दः ।

**आरोग्य**-न.-४७४-રોગરહિતપણું

द्र० अनामयशब्दः ।

*अरोगस्यभावः इति आरोग्यम् ।

**आरोपितविशेषता**-स्त्री-७०-પ્રભુવાણીનો ૩૧મો અતિશય

**आरोह**-पुं-३८०-સ્ત્રીની કેડનો પાછલો ભાગ

□नितम्ब ।

*आरोहति, आरुह्यते इति आरोहः ।

**आरोह**-पुं-१४३१-ઊંચાઈ

□समुच्छ्रय, 'उच्छ्रय' उत्सेध, उदय, उच्छ्राय ।

*आरोहणं इति आरोहः ।

**आरोहक**-पुं-१११४-વૃક્ષ

द्र० अगशब्दः ।

**आरोहण**-न.-१०१३-પગથિયું

□सोपान ।

*आरुह्यतेऽवरुह्यते चाऽनेन इति आरोहणम् ।

**आरोहण**-न.-१५१०-ચઢવું, સામે જવું

□अभिक्रम ।

*आरुह्यते इति आरोहणम् ।

**आर्जुनी**-स्त्री-१०८६-બાહુદા નદી

□बाहुदा, सैतवाहिनी ।

*अर्जुनस्य इयम् आर्जुनी ।

**आर्तव**-न.-५३६-સ્ત્રીરજ

□स्त्रीधर्म, पुष्प, रजस्, [कुसुम शि. ४४] ।

ऋतुरेव आर्तवम्, ऋतुः स्त्रीरजोऽत्र ऋतौ गर्भग्रहणकाले भवं वा, ऋतुः प्राप्तोऽस्य वा "ऋत्वादिभ्योऽण्" (६।४।१२५) इति ।

**आर्द्र**-पुं-१४९२-ભીનું

□तिमित, स्तिमित, क्लिन्न सार्द्र, उन्न, समुत्त ।

*अर्दति इति आर्द्रः "चिजि"-(उणा-३९२) इति रः दीर्घत्वं च ।

**आर्द्रक**-पुं न.-११८९-આદુ

□शृङ्गबेरक ।

*आर्द्रम् एव इति आर्द्रकः पुंक्लीबलिङ्गः ।

**आर्द्रा**-स्त्री-११०-આર્દ્રા નક્ષત્ર

□कालिनी रौद्री ।

*आर्दति हिनस्ति कार्यमिति आर्द्रा 'चिजि"-(उणा-३९२) इत्यादिना रो दीर्घश्च ॥

**आर्य**-पुं-२३२-બુદ્ધ

द्र० अद्वयशब्दः ।

*अर्यतेऽभिगम्यते इति आर्यः आरात् पापेभ्यः कर्मभ्यो यात इति वा ।

**आर्य**-पु-३३३-નાટકમાં વપરાતો શબ્દ

□मार्ष, [मारिष शि. २०] ।

*अरणीयोऽभिगम्य इति आर्यः ।

**आर्य**-पुं-३७९-સજ્જન

□साधु सभ्य, सज्जन ।

*अर्यते अभिगम्यते इति आर्यः ।

**आर्यपुत्र**-पुं-३३५-ભર્તા, સ્વામી

*आर्यस्य पुत्रः इति आर्यपुत्रः ।

**आर्या**-स्त्री-२०३-પાર્વતી

द्र० अद्रिजाशब्दः ।

*अर्यते इति आर्या ।

**आर्यावर्त्त**-पुं-९४८-તીર્થંકરાદિ ૬૩ શલાકા પુરુષોની જન્મભૂમિ

□पुण्यभू, आचारवेदी ।

*आर्या आवर्त्तन्तेऽत्र इति आर्यावर्त्तः, जिना

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अवसर्पिण्यामृषभादयः चतुर्विंशतिः, चक्रिणो भरतादयो द्वादश, अर्धचक्रिणोऽश्वग्रीवादयः त्रिपृष्ठादयश्च नव, साहचर्यादचलादयो बलदेवा नव. तेषां जन्मभूमिः ।

**आर्षभि**–पुं–६९२–પ્રથમ ચક્રવર્તી ભરત

☐भरत ।

*चक्रवर्तिषु प्रथमचक्रवर्ती ऋषभस्यादितीर्थकृतः अपत्यं इति आर्षभिः "अतइञ्" (६।१।३१) इति निपात्येत ।

**आर्षभ्य**–पुं–१२५९–નપુંસક કરવા યોગ્ય બળદ

*षण्ढतोचितोण्डाकर्षणयोग्य ऋषभाय अयं इति आर्षभ्यः "ऋषभोपनहाञ्ञ्यः" (७।१।४६) षण्ढता योग्य **इत्येके** ।

**आर्हत**–पुं–८६१–જૈન

☐स्याद्वादवादिन्, (अनेकान्तवादिन्, जैन, शि० ७१) ।

*अर्हन् देवताऽस्य इति आर्हतः जैनोऽपि ।

**आल**–न–१०५९–હરતાલ

☐हरिताल, पिञ्जर, बिडालक, विस्रगन्धि, खर्जुर, वंशपत्रक, पीतन, ताल, गोदन्त, नटमण्डन, वङ्गारि, लोमहृद् (गोपित्त शि० ९२) ।

आलाति शोभां इति आलम्, अलन्ति, भूषयन्ति अनेन वा ।

**आलाम्भ**–पुं–३७१–હિંસા

द्र० अपासनशब्दः ।

*आलम्भनं इति आलम्भः ।

**आलय**–पुं–९९०–घर

द्र० अगारशब्दः ।

*आलीयन्तेऽस्मिन् इति आलयः ।

**आलवाल**–न.–१०९५–ક્યારો

आवाल, आवाप, स्थानक ।

आलूयते खन्यते इति आलवालः पुंक्लीबलिङ्गः "चात्वाल–" (उणा–४८०) इति आले निपात्यते ।

**आलस्य**–न.३१५-આળસ

☐तन्द्रा कौसीद्य ।

*अलस्य भावः इति आलस्यम् ।

**आलस्य**–पुं–३८३–આળસુ

द्र० अनुष्णशब्दः ।

*आलस्यमस्त्यस्य इति आलस्यः अभ्रादित्वाद् ।

**आलान**–न.–१२३१–હાથીને બાંધવાનો ખીલો

*आलीयते बध्यतेऽस्मिन् इति आलानम्, गजस्य बन्धनाय स्तम्भो बन्धस्तम्भः ।

**आलाप**–पुं.–२७४–પરસ્પર સંબંધીઓ સાથે વાત કરવી તે

☐आपृच्छा, सम्भाष ।

*आलापनं इति आलापः ।

**'आलाबु'**–पुं.–११५५–તુંબડી

द्र० अलाबूशब्दः ।

*न लम्बते इति आलाबुः ।

**'आलाबू'**–पुं–११५५–તુંબડી

द्र० अलाबूशब्दः ।

*न लम्बते इति आलाबूः ।

**आलावर्त्त**–न.–६८८–વસ્ત્રનો પંખો

वस्त्रस्य व्यजनमारादावर्त्यते इति आलावर्तम्, पृषोदरादित्वात् ।

**आलास्य**–पुं–१३४९–મગરમચ્છ

☐नक्र, कुम्भीर, कुम्भिन्, महामुख, तालुजिह्व, शङ्खमुख, गोमुख, जलसूकर [शङ्कुमुख शि. १२१] ।

*आलमनर्थहेतुरास्यमस्य इति आलस्यः ।

**आलि**–સ્ત્રી–५२९–સખી

☐वयस्या, सखी, सध्रीची ।

*अलति इति आलिः "कृशृकुटि"–(उणा–६१९) इति णिदिः ।

**आलि**–पुं–९६५–પૂલ,

☐सेतु, पालि, (पाली) संवर, (आली) ।

*अलति इति आलिः ।

**आलि**–पुं–१२११–વીંછી

☐वृश्चिक, द्रुण, आली 'अलि' [द्रुत शि० १०६] ।

*अलति इति आलिः "कृशृकुटि."–(उणा–६१९) इति णिदिः ।

**आलि**–पुं–१४२३–પંક્તિ, હાર, શ્રેણી.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

□राजि, लेखा, तति, विथि, वीथि, माला, आवलि, 'आवली' पङ्क्ति, धोरणी, श्रेणी (श्रेणि)।

*अलति इति आलिः "कृशकुटि"-(उणा-६१९) इति णिदिः।

**आलिङ्गन**-न.-१५०७-५२२५२ ભેટવું તે

द्र० अङ्कपालीशब्दः।

*आलिङ्ग्यते इति आलिङ्गनम्।

**आलिङ्गिन्**-पुं.-२९३-ગાયના પુચ્છ જેવું મૃદંગ

□आलिङ्ग्य।

*आलिङ्गोऽस्य अस्ति इति आलिङ्गी।

**आलिङ्ग्य**-पुं-२९३-ગાયના પુચ્છ જેવું મૃદંગ

□आलिङ्गिन्।

*आलिङ्गः अस्य अस्ति इति आलिङ्गी वादनात् आलिङ्ग्यः।

**'आलिन्द'**-पुं-१०१०-ઓટલો.

द्र० अलिन्दशब्दः।

**आली**-पुं-१२११-વીંછી.

द्र० आलिशब्दः।

*आलमनर्थोऽत्रास्ति इति आली।

**(आली)**-पुं-९६५-પુલ.

द्र० आलिशब्दः।

*अलति इति आली।

**आली**-पुं-१४२३-પંક્તિ, શ્રેણી.

द्र० आलिशब्दः।

**आलीढ**-न.-७७७-જમણો પગ લંબાવી ડાબા પગને સંકોચી ઉભા રહેવું તે

*तिष्ठन्त्येभिरिति स्थानानि जङ्घयोश्चारी निवृत्तौ स्थितिविशेषाः आलेढि भुवं इति आलीढम्,

**धनुर्वेद**:-"अग्रतोवामपादं तु तीक्ष्णंचैवाऽनुकुञ्चितम् आलीढं तु प्रकर्तव्यं हस्तद्वयसविस्तरम्।"

**आलीन**-न.-१०४२-કલઈ

□वङ्ग, त्रपु, स्वर्णज, नाग जीवन, मृद्वङ्ग, रङ्ग, गुरुपत्र, पिच्चट, चक्रसंज्ञ, तमर, नागज, कस्तीर, सिंहल, [श्वेतरूप्य, शठ, सलवण, रजस्, परास, मधुक, ज्येष्ठ, धन, मुखभूषण शे. १११]।

*आलीयते स्म इति आलीनम्।

**आलीनक**-पुं.-१०४२-કલઈ

द्र० आलीनशब्दः।

**(आलु)**-स्त्री-१०२१-ઝારી પાણીનું નાનું પાત્ર

द्र० आलूशब्दः।

*अडति अनया इति आलुः।

**आलुक**-पुं-१३०७-શેષનાગ

द्र० अनन्तशब्दः।

*अलति पाताले इति आलुकः "कञ्चुक"-(उणा-५७) इतिके निपात्यते।

**आलू**-स्त्री-१०२१-ઝારી, પાણીનું નાનું પાત્ર.

□वार्धानी, गलन्ती, कर्करी, करक (आलु)।

*अडति अनया इति आलूः "अडोलचवा"-(उणा-८३७) इति णिदूः।

**आलेख्य**-न.-९२२-ચિત્ર.

□चित्र।

*आलिख्यते इति आलेख्यम्।

**आलेख्यशेष**-पुं-३७४-મરેલો.

□प्रमीत, उपसंपन्न, परेत, प्रेत, संस्थित, नामशेष, यशःशेष, व्यापन्न, उपगत, मृत, परासु।

*आलेख्यशब्दात् परः शेषः, तेन आलेख्यशेषः, आलेख्यैव शेषमस्येत्यादिकृत्वा।

**आलोक**-पुं-१०१-પ્રકાશ

द्र० आतपशब्दः।

*आलोकते जनोऽनेन इति आलोकः।

**आवपन**-न.-१०२६-દરેક પ્રકારનું વાસણ

□भाण्ड।

*आ उप्यते आधेयमस्मिन् इति आवपनम्।

**आवरण**-न.-७८३-ઢાલ

द्र० अङ्कुनशब्दः।

*आव्रियते वपुरनेन इति आवरणम्।

**आवरोधिक**-पुं-७२६-અન્તઃપુરનો અધિકારી.

द्र० अन्तःपुराध्यक्षशब्दः।

*अवरोधे नियुक्तः इति आवरोधिकः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**आवर्त्त**–પું-૧૦૭૬–પાણીની ભમરી, પાણીનું ચક્રાકારે ભમવું.

☐तालूर, वेलक ।

*आवर्तते मण्डलेन भ्रमति इति आवर्त्तः अम्भसां भ्रमः ।

**आवर्हित**–ન.–૧૪૮૦–મૂળમાંથી ઉખેડી નાખેલ

☐उन्मूलित, उत्पाटित, उद्धृत ।

*आवर्ह्यते स्म इति आवर्हितम् ।

**आवलि**–સ્ત્રી–૧૪૨૩–શ્રેણી, પંક્તિ.

द्र० आलिशब्दः ।

*आवलति इति आवलिः । "पदिपठि"—(उणा–६०७) इति इः स्त्रीलिङ्गः ।

**'आवली'**–૧૪૨૩-શ્રેણી પંક્તિ.

द्र० आलिशब्दः ।

**आवसथ**–પું–૯૯૧–ઘર.

द्र० अगारशब्दः ।

*आवसन्ति अस्मिन् इति आवसथः, "उपसर्गाद् वसः" (उणा–२३३) इति अथः ।

**आवसथ**-પું–૯૯૪–વિદ્યાર્થીઓ અને વ્રતીઓનું રહેઠાણ.

☐मठ, आवसथ्य ।

*आवसन्ति अस्मिन् इति आवसथः, छात्राणां व्रतिनां च वेश्मनि ।

**आवसथ्य**–ન.-૯૯૪-વિદ્યાર્થીઓ અને વ્રતીઓનું રહેઠાણ.

☐मठ, आवसथ ।

*आवसथः एव आवसथ्यं, भेषजादित्वाद् ट्यण ।

**आवसित**–ન.–૧૧૮૩–મસળેલું

☐धान्य, रिद्ध, (सिद्ध, सुसम्पन्न) 'ऋद्ध' [आवासित शि. १०७] ।

*आ अवसितं निष्पन्नं रक्षार्थमाच्छादितमावसितं, **ईत्यन्ये** ।

**आवाप**–પું-૬૬૩–બંગડી, કડુ વગેરે હાથના ભૂષણ.

☐करभूषण, कटक वलय, पारिहार्य, कङ्कण, हस्तसूत्र, प्रतिसर. [परिहार्य शि. ५४] ।

*आ उप्यते इति आवापः

**आवाप**–પું–૭૧૫–પરમંડલની ચિન્તા.

* आ उप्यते इति आवापः सन्ध्यादिषाड्गुण्येन परमण्डलचिन्ता ।

**आवाप**–પું–૧૦૯૫–ક્યારે ।

द्र० आलवालशब्दः ।

*आ उप्यते अम्भोऽस्मिन् इति आवापः ।

**आवाल**–ન.–ક્યારો.

द्र० आलवालशब्दः ।

*आवलते बहिर्निर्गमादम्भोऽत्र आवालं क्लीबलिङ्गः **व्याडिस्तु**: "आवलो जलपिण्डिलः" इति पुंलिङ्गमाह ।

**आवास**–પું–૯૯૧–ઘર

द्र० अगारशब्दः ।

*निवसन्ति अस्मिन् इति आवासः ।

**आवासित**–ન.–૧૧૮૩ (શિ. ૧૦૭) મસળેલું

द्र० आवसितशब्दः ।

**आविक**–પું–કાંબલ, ઊનનું વસ્ત્ર

☐कम्बल, ऊर्णायु, औरभ्र, रल्लक ।

*अविकस्य विकारः इति आविकः "प्राण्यौषधि"–(६।२।३१) इत्यण् ।

**आविद्ध**–ન.–૧૪૫૬–વાંકુ

द्र० अरालशब्दः ।

*आविध्यते स्म इति आविद्धम् ।

**आविद्ध**–ન.–૧૪૮૨–પ્રેરણા કરેલું

द्र० अस्तशब्दः ।

आविध्यते स्म इति आविद्धम् ।

**आविल**–ન.–૧૦૭૧–મલિન.

☐अनच्छ, कलुष ।

*आविलति इति आविलम् ।

**आविष्कृत**–ન.–૧૪૭૮–પ્રગટ કરાયેલું

☐दर्शित, प्रकाशित, प्रकटित, [प्रादुष्कृत शि. १३२] ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आविष्क्रियते स्म इति आविष्कृतम्, 'निर्दुर्बहि" (२।३।९) इति षत्वं प्रादुष्कृतमपि ।

**आविष्ट**–पुं–४९१–ભૂતગ્રસ્ત.

☐भूतात्त ।

*आविशति संरभते स्म इति आविष्टः ।

**आविस्**–१५३९–પ્રગટ, ખુલ્લુ

☐प्रादुस् ।

*अवति इति आविः "अवेर्णित्"-(उणा–९९५) इति अस् **यथा**–

'तेषामाविरभूद्ब्रह्मा परिम्लानमुखश्रियाम्" ।

**आवीत**-न.–८४५–જનોઈ (ડાબાખભે ધારણકરેલી)

☐प्राचीनावीत ।

*आवीयते स्म इति आवीतं,

**आवुक**–पुं–३३२–પિતા(નાટકની ભાષામાં)

*अवति इति आवुकः "कञ्चुकां"–(उणा-५७) इत्यादिशब्दादुकान्तो निपात्यते ।

**आवुक**––पुं.-३३२–બનેવી. (નાટકની ભાષામાં)

☐भावुक ।

**आवृत्**–न.–१५०४–અનુક્રમ.

द्र० अनुक्रमशब्दः ।

*आवर्तनं इति आवृत् संपदादित्वात् क्यप् ।

**आवृत्त**-न.–१४७६–ઢંકાયેલુ

द्र० अन्तर्हितशब्दः ।

*आव्रियते इति आवृत्तम् ।

**आवृत्ति**–સ્ત્રી–१५०४–અનુક્રમ

द्र० अनुक्रमशब्दः ।

*आवर्त्तनं इति आवृत्तिः ।

**आवेग**–पुं–३२२–ઉતાવળ, સંવેગ.

☐त्वरि, तूणि, संवेग, सम्भ्रम, त्वरा ।

*आवेजनं इति आवेगः ।

**आवेश**–पुं–३२१–આવેશ. (ધાતુના વૈષમ્યથી ઉત્પન્ન થયેલ)

☐अपस्मार ।

*अपस्मरणमपस्मारः धातुवैषम्यादेरावेशः ।

**आवेश**–पुं–१४९९—અહંકાર (ભૂતવગેરેનો આવેશ)

☐आटोप, संरम्भ ।

*आवेशनं इति आवेशः ।

**आवेशन**-न.–१०००–સોની વગેરે કારીગરોનું સ્થાન.

☐शिल्पिशाला, 'शिल्पशाल' ।

*आविशन्त्यस्मिन् इति आवेशनं, गृहादन्यत् कारूणां कर्मस्थानम् ।

**आवेशिक**–पुं–४९९–મહેમાન.

द्र० अतिथिशब्दः ।

*अवेशे अप्रतिवेशे भव इति आवेशिकः "नैकग्रामीणमतिथिं विप्रं सांगतिकं तथा" **इति स्मृतेः** अध्यात्मादित्वादिकण् ।

**आवेशिक**-न.–४९९–મહેમાન ગીરો

☐आतिथ्य, आतिथेयी ।

*अवेशेऽप्रतिवेशे भवं इति आवेशिकम् ।

**आवेष्टक**-पुं–९८२–કોટ, કીલ્લો.

☐वाट, प्राचीन, वृत्ति ।

*आवेष्टते इति आवेष्टकः ।

**आशंसा**–સ્ત્રી–४३०–ઈચ્છા.

द्र० अभिलाषशब्दः ।

*आशंसनं इति आशंसा ।

**आशंसितृ**–पुं–३५०–ઇચ્છા કરનાર

☐आशंसु ।

*आशंसते इति आशंसिता ।

**आशंसु**–पुं–३५०–ઇચ્છા કરનાર

☐आशंसितृ ।

*आशंसते इत्येवंशीलः इति आशंसुः "सनभिक्षा"–(५।२।३३) इति उः ।

**आशङ्का**–સ્ત્રી–३०१–ભય, ભયાનક રસનો સ્થાયી ભાવ.

द्र० आतङ्कशब्दः

आशङ्कनं इति आशङ्का ।

**आशय**–पुं–१३८३–અભિપ્રાય

द्र० अभिप्रायशब्दः ।

*आशेरतेऽस्मिन्नाशयः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**आशयाश**–પું–૧૧૦૦–(શિ. ૯૯)–અગ્નિ.

द्र० अग्निशब्दः ।

**आशर**–પું–૧૮૭–રાક્ષસ

द्र० असृक्पशब्दः ।

*आश्रृणाति हिनस्ति इति आशरः ।

**आशा**–સ્ત્રી–૧૬૬–દિશા.

□काष्ठा, दिश्, हरित्, ककुभ् ।

*आऽश्नुते इति आशा ।

**आशा**–સ્ત્રી–૪૩૦–ઇચ્છા.

द्र० अभिलाषशब्दः ।

*आश्यति अनया इति आशा "उपसर्गादातः" (५।३।११०) इत्यङ् ।

**आशित**–પું–૩૯૪–ખાનાર, ભક્ષણ કરનાર.

द्र० अद्मरशब्दः ।

*आ समन्तात् अश्नाति इति आशितः, आशिरोऽपि ।

**आशित**–પું–૪૨૬–તૃપ્ત, ધરાયેલ.

द्र० आघ्रातशब्दः ।

*आ अश्नाति स्म इति आशितः ।

**आशितङ्गवीन**–ન.–૯૬૪–ગાયો ધરાય તેવું ચરવાનું સ્થાન.

* आशितास्तृप्ता गवोऽस्मिन्नाशितङ्गवीनं, "अषडक्षा"–(७।१।१०६) इतीने साधुः ।

**आशिर**–પું–૩૯૪–(શિ. ૨૮) ખાનાર, ભક્ષણ કરનાર.

द्र० अद्मरशब्दः ।

आ समन्तात् अश्नाति इति आशिरः आशितोऽपि।

**आशिर**–પું–૧૧૦૦ (શે. ૧૬૯) અગ્નિ.

द्र० अग्निशब्दः ।

**आशिष्**–ન.–૨૭૨–આશીર્વાદ

□मङ्गलशंसन ।

*आशासनं इति आशीः "आङः" (४।४।१२०) इति क्विपि इसादेशः ।

**आशिष्**–ન.–૧૩૧૫–સર્પની દાઢ (તાળવામાં રહેલી)

□(अहिदंष्ट्रा) [आशी शि. ११६]

अहेर्दंष्ट्रा आशास्यते हिंस्यते अनया इति आशीः **यदाह**– 'आशीस्तालुगता दंष्ट्रा यया विद्धो न जीवति" –"ऋत्"–(५।३।११४) इति क्विप्, "क्वौ"–(४।४।११९) इतीसादेशः ईकारान्तोऽयं **इत्यन्ये** ।

**आशी**–સ્ત્રી–૧૩૧૫–(શે. ૧૧૬) સર્પની દાઢ (તાળવામાં રહેલી)

□(अहिदंष्ट्रा) आशिष् ।

**आशीविष**–પું–૧૩૦૪–સર્પ, સાપ.

द्र० अहिशब्दः ।

*आशीस्तालुगतादंष्ट्रा तस्यां विषमस्य आशीविषः पृषोदरादित्वाद् स्लोपः, आश्वस्य विषमस्तीतिवा।

**आशु**–પું–૧૧૬૮–ડાંગરની એક જાત.

□पाटल व्रीहि ।

*अश्नुते इति आशुः पुंलिङ्गः "कृवापाजि"–(उणा-१)इतिउण् शीघ्रपाकत्वाद्वा **यद्दुग**ः–"आश्वाख्या शालिशीघ्रयोः" इति ।

**आशु**–અ.–૧૫૩૦–જલદી

द्र०–**अञ्जसाशब्दः** ।

*अञ्जसेति तृतीयान्तप्रतिरूपकमव्ययम्, यथा– "यद्वाऽञ्जसा जयति ब्रह्मलोकम्" ।

**(आशु)**–અ.–૧૪૭૦–જલદી

द्र० अञ्जसाशब्दः ।

**आशुग**–પું–૭૭૮–બાણ

द्र० अजिह्मगशब्दः ।

*आशु गच्छत्याऽऽशुगः ।

**आशुग**–પું–૧૧૦૬–પવન

द्र० अनिलशब्दः ।

*आशु गच्छति इति आशुगः ।

**आशुशुक्षणि**–પું–૧૦૯૭–અગ્નિ

द्र० अग्निशब्दः ।

*आशोषुमिच्छति इति आशुशुक्षणिः "आङः कृहृशुषेः"–(उणा–६४३) इति अणौ साधुः ।

**आश्चर्य**–ન.–૩૦૪–આશ્ચર્ય અદ્ભૂત રસનો સ્થાયી ભાવ.

द्र० अद्भूतशब्दः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*आचर्यते इति आश्चर्यम्, वर्चस्कादित्वात् साधुः ।

**आश्मन**–પું–૧૦૨–(શે. ૧૧) સૂર્યનો સારથી, અરુણ.

द्र० अनूरुशब्दः ।

**आश्रय**–પું–૧૧૩–મૂલનક્ષત્ર

☐मूल(आस्रय) ।

*अश्रयो राक्षसो देवताऽस्य इति आश्रयः ।

**आश्रम**(બ.વ.)–પું–ન.–૮૦૭–બ્રહ્મચર્ય વગેરે ચાર આશ્રમ.

*आश्रम्यन्ति तपस्यन्त्येष्वित्याश्रमाः पुंक्लीबलिङ्गः ।

**आश्रम**–પું–ન.–૧૦૦૧–મુનિઓનું સ્થાન આશ્રમ.

☐मुनिस्थान ।

*आश्रम्यन्ति तपस्यन्त्यस्मिन् इति आश्रमः पुंक्लीबलिङ्गः ।

**आश्रय**–પું–બળવાનનો આશરો લેવો (રાજ્યને ઉપકારી છઠ્ઠો ગુણ)

*अशक्तया बलवदाश्रयणं इति आश्रयः संश्रयाख्यः ।

**आश्रय**–પું–૯૯૧–ઘર.

द्र० अगारशब्दः ।

*आश्रयन्त्येनं इति आश्रयः ।

**आश्रयाश**–પું–૧૦૧૯–અગ્નિ

द्र० अग्निशब्दः ।

* आश्रयमात्मस्थानमश्नाति इति आश्रयमाधारमश्नात्याश्रयाश इत्येके ।

**आश्रयाश** પું–(શિ.૯૯–૧૦૧૯–અગ્નિ.

द्र० अग्निशब्द ।

**आश्रव**–પું–૨૭૮–સ્વીકાર

द्र० अङ्गीकारशब्दः ।

*आङः परः श्रवः इति आश्रवः ।

**आश्रव**–પું–૪૩૨–સાંભળવામાં તત્પર

*आश्रुणोति वाक्यमाश्रयः वचनश्रवणे तत्परः ।

'**आश्रव**'–૧૩૭૫–શે, દુઃખ.

द्र० आदीनवशब्दः ।

**आश्रुत**–ન.–૧૪૮૯–સ્વીકારેલું

द्र० अङ्गीकृतशब्दः ।

*आश्रूयते स्म इति आश्रुतम् ।

**आश्व**–ન.–૧૪૨૦–ઘોડાનો સમૂહ.

☐अश्वीय ।

*अश्वानां समूह इति आश्वं "वाऽश्वादीयः" (६।२।१) इति निपात्यते ।

**आश्वत्थ**–પું–૮૧૬–વ્રતમાં ધારણ કરવા લાયક પિપળાનો દંડ.

☐जितनेमि ।

*अश्वत्थस्य विकारोऽवयवो वाऽऽश्वत्थः ।

**आश्वयुज**–પું–૧૫૫–આસોમાસ.

☐आश्विन, इष, ।

*आश्विनी पौर्णमास्यस्य इति आश्वयुजः ।

**आश्विन**–પું–૧૫૫–આસોમાસ.

☐आश्वयुज, इष ।

*आश्विनी पौर्णमास्यस्य इति आश्विनः ।

**आश्विनेय**–(द्वि.व.)–પું–૧૮૧–(શિ.૧૪)સ્વર્ગના વૈદ્યરાજ.

द्र० अश्विजशब्दः ।

**आश्वीन**–પું–૧૨૫૦–એક દિવસમાં ઘોડો જઈ શકે તેટલો માર્ગ

*अश्वेनाह्ना गम्य इति आश्वीनः "अह्ना गम्ये"–(७।१।८५) इति ईनञ् ।

**आषाढ**–પું–૧૫૪–અષાઢમાસ

☐शुचि ।

*आषाढी पौर्णमास्यस्य इति आषाढः ।

**आषाढ**–પું–૮૧૫–વ્રતમાં ખાખરાનો દંડ

☐पालाश ।

*आषाढाः प्रयोजनमस्य इति आषाढः विशाखाऽऽषा"–(६।४।१२०) इत्यण् ।

**आषाढ**–પું–૧૦૨૯–મલયાચલ પર્વત.

☐मलय, दक्षिणाचल, [चन्दनगिरि શિ.૧૫૯]

*आषाढासु जातः इति आषाढः "श्रविष्ठा"–(६।३।१०५) इत्यत्र मतान्तराश्रितोऽण् ।

**आषाढाभू**–પું–૧૧૭–મંગલગ્રહ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्र० अङ्गारकशब्दः ।

आषाढा उत्तराषाढास्तासुभवति इति आषाढाभूः ।

**आस**–पुं न.–७७५-ધનુષ્ય

द्र० अस्त्रशब्दः ।

*अस्यन्ते बाणा अनेन इति आसः पुंक्लीबलिङ्गः।

**आसक्त**–पुं–३८५–તત્પર

☐तत्पर, प्रवण, प्रह्व, प्रसित, परायण ।

*आसजति स्म इति आसक्तः ।

**आसन**–पुं–९ प.–આ શબ્દ લગાડવાથી વાહન-વાચક શબ્દ બને છે.

**आसन**–न.–८२–આસન, પદ્માસન વગેરે.

☐करण ।

*आस्यतेऽनेन इति आसनम्, पद्मासनादि ।

**आसन**-पुं. न –६८४–આસન, કાષ્ઠાસન.

☐विष्टर, पीठ, ।

*आस्यते अस्मिन् इति आसनं पुंक्लीबलिङ्गः।

**आसन**–न.–७३५–લડાઈ વગેરેની નિવૃત્તિ, કિલ્લામાં ભરાઈ રહેવું તે, રાજ્યોપકારી ચોથો ગુણ.

*आस्यते इति आसनं विग्रहादि निवृत्तिः ।

**आसन**–न.–१२२४–હાથીનો સ્કન્ધ.

*हस्तिनः स्कन्धः आस्यतेऽस्मिन् इति आसनम् ।

**आसन**–न.–११४४–અસનવૃક્ષ જીવક.

द्र० असन शब्दः।

**आसना**–स्त्री–१४९८-સ્થિતિ, સ્થાન.

☐आस्था, आस्या, स्थिति ।

आसनमासना

*"णिवेत्त्यास"–(५।३।१११) इत्यने आसना ।

**आसन्द**–पुं–२९९ (શે. ७६.)-વિષ્ણુ, નારાયણ.

द्र० अच्युतशब्दः ।

**आसन्दी**–स्त्री–६८४–ખુરશી વગેરે.

☐वेत्रासन ।

*वेत्रलताघटितमासनम् ।

**आसन्न**–न.–१४५१–સમીપ, બાજુમાં.

द्र० अन्तिक शब्दः ।

*आसीदति स्म इति आसन्नम् ।

**आसव**–पुं–९०४–મીરા દેશની મદિરા, શેરડી વગેરેનો દારૂ.

☐मैरेय, शीधु ।

*आसूयते इति आसवः ।

**आसव**–पुं–९०५·મદિરા બનાવવાની ક્રિયા.

द्र० अभिषवशब्दः ।

*आसवनं इति आसवः ।

**आसादित**-न.–१४९०–મેળવેલું

☐प्राप्त, भावित, लब्ध, भूत, [विन्न, शि. १३५]।

*"आङ्सदण्गतौ" इत्यस्य आसादितम्, विन्नमपि ।

**आसार**–पुं–१६५–વેગવાળો વરસાદ

☐(महावृष्टि) [धारासम्पात शे. २९]

**आसार**–पुं–७९०–મિત્રનું બળ

☐सुहृद्बल ।

*आस्त्रियतेऽनेनत्या आसारोऽन्वागच्छन्मित्रबलम् ।

**आसीन**–पुं–४९२–બેઠેલો.

☐उपविष्ट ।

*आस्ते इति आसीनः "आसीनः" (४।४।११५) इत्यानशि साधुः ।

**आसुति** स्त्री–९०५–મદિરા બનાવવાની ક્રિયા.

द्र० अभिषवशब्दः ।

*आसूयते इति आसुतिः ।

**आसुतीबल**–पुं–८१८–સોમરસ કાઢી યજ્ઞ કરનાર.

☐यज्वन् ।

*आसुतिः सोमसंधानमस्त्यस्य इति आसुतीबलः कृष्यादित्वाद् बलच् "बलच्यपित्रादेः" (३।२।८२) इति दीर्घः ।

**आसुतीबल**–पुं-९०१–કલાલ, મદિરા વેચનાર.

☐कल्यपाल, सुराजीविन्, शौण्डिक, मण्डहारक, वारिवास, पानवणिज् ध्वज, ध्वजिन्, ।

*आसुतिर्मद्यसंधानमस्त्यस्य इति आसुतीबलः ।

**आसुर**–न -६२१-લોહી

द्र० असृजशब्दः ।

*आसुराणामिदं प्रियं इति आसुरम् ।

**आसेचनक**–न.–१४४३-જેને જોવાથી આંખ તૃપ્ત ન થાય તેવું દૃશ્ય.



Jain Education International For Private & Personal Use Only www.jainelibrary.org

*आसिच्यते आप्यायते दृगनेन इति आसेचनकं यद्दर्शनाद् दृग् न तृप्यति ।

**आस्कन्दन**-न.-७९७-युद्ध, लडाई.

द्र० अनीकशब्दः ।

*आस्कन्दन्त्यत्र इति आस्कन्दनम् ।

**आस्कन्दित**-न.-१२४९-कोधथी चारे पग टेकीने जवुं ते.

☐उत्तेरित, उपकण्ठ ।

*आस्कन्दनं इति आस्कन्दितम् ।

**आस्तर**-पुं-६८०-हाथी के रथ उपर नांखवानुं वस्त्र, झूल.

☐कुथ, वर्ण, परिस्तोम, प्रवेणी, नवत [वर्ण-परिस्तोम शि. ५५ आस्तरण शि. ५६]।

*आस्तीर्यते इति आस्तरः आस्तरणमपि, अयं च हस्तिरथप्रावरणादावुपयुज्यते, **यद् वाचस्पतिः**-"विनियोगस्त्वस्य हस्तिरथप्रावरणादिषु" इति ।

**आस्तरण**-न.-६८० (शि. ५६)-हाथी के रथ उपर नांखवानुं वस्त्र, झुल.

द्र० आस्तरशब्दः ।

**आस्तिक**-पुं-४९०-आस्तिक, श्रद्धावाळो.

☐श्रद्धालु, श्राद्ध ।

*अस्ति परलोकः पुण्यं पापमिति मतिरस्य इति आस्तिकः "नास्तिक-" (६।४।६६) इति इकणि निपात्यते ।

**आस्था**-स्त्री-२७८-स्वीकार

द्र० अङ्गीकारशब्दः ।

*आस्थानं इति आस्था ।

**आस्था**-स्त्री-४८१-सभा.

☐सभा संसद्, समाज, परिसद्, सदस्, पर्षद् समज्या, गोष्ठी आस्थान, आस्थानी, समिति घटा ।

*आतिष्ठन्ति अस्यां इति आस्था ।

**आस्था**-स्त्री-१४९८-स्थान, **स्थिति.**

आस्या, आसना, स्थिति ।

*आस्थानं इति आस्था ।

**आस्थान**-न, स्त्री.-४८१-सभा

द्र० आस्थाशब्दः ।

*अनटि आस्थानम्, स्त्रीक्लीबलिङ्गः ।

**आस्थानगृह**-न.-९९७-सभागृह.

☐इन्द्रक ।

*आस्थानाय गृहमास्थानगृहम् ।

**(आस्थानी)**-स्त्री-४८१-सभा.

द्र० आस्थाशब्दः ।

**आस्पद**-न.-९८८-स्थान.

☐स्थान, पद ।

*आ समन्तात् पदं इति आस्पदं वर्चस्कादित्वात् साधुः ।

**आस्फोटनी**-स्त्री-९०९-मोती वगेरे बांधवानुं शस्त्र.

☐वेधनिका ।

*आस्फोट्यतेऽनया इति आस्फोटनी ।

**'आस्फोटा'**-स्त्री-११५६-गरणी.

द्र० अपराजिताशब्दः ।

**आस्य**-न.-५७२-मुख.

द्र० आननशब्दः ।

*अस्यत्यनेन वर्णमास्यं "शिक्यास्य"-(उणा-३६४) इति ये निपात्यते ।

**आस्यलाङ्गल**-पुं-१२८८-भुंड.

द्र० आखनिकशब्दः ।

*आस्यं दारकत्वाल्लाङ्गलमिवाऽस्य इति आस्यलाङ्गलः ।

**आस्यलोमन्**-पुं-५८३-दाढी-मुछ.

☐श्मश्रु, कूर्च, मासुरी, [व्यञ्जन, कोट शे.१२२]

**आस्या**-स्त्री-१४९८-स्थान स्थित

☐आस्था आसना, स्थिति ।

*आसनमास्या "आस्यटि-" (५।३।९७) इति निपात्यते ।

**आस्यासव**-पुं-६३३-लाळ.

☐सृणीका, स्यन्दिनी, लाला, कफकूचिका, [सृणिका शि. ४९]

*आस्यस्यासव इति आस्यासवः ।

**आस्रव**-पुं-१३७५-दोष, कष्ट, दुःख.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

□दोष, आदीनव, 'आश्रव' ।

*आस्रवन्ति गुणाः अस्मिन्नाश्रवः "आदीनवास्रवौ क्लेशः" इत्यमरः ।

**आस्राव**-पुं-३९६ (शे ९६) ઉકાળેલા અનાજનું-ધોવણ ઓસામણ.

द्र० आचामशब्दः ।

**आहत**-न.-१४८३-ગુણાકાર કરેલું.

□गुणित ।

*आहन्यते इति आहतम् ।

**आहतलक्षण**-पुं.-४३७-ગુણોથી પ્રસિદ્ધ પામેલ.

*आहतान्युद्घोषितानि लक्षणानि अस्य इति आहतलक्षणः ।

**आहर**-पुं-१३६८ અંદરનો શ્વાસ

□उच्छ्वास, आन ।

*आहरति अनेन इति आहरः ।

**आहव**-पुं-७९६-યુદ્ધ લડાઈ

द्र० अनीकशब्दः ।

*आहूयन्ते योद्धारोऽत्रेत्याहवः, "आङो युद्धे" (५।३।४३) इत्यलि वस्योत्वम् ।

**आहवनीय**-पुं-८२६-ત્રણ પ્રકારના અગ્નિમાંથી એક પ્રકારની અગ્નિ.

*आहोतव्य इति आहवनीयः "हव्यपच्य"-(७।१।११) इति ये निपात्यते ।

**आहार**-पुं.-४२३ ભોજન.

द्र० अदनशब्दः ।

*आहारणं इति आहारः ।

**आहारतेजस्**-पुं-६२०-રસધાતુ.

द्र० अग्निसंभवशब्दः ।

*आहारस्य तेजो निर्यास इति आहारतेजः ।

**आहारनिहारविधि**-स्त्री-५८-આહાર, નીહાર, લોકો દેખી ન શકે તેવો પ્રભુનો અતિશય.

**आहार्य**-पुं-२८३-ભૂષણ વગેરેથી કરાયેલ અભિનય.

**आहाव**-पुं-१०९२-હવાડો.

□निपान, उपकूप ।

*आहूयन्ते पशवः पानाय अस्मिन्निति आहवः "आहावो:" (५।३।४४) इत्यलि निपात्यते ।

**आहिक**-पुं-१२१-કેતુગ્રહ.

द्र० अश्लेषाभूशब्दः ।

*अहिना संसृष्ट इति आहिकः ।

**आहिताग्नि**-पुं-८३५-અગ્નિહોત્રી.

द्र० अग्निचित्शब्दः ।

*आहितोऽग्निरनेन इति आहिताग्निग्निः तत्र अग्न्याहितोऽपि ।

**आहितुण्डिक**-पुं-४८८-સર્પનું ઝેર ઉતારનાર.

□व्यालग्राहिन्, 'अहितुण्डिक' ।

*अहितुण्डेन दीव्यत्याहितुण्डिकः ।

**आहुति**-स्त्री-८२१-હોમ, અગ્નિમાં હોમવું તે.

□देवयज्ञ, होम, होत्र, वषट्कार ।

*आहूयतेऽसावग्नाहुतिः ।

**आहो**-અ.-१५३६-વિતર્ક જણાવનાર અવ્યય.

□उताहो, किमुत, किम्, किमु, उत ।

*आजुहोत्याहो विच् यथा अयं स्थाणुराहो पुरुषः ।

**आहोपुरुषिका**-स्त्री-३९८-હું શક્તિમાન છું એવી પોતાનામાં સંભાવના રાખવી તે.

*अहो अहं पुरुषः इत्यस्यां आहोपुरुषिका ।

**आह्निक**-न.-२५५-એક દિવસમાં ભણાવી શકાય તેટલો ગ્રંથ ભાગ.

*अवान्तरप्रकरणानां विश्रामः तत्र शीघ्रपाठात् अह्ना निवृत्तमिव आह्निकं, "निवृत्ते"—(६।४।१०५) इतीकण् प्रत्ययः ।

**आह्वय**-पुं-२६०-નામ.

द्र० अभिख्याशब्दः ।

*आहूयतेऽनेन इति आह्वयः "ह्वः समाह्वया"-(५।३।४१) इति अलन्तो निपात्यते ।

**आह्वा**-स्त्री-२६०-નામ.

द्र० अभिख्याशब्दः ।

*आहूयतेऽनया इति आह्वा ।

**आह्वान**-न.-२६१-બોલાવવું તે.

द्र० अभिमन्त्रणशब्दः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"इ"

**इक्षु**-पुं-११९४शेरडी
□रसाल, असिपत्रक ।
*इष्यते इति इक्षुः, "मस्जीष्यशिभ्यः सुक्"-[उणा-८२६] इति निपात्यते ।

**इक्षु**-पु-१२००-ગાંઠમાંથી ઉત્પન્ન થયેલ શેરડી વગેરે.
□तृण, वंश,
[*पर्व योनिरेषां ते पर्वयोनयः इक्ष्वाद्याः] ।

**'इक्षुगन्धा'**-स्त्री-११५६-ગોખરૂ.
द्र० गोक्षुरशब्दः ।

**इक्षुरसक्वाथ**-पु-४०२-ગોળ
□गुड ।
*गूयते क्वथ्यते इति गुडः "कुगुहुनी"-(उणा-१७०) इति डः कित् गुडति रक्षति वा ।

**इक्षुवारि**-पुं-१०७५-ઈક્ષુસમુદ્ર.
□इक्षूद
*इक्षुरसः वारि यस्य स इक्षुवारिः ।

**(इक्षुद)**-पुं-१०७५-ઇક્ષુસમુદ્ર.
□इक्षुवारि ।
*इक्षु [रसः] उदकं यस्य स इक्षूदः ।

**इङ्ग**-न.-१४५४-જંગમ, હાલતું ચાલતું
□जङ्गम, त्रस, चर, चराचर, जगद् चरिष्णु ।
*इङ्गति इति इङ्गम् ।

**इङ्ग**-पुं-१५१३-ઈશારો.
□आकार, इङ्गित ।
*इङ्गनं इति इङ्गः घञ् ।

**इङ्गित**-न.-१५१३-ઈશારો.
* आकार, इङ्ग ।
*इङ्गनं क्ते इङ्गितम्, इङ्गिताकारभ्यां भावज्ञानमित्यादौ गाबलीवर्दन्यायेन इङ्गितं, चेष्टितम् ।

**इङ्गुदी**-त्रि-११४३-તાપસોનું વૃક્ષ, ઈંગોરીઓ.
□तापसद्रुमः ।
*इङ्गति इति इङ्गुदी, त्रिलिङ्गः इङ्गयर्विभ्याम्" (उणा-२४२) इत्युदः ।

**इच्छा**-स्त्री-४३०-ઈચ્છા.
द्र० अभिलाषशब्दः ।
*एषणमिच्छा 'मृगयेच्छा" - (५।३।१०१) इति साधुः ।

**इच्छावसु**-पुं-१८९કુબેર દેવતા.
श्रीद, सितोदर, कुह, ईशसख, पिशाचकिन् । त्रिशिरस्, ऐलविल, एकपिङ्ग, पौलस्त्य, वैश्रवण, रत्नकर, कुबेर, यक्ष, नृधर्मन्, धनद, नरवाहन, कैलासौकस्, यक्षेश्वर, धनेश्वर, निधीश्वर, किंपुरुषेश्वर ।
*इच्छाया वस्वस्य इति इच्छावसुः ।

**इज्जल**-पुं-११४५-નેતર, સમુદ્રફળ.
□निचुल, हिज्जल, 'अम्बुज' ।
एति इज्जलः "मुरल"-(उणा-४७४) इत्यले निपात्यते ।

**इज्याशील**-पुं-८१८-યજ્ઞ કરનાર.
□यायजूक ।
*इज्या यजनं शीलमस्य इज्याशीलः ।

**इट्चर**-पुं-१२५९-આખલો, સાંઢ.
□गोपति, षण्ड, गोवृष, मदकोहल [शण्ड, इत्वर, शि. १११] ।
*एषणमिट्, इषाचरति इट्चरः, स्वेच्छाचारी 'इत्वरः' **इत्येके** पेठुः ।

**इद्वत्सर**-पुं-१५९(शे.२७)-વરસ.
द्र० अनुवत्सरशब्दः ।

**इडावत्सर**-पुं-१५९ (शे. २७)-વરસ
द्र० अनुवत्सरशब्दः ।

**इडिक**-पुं-१२७७-જંગલી બકરી.
□शिशुवाहक, पृष्ठशृङ्ग, वनाज ।
*इड्यते कौतुकादिकैः "निष्कतुरुष्क"-(उणा-२६) इति के निपात्यते ।

**इतर**-पुं-९३२-અસંસ્કારી, નીચ.
□विवर्ण, पृथग्जन, प्राकृत, नीच, पामर, बर्बर ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*एतीति इतरः "इणपूभ्यां कित्" (उणा-४३८) इति तरः प्रत्ययः ।

**इतर**–સ.–૧૪૬૮–ભિન્ન, જુદું

द्र० अन्यतरशब्दः ।

*एतीतरत् "इणपूभ्यां कित्" (उणा-४३८) इति तरः ।

**इतरथा**–અ.–૧૫૪૨ (શે. ૨૦૫)–બીજી રીતે.

☐अन्यथा ।

**इतरेतर**–ન.–૧૪૯૯–પરસ્પર

☐परस्पर, अन्योऽन्य (मिथः–अव्यय) ।

**'इतरेद्युस्'** અ.–૧૫૪૨ (શે.૨૦૩)–બીજા દિવસે.

**इति**–અ.–૧૫૪૨ (શે. ૨૦૦)–નિશ્ચય અર્થ બતાવનાર

द्र० एवशब्दः ।

**इतिह**–અ.–૧૫૩૭–પરંપરાથી આવેલ ઉપદેશ, સંપ્રદાય

*इति वृत्तं जिहीते इतिह, अव्ययसमुदायोवा, यथा इतिह स्माहुराचार्य ।

**इतिहास**–પું–૨૫૯–પૂર્વનું ચરિત્ર.

☐पुरावृत्त ।

*इति एवमर्थे, ह किलार्थे इतिह आसीदत्र इतिहासः ।

**इत्थम्**–અ.–૧૫૪૨ (શે. ૨૦૫) એ પ્રમાણે, એમ.

**इत्वर**–પું–૧૨૫૯ (શિ.૧૧૧) સાંઢ, આખલો.

द्र० इट्चरशब्दः ।

**इत्वरी**–સ્ત્રી–૫૨૮–કુલટા, અસતી.

द्र० असतीशब्दः ।

*एत्येवंशीला इत्वरी "सृजीण्–"(५।२।७७) इति ट्वरप् ।

**इदानीम्**–અ.–૧૫૩૦–હમણાં, હાલ.

*अस्मिन् काले इदानीम्, "सदाधुनेदानींतदानीमेतर्हि"–(७।२।९३) इति साधवः यथा–"इदानीं त्वं नाथः" ।

**इध्म**–પુ. ન.–૮૨૭–લાકડા, બળતણ.

☐समिध्, इन्धन, एध, तर्पण, एधस् ।

*इति मे इध्मं क्लीबलिङ्गोऽयम्, **वैजयन्ती** तु "होमेन्धनं स्यादिध्मोऽस्त्री" इति पुंस्यप्याह ।

**इन**–પું–૩૫૯–સ્વામી, નાયક.

द्र० अधिपशब्दः ।

*एति स्वामित्वं इनः "जीणृशी–"(उणा-२६१) इति नक् ।

**इन**–પું–૯૭–સૂર્ય.

द्र० अंशुशब्दः ।

*एति इनः "जीणृशी"–(उणा-२६१) इति नः ।

**इन्दिरा**–સ્ત્રી–૨૨૬–લક્ષ્મી, વિષ્ણુની પત્ની.

द्र० आशब्दः ।

*इन्दत्यनया इन्दिरा "मदिमन्दि"–(उणा-४१२) इति बहुवनादिरः ।

**इन्दिन्दिर**–પું–૧૨૧૨–ભમરો.

द्र० अलिशब्दः ।

* इन्दति कुसुमैरिन्दिदिरः, "स्थविर"–(उणा–४८७) इतीरे निपात्यते ।

**'इन्दिवर'**–ન.૧૧૬૪–નીલકમળ.

द्र० इन्दीवरशब्दः ।

**इन्दीवर**–ન.–૧૮૬૪–નીલકમળ, કાળું કમળ.

☐'इन्दिवर, इन्दीवार, नीलाम्बुजन्मन्' ।

*नीले उत्पल इन्दति श्रिया इन्दीवरं "तीवर"–(उणा–४१४४) इति वरटि निपात्यते ।

**इन्दीवार**–ન.–૧૧૬૪–નીલ કમળ, કાળું કમળ.

द्र० इन्दीवरशब्दः ।

*इन्दीवरशब्दवत् ।

**इन्दु**–પું–૧૦૫–ચંદ્રમા, ચંદ્ર.

द्र० अत्रिदृग्जशब्दः ।

इन्दति इति इन्दुः "भ्रमृ"–(उणा-७२९) इत्यादिना उः कित् ।

**इन्दुकान्ता**–સ્ત્રી–૧૪૩–રાત્રિ

☐निशानिशी, थिनी, रात्रि, रात्री, शर्वरी, क्षणदा क्षपा, त्रियामा, यामिनी, भौती, तमी, तमा, विभावरी, रजनी, (रजनि,) वसति, श्यामा, वासतेयी, तमस्विनी, उषा, दोषा, (चन्द्रश्री વગેરે યૌગિક, नक्त) [चक्रभेदिनी, निषद्वरी, निशीथ्या, निश, घोरा, वासरकन्यका, शताक्षी, राक्षसी, याम्या, पूतार्चिषू,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तामसी, तमि, शार्वरी, क्षणिनी, नक्ता, पैशाची, वासुरा, उशास्-शे १८, १९, २०, यामवती, तुङ्गी शि. ११) ।

*इन्द्रोः कान्ता इति इन्दुकान्ता ।

**इन्दुजा**–સ્ત્રી–१०८३–નર્મદા

□रेवा, पुर्वगङ्गा, नर्मदा, मेकलाद्रिजा मेखलाद्रिजा, [मेकलकन्या–मेकलकन्यका शि. ९७]

इन्दोर्जाता इन्दुजा ।

**इन्दुभृत्**–पुं–१९९–શંકર, મહાદેવ.

द्र० अट्टहासिन्शब्दः ॥

*इन्दुं बिभर्ति इति इन्दुभृत् ।

**इन्द्र**–पुं–८६९–પૂર્વ દિશાનો સ્વામી.

**इन्द्र**–पुं–१७१–ઇંદ્ર

द्र० अच्युताग्रजशब्दः ।

*इन्दति इन्द्रः "भीवृधि"–(उणा–३८७ इति रः

**इन्द्र**–पुं–३५९–સ્વામી, નાયક.

द्र० अधिपतिशब्दः ।

इन्दनाद् इन्दः "भीवृधि"–(उणा–३८७) इति रः ।

**इन्द्र**–पुं–११९९–એક પ્રકારનું ઝેર.

द्र० अङ्कोल्लसारशब्दः ।

*इन्दति इन्द्रः इन्द्रशैलभवत्वाद्वा ।

**इन्द्रक**–ન.–९९७–સભાગૃહ.

□आस्थानगृह ।

*इन्दं कायतीव सश्रीकत्वाद् इन्द्रकम् ।

**इन्द्रकील**–पुं–१०३०–મંદરાચલ.

□मन्दर ।

*इन्द्रेण कील्यते इति इन्द्रकीलः ।

**इन्द्रकोश**–पुं–११११–ઝુકતી અટારી, અગાસી.

□तमङ्ग, (तमङ्गक) ।

*इन्द्रेण कुश्यतीव इन्द्रकोशः ।

**इन्द्रगोप**–पुं–१२०९–ગોકળ ગાય, ચોમાસાના કીડા.

द्र० अग्निकशब्दः ।

इन्द्रेण गुप्यते इति इन्द्रगोपः ।

**इन्द्रच्छन्द**–पुं–६५८–એક હજાર આઠ શેરનો હાર

*अष्टोत्तरं सहस्रं लताः, इन्द्रस्य छन्दोऽनेन्द्रच्छन्दः ।

**इन्द्रजाल**–ન.–७३८–મંત્ર-તંત્રાદિથી અસંભવિત વસ્તુ બતાવવી.

*इन्द्रजालं मन्त्रद्रव्यहस्तप्रयोगादिनाऽसंभववद्वस्तुप्रदर्शनम्, क्षुद्रा अल्पा उपायाः ।

**इन्द्रजाल**–ન–९२६–ગારૂડી વિદ્યા, જાદુગીરી

□कुहुक (कुहक) जाल, कुसृति ।

*इन्द्रस्य जालमिन्द्रजालम् ।

**'इन्द्रदु'**–पुं–११३५–અર્જુન વૃક્ષ, સાદડાનું ઝાડ

द्र० अर्जुनशब्दः ।

**इन्द्रनील**–पुं न.–१०६५–નીલમણિ.

□नीलमणि, [महानील शि. ९५] ।

*मणीनामिन्द्रो नीलश्च मणिरिन्द्रनीलः, पुंक्लीबलिङ्गः 'इन्द्रनीलं महानीलम्' इति क्लीबे **वैजयन्ति** ।

**इन्द्रभगिनी**–સ્ત્રી–२०५ (शे. ५१)–પાર્વતી.

द्र० अद्रिजाशब्दः ।

**इन्द्रभूति**–पुं–३१–પ્રથમ ગણધર.

*इन्द्रोऽस्य भूयादितीन्द्रभूतिः ।

**इन्द्रमह**–पुं–१२८० (शे. १८३)–કુતરો.

द्र० अस्थिभुजशब्दः ।

**इन्द्रमहाकामुक**–पुं–१२८० (शे. १८२)–કુતરો.

द्र० अस्थिभुजशब्दः ।

**इन्द्रलुप्तक**–ન.–४६६–કેશ ખરી પડે તેવો રોગ.

*इन्द्रेण लुप्यते स्म इन्द्रलुप्तं अथवा इन्द्रलुप्तकं वात विशेषः ।

**इन्द्रवारुणी**–स्त्री.–११५७–કાળા વાલાનું મૂળ

□विशाला, 'चित्रा, गवाक्षी, गोडुम्बा' ।

*इन्द्रवत् अक्षै वृणोति इति इन्द्रवारुणी ।

**इन्द्रवृद्धिक**–पुं–१२४३ (शे. १८१)–ગુપ્ત અંડ વાળો ઘોડો.

**इन्द्रसुत**–पुं–७०४–વાલી

□वालिन्, वालि [सुग्रीवाग्रज शि. १०] ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*इन्द्रस्य सुत इन्द्रसुतः सुग्रीवाग्रजोऽपि ।

**'इन्द्रसुरस'**–पुं–११४७–નગોડનું ઝાડ, સિન્દુવાર

द्र० निर्गुण्डीशब्दः ।

**'इन्द्रसुरिस'**–पुं–११४७–નગોડનું ઝાડ, સિન્દુવાર.

द्र० निर्गुण्डीशब्दः ।

**इन्द्राग्निदेवता**–स्त्री–११२–વિશાખા નક્ષત્ર.

☐विशाखा, राधा ।

*इन्द्राग्नी देवते अस्या इन्द्राग्निदेवता ।

**'इन्द्राणिका'**–स्त्री–११४७–નગોડનું ઝાડ, સિન્દુવાર

द्र० निर्गुण्डीशब्दः ।

**इन्द्राणी**-स्त्री–१७५–ઇન્દ્રની અપ્સરા.

☐शची, पौलोमी, जयवाहिनी, [शक्राणी, चारुधारा, शतावरी, महेन्द्राणी परिपूर्ण, सहस्रचन्द्रवती-शे–३३/३४]

*इन्द्रस्य भार्या इन्द्राणी "वरुणेन्द्र"–(२।४।६२) इत्यादीनाङीः योगे आन्चान्तः ।

**इन्द्राणीमह**–पुं–५१८ (शे. १०९)–વરનો મહોત્સવ

☐हेलि ।

**इन्द्रानुज**–पु–२१४–વિષ્ણુ, નારાયણ.

द्र० अच्युतशब्दः ।

*इन्द्रस्यानुजः इन्द्रानुजः, इन्द्रमातुरदितेर्गर्भे बलिनिग्रहार्थं वामनरूपेणोत्पन्नत्वात् , यद् **माघः**– दीप्तिनिर्जितविरोचनादयं त्वां, विरोचनसुतादभीप्सतः । आत्मभूरवरजाखिलप्रजः, स्वर्पतेरवरजत्वमाययौ (१) योगिकत्वाद् वासवावरजादयः ।

**इन्द्रायुध**-पु–१२४३–કાળી આંખ વાળો ઘોડો.

**(इन्द्रावरज)**–पुं–९–વિષ્ણુ.

**इन्द्रिय**–पुं–६२९–શુક્ર વીર્ય.

द्र० आनन्दप्रभवशब्दः ।

**इन्द्रिय**–न.–१३८३–ચક્ષુ વગેરે ઇન્દ્રિય.

द्र० अक्षशब्दः ।

**इन्द्रियायतन**–न.–५६३–શરીર

द्र० अङ्गशब्दः ।

*इन्द्रियाणामायातनमिन्द्रियायतनम् ।

**इन्द्रियार्थ**–पु–१३८४–સ્પર્શાદિ પાંચ વિષયો.

☐विषय, गोचर, [अर्थ शि. १२५] ।

*स्पर्शनं स्पर्शः, आदिग्रहणाद् रसगन्धरूपशब्दा गृह्यन्ते, इन्द्रियैरर्थ्यन्ते इति इन्द्रियार्थाः, अर्था अपि ।

**इन्धन**–न.–८२७–લાકડાં, બળતણ.

द्र० इध्मशब्दः ।

*इध्यतेऽनेन इति इन्धनम् ।

**इन्वका**–स्त्री–११० (शि. ९)–મૃગશિર નક્ષત્રના માથે રહેલા પાંચ તારાઓ.

☐इन्वला ।

*इन्वन्ति प्रीणन्ति इति इन्वका ।

**इभ**-पुं–१२१८–હાથી.

द्र० अनेकपशब्दः ।

*एति इभः "इणः कित्"-(उणा–३२८)इति भः।

**इभपालक**–पुं–७६२–મહાવત

द्र० आधोरणशब्दः ।

*इभं पालयति इति इभपालकः, अयं कर्मकरप्रायः, मण्ठो देश्याम् ।

**इभारि**–पुं–१२८४–સિંહ

☐सिंह, कण्ठीरव, हरि, हर्यक्ष केसरिन् , पञ्चास्य, नखरायुध, महानाद, पञ्चशिख, पारिन्द्र, मृगपति, मृगारि, श्वेतपिङ्ग, मृगदृष्टि, मृगाशन, पुण्डरीक पञ्चनख, चित्रकाय, मृगद्विष् , [पलङ्कष, शैलाट, वन-राज, नभःक्रान्त, गणेश्वर, शृङ्गोष्णीष, रक्तजिह्व, व्यादीर्णास्य, सुगन्धिक शे १८४–८५–पारीन्द्र शि.११४]

**इभ्य**–पुं–३५७–ધનાઢ્ય, ધનવાન.

द्र० आढ्यशब्दः ।

*इभमर्हति इभ्यः "दण्डाऽऽदेर्यः" (६।४।१७८) इति यः ।

**इरम्मद**–पुं–११०१–વીજળીનો અગ્નિ.

☐मेघवह्नि, 'मेघज्योतिष्' ।

*इरया जलेन माद्यतीरम्मदः "इरम्मद" (५।१।१२७) इति खशि निपात्यते ।

**इरा**–स्त्री–९०२–મદિરા

द्र० अब्धिजाशब्दः ।

*एति भ्राम्यत्यनया इरा "इण् धागम्याम्"– (उणा–३८९) इति कित् रः प्रत्यय ।

**इरा**–स्त्री १०७० (शे १६४)–પાણી

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्र० अप्शब्दः ।

**इरावर**–न.–१६६ (शे ३०)–પાણીના કરા.

द्र० करकशब्दः ।

**इरिण**–न.–९३९–ઉખર ભૂમિ.

☐ऊषर ।

*ऋणाति इरिणम्, "ऋद्रुहेः कित्"–(उणा–१९५) इतीणः प्रत्ययः ।

**इला**–સ્ત્રી–९३७–પૃથ્વી

द्र० अचलाशब्दः ।

*इलति ईति इला, "नाम्युपान्त्य"–(५।१।५४) इति कः इराशब्दस्य लत्वं वा ।

**इल्वला**–સ્ત્રી–११०–મૃગશિર નક્ષત્રના માથે રહેલા પાંચ તારાઓ.

☐[इन्वका शि ९]

*इलन्ति गच्छन्ति इल्वलाः स्त्रीलिङ्गः 'तुल्वलेल्वलादयः" (उणा–५०७) इति निपातनम् ।

**इष**–પુ–१५५–આસો મહિનો.

☐आश्विन, आश्वयुज् ।

*इष्यते इति इषः "तुदादि विषिगुहिभ्यः कित्" (उणा–५) इति अः कित् ।

**इषु**–પું–२२८–કામદેવના, બાણપુષ્પો.

**इषु**–त्रि–७७८–બાણ.

द्र० अजिह्मगशब्दः ।

*इष्यति गच्छति इति इषुस्त्रिलिङ्गः "पृका"–(उणा–७२९) किदुः प्रत्ययः ।

**इषुधि**–પું–७८२–બાણ રાખવાનું ભાથું

द्र० उपासङ्गशब्दः

इषव धीयन्तेऽत्र इषुधिः यौगिकत्वात् ।

**इष्ट**–न.–८३४–યજ્ઞ વગેરે.

☐मखक्रिया ।

*इज्यते इति इष्टम् ।

**इष्ट**–न.–१५०५–ઈચ્છા પ્રમાણે.

☐काम, प्रकाम, पर्याप्त, निकाम, यथेप्सित,

*इष्यते इति इष्टम् ।

**'इष्टकापथ'**–न.–११५८–કાળા વાળાનું મૂળ

द्र० उशीरशब्दः ।

**इष्टगन्ध**–પું.–१३९१–સુગંધી સુવાસ.

☐आमोदिन्, मुखवासन, सुगन्धि ।

*इष्टो गन्धोऽस्य इष्टगन्धः ।

**इष्टापूर्त**–न.८३५–યજ્ઞકર્મ અને વાવ કૂવા વગેરે બંને કરાવવા તે.

*तत् [यज्ञकर्म वाप्यादि च] पूर्त्तमिष्टं च उभयमिष्टापूर्त्तं राजदन्तादित्वात् साधुः ।

**इष्य**–પું. न–१५६–વસંતઋતુ.

☐वसन्त, सुरभि, पुष्पकाल, बलाङ्गक, [पिकबान्धव, पुष्पसाधारण शे० २५] ।

*इषस्य तुल्यः समरात्रिन्दिवत्वादिष्यः शाखादित्वाद् यः, एषणमिट् पुष्पादिवाञ्छा तस्यां साधुरिति वा इष्यः पुंक्लीबलिङ्गः यद् **वाचस्पतिः**–

"वसन्ते त्वस्त्रियामिष्यः" ।

**इष्वास**–પું न.–७७५–ધનુષ્ય.

द्र० अस्त्रशब्दः ।

*इषवोऽस्यन्तेऽनेनेति इष्वासः शरासनमपि ।

## "ई"

**ई**–સ્ત્રી–२२६ (शि.१५)–લક્ષ્મી, વિષ્ણુની પત્ની.

द्र० आशब्दः ।

*अस्य विष्णोर्भार्या ईः ।

**ईक्षण**–न.–५७५–આંખ.

द्र० अक्षिशब्दः ।

ईक्ष्यतेऽनेन इति ईक्षणम् ।

**ईक्षण**–न.–५७६–જોવું તે

द्र० अवलोकनशब्दः ।

*ईक्ष्यते इति ईक्षणम् ।

**ईक्षणिक**–પુ–३८३–જ્યોતિષી, દેવજ્ઞ.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्र० आदेशिन्शब्दः ।

*शुभाशुभेक्षणं अस्ति अस्य ईक्षणिकः ।

**ईडा**–स्त्री–२६९–વખાણ સ્તુતિ.

द्र० अर्थवादशब्दः ।

**ईण्डेरिका**–स्त्री–४०० (શે. ૯૭)–વાડી.

□[वटिका शे० ९७] ।

**ईति**–स्त्री–६०–અ૦ નો ૬ઠ્ઠો અતિશય, ૧૨૫ યોજનમાં ધાન્યાદિકને ઉપદ્રવ કરનાર ઉંદર વગેરેની ઉત્પત્તિ ન થાય તે.

*पञ्चविंशतियोजनाधिके ईतिर्धान्याद्युपद्रवकारी प्रचुरो मूषिकादिः प्राणिगणो न स्यादिति षष्ठः ।

**ईति**–स्त्री–१२६–ઉપદ્રવ, અકસ્માત.

द्र० अजन्यशब्दः ।

*ईयते प्राप्यते दुःखमस्यां इति ईतिः स्त्रीलिङ्गः । "दृमुषि"–(उणा–६५१) इति बहुवचनात्तिः कित् ।

**ईप्सा**–स्त्री–४६१ (શે ૧૦૪) ઇચ્છા, મનોરથ.

द्र० अभिलाषशब्दः ।

**ईरित**–त्रि.–१४८२–પ્રેરણા કરેલું, ફેંકેલું.

द्र० अस्तशब्दः ।

*"ईरण् क्षेपे" इत्यस्य ईरितम्, चोदितमपि ।

**ईर्म**–पुं न.–४६५–ઘા.

□क्षत, व्रण, अरुष् क्षणनु ।

**ईर्या**–स्त्री–१५०८–પગે ચાલવું, વિહાર.

□गति, वीङ्खा, विहार, परिसर्प, परिक्रम ।

*"ईरक् गतिकम्पनयोः" ईरणं इति ईर्या भिदादित्वात् ।

**(ईर्या)**–स्त्री–१५०१ સાધુઓનું આચારમાં રહેવું.

*चर्या, ईर्यापथस्थिति ।

**ईर्यापथस्थिति**–१५०१–સાધ્વાચાર ધ્યાન, મૌન વગેરેમાં રહેવું તે.

□चर्या, (ईर्या) ।

*ईर्यापथः साध्वाचारः **यदाह**–'ईर्यापथो ध्यानमौनादिकं भिक्षुव्रतम्' तत्र स्थितिः ईर्यापथस्थितिः 'चर्या त्वीर्या विदुर्बुधाः' इति तु **मुनिः** ।

**ईर्ष्या**–स्त्री–३९१–અદેખાઈ, ઇર્ષા.

□अक्षान्ति ।

*ईर्ष्यणमीर्ष्या, भार्यादेः परदर्शनासहने रूढा । **कश्चित्तु** परोत्कर्षासहनं मात्सर्यमीर्ष्यां मन्यते यथा–"य ईर्ष्युः परिवित्तेषु" इति ।

**ईर्ष्यालु**–पुं–३९१–ઇર્ષાળુ.

□कुहन ।

*ईर्ष्यति ईर्ष्यालुः 'लस्जीर्ष्यिशलेरालु.' (उणा८२२) इत्यालुः ।

**(ईलि)**–स्त्री–७८५–નાની તલવાર, કટારી.

□करवालिका (ईली) [तरवालिका शि. ६८]।

**ईली**–स्त्री–७८५–નાની તલવાર, કટારી (એકબાજુ ધારવાળી)

□करवालिका (ईलि) । [तरवालिका शि. ६८]

*ईड्यते इति ईली, एकधारोऽसिस्तुरुष्कायुधम् ।

**ईश**–पुं–८–બીજો શંકર, મહાદેવ.

*कलत्रवाचिनः शब्दात्परे वरादयः शब्दास्तद्वतां कलत्रवतां वरादिलिङ्गानां नाम आहुः यथा–गौरीवरः, रमणः, प्रणयी ईशः प्रियः प्रभृतयो गृह्यन्ते ।

**ईश**–पु–१९५–શંકર, મહાદેવ.

द्र. अट्टहासिन्शब्दः ।

*ईष्टे इति ईशः ।

**ईश**–पुं–३५८–સ્વામી, નાયક.

द्र० अधिपशब्दः ।

*ईष्टे इति ईश ।

**ईशसख**–पुं–१८९–કુબેરદેવ.

द्र० इच्छावसुशब्दः ।

*ईशस्य रुद्रस्य सखा इति ईशसखः ।

**'ईशा'**–८९१–હળનો દંડ.

□ईषा ।

*ईषति इति ईशा लाङ्गलदण्डः ।

**ईशान**–पुं–१६९–ઈશાન ખુણાનો સ્વામી

**ईशान**–पुं–१९५–શંકર, મહાદેવ.

द्र० अट्टहासिन्शब्दः ।

*ईष्टे इति एवं शीलः ईशानः, ताच्छील्येशानः ।

**ईशान्तबन्धन**–न.–७५६–ધોંસરું.

□युग ।

ईशान्ते बन्धोऽस्य ईशान्तबन्धनम् ।

**ईशितृ**-पुं-३५९-સ્વામી નાયક

द्र० अधिपशब्दः ।

*ईष्टे इति ईशिता ।

**ईशित्व**-न.-२०२-જીવ-અજીવ સર્વ આજ્ઞા માને તેવી શક્તિ ત્રીજી સિદ્ધિ.

☐ईष्टे इत्येवंशील ईशी, ईशिनो भाव ईशित्वं, तेषां भूतभौतिकानां विजितमूलप्रकृतिः सन् य उत्पादो यो विनाशो यच्च यथावदवयवसंस्थानं तेषामीष्टे ।

**ईश्वर**-पुं-१९६-શંકર, મહાદેવ.

द्र० अट्टहासिन्शब्दः ।

*ईष्टे इत्येवंशीलः ईश्वरः, "स्थेशभास"—(५।२।८१) इति वरः ।

**ईश्वर**-पुं-३५७-ધનાઢ્ય, ધનવાન.

द्र० आढ्यशब्दः ।

* ईष्टे इति एव शीलः ईश्वरः ।

**ईश्वर**-पुं-३५९-સ્વામી, નાયક.

द्र० अधिपशब्दः ।

*ईशनशीलः इति ईश्वरः ।

**ईश्वरा**-स्त्री-२०४-શંકરની પત્ની, પાર્વતી.

द्र० अद्रिजाशब्दः ।

*ईष्टे इत्येवंशीला ईश्वरा "स्थेश"—(५।२।८१) इतिव रः, ईश्वरीति तु "अश्नोतेरीच्चादेः" (उणा-४४२) इति वरट्टि ङ्यां सिद्धं, ईश्वरस्य भार्या इति वा ।

**ईश्वरी**-स्त्री-२०५-(शि.५१)શંકરની પત્ની, પાર્વતી

द्र० अद्रिजाशब्दः ।

**ईश्वरी**-स्त्री-२०५(शि० १५)-શંકરની પત્ની, પાર્વતી

द्र० अद्रिजाशब्दः ।

**ईषत्**-અ.—१५३६—થોડું, અલ્પ.

☐किञ्चित्, मनाक् किञ्चन ।

*ईषति इति ईषत् 'संश्चद्'-(उणा-८८२) इति निपात्यते यथा—ईषत्पाण्डुः ।

**ईषत्पाण्डु**-पुं-१३९३-કંઈક ધોળાશ પડતો રંગ

☐धूसर ।

*ईषदव्यक्तः पाण्डुः इति ईषत्पाण्डुः ।

**ईषदुष्ण**-पुं-१३८६ થોડું ગરમ.

☐कोष्ण, क्वोष्ण, कदुष्ण, मन्दोष्ण ।

*अल्पं उष्ण इति ईषदुष्णः ।

**ईषा**-८९१-હળનો દંડ.

☐'ईशा' ।

*ईषति इति ईषा, लाङ्गलदण्डः ।

**ईषादन्त**-पुं-१२२३-લાંબા દાંતવાળો હાથી.

☐उदग्रदत् ।

*ईषाकारौ दन्तौ अस्य ईषादन्तः ।

**ईषिका**-स्त्री-९२०-લાકડા કે લોખંડની સળી.

☐तूलिका, ईषीका ।

*ईषति ईषिका काष्ठलोहादिमयीशलाका ।'

**ईषिका**-स्त्री-१२२५-હાથીની આંખનો ડોળો, આંખનો ગોળો.

द्र० अक्षिकूटकशब्दः ।

*ईषा लाङ्गलकीलिकेव ईषिका ।

**ईषीका**-स्त्री-९२०-લાકડા કે લોખંડની સળી.

☐तूलिका, ईषिका ।

*ईषति इषीका "रुचिकृजि"-(उणा-४८)इति ईकः।

**'ईषिका'**-स्त्री-१२२५-હાથીનો આંખનો ડોળો, આંખનો ગોળો.

द्र० अक्षिकूटकशब्दः।

*ईषा लाङ्गलकीलिकेव ईषिका ।

**(ईह)** पुं-४३०-ઈચ્છા, અભિલાષા.

द्र० अभिलाषशब्दः ।

**ईहा**-स्त्री-४३०-ઈચ્છા, અભિલાષા.

द्र० अभिलाषशब्दः ।

*ईहनमीहा, "क्तेट"-(५।३।१७६) इत्यः घञि ईहोऽपि ।

**ईहामृग**-पुं-२८४-નાટ્ય પ્રબંધનો પ્રકાર.

द्र० अङ्कशब्दः ।

*ईहा चेष्टा मृगस्येव स्त्रीमात्रार्थं । यत्र स ईहामृगः, अयं अभिनेयस्य प्रबन्धस्य प्रकारः भेदः ।

**ईहामृग**-पुं-१२९१-વરુ.

द्र० अरण्यश्वन्शब्दः ।

* ईहया मृग्यते ईहामृगः, ईहा मृगस्येवास्य वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# उ

**उकनाह**-पुं-१२४१-पीळी अने लाल कांति-वाळो घोडो.

*उच्चैः नह्यते उकनाहः, पीतरक्तच्छायः, स एव कृष्णरक्तच्छायः सन् क्वचिदुच्यते ।

**उक्षतर**-पुं-१२५८-मोटो बळद.

☐महोक्ष ।

*ह्रसित उक्षा उक्षातरः, "वत्सोक्षाश्वर्षभ"-(७।३।५१) इति तरट् ।

**उक्षन्**-पुं-१२५७-बळद.

द्र० अनडुद्‌शब्दः ।

*उक्षति मूत्रेण भूवमुक्षा, "उक्षितक्षि" (उणा-९००) इत्यन् ।

**उखा**-स्त्री-१०१९-थाळी, तपेली.

☐स्थाली (उपा) पिटर, कुण्ड, चरु, कुम्भी ।

*उषन्ति पचन्ति अस्यां उखा "उषे किद् लुक्च" (उणा-८८) इति खः, ओखतीति वा ।

**उख्य**-न.-४११-थाळी के तपेलीमां रांधेलु अन्न.

☐पैठर ।

*उखायां संस्कृतं उख्यम्, "शूलोखाद् यः" (६।२।१४१) इति यः ।

**उग्र**-पुं-१९५-शंकर, महादेव.

द्र० अट्टहासिन्‌शब्दः ।

*उच्यति क्षुधा समवैति औषति पुरं दहतीति वा उग्रः, "खुरक्षुर"-(उणा-३९६) इति रान्तो निपात्यते ।

**उग्र**-पुं-८९६-क्षत्रिय अने शूद्र स्त्रीथी उत्पन्न थयेल.

*क्षत्रियात् शुद्रायां जातः, उच्यत्युग्रः, 'खुरक्षुर"-(उणा-३९६) इति निपात्यते ॥

**उग्रचारिणी** स्त्री-२०५(शे.५७)-पार्वती शंकरनी स्त्री

द्र० अद्रिजाशब्दः ।

**उग्रत्व**-न.-३१८ उग्रपणुं, क्रूरपणुं.

चण्डता ।

*उग्रस्य भावः इति उग्रत्वम् ।

**उग्रधन्वन्**-पुं-१७४ ईन्द्र.

द्र० अच्युताग्रजशब्दः ।

*उग्रं धनुरस्य उग्रधन्वा ।

**उग्रनासिक**-पुं-४५२-ऊंचा नाकवाळो.

☐उन्नस ।

*उन्नता उद्‌गता वानासिकाऽस्य उन्नसः "उपसर्गात्" (७।३।१६२) इति नसः समासान्तः ।

**उचित**-न.-७४३-योग्य व्याजबी, न्याययुक्त.

द्र०-अभिनीतशब्दः ।

* उच्यते स्म उचितम् ।

**उच्च**-न.-ऊंचु

☐तुङ्ग उन्नत उद्धुर, प्रांशु, उच्छ्रित, उदग्र ।

*उदञ्चत्युच्चम् "न्युद्‌भ्यामञ्चेः" (उणा-१००३) इति कप्रत्यये साधुः, उच्चीयते वा "क्वचित्"-(५।१।१७१) इति डः ।

**उच्चण्ड**-न. १४७८ अवलंबनवाळु, शीघ्र.

☐अवलम्बित, 'अविलम्बित' ।

उच्चण्डतेऽवलम्बमानं इति उच्चण्डम् ।

**उच्चताल** न.-२८११ मद्यपानमां थतु नृत्य.

*पानगोष्ठ्यां आपाने नृत्तं, उच्चस्तालोऽत्रेत्युच्चतालम् ।

**उच्चन्द्र** पुं-१४५-रात्रिनो छेल्लो भाग.

☐अपररात्र ।

*उत्क्रान्तश्चन्द्रोऽस्मिन् उच्चन्द्रः ।

**उच्चय**-पुं-६७३-नीचेना वस्त्रनी गांठ.

☐नीवी ।

* परिधानस्य ग्रन्थिराग्रन्थनं तद् ग्रन्थिः,उच्चीयते बध्यतेऽनेनोच्चयः ।

**उच्चल**-न-१३६९-मन, चित्त.

द्र० अनिन्द्रियशब्दः ।

*उच्चलत्युच्चलम् अनिन्द्रियमपि ।

**उच्चार**-पुं-६३४-विष्टा, मळ.

द्र० अवस्करशब्दः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*उच्चार्यते प्रेर्यते इति उच्चारः ।

**उच्चावच**-न.-१४४९-અનેક પ્રકાર, બહુવિધ.

नैकभेद, (नानाप्रकार) ।

उदक् च अवाक् च उचितं चाऽवचितं च वा, उन्नतं चाऽवनतं च वा उच्चावचम्, मयूरव्यंसकादित्वात् साधुः ।

**उच्चिलिङ्ग**-पुं-६०८(शे.१२७)नितम्બ (કુલા)માં રહેલા ગોળાકાર બે ખાડા.

☐कुकुन्दर, कुकुन्दुर, [कटिकुप, रतावुक शे. १२७] ।

**उच्चूल**-पुं-७५०-ધજા ઉપરનો અગ્રભાગ.

*ध्वजस्योर्ध्वस्थितः कूर्चकः, उद्गता चूलाऽग्रभागोऽस्येत्युच्चूलः ।

**उच्चैःश्रवस्**-पुं-७६१-ઇન્દ્રનો ઘોડો.

☐[वृषणश्वः शे. ३४] ।

*इन्द्रस्य हयः, उच्चैः श्रवसी अस्य उच्चैःश्रवाः शेषश्चात्र-"वृषणश्वो हरेर्हये" ।

**उच्चैर्घुष्ट**-न.-२६९-ઊંચે સ્વરે બોલાવવું.

☐घोषणा ।

*उच्चैस्तरं यथा भवति घोषणं घुष्टं "घुषेरविशब्दे" (४।४।६८) इति नेट् ।

**उच्चैस्**-नं-१५४१-ઊંચું, મોટું.

*उदञ्चति इति उच्चैः, "न्युदभ्याम्"—(उणा-१००३) इति कैसि साधुः, **यथा** "उच्चैरुच्चरतु चिरम्" ।

**उच्छर**-पुं-१५३-(शे.२४)-વૈશાખ મહિનો.

☐वैशाख, राध, माधव ।

**उच्छादान**-न.-६३५-(शि. ५०) ચોળવું, માલીશ કરવું.

☐उद्वर्तन, उत्सादन ।

**उच्छृङ्खल**-न.-१४६६-અંકુશ રહિત.

द्र० अनर्गलशब्दः ।

उत्क्रान्तं शृङ्खलाद् इति उच्छृङ्खलम् ।

**'उच्छ्रय'**-पुं-१४३१-ઊંચાઈ.

द्र० आरोहशब्दः ।

**उच्छ्राय**-पुं-१४३२-ઊંચાઈ.

द्र० आरोहशब्दः ।

*उच्छ्रयणं उच्छ्रयः, घञि उच्छ्रायः ।

**उच्छिष्टभोजन**-पुं-८५७-દેવને ધરાયેલું નૈવેદ્ય, બલિ ખાનાર.

☐देवनैवेद्यबलिभोजन ।

*उच्छिष्टं भोजनमस्य उच्छिष्टभोजनः ।

**उच्छ्रित**-न.-१४२९-ઊંચુ.

द्र० उच्चशब्द. ।

*ऊर्ध्वं श्रयते स्म उच्छ्रितम् ।

**उच्छीर्षक**-न.-६८३-ઓશીકું.

☐उपधान, उपबर्हः ।

*उपरि शीर्षमस्य उच्छीर्षकम् ।

**उच्छ्वसित**-न.-११२८-ખીલેલું પુષ્પ.

प्रबुद्ध, उज्जृम्भ, फुल्ल, व्याकोश, विकच, स्मित, उन्मिषित, विकसित, दलित, स्फुटित, स्फुट, प्रफुल्ल, उत्फुल्ल, संफुल्ल, विजृम्भित, स्मेर, विनिद्र, उन्निद्र, विमुद्र, हसित ।

*उच्छ्वसिति स्म उच्छ्वसितम् ।

**उच्छ्वास**-पुं-१३६८-અંદરનો શ્વાસ.

☐आहर, आन ।

*स श्वासोऽन्तर्मुखो मध्यवृत्तिः, उच्छ्वसित्यनेन उच्छ्वासः ।

**उज्जयनी**-स्त्री-९७६-ઉજ્જૈન નગર.

द्र० अवन्तीशब्दः ।

*उत्कर्षेण जयति उज्जयनी, रम्यादित्वाद् अनट् **अन्ये**-तु उज्जयनी नाम राक्षसी, देवता वा तस्य निवास उज्जयनीति चातुरर्थिकमणमुत्पाद्य तस्य लोपमिच्छन्ति ।

**उज्जयन्त**-पुं-१०३१-ગિરનાર.

☐रैवतक ।

*उज्जयतितीती उज्जयन्तः, 'तृजि-(उणा-२२१) इत्यन्तः ।

**उज्ज्वल**-न.-१४३५-સ્વભાવથી નિર્મલ.

द्र० अनाविलशब्दः ।

*उज्ज्वलति इति उज्ज्वलम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**उज्जृम्भ**–न.-१२२७–ખીલેલું પુષ્પ

द्र० उच्छ्वसितशब्दः ।

*उज्जृम्भते इति उज्जृम्भम् ,उद्गता जृम्भाऽस्येति वा ।

**उज्जित**–न'-१४७५–છોડી દીધેલું, ત્યાગ કરેલ.

☐त्यक्त, उत्सृष्ट, धूत, हीन, विधूत ।

*उज्झ्यते स्म उज्झितम् ।

**उञ्छ**–पुं'–न.–८६५–ધાન્યના દાણા ભેગા કરવાતે.

☐धान्यकणादान ।

*उञ्छनमुञ्छः पुंक्लीबलिङ्गः ।

**उञ्छशिल** न.–८६६-દાણા અને મંજરીનું ગ્રહણ કરવું.

☐ऋत ।

**उटज**-पु'–न.-९९४–ઝુંપડી પાંદડા વગેરેનું ઘર, મુનિનિવાસ.

☐पर्णशाला, (पर्णशाल) ।

*वट्यते वेष्ट्यते तृणपर्णादिभिरित्युटजः मुनिकुटीरः पुंक्लीबलिङ्गः, "उटजादयः" (उणा–१३४) इत्यजे निपात्यते ।

**उडु**–स्त्री–न.-१०७–તારા, નક્ષત્ર.

☐नक्षत्र, तारका, तारा, ज्योतिस्, भ, ग्रह, धिष्ण्य, ऋक्ष ।

*इयर्ति खमिति उडुः, स्त्रीक्लीबलिङ्गः, "उडुच भे" (उणा–७३८) इति उः अते रुडादेशश्च ।

**उडुप**-पु'–न.–८७१-મછવે', નાની હોડી.

☐प्लव, कोल, भेल, तरण्ड, ।

*"उडिः संघाते सौत्रः" उड्यते उडुपः, पुंक्लीबलिङ्गः, "उडेरुपक्" (उणा–३११) ।

**उडुपथ**–पु'-१६३–આકાશ.

द्र० अनन्तशब्दः ।

*उडूनां नक्षत्राणां पन्थाः इति उडुपथः यौगिकत्वात् नक्षत्रवर्त्म ।

**'उडुम्बर'**–पु'-११३२-ઉંબરાનું ઝાડ.

द्र० उदुम्बरशब्दः ।

**उड्डीन**–न.–१३१८–ઉડવાની ક્રિયા.

☐प्रडीन, सण्डीन, डयन, नभोगति ।

*उड्डयनं उड्डीनं "क्लीबे क्तः" (५।३।१२३) "सूयत्यादि"—(४।२।७०) इति क्तस्य नत्वम् ।

**उड्डीश**—पु'—१९५—શંકર, મહાદેવ.

द्र० अट्टहासिन्शब्दः ।

*उद्दिशत्यागमविशेष उड्डीशः, पृषोदरादित्वात् ।

**उत**—न.— १४८७—પરેવેલું.

☐प्रोत ।

*'वेंग् तन्तुसन्ताने' ऊयते स्म उतम्, "यजादिवचेःकिति" (४।१।७९) इतिय्वृत् ।

**उत**–न.–१४८७–ગુંથેલું સીવેલું,

☐स्यूत, ऊत, तन्तुसन्तत ।

*'वेंग् तन्तुसन्ताने' इत्यस्य य्वृति उतम् ।

**उत**–अ.-१५३६–वितर्क, વિકલ્પ જણાવનાર.

द्र० आहोशब्दः ।

* अव्यते उतः, "पुतपिते"-(उणा–२०४) इति निपात्यते-**यथा** एकमेव वरं पुंसामुत राज्यमुताश्रमः ।

**उतथ्यानुज**–पु'-११९–ગુરુ, બૃહસ્પતિ.

द्र० आङ्गिरसशब्दः ।

*उतथ्यस्यानुज उतथ्यानुजः ।

**उताहो**–अ.-१५३६–વિકલ્પ જણાવનાર અવ્યય.

द्र० आहोशब्दः ।

*उताजुहोत्युताहो यथाः–"उताहोस्विद् भवेद् राजानलः परपुरंजयः ।

**उत्क**–पु'–४३६–ઉત્સાહી, આતુર.

☐उत्सुक, उन्मनस् , उत्कण्ठित ।

*उद्गत मनोऽस्य उत्कः"उदुत्सोः॥७।१।१९२॥ इतिकः ।

**उत्कट**–पु'–४३६–**मत्त**, મદવાળો

☐मत्त, शौण्ड, क्षीब ।

*उद्रिक्तः उत्कटः "संप्रोन्नेः–" ॥७।१।१२५॥ इति कटः, उत्कान्तकटीच्छादनो वा ।

**(उत्कन्ठा)**–पु'–३१४-ઉત્સાહ ઉત્કંઠા

द्र० अरतिशब्दः ।

*उत्कण्ठ न मुत्कण्ठः ।

**उत्कण्ठा**-स्त्री-३१४-ઉત્સાહ ઉત્કંઠા

द्र अरतिशब्दः ।

*उत्कण्ठनमुत्कण्ठा, उत्कण्ठोऽपि ।

**उत्कण्ठित**–पु'–४३६-ઉત્સાહી, આતુર

द्र० उत्कशब्दः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*उत्कण्ठा संजाताऽस्योत्कण्ठितः ।

**उत्कर**-पुं-१४११-સમૂહ સમુદાય

द्र० आकर शब्दः ।
*उत्कीर्यते इति उत्करः ।

**उत्कर्ष**-पुं-१५०६-અતિશય ઘણું.
द्र० अतिमात्रशब्दः ।
*उत्कृष्यतेऽनेन इति उत्कर्षः ।

**उत्कलिका**-स्त्री-३१४-ઉત્સાહ ઉત્કંઠા
द्र० अरति शब्दः ।
*उत्कलनमुत्कलिक "कीकल्यलि-" (उणा-३८) इति इकः ।

**उत्कलिका**-स्त्री-१०७५-પાણીના મોજા, લહેરો.
□तरङ्ग, भङ्ग, वीचि, ऊर्मि, ।
*उत्कलते इति उत्कलिका "कीकलि"-(उणा-३८) इतीकः ।

**उत्कुण**-पुं-१२०९-માંકડ
□मत्कुण, कोलकुण, उद्दंश, किटिभ,
*उत्कुणति इति उत्कुणः ।

**उत्कोच**-पुं-७३७-દાન, ભેટ, લાંચ.
द्र० आमिषशब्दः ।
*उत्कुच्यते भाष्यत उत्कोचः उत्कोचयति गुर्वपि कार्यमल्पी करोति ।

**उत्क्रमः**-पुं-१५११-ઉલટો ક્રમ. ક્રમ વિનાનો
□व्युत्क्रम, अक्रम ।
*उत्क्रमणं इति उत्क्रमः ।

**उत्क्रोश**-पुं-१३३५-માછલાનો નાશ કરનાર કુરરપક્ષી.
□मत्स्यनाशन, कुरर ।
*उच्चैः क्रोशत्युत्क्रोशः ।

**उत्क्षिप्तिका**-स्त्री-६५६-કાનનું આભૂષણ
□कर्णान्दु (कर्णान्दू शि. ५४) ।
*ऊत्क्षिप्यते स्मोत्क्षिप्तिका ।

**उत्तंस**-पुं-६५४-માથા પર મુકુટાકારે નાંખેલી માળા.
द्र० आपीडशब्दः ।
*उत्तंस्यतेऽनेनोत्तंसः "ब्यावाभ्यां"-(उणा—५६५)इति सः पुंक्लीबलिङ्गः ।

**उत्तंस**-पुं-६५४-કાનનું આભૂષણ.
□अवतंस, कर्णपूर ।

**उत्तप्त**-न.-६२४-શુષ્ક માંસ.
□वल्लूर, 'वल्लुर' ।
*उत्तप्यते शोष्यते उत्तप्तम् ।

**उत्तम**-न.-१४३८-મુખ્ય પ્રધાન.
द्र० अग्रशब्दः ।
*अतिशयेन उद्गतमुत्तमम्, "प्रकृष्टेतमप्" (७।३।५)इति निपात्यते ।

**उत्तमर्ण**-पुं-८८२-લેણદાર, નાણું ધીરનાર.
□दायक ।
*ऋणे उत्तमः उत्तमर्णः ।

**उत्तमाङ्ग**-न.-५६६-મસ્તક.
□शिरस्, मूर्धन्, मौलि, मुण्ड, क, मस्तक, वराङ्ग, करणत्राण, शीर्ष, मस्तिक ।
*उत्तमं च तदङ्गं चोत्तमाङ्गम् ।

**उत्तर**-न.-२६३-ઉત્તર, જવાબ.
□प्रतिवचस् ।
उत्तरन्ति अस्मात् उत्तरम्, उदो वा तरप् ।

**(उत्तरकुरु)**-पुं-९४६-પાંચ ઉત્તરકુરુ.

**उत्तरङ्ग**-न.-१००६ દ્વારનું ઉપરનું કાષ્ઠ,ઓતરંગ.
*द्वारस्य ऊर्ध्वे उपरि [तिर्यग् निहितं दारु उत्तरमूर्ध्वं गच्छति उत्तरङ्गम्, "नाम्नो गमः" (५।१।१३१) इति खड् ।

**उत्तरच्छद**-पुं-६७६-ઓછાડ, ઉત્તરપટ.
□निचोल, प्रच्छदपट, निचुल, (निचुलक) ।
*उत्तरं छाद्यतेऽनेन इति उत्तरच्छदः ।

**उत्तरदिक्पति**-पुं-११०७ (शे. १७२)-વાયુ, પવન.
द्र० अनिलशब्दः ।

**उत्तरफल्गुनी**-स्त्री-११२-ઉત્તરફાલ્ગુની, નક્ષત્ર.
□अर्यमदेवा ।
*उत्तरेति विशेषणविशिष्टा, फल्गुनी उत्तरफल्गुनी, उत्तरफल्गुन्यावुत्तरफल्गुन्य इति ।

**उत्तरभद्रपदा**-स्त्री-११५-ઉત્તરભાદ્રપદ નક્ષત્ર.
□अहिर्बुध्नदेवता, प्रोष्ठपदा ।

**उत्तरा**-स्त्री-१६७-ઉત્તર દિશા.
□उदीची, [अपाचीतरा शे. ३१] ।
*अतिशयेनोत्कृष्टा उत्तरा, "द्वयोर्विभज्ये च तरप्"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(७।१।६) इति तप्, उत्तरतीतिवा ।

**उत्तरायण**–न.–१५८–આ અયનમાં સૂર્ય ઉત્તર-દિશામાં જાય છે.

□उदगयन ।

**उत्तराशाधिपति**–पुं–१९० (શે. ४०)–કુબેરદેવ.

द्र० इच्छावसुशब्दः ।

**उत्तराषाढा**–સ્ત્રી–११३ ઉત્તરાષાઢા નક્ષત્ર.

□वैश्वी ।

*अषाढा उत्तरा इति उत्तराषाढेत्यर्थः ।

**उत्तरासङ्ग**–पुं–६७२–ખેસ, ઉત્તરાસંગ.

□वैकक्ष, प्रावार, बृहतिका ।

*उत्तरे ऊर्ध्वाङ्गे आसज्यते इति उत्तरासङ्गः ।

**उत्तरीयक**–न.–६७१–શરીર ઉપર નાંખવાનું વસ્ત્ર.

□प्रच्छादन, प्रावरण, संव्यान ।

*उत्तरे ऊर्ध्वे भवमुत्तरीयं गहादित्वादीयः, के उत्तरीयकम् ।

**उत्तरेतरा**–સ્ત્રી–१६७ (શે. ३१)–દક્ષિણાદિશા.

□दक्षिणा, अपाची, (अवाची) ।

**'उत्तरेद्युस्'**–અ.–१५४२–આવતા દિવસે.

**उत्तान**–न–१०७१–છીછરું

*ऊर्ध्वं तन्यते उत्तानं ।

**उत्तानपादज**–पुं–१२२–ધ્રુવ.

□ध्रुव, (औत्तानपादि, औत्तानपाद,) [ज्योतीरथ, ग्रहाश्रय શે. १७] ।

*उत्तानपादान्नृपतेर्जात उत्तानपादजः, यौगिकत्वादौत्तानपादिः, औत्तानपाद इत्यादयः ।

**उत्तानशय**–पुं–३३८–બાલક, ધાવણું બાલક.

द्र० अर्भशब्दः ।

*उत्तानः शेते इति उत्तानशयः ।

**उत्तेजित** न–१२४८–મધ્યમ વેગવાળી ગતિ.

□रेचित ।

*उत्तेजनमत्तेजितम् ।

**उत्तेरित** न.–१२४९–ક્રોધથી ચારે પગે ઠેકીને જવું.

□उपकण्ठ, आस्कन्दित ।

*उत्तरणमिति उत्तेरितम् ।

**उत्पतितृ**–वि.–३८९–ઉડનાર, કૂદનાર.

□उत्पतिष्णु ।

*उत्पतति, ऊर्ध्वं गच्छतीत्येवंशील उत्पतिता ।

**उत्पतिष्णु**–वि.–३८९–ઉડનાર, કૂદનાર.

□उत्पतितृ ।

*उत्पतति ऊर्ध्वं गच्छतीत्येवंशील उत्पतिष्णु "उदः पचिपतिपदिमदेः" (५।२।२९) इतीष्णुः ।

**उत्पत्ति**–સ્ત્રી–१३६७–જન્મ, ઉત્પત્તિ.

□जन्मन्, जनुष्, जनन, जनि, उद्भव, [जन्म શિ. १२३] ।

*उत्पदनमुत्पत्तिः ।

**उत्पल** पुं-न.–११६३–કુમુદ, પોયણું.

□कुवलय, कुवेल, कुवल, कुव, ।

*उत्पिपत्युत्पलं पुंक्लीबलिङ्गः "मुरल"–।(उणा–४७४) इत्यले निपात्यते उत्पलतीति वा ।

**उत्पल**–पुं–१२००–મુલકંદમાંથી ઉત્પન્ન થનાર. (પ.વ.)

□मूलज ।

*मूलतः कन्दात् जायन्ते उत्पलाः ।

**उत्पश्य**–पुं–४५७–ઉંચા મુખવાળો.

□उन्मुख ।

*ऊर्ध्वं पश्यत्युत्पश्यः "घ्राध्मा"–(५।१।५८) इति शः ।

**उत्पाटित**–न.–१४८०–મૂળમાંથી ઉખેડી નાંખેલ.

द्र० आवर्हितशब्दः ।

*उत्पाट्यते स्म उत्पाटितम् ।

**उत्पात**–पुं–१२६–ઉપદ્રવ, અકસ્માત.

द्र० अजन्यशब्दः ।

*उत्पतत्यकस्मादायाति अशुभमस्मादुत्पातः, घञ् ।

**उत्पादक**–पुं–१२८६–અષ્ટાપદ, શરભ.

द्र० अष्टापदशब्दः ।

*उर्ध्वा पादा अस्य उत्पादकः ।

**उत्पादपूर्व**–न.–२४७–પ્રથમ પૂર્વ.

*सर्वद्रव्याणां पर्यायाणां चोत्पादप्रज्ञप्तिहेतुरुत्पादम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**उत्पादशयन**–१३३०–ટીટોડી.

□टिट्टिभ, कटुक्वाण, 'टिटिभ कटिट्टिभक' [टीटिभ–शि. ११९] ।

*उत्पादः शेते उत्पादशयनः ।

**उत्पिञ्जल**–પું–३६६–અતિવ્યાકુલ.

□समुत्पिञ्ज, पिञ्जल ।

*उत्पिञ्जयतीति उत्पिञ्जलः ।

**उत्फुल्ल**–ન.–११२८–ખીલેલું પુષ્પ.

द्र० उच्छ्वसितशब्दः ।

*उत्फुल्लति उत्फुल्लम् ।

**उत्स**–પું–१०९६–ઝરણું, ઝરો.

□निर्झर, झर सरि, स्रव, प्रस्रवण ।

*उनत्तिः इति उत्सः "ऋञ्जिरिषि"-(उणा-५६७) इति कित् सः, पुंस्ययम् । **वाचस्पतिस्तु** "सरिः स्त्री निर्झरो झरः उत्सस्त्वस्त्री" इति क्लीबेऽप्याह ।

**उत्सङ्ग**–પું–६०२–ખોળો.

द्र० अङ्कशब्दः ।

*उत्कर्षेण सजत्यत्रोत्सङ्गः ।

**उत्सर्जन**–ન.-३८६–દાન, ત્યાગ.

द्र० अंहति शब्दः ।

*उत्सृज्यते इति उत्सर्जनम् ।

**उत्सर्पिणी**–स्त्री–१२७–વધતો કાલ, १० કોડાકોડી સાગરોપમ.

*उत्सर्पो भावानामेव रोहत्प्रकर्षता, सोऽस्यामस्ति इति उत्सर्पिणी ।

**उत्सव**–પું-१५०७–ઓચ્છવ, ઉત્સવ.

□मह, क्षण, उद्धव, उद्धर्ष ।

*उत्सूयते सुखमुत्सवः ।

**उत्सादन**–ન.-६३५–ચોળવું, ઉદ્વર્તન.

□उद्वर्तन, [उच्छादन शि. ५०] ।

*उत्साद्यतेऽनेनोत्सादनम् । 'उच्छादनम्' इत्यन्ये ।

**उत्सारक**–પું–७२१–દરવાન.

□द्वारस्थ, क्षत्तृ, द्वारपालक, दौवारिक, प्रतीहार, वेत्रिन्, दण्डिन् (द्वारथ, द्वास्थित) [द्वाःस्थितिदर्शक शे. १४१ वेत्रधर शि. ६२] ।

**उत्साह**–२९९–ઉત્સાહ, વીરરસનો સ્થાયી ભાવ.

द्र० अध्यवसायशब्दः ।

*उत्सहनं इति उत्साहः स्थेयान् संरम्भः ।

**उत्साहशक्ति**–स्त्री–७३५–પરાક્રમ આદિ વડે ઉત્પન્ન કરેલ શક્તિ.

*उद्यम्य सहनमुत्साहशक्तिः ।

**उत्सुक**–પું–४३६–ઉત્સાહી, આતુર.

द्र० उत्कशब्दः ।

*उद्गतं मनोऽस्य उत्सुकः "उदुत्सोरुन्मनसि" –(७।१।१९२) इति कः ।

**उत्सूर**–પું–१४०–સાંજ, સાયંકાલ.

□दिवावसान, विकाल, सबलि, साय ।

*उत्क्रान्तः सूरोऽस्मिन्नुत्सूरः ।

**उत्सृष्ट**–ન.–१४७५–ત્યાગ કરેલ.

द्र० उज्झितशब्दः ।

*उत्सृज्यते स्म इति उत्सृष्टम् ।

**उत्सेध**–પું ન.–१४३१–ઊંચાઈ.

द्र० आरोहशब्दः ।

*उत्सेधनं इति उत्सेधः, पुंक्लीबलिङ्गः ।

**उदक्**–ન.–१६८–ઉત્તરદિશામાં ઉત્પન્ન થયેલ.

□उदीचीन ।

**उदक्**–ન–१५४२ (શે. २०७)–દિશા વાચક શબ્દ.

**उदक**–ન.–१०६९–પાણી.

द्र० अप्शब्दः ।

*उनत्ति इति उदकम् "धून्दि"-(उणा–२९) इति किद् अकः ।

**उदक्या**–स्त्री–५३५–રજસ્વલા સ્ત્રી.

द्र० अधिशब्दः ।

*उदके भवा उदक्या "नाम्न्युदकात्" (६।३।१२५) इति यः उदकमर्हतीति वा दण्डादित्वात् यः ।

**उदगद्रि**–પું–१०२७–હિમાલય.

द्र० अद्रिराजशब्दः ।

*उदङ् उत्तरोऽद्रिः इति उदगद्रिः ।

**उदगयन**–ન.-१५८–આ અયનમાં સૂર્ય ઉત્તર દિશામાં જાય છે.

उत्तरायणः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**उदग्भूम**-पुं-९५३ ઉત્કૃષ્ટ સારી ભૂમિવાળો દેશ.

□उदङ्मृत्तिक ।

*उदीची भूमिरत्र इति उदग्भूम, उदङ्मृत्तिकः।

**उदग्र**-न.-१४२९-ઊંચુ.

द्र० उच्चशब्दः ।

*उच्चैरग्रमस्य उदग्रम् ।

**उदग्रदत्**-पुं-४५७-બહાર નિકળેલા દાંતવાળો, ખોખરદન્તો.

□दन्तुर ।

*उदग्रा दन्ता अस्य उदग्रदन् "वा ग्रान्त"–(७।४।१५४) इति दन्तस्य दतृः ।

**उदग्रदत्**-पुं-१२२३-લાંબા દાંત વાળો હાથી.

□ईषादन्त ।

*उदग्रौ दीर्घौ दन्तावस्य उदग्रदन् "वाग्रान्त"–(७।३।१५४) इति दन्तस्य दतृः ।

**उदङ्मृत्तिक**-पुं-९५३-ઉત્કૃષ્ટ સારી ભૂમિવાળો દેશ.

द्र० उदग्भूमशब्दः ।

**उदञ्चन**-न.-१०२६-ઢાંકણુ.

□पिधान ।

*उदयतेऽनेन इति उदञ्चनम् ।

**उदक्षित**-न.-१४८२-ઊંચે ફેંકેલું.

□ऊर्ध्वक्षिप्त, [उदस्त शि. १३३] ।

**उदधि**-पुं-१०७३-સમુદ્ર

द्र० अकूपारशब्दः ।

*उदकं धीयतेऽस्मिन् उदधिः "व्याप्यादाधारे" (५।३।८८) इति किः, "उदकस्योदः पेषंधि"–(३।२।१०४) इत्युदादेशः ।

**उदधिकुमार**-पुं-९०-૮ મા ભવનપતિ દેવ.

**उदन्त**-पुं-२६०-વાર્તા, યથાસ્થિત ખબર.

□वार्ता, प्रवृत्ति, वृत्तान्त ।

*उद्यते उदन्तः "सीमन्तहेमन्त"–(उणा-२२२) इत्यादि शब्दाद् निपात्यते ।

**उदन्या**-स्त्री-३९४-પાણીની તરસ, પિપાસા.

द्र० अपलासिकाशब्दः ।

*उदकेच्छा उदन्या क्यनि "क्षुत्तृड्गर्धेऽशना'–(४।३।११३) इत्युदकस्योदन् ।

**उदन्वत्**-पुं-१०७३-સમુદ્ર.

द्र० अकूपारशब्दः ।

*उदकानि सन्त्यस्य उदन्वान् "उदन्वानब्धौ च" (२।१।९७) इति मतौ निपात्यते ।

**उदपान**-पुं-न.-१०९१-કૂવો.

□कूप, अन्धु, प्रहि ।

*उदकं पीयतेऽस्मिन् उदपानः पुंक्लीबलिङ्गः, "नान्युत्तरपदस्य च" (३।२।१०७) इत्युदादेशः ।

**उदय**-पुं-५४ આવતી ચોવીશીના ७ મા તીર્થંકર.

*उदेति धर्मोऽस्मात् इति उदयः ।

**उदय**-पुं-१०२७-ઉદયાચલ પર્વત.

□पूर्वाद्रि ।

*उदयत्यत्रोदयः ।

**उदय**-पुं-१४३१-ઊંચાઈ.

द्र० आरोहशब्दः ।

□उदयति इति उदयः ।

**उदर**-न. ६०४-પેટ.

*तुन्द, तुन्दि, गर्भ, कुक्षि, पिचण्ड, जठर [मलक, रोमलताधार शे० १२१] ।

*अनत्यन्नमत्र " मृचुन्दि" (उणा ३९९) इति कित्यरे उदरं,क्लीबलिङ्गः,**वैजयन्तीकारस्तु**–"जठरं चोदरं न ना" इत्याह, त्रिलिङ्गोऽयमिति **बुद्धिसागरः**। उदियर्तीति वा ।

**उदरग्रन्थि**-स्त्री-४६९-પેટની ગાંઠ, બરોળ.

□गुल्म ।

*उदरे ग्रन्थिः इति उदरग्रन्थिः ।

**उदरत्राण** न.-७६८-પેટનું બખ્તર.

□नागोद ।

*उदरं त्रायतेऽनेनोदरत्राणम् ।

**उदरपिशाच**-पुं ४२८-બધું ખાઈ જનાર.

*सर्वान्नीन, सर्वान्नभक्षक ।

□उदरे पिशाच इव प्रसक्त उदरपिशाचः ।

**उदरम्भरि**-पुं-४२७-પેટભરો.

*स्वोदरपूरक, कुक्षिम्भरि, आत्मंभरि ।

□उदरं बिभर्ति इति उदरम्भरिः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**उदरिक**–પું–૪૫૦ (શિ.૩૨) મોટા પેટવાળો.

द्र० उदरिन्शब्दः

**उदरिणी**–સ્ત્રી–૫૩૮–સગર્ભા સ્ત્રી, ગર્ભિણી સ્ત્રી.

द्र०अन्तर्वत्नी शब्दः ।

*गर्भोऽस्त्यस्या इति उदरिणी ।

**उदरिन्**–પું–૪૫૦–મોટા પેટવાળો.

☐पिचिण्डिल, बृहत्कुक्षि, तुन्दिन, तुन्दिक, तुन्दिल, उदरिल, [तुन्दिभ, उदरिक शि. ३२] ।

* 'व्रीह्यर्थ तुन्दादेः''–(७।२।९)इति इन् निपात्यते ।

**उदरिल**–પું–૪૫૦–મોટા પેટવાળો.

द्र०उदरिन्शब्दः ।

*''व्रीह्यर्थतुन्दाऽऽदेः''–(७।२।९) इति इलः निपात्यते ।

**उदर्क**–પું–૧૬૨–ક્રિયા પછીનું ફળ, ભવિષ્યફળ.

*उदियर्ति इति उदर्कः ''निष्कतुरुष्कोदर्क''–(उणा –२६) इति कान्तो निपात्यते, अभिलाषात् सूयते इति वा, तद्भवमायतिभवं फलम् ।

**उदर्चिष्**–ન.–૧૧૦૦–અગ્નિ.

द्र०अग्निशब्दः ।

*ऊर्ध्वाः अर्चिषोऽस्य उदर्चिः ।

**उदवसित**–ન.–૯૯૦–ઘર.

द्र०अगारशब्दः ।

*उदवसिनोति स्मोदवसितम्, ऊर्ध्वं अवसीयते वा ।

**उदश्वित्**–ન.–૪૧૯–અર્ધું પાણીવાળું દહીં.

*अर्धमम्बु जलं यत्र अर्धाम्बु. उदकेन श्वयति उदश्वित् क्लीबलिङ्गः, ''उदकाच्छ्वेर्डित्''–(उणा-८८८) इति इत्, ''नाम्न्युत्तरपदस्य च' (३।२।१०७) इत्युदकस्योदः ।

**उदस्त**–ન.–૧૪૮૨(શિ. ૧૩૩)–ઊંચે ફેકેલું.

☐ऊर्ध्वक्षिप्त, उदञ्चित ।

*उदस्यते स्म इति उदस्तम् ।

**उदात्त**–પું–૩૬૭–ઉદાર, મહાત્મા.

☐महेच्छ, उद्भट, उदार, उदीर्ण, महाशय, महात्मन्, महामनस् ।

*उत्कर्षेणादीयते गम्यते इति उदात्तः ।

**उदान**–પું–૧૧૦૯–વાયુ, હૃદય અને માથા વચ્ચેનો પવન.

*रसादीनूर्ध्वं समन्ततो नयति इत्युदानः, ऊर्ध्वमनित्यनेन वा. हृदये शिरसि अनयोरन्तरे कण्ठे तालुनि भ्रूमध्ये च स्थानमस्येति, **यदवोचाम योगशास्त्रे**– ''रक्तोहृत्-कण्ठ-तालु-भ्रू-मध्ये मूर्धनि संस्थितः । उदानो वश्यतां नेयो गत्यागति विशेषतः'' इति ।

**उदार**–પું–૩૬૭–ઉદાર, મહાત્મા.

द्र०उदात्तशब्दः ।

*साधुभिः उदर्यते गम्यते इति उदारः ।

**उदार**–પું–૩૭૬–સરળ ચિત વાળો ઉદાર.

☐दक्षिण, सरल ।

*उदर्यते इति उदारः ।

**उदार**–પું–૩૮૫–દાતાર, ઉદાર.

☐दातृ ।

*उदर्यते इति उदारः ।

**उदारथि**–પું–૨૧૯(શે ૬૫)–વિષ્ણુ, નારાયણ.

द्र०अच्युतशब्दः ।

**उदावर्त**–પું–૪૬૯–મળ મુત્ર વગેરે રોકવાથી થતો રોગ, આફરો.

*गुदग्रह ।

☐ऊर्ध्वमावर्तते वायुरस्मिन् इति उदावर्तः ।

**उदासीन**–પું–૭૩૨–શત્રુ અને મિત્ર રાજાથી ભિન્ન રાજા

*शत्रुमित्रयोर्भूमिभ्यः परतर ऊर्ध्वमासीन इवोदासीनस्तटस्थः ।

**उदाहार**–પું.–૨૬૨ પ્રસ્તાવના.

☐उद्धृत्या ह्रियते इति उदाहारः ।

**उदित**–ન.–૨૪૧–(શે. ૮૨)–વાણી–વચન.

☐वचन, व्यवहार, भाषित, वचस्, [जल्पित, लपित, भणित, अभिधान, गदित शे. ८२] ।

**उदीची**–સ્ત્રી૧૩૭–ઉત્તર દિશા.

☐उत्तरा ।

*उत्तरामञ्चत्यर्कोऽस्याम् उदीची ।

**उदीचीन**–ન.–૧૬૮–ઉત્તર દિશામાં ઉત્પન્ન થયેલ.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

□उदच् ।

**उदीच्य**–पुं–९५२–शरावती नदीनी पश्चिम अने उत्तर दिशानो देश.

*शरावत्याः पश्चिमत उत्तरतश्च उदीच्यः **यदाह**– "प्रागुदञ्चौ विभजते हंसः क्षीरोदके यथा । विदुषां शब्दसिद्धै या सा वः पायाच्छरावती ।

**'उदीच्य'**–न.–११५८–सुगंधीवाळो.

द्र० जलशब्दः ।

**उदीर्ण**–पुं–३६७–उदार. महात्मा.

द्र०उदात्तशब्दः ।

□उदीर्यते स्म उदीर्णः ।

**उदुम्बर**–पुं–१००९–घरनो उंबरो.

□गृहावग्रहणी, देहली, उम्बर, उम्बुर ।

*उद्यते क्लिद्यते इति उदुम्बरं "तीवर धीवर"– (उणा–४४४) इति वरटि निपात्यते ।

**उदुम्बर**–न.–१०३९–तांबु.

□ताम्र,म्लेच्छमुख, शुल्व, रक्त, द्वयष्ट, 'द्विष्ट' म्लेच्छ, शावर, मर्कटास्य, कनीयस, ब्रह्मवर्धन, वरिष्ठ, [पवित्र, कांस्य, शे. १६० औदुम्बर शि. ९१].

*उनत्ति क्लिद्यते उदुम्बरं उद्गताम्बरं इति **नैरुक्ताः**, औदुम्बरमित्यन्ये ।

**उदुम्बर**–पुं–११३२–उंबरानु झाड.

□जन्तुफल, मशकिन् हेमदुग्धक, 'उडुम्बर, यज्ञाङ्ग' ।

*उनत्त्युदुम्बरः "तीवर"– (उणा–४४४) इति वरटि निपात्यते उल्लङ्घिताम्बर इति वा पृषोदरादित्वादुत्वम् ।

**उदुखल**–न.–१०१६–खांडणी. खांडणीयो.

□उलूखल ।

*ऊर्ध्वं खं बिलं वाऽस्य उदूखलम्, कण्डनभाण्डं पृषोदरादित्वात् साधुः ।

**उद्गत**–न.–१४९५–वमन करेल अन्न वगेरे.

□उद्वान्त, 'उद्वात' ।

*उद्गच्छति स्म उद्गतम् ।

**उद्गमनीय**–न.–६६८–धोयेलुं वस्त्र.

*उद्गम्यतेऽभिलष्यते, उद्गमनीयम् युगमविवक्षितं तेनैकमपि **यद्भागुरिः**– "धौतैरुद्गमनीयं तु धौतवस्त्रमुदाहृतं" **लक्ष्यं** च–"गृहीतवत्युद्गमनीयवस्त्रे" इति ।

**उद्गाढ**–न.–१५०५–अतिशय, घणुं.

द्र०अतिमात्रशब्दः ।

*उद्गाहते स्म उद्गाढम् ।

**उद्गातृ**–पुं–८१९–सामवेदने जाणनार, सामवेदनो गान करनार ऋत्विज.

□सामविद् ।

*सामान्युद्गायति उद्गाता "हृपूग्"–(उणा-८६३) इति तृः प्रत्ययः ।

**उद्घ**–पुं–६२३(शे.१२८)–मांस.

द्र०आमिषशब्दः ।

**उद्घन**–पुं–९१९–नीचेनुं लाकडुं (जे लाकडा उपर लाकडुं मूकी घडाय ते).

*उद्धन्यते काष्ठमस्मिन् उद्घनः "निघोद्घ-॥५।३।३६॥ इत्यलि निपात्यते. काष्ठमुपलक्षणं लोहादिरपि **यल्लक्ष्यं** ' लोहोद्घन घनस्कन्धाः" इति ।

**उद्घाटक** न.–१०९३–रेंट.

□घटीयन्त्र, [उद्घाटन, उद्घातन. शि ९८] ।

*उद्घातयति प्रकाशयत्यम्भ उद्घाटकम् ।

**उद्घाटन**–न–१०९३(शि.९८) रेंट.

द्र०उद्घाटकशब्दः ।

द्र०उद्घातयति प्रकाशयत्यम्भ इत्युद्घाटनम, ऊर्ध्वं हन्यतेऽनेनेत्युद्घाटनमिति **कौटिल्यः** ।

**उद्घात**-पुं-१५१० (शि.१३६) ज्ञानपूर्वक आरंभ शरुआत.

द्र०अभ्यादानशब्दः ।

**उद्घातन**–न.–१०९३ (शि.९८)-रेंट.

द्र०उद्घातकशब्दः ।

**उद्दंश**–पुं–१२०९–मांकड.

□मत्कुण, कोलकुण, किटिभ, उत्कुण ।

*उद्दशति इति उद्दंशः ।

**उद्दान**–न.–४३९–बंधन.

□बन्धन ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*'दोंच छेदने' 'देङ् पालने'वा, उद्दीयते उद्-नम् ।

**उद्दाम**–न–१४६६–અંકુશ રહિત.

द्र०अनर्गलशब्दः ।

*उत्क्रान्तं दामाया उद्दामम्, अत्र दामाशब्दः स्त्रियां डाबन्तः ।

**उद्दाम**–पुं–१८८–(શે. ૩૯)–વરુણ દેવતા.

द्र०अर्णवमन्दिरशब्दः ।

**उद्दाल**–पुं–११७७–કોદરા.

□कोद्रव, कोरदूषक, 'काद्रव' ।

*उद्भ्यते इति उद्दालः ।

**उद्द्योत**–पुं–१०१–પ્રકાશ

द्र०आतपशब्दः ।

*उद्द्योतते इति उद्द्योतः ।

**उद्द्राव**–पुं–८०३–ભાગી જવું.

द्र०अपक्रमशब्दः ।

*"युपूद्रो–" ॥५।३।५४॥ इति घञि उद्द्रावः ।

**उद्ध**–पुं–१४४१–આ શબ્દ ઉત્તરપદમાં જોડવાથી પ્રશંસા વાચક શબ્દ બને છે.

**उद्धत**–पुं–४३१–અવિનીત

□अविनीत ।

*उत्कठं हन्ति गच्छति हिनस्ति वा उद्धतः ।

**उद्धर**–पुं–१८८–(શે.૩૮)–રાક્ષસ.

द्र० असृक्पशब्दः ।

**उद्धर्ष**–पुं–१५०८–ઉત્સવ, ઓચ્છવ.

द्र० उत्सवशब्दः ।

□उच्चैःहर्षयति इति उद्धर्षः ।

**उद्धव**–पुं–१५०८–ઉત્સવ, ઓચ્છવ.

द्र० उत्सवशब्दः ।

*उद्धुनाति दुःखमुद्धवः ।

**उद्धान**–न०–१०१८–ચૂલો.

द्र० अधिश्रयणीशब्दः ।

□उद्धीयतेऽनेन उद्धानम् ।

**उद्धार**–पुं–८८१–કરજ, દેવું.

□ऋण, पर्युदञ्चन ।

*उद्ध्रियतेऽसौ उद्धार्यते वा उद्धारः ।

**उद्धुर**–नं–१४२८–ઊંચું.

द्र० उच्चशब्दः ।

*उद्गता धूरस्य उद्धुरम्

**उद्धुषण**–न०–३०६–રોમાંચ.

□पुलक, रोमाञ्च, कण्टक, रोमविकार, रोमहर्षण, रोमोद्गम, उल्लकसन ।

*उद्धुषत्युच्छ्वसित्यनेनाङ्गमुद्धुषणम् ।

**उद्धूष**–पुं–४०१–(શે.૯૯)–ચોખાની ધાણી.

□लाज, अक्षत,[भरुज, खटिका, परिवारक शे.९९] ।

**उद्धृत**–न०–१४८०–મૂળમાંથી ઉખેડી નાંખેલ.

द्र० आवर्हितशब्दः ।

उद्ध्रियते स्म उद्धृतम् ।

**'उद्ध्मान'**–न०–१०१८–ચૂલો.

द्र०अधिश्रयणीशब्दः ।

**उद्ध्यय**–पुं–१०९१–મોટીનદી, નદ, દ્રહ.

□नद, वह, भिद्य, सरस्वत् ।

*उज्झत्युदकमुद्ध्य, "कुप्यभिद्योद्ध्य"-॥५।१।३९॥ इति क्यपि साधुः ।

**उद्भट**–पुं–३६७–ઉદાર મહાત્મા.

द्र० उदात्तशब्दः ।

*उद्भटति उद्धरति इति उद्भटः ।

**उद्भव**–पुं–१३६७–જન્મ, ઉત્પત્તિ.

द्र० उत्पत्तिशब्दः ।

*उद्भवनं इति उद्भवः ।

**उद्भिज्ज**–न०–१३५७–ખંજન,તીડ વગેરે જમીન ફાટીને ઉત્પન્ન થનારા જંતુ.

उद्भिद्, उद्भिद ।

उद्भेदनमुद्भित् ततो जायते, इति उद्भिज्जम् ।

**उद्भिद्**–न०–१३५७–ખંજન,તીડ વગેરે જમીન ફાટીને ઉત્પન્ન થનાર જંતુ.

*उद्भिज्ज, उद्भिद् ।

*उद्भिनत्ति भुवं इति उद्भिद् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**उद्‌भिद्**–न०१३५७–ખંજન, તીડ વગેરે જમીન ફાડીને ઉત્પન્ન થનાર જંતુ.

☐उद्भिज्ज, उद्‌भिद् ।

*उद्‌भिनत्ति इति उद्‌भिदम् ।

**उद्यम**–पुं–३००–ઉત્સાહ, વીરરસનો સ્થાયીભાવ.

द्र० अध्यवसायशब्दः ।

*उद्यमनं इति उद्यमः ।

**उद्यान**–पुं न.–१११२–બગીચો.

*उद्यान्त्यस्मिन् इति उद्यानं, राज्ञां लोकैः सह साधारणं वनं पुंक्लीबलिङ्गोऽयम् ।

**उद्योग**–पुं.–३०० ઉત્સાહ, વીર રસનો સ્થાયીભાવ.

द्र० अध्यवसाय शब्दः ।

*उद्योजनं इति उद्योगः ।

**उद्र**–पुं–१३५०–પાણીનો બિલાડો.

☐जलमार्जार, पानीयनकुल, वसिन् ।

*उनत्ति उद्रः "ऋज्यजि–" (उणा–३८८) इति किद् रः ।

**(उद्रङ्ग)**–पुं–९७२–કર્બટથી ઊતરતું અને પત્તનથી શ્રેષ્ઠ નગર.

☐(द्रङ्ग, निवेश) ।

**उद्वत्सर**–पुं–१५९–વરસ

द्र० अनुवत्सरशब्दः ।

**उद्वर्तन**–न०–६३५–ચોળવું, ઉદ્વર્તન.

☐उत्सादन [उच्छादन शि. ५०] ।

*उद्वर्त्यतेऽनेनोद्वर्तनम् ।

**उद्वह**-पुं–५४२–પુત્ર.

द्र० अङ्गजशब्दः ।

*उद्वहति इति उद्वहः ।

**(उद्वहा)**–સ્ત્રી–५४२-પુત્રી.

द्र० अङ्गजाशब्दः ।

**उद्वान्त**-पुं-१२२१-મદ વિનાનો હાથી.

☐निर्मद ।

*उद्वमति स्म उद्वान्तः ।

**उद्वान्त**-न०–१४९५–વમન કરેલ અન્ન વગેરે.

☐उद्गत, 'उद्गात' ।

*उद्वमति स्म उद्वान्तम् ।

**उद्वासन**-न०–३७१–હિંસા.

द्र० अपासनशब्दः ।

उद्वसतः प्रयुक्तिः इति उद्वासनम् ।

**उद्वाह**–पुं-५१८–વિવાહ

☐विवाह, पाणिपीडन, पाणिग्रहण, उपयाम, उपयम, दारकर्मन्, परिणय,[जाम्बूमालिका शे. १०८] ।

*उद्वहनं इति उद्वाहः ।

**उद्वेग**–न०–११५४–સોપારી

*पूगस्य फलमुद्‌गतो वेगोऽस्य उद्वेगम्, स्वंसकत्वात्

**उन्दर**–पुं–१३००–(शि०११५)--ઉંદર.

द्र० आखुशब्दः ।

**उन्दुर**–पुं-१३००–ઉંદર.

द्र० आखुशब्दः ।

*उनत्ति उन्दुरः "वाश्यसि–" (उणा–४२३) इति उरः प्रत्ययः ।

**उन्दुरु**–पुं–१३००–ઉંદર.

द्र० आखुशब्दः ।

*"शिगुगेरुः"–(उणा–८११) इति निपातना-दुन्दुरुः, उन्दरोऽपि ।

**उन्न**–पुं–१४९२–ભીનું, પલરેલું.

द्र० आर्द्रशब्दः ।

*उन्नति स्म उन्नः "ऋह्रीघ्रा"–॥४।२।७६॥ इति क्तस्य वा नत्वम् ।

**उन्नत**–न.-१४२८–ઊંચુ.

द्र० उच्चशब्दः ।

*उन्नमति स्म इति उन्नतम् ।

**उन्नतानत**–न०–१४६८–સ્વાભાવિક ઊંચુ, પરંતુ કંઈક નમેલું.

☐बन्धुर, 'वन्धूर'

*उन्नतं च तदुपाधिवशादीषन्नतं उन्नतानतम्, यथा कण्ठस्य तस्याः स्तनबन्धुरस्य इति ।

**उन्नतीश** पुं–२३१-(शे. ८०)-ગરુડ પક્ષી.

द्र० अरुणावरजशब्दः ।

**उन्नयन**-न०–३२२–વિચારણા.

द्र० अध्याहारशब्दः ।

*उन्नीयते इति उन्नयनम् ।

**उन्नस**-પું-૪૫૨-ઊંચા નાકવાળો.

☐उन्ननासिक ।

*उन्नता उद्गता वा नासिकाऽस्य उन्नसः "उपसर्गात्" ॥७।३।१६२॥ इति नसः समासान्तः ।

**उन्नाह**-ન૦-૪૧૬-કાંજી, રાબ.

द्र० अवन्तिसोमशब्दः ।

*उन्नह्यत्यनेन इति उन्नाहम् ।

**उन्निद्र**-ન૦-૧૧૨૯-ખીલેલું પુષ્પ.

द्र०उच्छ्वसितशब्दः ।

*उत्क्रान्तं निद्रामुन्निद्रम् ।

**उन्मत्त**-પું-૧૧૫૧-ધતુરો.

द्र० कनकाह्वयशब्दः ।

**उन्मत्तवेष**-પું-૨૦૦-(શે ૪૫) શંકર, મહાદેવ.

द्र० अट्टहासिन् शब्दः ।

**उन्मदिष्णु**-પું-૪૨૯-ઉન્મત્ત.

☐उन्मादसंयुत ।

*उन्मादशील उन्मदिष्णुः "उदःपचि"-(५।२।२९) इतीष्णुः ।

**उन्मनस्**-પું-૪૩૬-ઉત્સાહી, આતુર.

द्र० उत्कशब्दः ।

* उद्गतं मनोऽस्य उन्मनाः ।

**उन्मन्थ**-પું-૩૭૧-હિંસા.

द्र० अपासनशब्दः ।

*उन्मथ्नाते घंञि उन्मन्थः ।

**उन्माथ**-પું-૯૩૨-પશુપક્ષી વગેરેને પકડવાનો ફાંસો.

कुटयन्त्र, [पाशयंत्र शि. ८२] ।

*ऊर्ध्वं पातान्मथ्यतेऽनेन इति उन्माथः ।

**उन्माद**-પું-૩૨૦-ઘેલછા, ચિત્તભ્રમ.

☐चित्तविप्लव ।

*उन्मदनं इति उन्मादः ।

**उन्मादसंयुत**-પું-૪૨૯-ઉન્મત્ત.

☐उन्मदिष्णु ।

**उन्मिषित**-ન. ૧૧૨૮-ખીલેલું પુષ્પ.

द्र० उच्छ्वसितशब्दः ।

* उन्मिषति स्म इति उन्मिषितम् ।

**उन्मीलन**-ન-૫૭૮-આંખ ખોલવી તે.

☐उन्मेष ।

*उन्मील्यते इति उन्मीलनम् ।

**उन्मुख**-પું-૪૫૭-ઊંચા મુખવાળો.

☐उत्पश्य ।

*ऊर्ध्वं मुखमस्य इति उन्मुखः ।

**उन्मूलित**-ન.-૧૪૮૦-મૂળમાંથી ઉખેડી નાંખેલ.

द्र० आवर्हितशब्दः ।

*उन्मूल्यते स्म उन्मूलितम् ।

**उन्मेष**-પું-૫૭૮-આંખ ખોલવી તે.

☐उन्मीलन ।

*उन्मेषणमुन्मेषः ।

**उपकण्ठ**-ન.-૧૨૪૯-ક્રોધથી ચારે પગે ટેકીને ચાલવું તે.

☐उत्तेरित, आस्कन्दित ।

*उपनतः कण्ठोऽस्मिन् इति उपकण्ठम् ।

**उपकण्ठ**-ન.-૧૪૫૦-નજીક, સમીપ.

द्र० अन्तिकशब्दः ।

*समीपः कण्ठोऽस्य इति उपकण्ठम् ।

**उपकरण**-ન.-૭૧૬-નોકર, ચાકર વગેરે પરિવાર.

☐परिच्छिद, परिबर्ह, परिबर्हण, तंत्र, परिस्पन्द, परिकर, परिवार, परिग्रह [परिजन, परिबर्हण-शि. ६१]।

*उपक्रियतेऽनेनोपकरणम्. परिजनोऽपि ।

**उपकार्या**-સ્ત્રી-૯૯૩ (शि. ८६)-રાજમહેલ, તંબુ ડેરા વગેરે.

☐उपकारिका, उपकार्या।

*उपक्रियते इति उपकार्या, पटमण्डपादि राजसदनम् ।

**उपकारिका**-સ્ત્રી-૯૯૩-રાજમહેલ, તંબુ, ડેરા, વગેરે.

☐उपकार्या [उपकर्या शि. ८६] ।

*उपकरोति इति उपकारिका ।

**उपकार्या**-સ્ત્રી-૯૯૩-રાજમહેલ, તંબુ, ડેરા વગેરે.

☐उपकारिका (उपकर्या शि. ८६) ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*उपक्रियते इति उपकार्या, उपकर्याऽपि, पटमण्डपादि राजसदनम् ।

**उपकुप**–न.–१०९२–હવાડો, કુવાની પાસે ઢોરને પાણી પીવાનું સ્થાન.

☐आहाव, निपान ।

*कूपस्य समीपे शिलादिबद्धं पशुपानार्थं कूपोद्धृताम्बुस्थानम् ।

**उपकुल्या**-स्त्री–४२१–પીપર.

☐वैदेही, पिप्पली, पिप्पलि, कृष्णा, मागधी, कणा, [ऊषणा, शौण्डी, चपला, तीक्ष्णतण्डुला, उषणा, तण्डुलफला कोला, कृष्णतण्डुला शे० १०२–१०३] ।

*उपकोलति संस्त्यायति इति उपकुल्या "कुलेईच वा"–(उणा–३६२) इति किद् यः ।

**उपक्रम**–पुं–१५१०–જ્ઞાનપૂર્વક આરંભ, શરૂઆત.

द्र० अभ्यादानशब्दः ।

*उपक्रमणं इति उपक्रमः ।

**उपक्रोश**-पुं–२७१–નિંદા.

द्र० अपवादशब्दः ।

*उपक्रोशनं इति उपक्रोशः ।

**उपगत**–पुं–३७४–મરેલો, મૃત્યુ પામેલ

द्र० आलेख्यशेषशब्द ।

*उपगच्छति स्म उपगतः ।

**उपगत**–न.–१४८९–સ્વીકારેલું.

द्र० अङ्गीकृतशब्दः ।

**उपगूहन**–न–१५०७–આલિંગન.

द्र० अङ्कपालीशब्दः ।

*उपगुह्यते इति उपगूहनम् ।

**उपग्रह**-पुं–८०६–કેદી, બંદીવાન.

☐बन्दी, ग्रह–(ग्रहक) प्रग्रह ।

*उपशब्दात् परो ग्रहः उपग्रहः ।

**उपग्राह्य**–पुं-७३७–દાન, ભેટ, લાંચ.

द्र० आमिषशब्दः ।

*उपगृह्यते इति उपग्राह्यः ।

**उपघ्न**–पुं–१००१–પાસેનો આશ્રય, આધાર.

☐अन्तिकाश्रय ।

*उपहन्यते समीप इति ज्ञायते उपघ्नः, "निघ्नोद्घ"–(५।३।३६) इत्यलि निपात्यते ।

**उपचर्या**–स्त्री–४७३-રોગ દૂર કરવાની ક્રિયા.

☐चिकित्सा, रुक्प्रतिक्रिया, उपचार ।

* उपचरणमुपचर्या "समज"–(५।३।९९) इति क्यप् ।

**उपचार**-पुं–४७३–રોગ દૂર કરવાની ક્રિયા.

☐चिकित्सा, रुक्प्रतिक्रिया, उपचर्या ।

*उपचरणम् घञि उपचारः ।

**उपचार**–पुं–४९७–સેવા, ભક્તિ, પૂજા.

द्र० आराधनाशब्दः ।

*उपचरणमुपचारः ।

**उपचार**–पुं–७३७–દાન, ભેટ, લાંચ.

द्र० आमिषशब्दः ।

*उपचर्यतेऽनेनोपचारः ।

**उपचारपरितता**–स्त्री-६५-પ્રભુવાણીનો બીજો ગુણ.

*उपचारपरीतता–अग्राम्यत्वम् ।

**उपचित**–पुं–४४१–બલવાન.

द्र० अंसलशब्दः ।

*उपचीयते स्म उपचितः ।

**उपजाप**–पुं–७३६–ભેદ, સંગઠન તોડવું તે.

☐भेद ।

* उपांशु जपनमुपजापः ।

**उपजिह्वा**–स्त्री–१२०७–ઉધઈ.

☐उपदेहिका, बम्री, उपदीका ।

*उपलेढि उपजिह्वा, उप समीपे जहातीति वा "प्रह्वाह्वा"–(उणा–५१४) इति वे निपात्यते ।

**उपज्ञा**–स्त्री–१३७३–પ્રથમજ્ઞાન, ઉપદેશ વિનાનું જ્ઞાન

*उपज्ञायते उपज्ञा, इदं प्रथमतया ज्ञानं, यथा-चन्द्रस्योपज्ञा चन्द्रोपज्ञसंज्ञकं व्याकरणम् ।

**उपताप**–पुं–४६३-રોગ.

द्र० अपाटवशब्दः ।

*उपतापयति इति उपतापः ।

**उपत्यका**–स्त्री-१०३५–તળેટી.

पर्वतस्याऽऽसन्ना अधोभूमिः उपत्यका ।

**उपदंश**–पुं-९०७–મદિરા પીવી, પ્રીતિ [ઉત્પન્ન

करे तेवो भक्ष्य पदार्थ.

द्र० अवदंशशब्दः ।

*उपदश्यते पानरुचिजननार्थमुपदंशः ।

**उपदा**-स्त्री ७३७-दान, भेट, लांच.

द्र० आमिषशब्दः ।

*उपदीयते इति उपदा ।

**उपदीका** स्त्री-१२०८-उधेई.

द्र० उपजिह्वाशब्दः ।

*उप समीपे ददाति उपदीका "सृणीक"-(उणा-५०) इतीके निपात्यते ।

**उपदेहिका**-स्त्री-१२०७-उधेई.

द्र० उपजिह्वाशब्दः ।

*उपदिह्यते मृदनया इति उपदेहिका ।

**उपद्रव**-पुं-१२५-अकस्मात्, उपद्रव.

द्र० अजन्यशब्दः ।

*उपद्रूयते प्रजाऽत्र उपद्रवः ।

**उपधा**-स्त्री-७४०-धर्म, अर्थ, काम अने भय वगेरेथी अमात्यादिकनी परीक्षा करवी ते.

*भयधर्मार्थकामोपन्यासेनामात्यानामाशयान्वेषणम्, उपधीयते समीपे ढौक्यते परीक्षार्थमुपधा, **यत्कौटिल्यः**-"उपधाभिः शौचाशौचपरिज्ञानममात्यानाम्" इति ।

**उपधा**-स्त्री-३७८ (शि. २६) कपट, माया.

द्र० उपधिशब्दः ।

**उपधान**-न.-६८३-ओशीकुं.

☐उच्छीर्षक, उपबर्ह ।

*उपधीयते शीरोऽस्मिन्नुपधानम् ।

**उपधि**-स्त्री-३७८-कपट, माया.

☐कपट, कैतव, दम्भ, कूट, छद्मन्, माया, छल, व्यपदेश, मिष, लक्ष, निभ, व्याज. [उपधा-उपाधि शि. २६]

*उपधियते स्फटिकस्येव सिन्दूरमुपधिः उपधाऽपि।

**उपधृति**-पुं-९९-किरण.

द्र० अर्चिष्शब्दः ।

*उपध्रियते अवतिष्ठते रश्मोऽस्मिन्निति उपधृतिः "इमुषि"-(उणा-६५१) इत्यादिना बहुवचनात् तिः कित् ।

**उपनत**-पुं-१४९४-नमेल, नम्रनी पासे.

☐उपसन्न, उपस्थित ।

*उपनमति स्म उपनतः ।

**उपनय**-पुं-८१४-जनोइ संस्कार.

द्र० आनयशब्दः

*उपनयनमुपनयः ।

**उपनाय**-न -८१४-जनोई, संस्कार.

द्र० आनयशब्दः ।

*उपनायमुपनायो मौञ्जीबन्धनं **यन्मनुः** "गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनम् ।"

**उपनाह**-पुं-२९०-वीणाना तारनुं बंधन.

☐निबन्धन ।

*वीणाया निबन्धनं येन चर्मणोपनह्यते स उपनाहः, प्रान्ते यत्र तन्त्र्यो निबध्यन्ते वा ।

**उपनिधि**-पुं-८७०-थापण

☐निक्षेप, न्यास ।

*उपसृत्य समीपे वा निधीयते उपनिधिः, उप समीपे निधिर्वा ।

**उपनिषद्**- न.-२५०-वेदान्त, वेद रहस्य.

☐वेदान्त ।

*उप समीपे ब्रह्मणो निषीदन्त्यनया उपनिषद् ।

**उपनिष्कार**-न.-९८७-राजमार्ग.

द्र० असङ्कुलशब्दः ।

उपनिष्कीर्यते सैन्यमस्मिन् उपनिष्करम् ।

**उपनिष्क्रमण**-न.-९८७-राजमार्ग.

द्र० असङ्कुलशब्दः ।

*उपनिष्क्रम्यतेऽस्मिन् उपनिष्क्रमणम् ।

**उपनीतरागत्व** न.-६६-प्रभुवाणीनो ७मो गुण, मालकोश वगेरे रागयुक्त.

*उपनीतरागत्वं-मालवकैशिक्यादिग्रामरागयुक्तता ।

**उपन्यास**-पुं-२६२-प्रस्तावना उपोद्घात.

द्र० उदाहारशब्दः ।

*उपन्यस्यते इति उपन्यासः ।

**उपपति**-पुं-५१९-पतिना जेवो जार पुरुष.

☐जार ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*उपजातः पतिः उपपतिः ।

**उपपादुक** (त्रि. वि.)-पुं-१३५७-દેવ, નારકી.

*उपपद्यन्ते स्वयमित्येवं शीला उपपादुकाः ।

**उपपुर**-ન.-९७२-પરું, ઉપનગર.

□शाखापुर ।

* उपसमीपे पुरस्य मूलनगरस्य इति उपपुरम् ।

**उपप्रदान**-ન.-७३७-દાન, ભેટ, લાંચ.

द्र० आमिषशब्दः ।

*उपप्रदीयते इति उपप्रदानम् ।

**उपप्लव**-पुं-१२५-ચંદ્રગ્રહણ કે સૂર્યગ્રહણ.

□राहुग्रास, ग्रह, उपराग ।

*उपप्लूयेते अनेन उपप्लवः ।

**उपप्लव**-पुं-१२१ (शि. १६)-રાહુ.

द्र० तमस्शब्दः ।

**उपबर्ह**-पुं-६८३-ઓશીકું.

□उच्छीर्षक, उपधान ।

*उपबृह्यतेऽनेन, उपबर्हति वा, उपबर्हः शिरो-निवेशनं गण्डूकाख्यम् ।

**(उपबाहु)**-पुं-५९०-કોણીથી નીચેનો કાંડા સુધીનો ભાગ.

□प्रकोष्ठ, कलायिका ।

*कूर्परस्य मणिबन्धमवधीकृत्य प्रकुष्णाति इति उपबाहुः ।

**उपभृत्**-स्त्री-८२८-યજ્ઞપાત્ર વિશેષ.

*उपभ्रियते इति उपभृत् , संपदादित्वात् क्विप् ।

**उपभोग** पुं-६३८-સ્ત્રી વિગેરેનો ઉપભોગ.

□निर्वेश ।

*उपभुक्तिः इति उपभोगः ।

**उपभोगान्तराय**-पुं-७२-તીર્થંકરમાં ન હોય તે ૧૮ દોષમાંથી પાંચમો દોષ

*उपभुज्यते इति उपभोगोऽङ्गनादिः, तद्गतोऽन्तराय इति पञ्चमः ।

**उपमा**-स्त्री-१४६२-સમાન, તુલ્ય.

□प्रख्य, प्रकार, प्रतिम, निभ, भूत रूप संङ्काश, नीकाश प्रकाश, प्रतिकाश (प्रतीकाश) ।

*उपमीयतेऽनया इति उपमा ।

**उपमा**-स्त्री-१४६२-સમાનપણું, ઉપમા.

द्र० अनुकारशब्दः ।

*उपमानं इति उपमा ।

**उपमातृ**-स्त्री-५५८-ધાવમાતા.

□धात्री ।

*उपजाता उपचरिता वा माता उपमाता ।

**उपमान**-ન.-१४६३-ઉપમા, સમાનપણું.

द्र० अनुकारशब्दः ।

*उपमितिः उपमानम् ।

**(उपमिति)**-स्त्री-१४६३-સમાનપણુ, ઉપમા.

द्र० अनुकारशब्दः ।

**उपयन्तृ**-पुं-५१७ (शि. ४२) પ્રીયપતિ, વર.

द्र० कान्तशब्दः ।

**उपयम**-पुं-५१-વિવાહ.

द्र० उद्वाहशब्दः ।

द्र० उपयमनमुपयमः,"संनिव्युपाद्यमः"(५।३।२५) इति वाऽल् ।

**उपयाम** पुं ५१८-વિવાહ

द्र० उद्वाहशब्दः ।

*उपयमनमुपयामः, "संनिव्युपाद्यमः"(५।३।२५) इति वाऽल् ।

**उपरक्त**-ન-३८१ વ્યસનથી પીડાયેલ.

□व्यसनार्त्त ।

*उपरज्यते स्म उपरक्तः ।

**उपरक्षण** ન.-७४९-સૈન્યને સજ્જ કરવું અને રક્ષણ કરવું તે.

□सज्जन ।

*उपरक्ष्यतेऽनेनोपरक्षणं सैन्यस्य प्रगुणीकरणं गुल्मको वा ।

**उपरति**-स्त्री-१५२२-નિવૃત્તિ, અટકવું.

द्र० अवरतिशब्दः ।

**उपरम**-पुं-१५२२-નિવૃત્તિ, અટકવું.

द्र० अवरतिशब्दः ।

**उपराग**-पुं-१२५-ચંદ્રગ્રહણ કે સૂર્યગ્રહણ.

□राहुग्रास, ग्रह, उपप्लव ।

*उपरज्येते छाद्येते चन्द्रार्कावनेनोपरागः ।

**उपराग**-पुं-१२१ (शे. १६)-રાહુ.

द्र० तमस्शब्दः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**उपरि**-અ०-१५२६-ઊંચું, ઉપર.

□उपरिष्टात् ।

*ऊर्ध्वे देशे उपरि "ऊर्ध्वाद् रिरिष्टातावुपश्चास्य" ॥७।२।११४॥ इति साधुः यथा "गिरेरुपरि" ।

**उपरिष्टात्**-અ०-१५२६-ઊંચું, ઉપર.

□उपरी ।

ऊर्ध्वे देशे उपरिष्टात् "ऊर्ध्वाद्"-॥७।२।११४॥ इति साधुः यथाः- "गिरेरुपरिष्टाद्" ।

**उपल**-पुं-न.-१०३६-પથ્થર.

द्र० अश्मन्शब्दः ।

उप्यते उपलः पुंक्लीबलिङ्गः, "तृपिवपि-" (उणा-८९८) इति किद् लः ।

**उपलब्धि**-स्त्री-३०९-બુદ્ધિ.

□मति, मनीषा, बुद्धि, धी, धिषणा, ज्ञप्ति, चेतना, प्रतिभा, प्रतिपद, प्रज्ञा, प्रेक्षा, चित्, संवित्ति, शेमुषी, दृष्टि ।

*उपलम्भनं इति उपलब्धिः ।

**उपलम्भ**-पुं-१५२०-પ્રાપ્તિ, લાભ

□अनुभव ।

*उपलम्भनं इति उपलम्भः

**उपलिङ्ग**-न०-અકસ્માત કે ઉપદ્રવ.

द्र० अजन्यशब्दः ।

*उपलिङ्ग्यते दोषैर्गम्यते जनोऽत्र उपलिङ्गम् ।

**उपवन**-न० ११११-બગીચો, વાડી.

द्र० अपवनशब्दः ।

*उप समीपे वनं उपवनम् ।

**उपवर्त्तन**-न०-९४७-માણસોની વસ્તી વાળો દેશ.

□विषय, देश, जनपद, नीवृद्, राष्ट्र, निर्ग, मण्डल, [उपावर्तन शि०८४] ।

* उपवर्त्तन्तेऽस्मिन्नुपवर्त्तनम् ।

**उपवसथ**-पुं-९६१-ગામ.

□ग्राम, संवसथ, निर्वसथ, प्रतिवसथ, परिवसथ ।

*"उपसर्गाद् वसथः" (उणा-२३३) इत्यथः, तेन उपवसथः ।

**उपवस्त्र**-न०-८४२-(शि० ७३) ઉપવાસ.

□औपवस्त्र, उपवास [औपवस्त, शि० ७३] ।

**उपवास**-पुं न०-८४२-ઉપવાસ.

□औपवस्त्र [उपवस्त्र, औपवस्त शि०७३] ।

*उपवसनमुपवासः पुंक्लिबलिङ्गः ।

**उपवाह्य**-पुं-१२२२-રાજાને બેસવા યોગ્ય હાથી.

□राजवाह्य [औपवाह्य शि० ११०] ।

*समीपे वाह्यते इति उपवाह्य औपवाह्यः **इत्यन्ये** ।

**उपविष**-न०-१३१४-બનાવટી ઝેર.

□चार, गर ।

*उपगतं विषेण उपविषम् ।

**उपविष्ट**-पुं-४९२-બેઠેલો.

□आसीन ।

*उपविशति स्म उपविष्टः ।

**उपवीत**-पुं-न०-८४५-જમણા ખભે ધારણ કરેલી જનોઈ.

□यज्ञसूत्र, यज्ञोपवीत, [ब्रह्मसूत्र, पवित्र शि० ७३] ।

*उपवीयते प्राव्रियते स्म उपवीतं पुंक्लीबलिङ्गः ।

**उपवैणव**-न०-१४०-ત્રણ સંધ્યા.

□त्रिसन्ध्य ।

*उप समीपे वैणवो व्रतदण्डो यत्र तदुपवैणवम् ।

**उपशम**-पुं-३०४-શાંતિ, શાંતરસનો સ્થાયીભાવ.

□शम, शान्ति, शमथ, तृष्णाक्षय ।

*उपशमनं इति उपशमः ।

**उपशल्य**-न०-९६३-ગામનો સીમાડો

□ग्रामसीमा ।

*ग्रामस्य सीमा ग्रामान्त, अन्ते चिह्नार्थं शल्यप्रक्षेपादुपशल्यं, उपशल्यते आशु गम्यतेऽत्रेति वा, "स्थाच्छामा"-(उणा-३५७) इतियः ।

**उपशाय**-पुं-१५०३-પહેરેગીરેનું વારાફરતી સુવું તે.

□विशाय (क्रमशयन) ।

*उपशयनमुपशायः "व्युपाच्छीङः"॥५।३।७७॥ इति घञ् ।

**(उपशोचन)**-न.-२७५-શોક કરવો, રુદન પૂર્વક બોલવું તે.

☐विलाप, परिदेवन ।

**उपश्रुत**-१४८९-સ્વીકારેલું, સ્વીકાર કરેલું.

द्र० अङ्गीकृतशब्दः ।

**उपश्रुति**-स्त्री-२६३-દૈવપ્રશ્ન, પ્રશ્નફલ જાણવા માટે વચન.

☐देवप्रश्न ।

*उप-समीपे श्रूयतेऽस्यां इति उपश्रुतिः ।

**उपसङ्ग्रह**-पुं-८४४-પગમાં પડવું, નમસ્કાર, વંદન

☐पादग्रहण, अभिवादन ।

*उपसंग्रहणमुपसङ्ग्रहः, **यन्मनुः**-"व्यत्यस्तपाणिना कार्यमुपसंग्रहणं गुरोः। वामेन वामः स्प्रष्टव्यो दक्षिणेन तु दक्षिणः" ।

**उपसन्न**-पुं-१४९४-નમેલ, પાસે રહેલ.

उपनत, उपस्थिति ।

उपसीदति स्म उपसन्नः ।

**उपसवन**-न.-३९१-ઉંડી શાક.

☐निष्टान, तेमउन (क्नोपन) ।

**उपसम्पन्न**—पुं-६७३-મરેલો.

द्र० आलेख्यशेषशब्दः ।

*उपसंपद्यते स्म उपसम्पन्नः ।

**उपसम्पन्न**-न०-४१३-સ્વાદિષ્ટ અન્ન.

☐प्रणीत ।

*उपसंपद्यते स्म उपसंपन्नमन्नम् । रूपरसादि-निष्पन्नमन्नम् ।

**उपसंव्यान**-न०-६७३-નીચે પહેરવાનું વસ્ત્ર

द्र० अवोंशुकशब्दः ।

*उपसंवीयतेऽनेन कटिरूपसंव्यानम् ।

**उपसर**-पुं-१२७४-ગર્ભાધાન કાલ.

☐प्रजन ।

*स्त्रीषु पुंसा प्रथममुपसरणं इति उपसरः "सृग्लहः प्रजनाक्षे" ।५।३।३१।इत्यल् ।

**उपसर्ग**-पुं-१२५-અકસ્માત ઉપદ્રવ.

द्र० अजन्यशब्दः ।

*उपसृज्यते उपद्रूयते प्रजाऽत्र इति उपसर्गः ।

**उपसर्जन**-न०-१४४१-ગૌણ, અપ્રધાન

द्र० अप्रधानशब्दः ।

*उपसृज्यते नियुज्यते उपसर्जनं आविष्टलिङ्गो नपुंसकः, यथा उपसर्जनं भार्या ।

**उपसर्या**-स्त्री-१२६८-ગર્ભગ્રહણ સમયને પ્રાપ્ત થયેલી ગાય.

☐काल्या ।

*गर्भग्रहणे उपस्रियते वृषेणोपसर्या "वर्योपसर्या"-।५।१।३२।इति ये साधुः ।

**उपसूर्यक**-न०-१०१-મંડલ, સૂર્ય/ચંદ્રની ચોમેર ગોળાકારે દેખાતું તેજ.

☐मण्डल, परिधि, परिवेष ।

*समीपे सूर्यस्य प्रतिकृतिः इति उपसूर्यकं, क्लीबम् ।

**उपस्कर** पुं-४१७-મસાલો સૂંઠ, મરી વગેરે.

☐वेषवार, 'वेसवार, वेशवार' ।

*शाकाद्युपस्क्रियतेऽनेन इति उपस्करः "पुंनाम्नि" ।५।३।१३०। इति घः ।

**उपस्थ**-पुं-६०२-શરીરનો પૂર્વભાગ, ખોળો.

द्र० अङ्कशब्दः ।

*उत्कर्षेण सजत्यत्रोत्सङ्गः ।

**उपस्थ**-पुं न.-६११-સ્ત્રી અને પુરુષનું ચિન્હ.

☐गुह्य, प्रजनन ।

*उपतिष्ठते संगच्छत उपस्थः पुंस्ययम्, **वैजयन्तीकारस्तु** "उक्तद्वयमुपस्थोऽस्त्री" इति क्लीबेऽप्याह।

**उपस्थित**-पुं-१४९४-નમેલ, પાસે આવેલ.

☐उपनत उपसन्न ।

*उपतिष्ठते स्म उपस्थितः ।

**उपस्पर्श**-पुं-८३७-આચમન, વેદોક્તમંત્રથી મુખ વગેરેનો સ્પર્શ.

☐आचमन ।

*उपस्पृश्यतेऽद्भिः खान्यस्मिन्नुपस्पर्शः **यन्मनुः**-"उपस्पृश्य द्विजो नित्यमन्नमद्यात् समाहितः । भुक्त्वा चोपस्पृशेत् सम्यगद्भिः खानि च संस्पृशेत् ।"

**उपहार**-पुं-४४७-બલિદાન, પૂજાની સામગ્રી.

☐बलि ।

*उपह्रियते देवार्थं इति उपहारः ।

**उपहार**-पुं-७३७-દાન, ભેટ, લાંચ.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्र० आमिषशब्दः ।

*उपह्रियते इति उपहारः ।

**उपहालक**-पु (બ.વ.)–९६१-કુંતલદેશ, અંગ, બંગ, મગધ વગેરે.

☐कुन्तला ।

*उप समीपे हाला येषां उपहालकाः । अत्र प्राग्ज्योतिष-मालव-चेदि-वङ्गाऽङ्ग मगधाः प्राच्याः, मरुः साल्वाश्च प्रतीच्याः, जालन्धर तायिक-कश्मीर वाह्लीक तुरुष्क-कारूष-लम्पाक-सौवीर प्रत्यग्रथा उदीच्याः, ओण्ड्राः कुन्तलाश्च अपाच्या इति ।

**उपह्वर**-पुं-न.–७४१-એકાંત.

☐रहस् , छन्न, विविक्त, विजन, एकान्त, निःशलाक, केवल ।

*उपह्वयति इति उपह्वरं पुंक्लीबलिङ्गः ।

**उपांशु**--१५३८-એકાંત, ગુપ્ત.

*उपाश्नुते उपांशु "अशेरान्नोऽन्तश्च" -(उणा -७१९) इत्युः, यथा-"तेषामुपांशु वधं प्रकुर्वीत" ।

**उपाकरण**-न.-८४१-વેદપાઠના આરંભમાં શ્રુતિનું સંસ્કાર પૂર્વક ગ્રહણ કરવું તે.

*उपाक्रियतेऽनेन उपाकरणं, वेदपाठारम्भे विशिष्टो विधिः ।

**उपाकृत**-पुं-८२९-જે પશુમન્ત્રથી મન્ત્રીને હણાય તે.

*उप आमन्त्र्य क्रियते हन्यते स्म इति उपाकृतः ।

**उपाग्र**-न.-१४४१-ગૌણ, અપ્રધાન.

द्र० अप्रधानशब्दः ।

*उप रुद्धं अग्रं अस्य उपाग्रम् ।

**उपात्यय**-पुं-१५०४ ક્રમનું ઉલ્લંઘન.

द्र० अतिक्रमशब्दः ।

*उपपन्नस्यात्ययोऽतिक्रमणं इति उपात्ययः ।

**उपादान**-न.-१५२४-ઇંદ્રિયોને વિષયથી પાછી ખેંચવી તે.

☐प्रत्याहार ।

*उपादीयते इति उपादानम् ।

**उपाधि**-पुं-४७८-કુટુંબ પોષણ કરવામાં ઉદ્યત.

☐अभ्यागारिक, कुटुम्बव्यापृक्त ।

*उपाधीयते इति उपाधिः पुंलिङ्गः ।

**उपाधि**-पुं-१३८१-ધર્મનો વિચાર.

☐धर्मचिन्तन ।

*उपाधीयते इति उपाधिः पुलिङ्गः ।

**उपाध्याय**-पुं-७८-અધ્યાપક

☐पाठक ।

*उपेत्याधीयतेऽस्मादित्युपाध्यायः "इङोऽपादाने तु टिद्वा" (५।३।१९) इति घञ् ।

**उपाध्याया**-स्त्री-५२४-શિક્ષિકા.

☐उपाध्यायी ।

*स्वत एव स्त्री, उपेत्य अधीयतेऽस्या इत्युपाध्याया 'इङोऽपादाने तु टिद्वा'(५।३।१९)इति आप् ।

**उपाध्यायानी**-स्त्री-५२३-ઉપાધ્યાયની સ્ત્રી.

☐उपाध्यायी ।

*पुंयोगात् उपाध्यायस्य भार्या इति उपाध्यायानी ।

**उपाध्यायी**-स्त्री-५२३ ઉપાધ્યાયની સ્ત્રી.

उपाध्यायी

☐पुंयोगात् उपाध्यायस्य भार्या इति उपाध्यायी ।

**उपाध्यायी** स्त्री ५२४-શિક્ષિકા.

☐उपाध्याया ।

*उपेत्य अधीयतेऽस्या इत्युपाध्यायी "इङोऽपादाने तु टिद्वा (५।३।१९) इति घञो विकल्पेन टित्त्वादेकत्र ङीः।

**उपानह्**-स्त्री-९१४-બૂટ, ચંપલ.

☐पादुका, पादू , पन्नद्धा, पादरक्षण, प्राणहिता, [पादरथी, पादजङ्गु, पदत्वरा, पादवीथी, पेशी, पादपीठी, पदायता शे. १५६, पादत्राण शि. ८०]।

*उपनह्यति पादमुपानत् , स्त्रीलिङ्गः क्विपि "गतिकारकस्य नहिवृति"-(३।२।८५)इति दीर्घः।

**उपान्त**-न.-१४५०-સમીપ, નજીક.

द्र० अन्तिकशब्दः ।

*समीपोऽन्तोऽस्य उपान्तम् ।

**उपाय**-पुं(બ.વ.)-७३६-સામ, દામ, ભેદ, દંડ આ ચાર ઉપાય.

*उपैत्येभिरित्युपायाः सामादयश्चत्वारः ।

**उपायन**-न.-७३७-દાન, ભેટ લાંચ

द्र० आमिषशब्दः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*उप समीपेऽयन्तेऽनेनोपायनम् ।

**(उपालिन्दक)**–પું–૧૦૧૦–બારણા આગળ કરેલો ઓટલો.

द्र० अलिन्दशब्दः ।

**उपावर्त्तन**–ન.–૯૪૭ (शि. ८४)–દેશ, માણસોની વસ્તી વાળો દેશ.

द्र० उपवर्त्तनशब्दः ।

**उपाशकदशा**–સ્ત્રી(બ. વ) ૨૪૪-૭મું અંગ.

*उपासकाः श्रावकाः तद्गतक्रियाकलापप्रतिबद्धा दशा दशाऽध्ययनरूपा उपासकदशाः बहुवचनान्तमेतद् ग्रन्थनाम ।

**उपासङ्ग**–પું-૭૮૧–બાણ રાખવાનું ભાથુ.

द्र० इषुधिशब्दः ।

*उपासज्जयन्तेऽत्र बाणाः इति उपासङ्गः ।

**उपासन**–ન.–૭૮૮ (शे. १५२)-શસ્ત્રકળાનો અભ્યાસ.

द्र० अभ्यासशब्दः ।

**उपासना**–સ્ત્રી–૪૯૭ (शि. ३८)–સેવા, ભક્તિ,

द्र० आराधनाशब्दः ।

*उपासनं इति उपासना ।

**उपास्ति**–સ્ત્રી–૪૯૭ (शि. ३८)–સેવા, ભક્તિ.

द्र० आराधनाशब्दः ।

*उपासनं इति उपास्तिः ।

**उपाहित**–પું–૧૨૬–અગ્નિનો ઉપદ્રવ.

□वह्न्युत्पात ।

*उपासन्नमहितमस्योपाहितः, धूमकेत्वाख्य उत्पात **इत्येके** ।

**उपाहित**–પું–૧૪૮૫–જોડાયેલું.

संयोजित, संयोगित' ।

उपाधीयते स्म उपाहितः ।

**उपेक्षा**–સ્ત્રી–૭૩૮–ઉપેક્ષા, તિરસ્કાર.

* उपेक्षाऽवधीरणम् ।

**उपेन्द्र**–પું–૨૧૪-વિષ્ણુ, નારાયણ.

द्र० अच्युतशब्दः ।

*इन्द्रमुपगतोऽनुजत्वाद् उपेन्द्रः ।

**उपोद्घात**–પું–૨૬૨-પ્રસ્તાવના, શાસ્ત્ર, પ્રારંભ વચન.

□उदाहार, उपन्यास, वाङ्मुख ।

*उपसमीपे उद्धृत्य हन्यते उपोद्घातः **यदाह**––"चिन्तां प्रकृत सिद्ध्यर्थामुपोद्घातं प्रचक्षते ।

**उपोद्घात**-પું-૧૫૧૦–જ્ઞાનપૂર્વક આરંભ શરૂઆત.

द्र० अभ्यादानशब्दः ।

*उपोद्घननं उपोद्घातः उद्घातोऽपि ।

**उप्तकृष्ट**–ન.–૯૬૯–પ્રથમ વાવીને પછી ખેડેલું ખેતર.

□बीजाकृत ।

*आदावुप्तं पश्चाद् बीजैः सह कृष्टं, "पूर्वकाले"–(३।१।९२) इति कर्मधारयः ।

**उभ**–वि. (द्वि. व)–१४२३–બે, બંને.

□द्वि ।

*उभतः पूरयतो द्वित्वमुभौ ।

**उभयंद्युस्**–અ.-૧૫૪૨ (शे. २०४)–બંને દિવસ

□उभयेद्युस् ।

**उभयेद्युस्** અ.–૧૫૪૨ (शे. २०४)–બંને દિવસ

□उभयेद्युस् ।

**उम्**–અ.–૧૫૪૨–ક્રોધવાળું વચન બતાવનાર અવ્યય.

*ऊयते उं बाहुलकात् किन् म्, यथा–"उं सैवास्मि तव प्रिया" ।

**उमा**–સ્ત્રી–૨૦૩–શંકરની સ્ત્રી, પાર્વતી.

द्र० अद्रिजाशब्दः ।

*अवतीति उमा, "अवेर्ह्रस्वश्च वा"–(उणा–३४२) इति मक्, उमेति मात्रा तपसे निषिद्धेति वा

**उमा** સ્ત્રી–૧૧૭૯-અળસી.

□अतसी, क्षुमा ।

*अव्यते उमा "अवेर्ह्रस्वश्चवा" (उणा–३४२) इति किति मे साधुः ।

**उमापति**–પું–૧૯૯શંકર, મહાદેવ.

द्र० अट्टहासिन्शब्दः ।

*उमायाः पतिः उमापतिः यौगिकत्वात् उमानाथः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**उमावन**-न.-९७७-બાણાસુરનું નગર.

□देवीकोट, कोटिवर्ष, बाणपुर, शोणितपुर ।

*उमायाः वनं इति उमावनम् ।

**उमासुत**-पुं-२०८-કાર્તિકેય શંકરનો પુત્ર.

द्र० अग्निभूशब्दः ।

*उमायाः सुतः उमासुतः ।

**उम्बर**-पुं-१००९-ઘરનો ઉંબરો.

द्र०उदुम्बरशब्दः ।

*उद्यते क्लिद्यते उम्बरः, "तीवरधीवर-" (उणा-४४४) इति वरटि निपात्यते ।

**उम्बुर**-पुं-१००९-ઘરનો ઉંબરો.

द्र०उदुम्बरशब्दः ।

*"श्वशुर"-(उणा-४२६) इत्युरे निपातनाद् उम्बुरः ।

**उम्य**-न.-९६७-અળસીનું ખેતર.

□औमीन ।

*उमानां इति उम्यम् ।

**उरःसूत्रिका**-स्त्री-६५७-નાભિ સુધી લટકતી માળા.

*उरसि सूत्रमस्या उरःसूत्रिका ।

**उरग**-पुं-१३०३ સર્પ, નાગ.

द्र०अहिशब्दः ।

*उरसा गच्छति इति उरगः, पृषोदरादित्वात् स लोपः ।

**(उरगभूषण)**-पुं-१९९ શંકર, મહાદેવ.

द्र०अट्टहासिन्शब्दः ।

*यौगिकत्वात् उरगभूषणः ।

**उरण**-पुं-१२७६-ઘેટો

द्र०अविशब्दः ।

*इयर्ति इति उरणः 'चिक्कण"-(उणा-१९०) इत्यणे निपात्यते 'उरणः कण्ड्वादौ" उरण्यति देवताः प्रीणाति वा उच्चैरणोऽस्येति वा उः स्वरप्रतिरूपकमव्ययम् ।

**उरभ्र**-पुं-१२७६-ઘેટો.

द्र०अविशब्दः ।

*इयर्ति इति उरभ्रः "खुरक्षुर-" (उणा-३९६) इति रे निपात्यते उच्चैरभते उरुभ्रमति इति वा पृषोदरादित्वात् ।

**उररीकृत**-न.-१४८९-સ્વીકાર કરેલું.

द्र०अङ्गीकृतशब्दः ।

*ऊररीक्रियते इति उररीकृतम्, "ऊर्यादनुकरण"-॥३।१।२॥ इति गतिसंज्ञायां "गतिक्वन्यस्तत्पुरुषः" इति समासः ।

**उरच्छेद**-पुं-७६६-બખતર, કવચ.

□सन्नाह, वर्मन, कङ्कट, जगर, कवच, दंश, तनुत्र, माठी-माठि, [दंशन, त्वक्त्र, तनुत्राण शि. ११] ।

*उरश्छाद्यतेऽनेन इति उरश्छदः, "पुंनाम्नि" -॥५।३।१३०॥ इति घे 'एकोपसर्गस्य"-॥४।३।२४॥ इति ह्रस्व, त्वक्त्रमपि ।

**उरस्**-न.-६०२-છાતી, બે હાથવચ્ચેનો ભાગ.

□क्रोडा, हृदयस्थान, वक्षस्, वत्स, भुजान्तर ।

*अर्यते गम्यते उरः क्लीबलिङ्गः "अर्तेरुराशौ च (उणा ९६७) इत्यस् कण्ड्वादावुरस्यतीति वा क्विप् ।

**(उरसिज)**-पुं-६०३ સ્તન.

□स्तन, कुच, पयोधर, उरोज वक्षोज[धरण शे.१२१]।

*यौगिकत्वादुरसिजः ।

**उरसिल**-पुं-७९२ વિશાલ છાતીવાળો ભાગ.

□उरस्वत् ।

*पिच्छादित्वादिले उरसिलः ।

**उराह**-पुं-१२४०-કંઈક સફેદ અને કાળીજાંઘાવાળો ઘોડો.

*उरस आहन्ति इति उराहः ।

**'उरीकृत'**-न.-१४८८-સ્વીકારેલું.

द्र० अङ्गीकृतशब्दः ।

**उरु**-पुं-१४३०-વિશાળ, મોટું.

□विशाल, विशङ्कट, पृथु, पृथुल, व्यूढ, विकट, विपुल, बृहत्, स्फार, वरिष्ठ-वड्र, विस्तीर्ण, तत, बहु, महत्, गुरु ।

*इयर्ति इति उरुः "महत्युरुच" (उणा-७३७) इति उः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**उरु**-पुं-१११४ (शे. ७४१)-વૃક્ષ, ઝાડ
द्र०अङ्घ्रिपशब्दः

**उरुक्रम**-पुं-२१९-(शे ६५)વિષ્ણુ, નારાયણ.
द्र०अच्युतशब्दः ।

**उरुगाय**-पुं-२१९ (शे.६५)-વિષ્ણુ નારાયણ.
द्र०अच्युतशब्दः

**उररीकृत**-न -१४८८-સ્વીકાર કરેલું.
द्र०अङ्गीकृतशब्दः ।
ऊररीक्रियते स्म उररीकृतम् । "ऊर्यादिच्विडाचश्च"-॥३।१।२॥ इति गतिसंज्ञायां " गतिक्वन्यस्तत्पुरुषः" ॥३।१।४२॥ इति समासः ।

**उरोज**-पुं. (द्वि.व.)-६०३-સ્તન
द्र०उरसिजशब्दः ।
*उरसि जातौ इति उरोजौ ।

**उर्वङ्ग**-पुं-१०२७ (शे.१५८)-પર્વત.
द्र०अचलशब्दः ।

**उर्वङ्ग**-पुं-१०७४ (शे.१६७)-સમુદ્ર.
द्र०अकूपारशब्दः ।

**उर्वरा**-स्त्री-९३९-જ્યાં સર્વ પ્રકારનું ધાન્ય થાય છે તે ભૂમિ.
□ऊर्वति क्षुधमुर्वरा "जठर"-(उणा-४०३) इत्यरे निपात्यते ऊरुनियर्ति वा सर्वं सस्यमस्यां सर्वसस्याभूमिः ।

**उर्वशी**-स्त्री—१८३-ઉર્વશી નામની અપ્સરા, સ્વર્ગની વેશ્યા.
□ऊरू अश्नुते नारायणस्योरूद्भवत्वात् उर्वशी, पृषोदरादित्वात् ह्रस्वः, यल्लक्ष्यं -ऊरूद्भवा नरसखस्य मुनेः सुरस्त्रीमुख्यग्रहणात् प्रभावत्याद्याः यदू व्याडिः—
अथब्रह्मणोऽग्निकुण्डात् समुत्पन्नाप्रभावती ।
वेदितलाद् वेदिवती, यमात् पुनः सुलोचना ॥१॥
उर्वशी तु हरेः सक्थमुरं भित्त्वा विनिर्गता ।
रम्भा तु ब्रह्मणो वक्त्राच्चित्रलेखा तु तत्करात् ॥२॥
शिरसस्तु महाचित्रा, स्मृता काकलि सावसा ।
मरीचि सूचिका चैव, विद्युत्पर्णा तिलोत्तमा ॥३॥
अद्रिका लक्षणा क्षेमा, दिव्या रामा मनोरमा ।
हेमा सुगन्धा सुवपुः, सुबाहुः सुव्रता सिता ॥४॥
शारद्वती पुण्डरीका, सुरसा सूनृतापि च ।
सुवाता कामला हंसपादी च सुमुखीति च ॥५॥
मेनका सहजन्या च, पर्णिनी पुञ्जिकास्थला ।
ऋतुस्थला घृताची च, विश्वाचीत्यप्सरःस्त्रियः ॥६॥

**उर्वशीरमण**-पुं-७०१-પુરુરવા રાજા, ઉર્વશીનો પતિ.
□पुरूरवस्, बौधे, ऐल ।
*उर्वश्या रमणः इति उर्वशीरमणः ।

**'उर्वारु'**-स्त्री-११८९-કાકડી
द्र० एर्वारु शब्दः ।

**'उर्वालु'**-स्त्री-११८९-કાકડી
द्र० एर्वारु शब्दः ।

**उर्वी**-स्त्री-९३५-પૃથ્વી.
द्र० अचलाशब्दः ।
*उर्वी विस्तीर्णत्वात् ।

**उर्वीधर**-पुं-१८ (परि.)-પર્વત, રાજા

**उर्वीभृत्**-पुं-१८-પર્વત, રાજા.

**उलक्का**-स्त्री-११०२-અગ્નિની મોટી જ્વાલા.
*ज्वाला महती उलकायति, ज्वलतीति वा "निष्कतुरुष्क" (उणा-२६) इति के निपात्यते ।

**उलन्द्**-पुं.-२०० (शे. ४७)-શંકર, મહાદેવ.
द्र० अट्टहासिन्शब्दः ।

**उलप**-पुं-१११८-વિસ્તાર પામેલ વેલો ગુચ્છાવાળી વેલડી.
□प्रतानिनी, गुल्मिनी, वीरुध् ।
*वलते वेष्टते इति उलपः "विष्टपालेप"-(उणा-३०७) इत्यपे निपात्यते ।

**उलप**-पुं-११९४ એક પ્રકારનું કોમલ ઘાસ.
□वल्वज ।
*वलते इति उलपः "विष्टपालेप"-(उणा-३०७) इत्यपे निपात्यते ।

**उलूक**-पुं-१३२४ ઘુવડ
□घूक, निशाट, काकारि, कौशिक, पेचक, दिवान्ध, 'दिवाभीत' ।
*अलति इति उलूकः, "शम्बूक"-(उणा-६१) इत्यूके निपात्यते ऊच्चैर्लोकते, ऊर्ध्वौ कर्णावस्येति वा, पृषोदरादित्वात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**उलूखल**–પું–૮૧૬–વ્રતમાં ધારણ કરવા યોગ્ય ઉદુમ્બરનો દંડ.

☐औदुम्बर।

*उदुम्बरपर्याय उलूखलशब्दः, उलूखलस्य विकारोऽवयवो वा उलूखलः "प्राण्यौषधि"–(६।२।३१) इत्यण् लुब् "बहुलं पुष्पमूले" (६।२।५७) इति तस्य लुप् । **मनुस्तुः**

ब्राह्मणो बैल्वपालाशौ, क्षत्रियो वाटखादिरौ ।
पैलवौदुम्बरौ वैश्यो, दण्डानर्हन्ति धर्मतः ॥

इत्याह ।

**उलूखल**–ન.–૧૦૧૬–ખાંડણી, ખાંડણીયો.

☐उदूखल ।

*ऊर्ध्वं खं बिलं वाऽस्य उलूखलम्, कण्डन-भाण्डं पृषोदरादित्वात् साधुः ।

**'उलूखलक'**–ન.–૧૧૪૨ ગૂગળનું ઝાડ

द्र० गुग्गुलुशब्दः ।

**'उलूपिन्'**–પું–૧૩૪૬–એક જાતનો મચ્છર

☐उलूपी शिशुक ।

**उलूपी**–પું–૧૩૪૬–એક પ્રકારનો મચ્છ, શિશુમાર.

☐'उलूपिन्' शिशुक ।

*उल्लुम्पतीत्येवं शिल उलुपो, पृषोदरादित्वात् ।

**उलूलु**–પું–૫૧૮ (શે. १०९)–માંગલિક શબ્દ.

☐ (मङ्गलध्वनि शे १०९)

**उल्का**–સ્ત્રી–૧૧૦૩–તેજનો સમૂહ, જવાલા રહિત અગ્નિ.

☐अलातज्वाला ।

*'उल दाहे' सौत्रस्य, ज्वलतेर्वा "निष्कतुरुष्क"-(उणा–२६) इति के निपातनादुल्का ।

**उल्ब**–પું. ન.–૫૪૦–ગર્ભાશય, ગર્ભસ્થાન.

☐गर्भाशय, जरायु ।

अलत्यावृणोति इति उल्बं पुंक्लीबलिङ्गः, "शल्य-लेरुच्चातः" (उणा–३१९) इति बः ।

*अलति इति उल्वम्, पुंक्लीबलिङ्गः, शुक्रशोणित-समवायः ।

**उल्व**–પું ન.–૫૪૦–શુક્ર અને રૂધિરનું મિશ્રણ.

☐कलल ।

**उल्बण**–ન.–૧૪૬૭–૨૫૫૮.

☐स्फुट, स्पष्ट, प्रकाश, प्रकट, व्यक्त, 'प्रव्यक्त' ।

*बलत्युल्बणं "चिक्कण"–(उणा–१९०) इत्यणे निपात्यते उद्बाणतीति वा पृषोदरादित्वात् ।

**उल्मुक**–ન.–૧૧૦૩–અંગારો, ઉંબાડીયું.

☐उलात ।

*ज्वलति इति उल्मुकं "कञ्चुकां–" (उणा–५७) इत्युके निपात्यते ।

**उल्लकसन**–ન.–૩૦૬–રોમાંચ.

द्र० उद्घुषणशब्दः ।

*उल्लकसत्यनेनाङ्गं इति उल्लकसनम् ।

**उल्लाघ** પું–૪૭૪–નિરોગી.

☐पटु, कल्य, वार्त्त, नीरुज् ।

*उल्लाघते स्म उल्लाघः "अनुपसर्गाः क्षीब"–(४।२।८०) इति क्ते निपात्यते ।

**उल्लाप**–પું–૨૭૫–શોક, ભય વગેરેથી સ્વરનું બદલાવવું તે.

काकुवाच् ।

*उल्लपनं इति उल्लापः ।

**उल्लोच**–પું–૬૮૧–ચંદરવો.

☐वितान, कदक, चन्द्रोदय ।

*उपरि लोच्यते इति उल्लोचः, उल्लुच्यतेऽपनीय-तेऽनेनाऽऽतपादीनि वा ।

**उल्लोल**–પું–૧૦૭૬–તરંગ, પાણીના મોટા મોજા

☐लहरी, कल्लोल ।

*ऊर्ध्वं लोलति इति उल्लोलः ।

**उशती**–સ્ત્રી–૨૭૩–(શિ. १८)–ખરાબ શબ્દ. અમાંગલિક શબ્દ.

☐रुशती ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**उशनस्**–पुं ११९–शुक्र.

☐शुक्र, मघाभव, काव्य भार्गव, कवि, षोडशार्चिष्, दैत्यगुरु (असुराचार्य) धिष्ण्य, [भृगु शे. ५] ।

* वष्टीति उशना, "वष्टेः कनस्" (उणा–९८५) ।

**उशस्**-स्त्री.–१४३ (शे. २०)–રાત્રી

द्र० इन्दुकान्ताशब्दः ।

**उशीर**–पुं न.–११५८–કાળા વાળાનું મૂળ.

☐वीरणीमूल, 'अभय, नलद, सेव्य, अमृणाल, जलाशय, लामज्जक, लघुलय, अवदाह, इष्टकापथ' ।

*उश्यते इति उशीरं पुंक्लीबलिङ्गः 'घसिवशि"–(उणा–४१९) इति किदीरः प्रत्ययः ।

**उषणा**–स्त्री–४२१ (शे. १०३)–પીપર.

द्र० उपकुल्याशब्दः ।

**उषर्बुध**–पुं–१०९९–અગ્નિ.

द्र० अग्निशब्दः ।

*उषसि रात्रौ बुध्यते इति उषर्बुधः, "वाऽह-र्पत्यादयः" (१।३।५८) इति साधु ।

**उषस्**–न.–१३९–પ્રભાત કાળ.

द्र० अहर्मुखशब्दः ।

*ओषत्यर्ककरैः इति उषः "मिथिरञ्ज्युषि"–(उणा–९७१) इति अस् प्रत्ययः ।

**उषा**-स्त्री–१४३–રાત્રિ.

द्र० इन्दुकान्ताशब्दः ।

*ओषति दहत्यहः क्लेशं इति उषा अव्ययमपि ।

**उषा**–स्त्री–१२६५–ગાય.

द्र० अघ्न्याशब्दः ।

*उषत्यशिवं इति उषा ।

**उषा**–स्त्री–१५३३–રાત્રિ

☐दोषा, नक्त ।

*उषति इति उषा बाहुलकात् कित् आप्रत्ययः, यथा उषातनो वायुः ।

**उषा**–स्त्री.–१५३६–નિશાંત રાત્રિનો છેડો, પ્રાતઃકાલ.

*उषति इति उषा यथा उषातनः ।

'**उषा**'–स्त्री–१०१९–થાળી તપેલી.

द्र० उखाशब्दः ।

**उषाकील**–पुं–१३२५ (शे. १८३)–કુકડો.

द्र० कुक्कुटशब्दः ।

(**उषारमण**)–पुं–२३०–કામનો પુત્ર.

द्र० अनिरुद्धशब्दः ।

**उषित**–पुं–१४८६–બળેલું.

☐प्लुष्ट, प्रुष्ट, दग्ध ।

उष्यते इति उषितः, उषेर्मतान्तरेण अत्र इट् ।

**उषेश**–पुं–२३०–કામનો પુત્ર.

द्र० अनिरुद्धशब्दः ।

*उषा बाणदुहिता तस्या ईशः इति उषेशः, यौगिकत्वात् उषारमणः ।

**उष्ट्र**–पुं–१२५४–ઊંટ.

☐क्रमेलक, कुलनाश, शिशुनामन्, शल, मोलि, मरुप्रिय, मय, महाङ्ग, वासन्त, द्विककुद्, दुर्गलङ्घन, भूतघ्न, दासेर, रवण, कण्टकाशन, दीर्घग्रीव, केलिकीर्ण, [मय–शि. १११] ।

*उष्यते दह्यते मरौ इति उष्ट्रः 'सूमूखन्युषिभ्यः कित्" (उणा–४४९) इति त्रट् ।

**उष्ण**–पुं–१५७–ગ્રીષ્મઋતુ, જેઠ અને અષાઢમાં.

☐उष्णागम, ग्रीष्म, निदाघ, तप, ऊष्म ऊष्मक, [ऊष्मायण, आखोर, पद्म शे. २५/२६] ।

*ओषति इति उष्णः "धृवीह्वा"–(उणा–१८३) इति णः कित् ।

**उष्ण**–पुं–३८४ દક્ષ, હોંશિયાર.

☐दक्ष, पेशल, पटु उष्णक, सूत्थान, चतुर ।

*ओषति दहतीति उष्णः, "घृवीह्वा"– (उणा–१८३) इति णक् ।

**उष्णक**–पुं–३८४–દક્ષ, હોંશિયાર.

द्र० उष्णशब्दः ।

*उष्णं क्षिप्रं करोति इति उष्णकः, "शीताच्च-कारिणि"–॥७।१।१८६॥ इति कः ।

(**उष्णवरण**)–न.–७१७–રાજાનું છત્ર.

द्र० आतपवारणशब्दः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**उष्णवीर्य**–पुं-१३५०-જલનો વાંદરો, શિશુમાર મચ્છ.

□शिशुमार, अम्बुकूर्म, महावस ।

*उष्णवीर्य: अस्य उष्णवीर्य: ।

**उष्णांशु**–पुं-९५-સૂર્ય.

द्र०अंशुशब्द: ।

*उष्णा: अंशव: अस्य स उष्णांशु: यौगिकत्वात् शीतेतररश्मि: ।

**उष्णागम**–पुं-१५७-ગ્રીષ્મ ઋતુ જેઠ અને અષાઢમાં.

द्र०उष्णशब्द: ।

उष्णस्य घर्मस्यागमोऽत्र इति उष्णागम: ।

**उष्णिका**–स्त्री–३९७–રાબડી, કાંજી.

□श्राणा, विलेपी विलेप्या, तरला, यवागू ।

*उष्णादग्नेरचिरोद्धृता इति उष्णिका, "उष्णात्" ॥७।१।१८५॥ इति संज्ञायां क: ।

**उष्णीष**–पुं न.–६५१–મુગટ.

□मुकुट, मौलि, किरीट, कोटीर, [मकुट शि. ५२] ।

*उषत्यश्रियं इति उष्णीषं, "उषेर्णोऽन्तच" (उणा –५५६) इतीष:, पुंक्लीबलिङ्ग: ।

**उष्णीष**–पुं न –६६७–પાઘડી, ફેંટો.

□मूर्धवेष्टन ।

*उषत्यश्रियं इति उष्णीष: पुंक्लीबलिङ्ग: ।

**उस्र**–पुं –९९–કિરણ.

द्र० अंशुशब्द: ।

*वसन्त्यस्मिन् रसा इति उस्र:, "ऋज्यजि"–(उणा–३८८) इत्यादिना र: कित् ।

**उस्रा**–स्त्री-१२६५-ગાય.

द्र०अघ्न्याशब्द: ।

*वसति क्षीरं अस्यां इति उस्रा, "ऋज्यजि"–(उणा-३८८) इति किद् र: ।

**उहार**–पुं –१३५३ (शि.१२२)–કાચબો.

द्र०कच्छपशब्द: ।

## "ऊ"

**ऊढा**–स्त्री–५१३–પત્ની, પરણેલી સ્ત્રી

□दारा, क्षेत्र, वधू, भार्या, जनी, जाया, परिग्रह, द्वितीया, कलत्र, सधर्मिणी, पत्नी, सहचरी, पाणिगृहीती गृहिणी, गृहा, [कराती, गेहिनी, सहधर्मिणी सधर्मचारिणी शि. ४०/४१]।

*उह्यते परिणीयते स्म इति ऊढा ।

**ऊत**–न.–१४८७–સીવેલું, વણેલું.

□स्यूत, उत, तन्तुसन्तत ।

*"ऊयैङ् तन्तुसन्ताने" ऊयते स्म इति ऊतम्, "य्वो: प्वय्व्यञ्जने"–॥४।४।१२१॥ इति य लोप: ।

**ऊधस्**–न.-१२७२–આંચળ

□आपीन ।

*उह्यते गवा, वहति क्षीरमिति वा ऊध: क्लीबलिङ्ग:, "छदिवहिभ्यां छन्दौधौ च" (उणा–९५४) इति अस् ।

**ऊधस्य**–न.–४०४–દૂધ.

□दुग्ध, सोमज, गोरस, क्षीर, स्तन्य पुंसवन, पयस् [योग्य, बालसात्म्य जीवनीय, रसोत्तम, सर, गव्य, मधुज्येष्ठ शि ९९/१००] ।

**ऊम्**–अ १५४२ (शि.२०१)–प्रश्नार्थ બતાવનાર.

**ऊरव्य**–स्त्री(બ.વ.)–८६४–વૈશ્ય.

द्र० अर्यशब्द: ।

*ऊर्वोर्भवा इति ऊरव्या: देहांशत्वाद् य: ।

**ऊरीकृत**–न.–१४८८–સ્વીકાર કરેલું.

द्र०अङ्गीकृतशब्द: ।

*ऊरीक्रियते स्म ऊरीकृतम् ।

**ऊरु**–पु –स्त्री ६१३–સાથળ.

□सक्थि ।

* इयर्त्यनेन इति ऊरु: पुंस्त्रीलिङ्ग: "अर्तेरुर् च" (उणा–७३६) इति युस् ।

**ऊरुज**–स्त्री–८६४–વૈશ્ય.

द्र०अर्यशब्द: ।

*ब्रह्मण ऊर्वोर्जाता इति ऊरुजा: **यत श्रुति:**– "ऊरू तदस्य यद्वैश्य:" इति ।

**ऊर्ज** स्त्री–७९६ (शि.७०)-પરાક્રમ.

द्र०ऊर्जशब्द: ।

**ऊर्ज**-पुं-१५५–કાર્તિક માસ.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

□कार्तिक, कार्तिकिक, बाहुल, [सैरिन् कौमुद शे.२४]।

*ऊर्जयन्ति बलिनो भवन्ति प्राणिनोऽत्र इति ऊर्जः "पुंनाम्नि घः" ॥५।३।१३०॥

**ऊर्ज्ज**–पुं-स्त्री–७९६–પરાક્રમ.

□प्राण, स्थामन, तरस्, पराक्रम, बल, द्युम्न, शौर्य, औजस्, शुष्म, शुष्मन्, शक्ति, सहस्, [द्रविण, ऊर्ज शि.७०]।

*ऊर्ज्जनं इति ऊर्ज्जः पुंस्त्रीलिङ्गः, ऊर्गपि।

**ऊर्जस्**-न–३००-ઉત્સાહ, વીરરસનો સ્થાયી ભાવ.

द्र०अध्यवसायशब्दः।

*ऊर्जनं इति ऊर्जः।

**ऊर्जस्वत**–वि ७९२–(शि.१९)–અતિશય પરાક્રમી.

□ऊर्जस्विन् ऊर्जस्वल।

**ऊर्जस्विन्**–वि. ७९२–અતિશય પરાક્રમી

□ऊर्जस्वल [ऊर्जस्वत् शि. १९]।

*ऊर्ग् बलमस्ति अस्य ऊर्जस्वी।

**ऊर्जस्वल**–पुं–७९२–અતિશય પરાક્રમી

□ऊर्जस्विन् [ऊर्जस्वात् शि. १९]।

*ऊर्जस्वलः ऊर्जातिशयान्वितः "ऊर्जोविन्वलावस् चान्तः" ॥७।२।५१॥ इति साधु ऊर्जस्वानपि।

**ऊर्णनाभ**–पुं–१२१०–કરોળિયો, લુતા

द्र०अष्टपाद्शब्दः।

*ऊर्णा नाभावस्य ऊर्णनाभः।

**ऊर्णायु**–पु–६७०–ઉનનું વસ્ત્ર કાંબલ.

द्र०आविकशब्दः।

*ऊर्णाः सन्त्यत्रोर्णायुः, पुंलिङ्गः "ऊर्णाहं"-॥७।२।५७॥ इति युस्।

**ऊर्णायु**–पु–१२७६–ઘેટો.

द्र०अविशब्दः।

*ऊर्णाऽस्त्यस्य ऊर्णायुः 'ऊर्णाहं'–॥७।२।५७॥ इति युस्।

**ऊर्ध्व**–पुं–४९२–ઊભેલો.

□ऊर्ध्वन्दम, स्थित।

*ऊर्दते परिमाति क्रीडति वा ऊर्ध्वः "उदेर्घ च" (उणा–५०७) इति वः।

**ऊर्ध्वक**–पुं–२९३–ઊંચા મુખવાળું મૃદંગ.

□(आभोगिक)।

*ऊर्ध्वं कृत्वैकेन मुखेन वादनाद् ऊर्ध्वं कायति ऊर्ध्वक. आभोगिकाख्यः, **आहुश्च**–

"हरीतक्या कृतिस्त्वङ्क्यो, यवमध्यस्तयोर्ध्वकः।
आलिङ्ग्यश्चैव गोपुच्छो, मध्यदक्षिणवामगाः॥"

**ऊर्ध्वकच**–पुं–१२२ (शे. १७)–કેતુગ્રહ.

□आहिक, अश्लेषाभू, शिखिन, केतु।

**ऊर्ध्वकर्मन्**–पुं–२१९(शे.१८)–विष्णु, નારાયણ.

द्र०अच्युतशब्दः।

**ऊर्ध्वक्षिप्त**–न.–१४८२–ઊંચે ફેકેલું.

□उदञ्चित, [उदस्त शि.१३३]

*ऊर्ध्वं क्षिप्यते स्म इति ऊर्ध्वक्षिप्तम्।

**ऊर्ध्वजानुक**–पुं–४५५–ઊંચા ઢીંચણવાળો.

ऊर्ध्वज्ञु, ऊर्ध्वज्ञ।

**ऊर्ध्वज्ञ**–पुं–४५६–ઊંચા ઢીંચણવાળો.

□ऊर्ध्वज्ञु, ऊर्ध्वजानुक।

*ऊर्ध्वज्ञः "वोर्ध्वात्"–॥७।३।१५६॥ इति साधु।

**ऊर्ध्वज्ञु**-पुं.–४५६–ઊંચા ઢીંચણવાળો.

□ऊर्ध्वज्ञ, ऊर्ध्वजानुक।

*ऊर्ध्वे जानुनी अस्य इति ऊर्ध्वज्ञुः।

**ऊर्ध्वन्दम**–पुं–४९२–ઊભેલો.

□ऊर्ध्व, स्थित।

ऊर्ध्वं दाम्यति ऊर्ध्वन्दमः, अध्यात्मादावूर्ध्वंदमपाटान्मोऽन्तः, ऊर्ध्वमिति मान्तमव्ययं वा।

**(ऊर्ध्वदेहिक)**-न–३७४-મરેલાની પાછળ તે દિવસે દાન કરવું તે.

□और्ध्वदेहिक, [और्ध्वदैहिक शि. २५]।

**ऊर्ध्वलिङ्ग**–पुं–१९६–શંકર, મહાદેવ.

द्र०अट्टहासिन्शब्दः।

*ऊर्ध्वं लिङ्गमस्य इति ऊर्ध्वलिङ्ग. नकुलीशमूर्तौ।

**ऊर्ध्वलोक**–पुं–८७–સ્વર્ગ

□स्वर्ग, त्रिविष्टप, (त्रिपिष्टप), द्यो, दिव्, भुविष्, तविष, ताविष नाक, गो, त्रिदिव, सुरालय, (त्रिदशावास,

देवलोक इत्यादि] [फलोदय, मेरुपृष्ठ, वासवावास, सैरिक, दिदिवि दीदिवि, द्यु, दिव शे. ३] ।

*ऊर्ध्वश्चासौ लोकश्च इति ऊर्ध्वलोकः ।

**ऊर्मि**-પું-સ્ત્રી-૧૦૭૫-પાણીના મોજા, લહેરો.

द्र० उत्कलिकाशब्दः ।

*इयर्ति इति ऊर्मिः, पुंस्त्रीलिङ्गः, "ऋतेरूच्चातः" (उणा-६८९) इति मिः ।

**ऊर्मिका**-સ્ત્રી-૬૬૩-વીંટી, વેઢ.

☐अङ्गुलीयक ।

*ऊर्मिप्रतिकृतिः इति ऊर्मिका ।

**ऊर्मिमत्**-ન.-૧૪૫૭-વાંકુ.

द्र० अरालशब्दः ।

*ऊर्मयो भङ्गाः सन्ति अस्य इति ऊर्मिमत् ।

**ऊल्ब** પું ન.-૫૪૦-શુક્ર અને રૂધિરનું મિશ્રણ.

☐कलल ।

*अलति इति ऊल्बम्, पुंक्लीबलिङ्गः, शुक्रशोणितसमवायः ।

**'ऊर्व'**-પું-૧૧૦૦-વડવાનલ.

द्र० और्वशब्दः ।

**ऊष**-પું-૯૪૦-ખારી માટી.

*ऊषति ऋजति इति ऊषः ।

**ऊषण**-ન.-૪૧૯-કાળામરી.

☐मरिच, कृष्णाभ, कोलक, वेल्लज, धार्मपत्तन, यवनप्रिय [द्वारवृत्त, मरीच, बलित शे. १०२] ।

*ऊषति रुजति इति ऊषणम् ।

**ऊषणा**-સ્ત્રી-૪૨૧ (શે. ૧૦૨)-પીપર.

द्र० उपकुल्याशब्दः ।

**ऊषर**-ન.-૯૩૯-અનાજ ન ઊગે તેવી ભૂમિ, ઉખર ભૂમિ.

☐इरिण ।

*ऊषस्य निवास इति ऊषरम्, "रोऽश्मादेः" (६।२।७१) इति चातुरर्थिको रः, ऊषोऽस्यास्तीति वा मध्वादित्वाद् रः ।

**ऊष्म**-પું-૧૫૭-ગ્રીષ્મઋતુ, જેઠ અને અષાઢમાં.

द्र० उष्णशब्दः

* ऊष्मयति इति ऊष्मः ऊष्मप्रतिकृतिर्वा ।

**(ऊष्मक)**-પું-૧૫૭-ગ્રીષ્મઋતુ, જેઠ અને અષાઢમાં

द्र० उष्णशब्दः ।

**ऊष्मन्**-પું-૧૧૦૨-ગરમી, હુંફ.

☐बाष्प ।

*ऊषति रुजति इति ऊष्मा, पुंलिङ्गः, "मन्" (उणा-९११) इति मन् ।

**ऊष्मायण**-ન.-૧૫૭ (શે. ૨૫)-ગ્રીષ્મઋતુ જેઠ અને અષાઢમાં.

द्र० उष्णशब्दः ।

**ऊह**-પું-૩૧૧-યુક્તિ પૂર્વક વિચારવું તે. બુદ્ધિનો પાંચમો ગુણ.

*ऊहनं इति ऊहः युक्तिगम्यतर्कः ।

**ऊह**-ન -૩૨૩-વિચારણા.

द्र० अध्याहारशब्दः ।

*ऊहनं इति ऊहः ऊहाऽपि ।

**ऊहा**-સ્ત્રી-૩૧૧ (શિ. ૧૯) યુક્તિપૂર્વક વિચારવું તે, બુદ્ધિનો પાંચમો ગુણ.

**(ऊहा)**-સ્ત્રી-૩૨૩-વિચારણા.

द्र० अध्याहारशब्दः ।

*ऊहनं इति ऊहा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## 'ऋ'

**ऋवण**–न.–१९२–धन.

द्र० अर्थशब्दः ।

*ऋच्यते स्तूयते ऋक्णं "वृवीह्वा"(उणा -१८३) इति बहुवचनात् णक् ।

**ऋक्थ**–न–१९२–धन.

द्र० अर्थशब्दः ।

*ऋच्यते स्तूयते इति **ऋक्थम्**, "नीनूरमि–" (उणा–२२७) इति बहुवचनाद् थक् ।

**ऋक्ष**–न.–१०८–नक्षत्र, तारा.

द्र० उडुशब्दः ।

*अर्यते गच्छति इति ऋक्षं "ऋजिरिषि"–(उणा-५६७) इत्यादिना सः कित्, ऋक्ष्णोति तम् इति वा ।

**ऋक्ष** पुं–१२८९–रींछ.

द्र० अच्छभल्लशब्दः ।

*ऋज्यति ऋक्षः "ऋजिरिषि"–(उणा ५६७) इति कित् सः ऋक्ष्णोति इति वा ।

**ऋग्विद्**–पुं–८१९–ऋग्वेद जाणनार ब्राह्मण.

☐होतृ ।

*ऋग्वेदं वेत्ति इति ऋग्वित् ।

(**ऋग्वेद**)–पुं–२४९–वेदनो प्रकार ऋग्वेद.

☐ऋच् ।

*ऋच्यते स्तूयतेऽनया ऋक् स्त्रीलिङ्गः, ऋक् च वेदश्च ऋग्वेदः ।

**ऋच्**–पुं–२४९–ऋग्वेद

☐(ऋग्वेद) ।

*ऋच्यते स्तूयतेऽनया ऋक् स्त्रीलिङ्गः ।

**ऋचीष**–न.–१०२०–लोढी, कढाडुं.

☐ऋजीष ।

*ऋच्यते स्तूयते पाकोत्कर्षाद् ऋचीषं "ऋजिशृ"– (उणा–५५४) इति बहुवचनादीषः ।

**ऋजीष**–न.–१०२०–लोढी, कढाडुं.

☐ऋचीष ।

*ऋज्यते इति ऋजीषं "ऋजिशृ–(उणा–५४४) इति किदीषः, पिष्टकृतस्य भक्ष्यस्य पाकं बिभर्ति पिष्टपाकभृद्भाजनविशेषः ।

**ऋजु**–पुं–३७५–सरळ.

☐प्राञ्जल, अञ्जस ।

*अर्ज्यते इति ऋजुः "अर्जेर्ऋज् च" (उणा –७२२) इति उः ।

**ऋजु**–पुं–१४५६–सरळ, सीधुं.

☐अजिह्म, प्रगुण ।

*अर्ज्यते इति ऋजुः "अर्जेर्ऋज च"–(उणा–७२२) इत्युः तत्र ।

(**ऋजुरोहित**)–न–१७९–इन्द्रनुं सरळ धनुष्य.

☐रोहित ।

*देवेन्द्रधनुरुत्पाते ऋजु अवक्रं, रोहो संजातोऽस्य रोहितम्, रोहितवर्णत्वाद् वा, केचित्तु ऋजुरोहितमिति समस्तमिच्छन्ति ।

**ऋण**–न.–८८१–करज, देवुं.

☐उद्धार, पर्युदञ्चन ।

*अर्यते स्म ऋणम्, "ऋह्रिघ्रा"–(४।२।७६) इति क्तस्य नत्वं ।

**ऋत** न.–२६४–सत्य, साचुं.

☐सत्य, सम्यक्, समीचीन, तथ्य, यथातथ, यथास्थित, सद्भूत ।

*इयर्ति गच्छति जनः प्रत्ययमत्र ऋतम्, "शीरी"–(उणा–२०१) इति तक् ।

**ऋत**–न–८६६–खेतरमां पडेला दाणा, मंजरीने ग्रहण करवुं ते.

☐उञ्छशिल ।

**ऋतु**–स्त्री–१५५–ऋतु.

*इयर्ति ऋतुः पुंसि **यत् कात्यः**-"आदाय मार्गशीर्षाच्च द्वौ द्वौ मासावृतुर्मतः हेमन्तादिः वत्सरस्य आरम्भः।

**ऋतु**–पुं–५३६–रजसनो काल.

*रजसः कालः समयस्तत्कालः इयर्ति ऋतुः पुंलिङ्गः, "अञ्जर्तेः कित्" (उणा-७७७) इति तुन् ।

**ऋतुमती**–स्त्री–५३५–रजस्वला स्त्री.

द्र० अधिशब्दः ।

*ऋतू रजोऽस्या अस्ति ऋतुमति ।

**ऋतुवृत्ति**–पुं–१५९ (शे. २१)–वरस

द्र० अनुवत्सरशब्दः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**ऋते**-અ.-૧૫૨૭-વિના, વગર, સિવાય.

द्र० अन्तरेणशब्दः ।

*ऋते इति सप्तम्यन्तप्रतिरूपकम्, यथा-"ऋते कृशानोर्न हिमन्त्रपूतम्" ।

**ऋद्ध**-पुं-૩૫૭-ધનાઢ્ય, પૈસાદાર.

द्र० आढ्यशब्दः ।

*ऋध्यति स्म ऋद्धः समृद्धः । ।

**ऋद्ध**-न-૧૧૮૩-મસળેલું અનાજ.

द्र० आवसितशब्दः ।

**ऋद्धि**-स्त्री-૩૫૭-સંપત્તિ, સમૃદ્ધિ.

□विभूति, संपति, श्री, लक्ष्मी, संपत् ।

*अर्धनं इति ऋद्धिः ।

**ऋभु**-पुं-૮૮ (બ.વ.)-દેવતા.

द्र० अनिमिषशब्दः ।

*रभन्ते पुण्यकार्येषु उत्सुका भवन्तीति ऋभवः, "रभि प्रथि"-(उणा-७३०) इति उ प्रत्ययः ऋशब्दोऽदितिवाची ततो भवन्तीति वा "केवयुभुरण्" उणा-७४५) इति डुः ।

**ऋभुक्षिन्**-पुं-૧૭૨-ઈન્દ્ર.

द्र० अच्युताग्रजशब्दः ।

*इयर्ति इति ऋभुक्षाः "अर्ते र्भुक्षिनक्"-(उणा-९२८) ऋभून् देवान् क्षयत्यधिवसति **इत्यन्ये** ।

**ऋश्य**-पुं-૧૨૯૪-એકપ્રકારની હરણજાતિ.

*'ऋश गतौ स्तुतौ वा' स्वरादिस्तालव्यान्तश्च ऋश्यते ऋश्यः हरिणः प्रायो मृदुशृङ्गः "ऋशिजनि-" (उणा-३६१) इति किद् यः ।

**ऋषभ**-पुं-૨૬-પ્રથમ તીર્થંકર.

*ऋषति गच्छति परमपदमिति "ऋषिवृषिलुसिभ्यः कित्" (उणा-३३९) इत्यभे ऋषभः, यद्वा ऊर्वोर्वृषभलाञ्छनमभूद् भगवतो जनन्या च चतुर्दशानां स्वप्नानामादावृषभो दृष्टस्तेन ऋषभः ।

**ऋषभ**-पुं-૨૯-પ્રથમ તીર્થંકર.

*वृषलाञ्छनत्वाद् ऋषभः ।

**ऋषभ**-पुं-૧૨૫૬-બળદ

द्र० अनड्वान्शब्दः ।

*ऋषति गच्छति ऋषभः ।

**ऋषभ**-पुं-૧૪૦૧-સ્વરનું નામ.

ऋषभो गोरुत संवादित्वात् **यदाह व्याडिः**-

वायुः समुत्थितो नाभेः, कण्ठशीर्षसमाहतः ।
नर्दत्वृषभवद् यस्मात्, तेनैष ऋषभः स्मृतः ।"

**ऋषभ**-पुं-૧૪૪૦-આ શબ્દ ઉત્તરપદમાં લગાડવાથી પ્રશંસાવાચક શબ્દ બને છે.

**ऋषि**-पुं-૭૬-સાધુ, મુનિ.

द्र० अनगारशब्दः ।

ऋषति जानाति तत्त्वं इति ऋषिः "नामुपान्त्य"-(उणा-६०९) इति किः, दर्शनाद्वा ऋषिः **यद् भट्टतोतः** "ऋषिश्च किल दर्शनादिति" ।

**ऋषिकुल्या**-स्त्री-૧૦૮૨-ગંગાનદી.

□गंगा, त्रिपथगा, भागीरथी, त्रिदशदीर्घिका, त्रिस्रोता, जाह्नवी, मन्दाकिनी, भीष्मसू, कुमारसू, सरिद्वरा, विष्णुपदी, सिद्धापगा, स्वरापगा, स्वर्ग्यापगा, खापगा, हैमवती, स्वर्वापी, हरशेखरा ।

ऋषीणां कुल्या इति ऋषिकुल्य ।

**ऋष्टि**-स्त्री-૭૮૨-તલવાર.

द्र० असिशब्दः ।

*ऋषति पाणिं गच्छति इति ऋष्टिः, स्वरादिः ।

**'ऋष्य'**-पुं-૧૨૯૪-એક પ્રકારની હરણજાતિ.

(**ऋष्यकेतु**)-पुं-२३०- કામનો પુત્ર.

द्र० अनिरुध्धशब्दः ।

**'ऋष्यप्रोक्ता'**-पुं-૧૧૫૧

**ऋष्याङ्क**-पुं-૨૩૦-કામનોપુત્ર.

द्र० अनिरुद्धशब्दः ।

*ऋष्यनामा मृगोऽङ्कश्चिह्नं यस्य ऋष्याङ्कः, यौगिकत्वाद् ऋष्यकेतुः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ए

**एक**–પું–૮૭૩–એક.

**एक**–પું–૧૪૫૭–એકલો.

☐एकाकिन्, एकक, [अवगण शि. १३०]

*एति इति एकः ।

**एक**–પું–૧૪૬૮-ભિન્ન, જુદું.

द्र० अन्यद्शब्दः ।

*एति इति एकम्, यथा–इत्येके मन्यन्ते, यत् **कात्यः** "प्रधानान्यासहायेसु सङ्ख्यायां चैक इष्यते" ।

**एकक**–પું–૧૪૫૭–એકલો

द्र० एक शब्दः

*एक एव इति एककः, असहाय इत्यर्थः "एकादाकिन् चासहाये" ॥७।३।२७॥ इति साधुः अवगणोऽपि ।

**एककुण्डल**–२२४–બળદેવ

द्र० अच्युताग्रजशब्दः ।

*एकं कुण्डलमस्य एककुण्डलः, शेषमूर्तित्वात् ।

**एककुण्डल**–પું–૧૩૦૭ (શિ. ૧૧૬)–શેષનાગ

द्र० अनन्तशब्दः ।

**एकगुरु**–પું–૭૯-ગુરુભાઈ, સહાધ્યાયી.

सतीर्थ्य ।

*एकः समानो गुरुरेषामेकगुरवः

**'एकतर'**–પું–૧૪૬૮–ભિન્ન

द्र० अन्यद्शब्दः ।

**एकतान**–ન.–૧૪૫૮–એકાગ્ર

द्र० अनन्यवृत्तिशब्दः ।

*एकमविच्छिन्नं तननं विस्तारोऽस्य एकतानम् ।

**एकताल**–પું–૧૪૧૦–ગીત વાજીંત્ર આદિનું સરખાપણું.

☐लयानुग ।

*एकः समस्तालो मानमस्य एकतालः, अभिन्नकालमान इत्यर्थः ।

**एकदन्त**–પું–૨૦૭–ગણેશ, વિનાયક, ગણપતિ.

द्र० आखुगशब्दः ।

*एको दक्षिणो दन्तोऽस्य एकदन्तः ।

**एकदा**–અ.–૧૫૪૨ (શે. ૨૦૪) એકસમયે

☐[युगपद् शे.२०४]

**एकदा**–અ.–૧૫૪૨–(શે. ૨૦૪) બીજેવખતે, એક વખતે.

* अन्यदा [शे. २०४]

**एकदृश्**–પું–૧૯૬–શંકર, મહાદેવ.

द्र० अट्टहासिन्शब्दः ।

*एका दृक् यस्य स एकदृक्, अर्धनारीश्वर–मूर्तौ महेश्वराऽङ्गस्य एकदृक्त्वात्, यौगिकत्वात् एकनेत्रः ।

**एकदृश**–પું–૪૫૩–કાણો, એકાક્ષ

☐काण, कनन (एकाक्ष) ।

**एकदृश्**–પું–૧૩૨૨–કાગડો

द्र० अन्यभृत् शब्दः ।

*एका दृक् एकदृगस्य रामेण काणीकृतत्वात् ।

* एकदृश् एकाक्षः ।

**एकदृश्**–પું–૨૧૯ (શે. ૬૬)-વિષ્ણુ, નારાયણ

द्र० अच्युतशब्दः ।

**एकधुर**–પું–૧૨૬૨–એક ધોસરીને વહન કરનાર બળદ.

☐एकधुरीण ।

*एका एकस्य वा धूरेकधुरा तां वहति इति एकधुरः ।

**एकधुरीण**–પું–૧૨૬૨–એક ધોસરીને વહન કરનાર બળદ.

☐एकधुर ।

*एका एकस्य वा धूरेकधूरा तां वहति इति एकधुरः "अश्वैकादेः" (७।१।५) इतीनोऽकारश्च-प्रत्ययौ ।

**(एकनेत्र)**–પું–૧૯૬–શંકર, મહાદેવ.

द्र० अट्टहासिन् शब्दः ।

**एकपत्नी** સ્ત્રી–૫૨૮–પતિવ્રતા સ્ત્રી

☐पतिव्रता, सुचरित्रा, साध्वी, सती ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*एक पतिरस्या एकपत्नी "सपन्यादौ" (२।४।५०) इति ङ्यां साधुः ।

**एकपदी** स्त्री-९८३-માર્ગ, રસ્તો.
द्र० अध्वन्शब्दः ।

**एकपदे**-अ.-१५३२-એકદમ, તત્કાલ.
द्र० अकस्मात् शब्दः ।
*एक पदे विभक्त्यन्तप्रतिरूपकम् यथा "अयमेकपदे तया वियोगः" ।

**एकपर्णा**-स्त्री-२०५ (શે. ५२)શંકરની પત્ની-પાર્વતી.
द्र० अद्रिजाशब्दः ।

**एकपाटला**-स्त्री-२०५ शे· ५२)-શંકરની પત્ની પાર્વતી
द्र० अद्रिजाशब्दः ।

**एकपाद्**-पुं-१९६-શંકર, મહાદેવ.
द्र० अट्टहासिन् शब्दः ।
*अर्धनारीश्वरमूर्तौ एकः पादोऽस्य एकपात् "सुसंख्यात्" (७।३।१५०) इति पादस्य पाद्भावः ।

**एकपिङ्ग**-पुं-१८९-કુબેરદેવ.
द्र० इच्छावसुशब्दः ।
*एकं पिङ्गमस्य एकपिङ्गः, पिङ्गलैकनेत्रत्वात् अतएव भागुरिणा हर्यक्ष उक्तः ।

**एकभू** पुं-१०५-ચન્દ્રમા. ચન્દ્ર.
द्र० अत्रिदृग्जशब्दः ।

**एकयष्टिका**—स्त्री-६६१-એક શેરનો હાર, કંઠી.
□एकावली, कण्ठिका ।
*एका यष्टिरस्या इति एकयष्टिका ।

**एकवर्षा** स्त्री-१२७२-એક વરસની ગાય.
□एकहायनी ।

**एकशफ**-पुं १२३२ (શે. १८०)-ઘોડો.
द्र० अर्वन्शब्दः ।

**एकशृङ्ग** पुं-२१९ (શે. ७६)—વિષ્ણુ, નારાયણ.
द्र० अच्युत शब्दः ।

**एकसर्ग**-न.-१४५८-એકાગ્ર.
द्र० अनन्यवृत्तिशब्दः ।
*एकः सर्गो निश्चयोऽस्य एकसर्गम् ।

**एकहायनी**-स्त्री-१२७२-એક વરસની ગાય.
□एकवर्षा ।

**एकाकिन्**-पुं-१४५७-એકલો.
द्र० एक शब्दः ।
*एक एव एकाकी ।

**(एकाक्ष)**-पुं-४५६ કાણો, એક આંખવાળો.
□काण, कनन एकदृश् ।

**एकाग्र**-न.-१४५८-એકાગ્ર.
द्र० अनन्यवृत्तिशब्दः ।
* एकमग्रं पुरोगतमस्त्यस्य एकाग्रम् ।

**'एकाऽय'**-न.-१४५८-એકાગ્ર.
द्र० अनन्यवृत्तिशब्दः ।

**एकाङ्ग**-पुं-११७ (શે. १४)-મંગલગ્રહ
द्र० अङ्गारकशब्दः ।

**एकाङ्ग** पुं-२१९ (શે. ७१)-વિષ્ણુ, નારાયણ.
द्र० अच्युतशब्दः ।

**एकाङ्ग**-न.-६४१ (શે. १३१)-ચંદન, સુખડ.
□श्रीखण्ड, रोहणद्रुम, गन्धसार मलयजचन्दन, [भद्रश्री, फलकिन् शे. १३१]

**एकादशोत्तम**—पुं-२०० શે. ४६)શંકર, મહાદેવ.
द्र० अट्टहासिन् शब्दः ।

**एकानासी**-स्त्री-२०५-(શે. ५६) પાર્વતી
द्र० अद्रिजाशब्दः ।

**एकान्त**-न.-७४२ એકાંત.
द्र० उपह्वरशब्दः ।
* एको न तु द्वितीयोऽन्ते समीपेऽत्रैकान्तम् ।

**एकान्त**-न.-१५०६ અતિશય, ઘણું.
द्र० अतिमात्रशब्दः ।
* ए ोऽन्तो निश्चयोऽत्र एकान्तम् ।

**एकान्तदुःषमा**-स्त्री-१३१-એકાંતેદુઃખવાળો આરો.
* एकान्तेन दुःषमा सुषमानुभावरहिता एकान्तदुःषमा, दुःषमदुःषमेत्यर्थः, तदाख्यः षष्ठोऽरः, तावती दुःषमावदेकविंशतिवर्षसहस्रप्रमाणा ।

**एकान्त सुषमा**-स्त्री-१२९-એકાંતે સુખવાળોઆરો
* एकान्तेन सुषमा दुःषमानुभावरहिता एकान्तसुषमा सुषमसुषमेत्यर्थः प्रथमोऽरः, सागराणां सागरोपमानां चतस्रश्चतुस्संख्याः कोटिनां कोटयो भवन्ति, चतुस्सा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गरोपमकोटाकोटिप्रमाणा इत्यर्थः ।

**एकायन**–न.–१४५८–એકાગ્ર.

द्र० अनन्यवृत्तिशब्दः ।

*एकमयनं गतिरस्य एकायनम् ।

**एकायनगत**-न.–१४५८–એકાગ્ર

द्र० अनन्यवृत्तिशब्दः ।

* एकमयनं गतमेकायनगतम् ।

**एकावली**-स्त्री–६६१–એક સેરનો હાર, કંઠી.

☐एकयष्टिका, कण्ठिका ।

*एका आवलते इति एकावली ।

**एड** पुं–४५४–બહેરો.

☐अकर्ण, बधिर, (श्रुतिविकल) ।

* एड पशुरिव, आ ईड्यते वा ।

**एडक** पुं–१२७६–ઘેટો.

द्र० अविशब्दः ।

*ईड्यते देवता अनेन एडकः, "कीचक"–(उणा-३३) इत्यके निपात्यते ।

**एडगज**-पुं–११५८–કુંવાડિયો, પુંવાડીઆનુ વૃક્ષ.

☐प्रपुन्नाट, दद्रुघ्न, चक्रमर्दक, प्रपुन्नाड, प्रपुन्नाल, प्रपुनाल, प्रपुनाड, प्रपुनड, एलगज, दद्रुघ्न, पद्माट, उरणाख्य ।

*एडवद् मेषाक्षत्वाद् गज्यते शब्द्यते इति एडगजः ।

**एडमूक**-पुं–३४८–બહેરો અને મુંગો.

द्र० अनेडमूकशब्दः ।

*एडो बधिरः मूकोऽवाक् एडश्चासौ मूकश्च एडमूकः, "कलमूकस्त्ववाक्श्रुतिः" इति **हलायुधः** ।

**एडूक**-पुं–१००३–જેમાં હાડકા રાખવામાં આવ્યા હોય તેવી ભીંત.

☐एड्यति इति एडूकम्, "शम्बूकशाम्बुक"–(उणा-६१)इत्यूके निपात्यते ।

**एण**–पुं–१२९४–હરણનો એક પ્રકાર.

*एति इति एणः "इणुर्विश"–(उणा–१८२) इति णः ।

**एणभृत्**–पुं–१०५–ચંદ્ર, ચંદ્રમા.

द्र० अत्रिदृग्जशब्दः ।

*एणं बिभर्ति एणभृत् यौगिकत्वात् मृगलाञ्छनः।

**एत**–पुं–१३९८–કાબર ચીતરો વર્ણ, તરેહવાર વર્ણ.

☐कर्बुर, किर्मीर, 'कर्मीर' शबल, चित्र, कल्माष, चित्रल ।

*एति इति एतः,"दम्यमि"–(उणा-२००)इति तः ।

**एतन**–पुं–१३६८–બહારનો શ્વાસ નિઃશ્વાસ.

☐निःश्वास, पान ।

*एति इति एतनः "वीपति"–(उणा-२९२) इति बहुवचनात् तनः ।

**एतन**-पुं–१३४५ (शे. १९६)-હજાર દાઢ વાળો મચ્છ.

☐सहस्रदंष्ट्र,वादाल, [जलवाल, वदाल-शे.१९७]।

**एतर्हि**–अ.–१५३०–હમણાં, હાલ.

द्र० अधुनाशब्दः ।

*अस्मिन् काले इति एतर्हि "सदासुनेदानींतदा"–(७।२।९३) इति साधुः, यथा–"भवन्तमेतर्हि मनस्विगर्हिते" इति ।

**एतस**–पुं–८१३–બ્રાહ્મણ.

द्र० अग्रजशब्दः ।

एतीत्येतसः "इणः"–(उणा–५८१) इति तसः ।

**एधः**–पुं–८२७–લાકડાં, બળતણ.

द्र० इध्मशब्दः ।

*"दशनाऽवोदै"–(४।२।५४) इति निपातनाद् नलोपे घञि एधः ।

**एधस्**–न.–८२७–લાકડાં, બળતણ.

द्र० इध्मशब्दः ।

*इध्यतेऽनेन इति एधः क्लीबलिङ्गः, "येन्धिभ्यां यादेधौ च" (उणा–९६८) इत्यस् ।

**एधित**–न.–१४९५–ઘણું વધેલુ, પ્રૌઢ.

☐प्रवृद्ध, प्रौढ ।

*एधते स्म एधितम् ।

**एनस्**–न.–१३८०–પાપ, અશુભ.

द्र० अंहस्शब्दः ।

*एत्येनः क्लीबलिङ्गः, "अर्त्तिणिभ्यां"–(उणा–९७९) इति नस् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**एरण्ड**-पुं-११५०—એરંડો.

□पञ्चाङ्गुल, 'व्याघ्रपुच्छ, गन्धर्वहस्तक, उरुवूक, (उरुवुक) रुवुक, रुवूक, रुचक, चित्रक, चञ्चु, मण्ड, बर्द्धमान, व्यडम्बक, (व्यडम्बन)

*ईरयति वायुमेरण्डः "पिचण्डैरण्ड"(उणा–१७६) इत्यण्डे निपात्यते ।

**'एरावत'**-पुं-११४३-નારંગીનું ઝાડ

द्र० नागरङ्गशब्दः ।

**एर्वारु**-स्त्री-११८९-કાકડી.

□चिर्भिटी, कर्कटी, वालुङ्की, त्रपुसी, 'उर्वारु, उर्वालु, एर्वालु' ।

*उर्वति हिनस्त्यार्त्तिमेर्वारुः, पुंस्त्रीलिङ्गः "उर्वेरादेरुदेतौ च" (उणा–८१४) इत्यारुः ।

**'एर्वालु'**-स्त्री-११८९-કાકડી.

द्र० एर्वारुशब्दः ।

**'एलगज'**-पुं.-११५८-કુંવાડિયો.

द्र० एडगजशब्दः ।

**एव**-અ.-१५४२ (શ. २०१)-નિશ્ચય અર્થ બતાવનાર અવ્યય.

[द्र० इतिशब्दः शे० २०१] ।

**एव**-અ-१५४२ (શ. २००)-સરખાપણું બતાનાર અવ્યય.

□[वद्, वा, यथा, तथा एवम्. शे. २००] ।

**एवम्**-અ.-१५४२ (શ. २०१)-નિશ્ચય અર્થ બતાવનાર અવ્યય.

[द्र० इतिशब्दः शे. २०१] ।

**एवम्**-અ.-१५४२ (શ. २००) સરખાપણું બતાવનાર અવ્યય.

[द्र० एवशब्दः शे. २००] ।

**एषण**-पुं-७७९-લોઢાનું બાણ.

□प्रक्ष्वेडन, सर्वलौह, नाराच, [लोहनाल, अस्त्रसायक शे. १४४] ।

*इष्यतेऽनेन इति एषणः ।

**एषणा**-स्त्री-३८८-માંગણી કરવી.

द्र० अध्येषणाशब्दः ।

* एषणमेषणा "इषोऽनिच्छायाम्" (५।३।११२) इत्यनः ।

**एषणी**-न.-९२४-વ્રણ શોધવાનું ફોડવાનું શસ્ત્ર.

□नाराची ।

*इष्यते अन्विष्यते व्रणोऽनया इति एषणी, "इषोऽनिच्छायाम्" (५।३।११३) इत्यनः गौरादित्वात् ङीः ।

# ऐ

**ऐकागारिक**-पुं-३८२-ચોર.

□चोर, प्रतिरोधक, दस्यु, पाटच्चर-(पटचोर) स्तेन, तस्कर, पारिपन्थिक, परिमोषिन्, परास्कन्दिन्, मलिम्लुच, [चोरड, रात्रिचर, शे० ९५ चौर शि.२६] ।

*एकमसहायमगारं प्रयोजनमस्य ऐकागारिकः, "एकागाराच्चौरे" ॥६।४।१९८॥ इति इकण्

**ऐकाग्र**-न.-१४५८-એકાગ્ર.

द्र० अनन्यवृत्तिशब्दः ।

*एकाग्रमेवैकाग्र्यं प्रज्ञादित्वादण् ।

**(ऐडविड)**-पुं-१८९-કુબેર દેવતા.

द्र० इच्छावसुशब्दः ।

ईडयऽसांविति ईडविड् विश्रवाः "ईडेरविड् ह्रस्वश्च" (उणा–८७९) तस्यापत्यं ऐडविडः, इडविड् धनदमातेत्यन्ये ।

**ऐतिह्य**-ન.-२५९-ઇતિહાસ, જૂના જમાનાની વાત.

□ (पुरातनीवार्ता),

इति ह इति निपातसमुदायः,

*उपदेशपारम्पर्ये वर्तते, इतिह इत्येव ऐतिह्यम्, भेषजादित्वात् ष्यण् ।

**ऐन्द्रलुप्तिक**-पुं-४५२-ટાલીયો.

□खलति, खल्वाट, (खलत), शिपिविष्ट, बभ्रु, [खलत शि. ३२] ।

*इन्द्रलुप्तं केशघ्नं तेन चरत्यैन्द्रलुप्तिकः ।

**ऐन्द्रि**-पुं-७०९-અર્જુન.

द्र०अर्जुनशब्दः ।

□इन्द्रस्यापत्यं इति ऐन्द्रिः ।

**ऐन्द्री**-स्त्री-११३-જયેષ્ઠા નક્ષત્ર.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

☐ज्येष्ठा ।

*इन्द्रो देवताऽस्या इति ऐन्द्री ।

**(ऐन्द्री**-स्त्री-१६९-પૂર્વ દિશા.

**ऐरावण**-પું-१७७-ઇંદ્રનો હાથી, એરાવણ હાથી.

द्र०अभ्रमातङ्गशब्दः ।

*इरावणे भव इति ऐरावणः ।

**ऐरावत**-પું-ન.-૧૭૭-ઇંદ્રનો હાથી, ઐરાવણહાથી.

द्र० अभ्रमातङ्गशब्दः ।

*इरावत्यब्धौ जातः ऐरावतः पुंक्लीबलिङ्गः ।

**ऐरावत**-પું-૧૭૦-પૂર્વ દિશાનો દિગ્ગજ.

*इरावति अब्धौ जातः ऐरावतः "जाते" ॥६।३।९८॥ इत्यण् ।

**ऐरावत**-પું ન.-૧૮૦-ઇન્દ્રનું લાંબુ અને સરળ ધનુષ્ય.

*इरावति मेघेऽब्धौ वा भवं ऐरावतं पुंक्लीबलिङ्गः ।

**ऐरावत**-ન.-૯૪૬-એરાવત ક્ષેત્ર.

*इरावतीनां नदीनां निवासा ऐरावतानि ।

**ऐरावत**-પું-૧૧૪૩-નારંગીનું ઝાડ.

द्र०नागरङ्गशब्दः ।

**ऐरावती**-સ્ત્રી-૧૧૦૪-વીજળી.

द्र०अचिरप्रभाशब्दः ।

*ऐरावतोऽभ्रगो गजः तस्य स्त्री ऐरावती, इरावति मेघे समुद्रे वा भवेति वा ।

**ऐल**-પું-૭૦૧-પુરૂરવ રાજા, ઉર્વશીનો પતિ.

☐पुरुरवस्, बोध, उर्वशीरमण ।

*इलाया अपत्यमैलः, शिवादित्वादण् ।

**ऐलविल**-પું-૧૮૯-કુબેરદેવતા.

द्र०इच्छावसुशब्दः ।

*ईडयतेऽसाविति ईडविड् विश्रवाः "ईडेरविड् ह्रस्वश्च" (उणा-८७९) तस्याऽपत्यं ऐडविडः लत्वे ऐलविलः ईडविड् धनदमातेत्यन्ये ।

**ऐशानज** (બ. વ.)-પું—૯૩—બીજાદેવલોકમાં ઉત્પન્ન થયેલ દેવ.

ईशानस्येन्द्रस्य निवासः ऐशानः कल्पस्तत्र जाता ऐशानजाः ।

**(ऐशानी)**-સ્ત્રી-૧૬૯-ઇશાન ખૂણો.

**(ऐश्वर्य)**-ન-૨૦૨-અણિમા વગેરે આઠ ઐશ્વર્ય.

**ऐषमम्**-અ.-૧૫૪૨ (શે ૨૦૫) ચાલતુ વર્ષ.

## 'ओ'

**ओकस्**-ન.-૯૯૧-ઘર.

द्र०अगारशब्दः ।

*उच्यन्त्यस्मिन् ओकः क्लीबलिङ्गः, "उच्यञ्चेः कश्च" (उणा-९६५) इत्यस् ।

**ओघ**-પું-૨૯૨-શીઘ્ર ગતિ વાળું નૃત્યાદિ.

☐द्रुत ।

**ओघ**-પું-૧૦૮-પ્રવાહ.

☐प्रवाह, वेणी, धारा, रय ।

*वहत्योघः, न्यङ्क्वादित्वादविकृतघवो निपात्यते ।

**ओघ**-પું-૧૪૧૧-સમૂહ સમુદાય.

द्र०उत्करशब्दः ।

उह्यते इति ओघः, न्यङ्क्वादित्वाद् घञि साधुः ।

**ओङ्कार**-પું-૨૫૦-એક મંત્ર બીજ.

☐प्रणव ।

अवति विघ्नाद् ओं अव्ययम् "अवेर्मः" (उणा-९३३) इति मः ओमेव ओङ्कारः "वर्णात्ययात् स्वरुपे कारः" ।७।२।१५६॥ इति कारः ।

**ओजस्**-ન.-૭૯૬-પરાક્રમ.

द्र० ऊर्जशब्दः ।

*ओषत्यरीननेन ओजः क्लीबलिङ्गः "उषेर्ज च" (उणा-९५९) इत्यस् ।

**ओण्ड्र**-પું-૯૬૧-કેરળ, [મલવાર]. ઓરીસા દેશ.

☐केरल ।

*'ओणृ अपनयने' ओणन्ति ओण्ड्राः "खुरक्षुर"-(उणा-३९६) इति रे निपात्यते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**ओतु**–પું–१३०१–બિલાડો.

☐बिडाल, 'विडाल', मार्जार, हिंकु, वृषदंशक, 'आखुभुज्' ।

*अवति आखुभ्य इति ओतुः, "कृसिकमि"–(उणा–७७३) इति तुन् "मव्यवि"–।।४।१।१०९।। इत्यूटादेशे गुणः ।

**ओदन**–પું–३९५–ભાત.

द्र० अन्धस्शब्दः ।

*उन्नति क्लीद्यति इति ओदनः "उन्देर्नलुक् च"-(उणा-२७१) इत्यनः ।

**ओम्**–અ.–१५४०–સ્વીકાર જણાવનાર, હા.

☐आं, परमं ।

* अवति इति ओम्, 'अवेर्मः'–(उणा–९३३) इतिं मे "मव्यवि" –।।४।१।१०९।। इत्युपान्त्येन उत्वम्, ततो गुणः यथा–"ओमित्युक्तवतोऽथ शार्ङ्गिणः" इति ।

**ओषण**–પું–१३८९–કડુરસ, તીખુ.

☐कटु, मुखशोधन ।

*ओषति इति ओषणः ।

**ओषधि** स्त्री–१११७–ફળ પરિપક્વ થતાં જે વૃક્ષ નાશ પામેછે તે–ઘઉં, ડાંગર, જવ વગેરે.

☐औषधि, 'ओषधी, औषधी' ।

*ओषति इति ओषधिः, उषेरधिः, उषो धीयतेऽस्यामितिवा ।

**ओष्ठ**-પું–५८१–હોઠ.

द्र० अधरशब्दः ।

*उष्यते तीक्ष्णाहारेण ओष्ठः "वनिकणि"–(उणा –१६२) इति ठः ।

☐

## 'औ'

**औक्षक**–ન.–१४१६–બળદનો સમુહ.

*उक्ष्णां समूहः औक्षकम्, एवमन्येऽपि "गोत्रोक्षवत्सोष्ट्रवृद्धाजोरभ्रमनुष्यराजराजन्यराजपुत्रादकञ्" (६।२।१२) निपात्यते ।

**औजस**–ન.-१०४४ (શે. १६३)–સોનું.

द्र० अर्जुनशब्दः ।

**औड्रपुष्प**–ન.–११४७–જાયા પુષ્પ. જાસુદ, જાસ્વંદિ.

☐जपा 'ओड्रपुष्प जपापुष्प' [जवा शि. १०४]

*उड्रदेशे भवं पुष्पं औड्रपुष्पम् ।

**(औत्तानपाद)**–પું––१२२–ધ્રુવ.

द्र० उत्तानपादजशब्दः ।

**(औतानपादि)**–પું–१२२–ધ્રુવ.

द्र० उत्तानपादजशब्दः ।

**औत्सुक्य**–ન.–३१४–ઉત્સુકતા.

द्र० अरतिशब्दः ।

*उत्सुकस्य भाव औत्सुक्यं, विलम्बासहत्वम् ।

**औदनिक**–પું–७२२–રસોઇયો.

द्र० आरालिकशब्दः ।

*ओदने नियुक्त औदनिकः "तत्र नियुक्ते"(६।४।७४) इतीकण्, ओदने साधुरिति वा कथादित्वादिकण् ओदनाय शक्त इति वा "तस्मै योगादेः"–(६।४।९४) इतीकण् ।

**औदारिक**–પું–४२८-ઉદરપૂર્તિની ઇચ્છાવાળો.

☐आद्युन ।

*उदरे प्रसक्त औदारिकः "उदरे त्विकणाद्यूने" (७।१।१७१) इतीकण् ।

**औदारिक**–પું–४५० (શિ. ३२)-મોટા પેટવાળો.

द्र० उदरिन्शब्दः ।

**औदश्वित**–ન.–४११–અર્ધા પાણી વાળા દહીંથી સંસ્કારિત દ્રવ્ય.

☐औदश्वित्क ।

*उदश्विति संस्कृतं औदश्वितं, औदश्वित्कं "वोदश्वितः" (६।२।१४४) इतीकण्, पक्षेऽण् ।

**औदश्वित्क**–ન.–४११–અર્ધા પાણી વાળા દહીંથી

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संस्कारित द्रव्य.

□औदश्वित ।

**औदात्त्य**-न.-६५-उच्चवृत्तिपणुं.

*औदात्त्यं उच्चैर्वृत्तिता ।

**औदार्य**-न.-६९-तुच्छता विनानी वाणी. प्रभु वाणीनो २३मो अतिशय.

*औदार्यमभिधेयस्यार्थस्यातुच्छत्वम् ।

**औदार्य**-न.-५०९-वगर महेनते प्राप्त थनार ७ अलंकार पैकी बीजो अलंकार.

*औदार्यममर्षेर्ष्याद्यवस्थास्वपि प्रश्रयः ।

**औदुम्बर**-न.-१०३९ (शि. ९१)-त्रांबु.

द्र० उदुम्बरशब्दः ।

**औदुम्बर**-पु.-८१६-उदुम्बर वृक्षनो दंड.

□उलूखल ।

*उदुम्बरस्य विकारोऽवयवो वा औदुम्बरः ।

**(औद्दालक)**-न-१२१४-मधनी एक जाति.

**औपगवक**-न-१४१६-गोवाळ वगेरेनो समुह, समुदाय.

*उपगोरपत्यानि औपगवाः, तेषां समूह औपगवकं "गोत्रोक्ष-" (६।२।१२) इत्यकञ् ।

**(औपपातिक)**-न.-२४५-प्रथम उपांग सूत्र.

**औपम्य**-न.-१४६३-उपमा समानपणुं.

द्र० अनुकारशब्दः ।

*उपमैव औपम्यम्, भेषजादित्वात् ट्यण् ।

**औपयिक**-न.-७४३-योग्य, न्याययुक्त.

द्र० अभिनीतशब्दः ।

*उपाय एवौपयिकम्, "उपायाद् ह्रस्वश्च" (७।२।१७०) इति स्वार्थे इकणि साधुः अयं वाच्यलिङ्गः ।

**औपरोधिक**-पुं-८१५-पीलुनो दंड.

□पैलव ।

*समीपमागच्छतां दुष्टसत्त्वानां रोधो निवारणं प्रयोजनमस्य इकणि पृषोदरादित्वात् औपरोधिकः ।

**औपवस्त**-न-८४२-(शि. ७३)-उपवास.

□औपवस्त्र, उपवास, [उपवस्त्र शि. ७३] ।

**औपवस्त्र**-न.-८४२-उपवास.

□उपवास, [औपवस्त, उपवस्त्र शि. ७३] ।

*उपवसता प्राप्तोऽस्य औपवस्त्रं "ऋत्वादिभ्यः" (६।४।१२५) इत्यण्, "वसूच् स्तम्भे" इत्यस्मात् क्ते उपवस्तः तस्येदमौपवस्त्रमित्यन्ये, उपवस्त्रमित्येके, उपवस्तुरिदमिति अन्नाद्यपि, यत् **स्मृतिः**-

"माषान् मधुमसूरांश्च वर्जयेदौपवस्त्रके" ।

**औपवाह्य**-पुं-१२२२ (शि. ११०)-राजाने बेसवा योग्य हाथी.

□राजवाह्य, उपवाह्य, ।

**औमीन**-न.-९६७-अळसीनुं खेतर.

□उम्य ।

*उमानामौमीनम् ।

**औरभ्र**-पुं-६७०-ऊननुं वस्त्र, कांबळ.

द्र० आविकशब्दः ।

*उरभ्रस्य विकारः औरभ्रः "प्राण्यौषधि"- (६।२।३९) इत्यण् ।

**औरभ्रक**-न.-१४१७-घेटाओनो समूह.

*उरभ्राणां समूहः औरभ्रकम् ।

**औरस**-पुं-५५०-पोतानाथी स्वस्त्रीमां उत्पन्न थयेल पुत्र.

*उरसाकृत औरसः 'उरसो याणौ' (६।३।१९३) यत् **मनुः**-स्वक्षेत्रे संस्कृतायां तु, स्वयमुत्पादयेद् धियम् । तमौरसं विजानीयात्, पुत्रं प्राथमकल्पिकम् ॥

**और्ध्वदेहिक**-न.-३७४-मरेलानी पाछळ मरण दिवसे जे दान करवुं ते.

□(ऊर्ध्वदेहिक) [और्ध्वदेहिक शि. २५] ।

*मृतस्य अहनि दिवसे, तमुद्दिश्य दानं पिण्डोदकादि, ऊर्ध्वदेहाद् भवमौर्ध्वदेहिकम् अध्यात्मादित्वादिकण एकदेशविकृतत्वादूर्ध्वदेहिकम् अनुशतिकादिपाठमताश्रयणे तु उभयपदवृद्धौ और्ध्वदेहिकमपि ।

**और्ध्वदेहिक**-न.-३७४ (शि. २५)-मरेलानी पाछळ मरण दिवस जे दान करवुं ते.

□और्ध्वदेहिक, (ऊर्ध्वदेहिक) ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**और्व**–पुं–११००–વડવાનલ.
द्र० अब्ध्यग्निशब्दः ।
*ऊर्वस्यापत्यं इति और्वः, विदादित्वादञ्, दधीचिसूनोः पिप्पलादस्य उरूद्भवत्वादिति वा, वरुणभयान्मात्रा ऊर्वोर्गोपितत्वादित्येके ।
**और्वशेय**–पुं–१२३–અગસ્ત્ય ઋષિ.
द्र० अगस्तिशब्दः ।
*ऊर्वश्या अपत्यं इति और्वशेयः ।
**औलूक्य**–ન.–८६२–વૈશેષિક શાસ્ત્ર.
□वैशेषिक, [कणाद शि. ७१] ।
*उलूकस्यापत्यमिव तज्जन्यत्वादौलूक्यं शास्त्रं, उलूकवेषधारिणा महेश्वरेण प्रणीतमिति प्रसिद्धिः गर्गादित्वाद् यञ, तत्र साधुरौलूक्यः ।
**औशिर**–ન.–६८५–શયન અને આસન.
*उश्यते काम्यते उशीरं तदेव प्रज्ञाद्यणि औशीरं शयनासने युगपदुच्येते ।
**औषध**–पुंન.–४७२–દવા.
द्र० अगदशब्दः ।
*औषधिरेव औषधं, पुंक्लीबलिङ्गः "श्रोत्रौषधि– (७।२।१६६) इति स्वार्थेऽण् ।
**ओषधि**–સ્ત્રી–१११७–ફળપરિપક્વ થતાં જે વૃક્ષ નાશ પામે છે તે, ઘઉં, ડાંગર, જવ વગેરે.
द्र० ओषधिशब्दः ।
*ओषतीत्योषधिः
बाहुलकाद् वृद्धौ औषधिः, स्त्रीलिङ्गः ।
**औषधिगर्भ**–पु–१०५ (શે. १२)–ચંદ્રમા, ચંદ્ર.
द्र० अत्रिदृग्जशब्दः ।
**'औषधी'**–સ્ત્રી–११९७-ઘઉં, ડાંગર, જવ વગેરે.
द्र० ओषधिशब्दः ।
**औषधीपति**–पुं–१०४–ચંદ્રમા ચંદ્ર.
द्र० अत्रिदृग्जशब्दः ।
*औषधीनां पतिः औषधीपतिः, यौगिकत्वात् औषधीशः ।
**(औषधीश)**–पुं–१०४–ચંદ્રમા, ચંદ્ર.
द्र० अत्रिदृग्जशब्दः ।
*औषधीनां ईशः औषधीशः ।
**औष्ट्रक**–ન.–१४१६–ઊંટનો સમૂહ.
*उष्ट्राणां समूहः औष्ट्रकम् ।

## ॥ क ॥

**क**–पुं–२११–બ્રહ્મા.
द्र० अजशब्दः ।
*कायतीति कः ।
**क**–ન.५६६—મસ્તક.
द्र० उत्तमाङ्गशब्दः ।
कायतीति कं "क्वचित्" (५।१।१७१) इति डः ।
क–ન.–१०६९–પાણી
द्र० अप्शब्दः ।
कायतीति कं "क्वचित्" (५।१।१७१) इति डः।
(क)–ન.१०७० પાણી
द्र० अप्शब्दः ।
**कंस**–पुं–२२०–વિષ્ણુનો શત્રુ.
द्र० अरिष्टशब्दः ।
*काम्यते जयं इति कंसः, "मावावद्यमि–" (उणा–५६४) इति सः ।
**कंस**–पुं ન. १०२४–પાણી પિવાનું પાત્ર, પ્યાલો.
□कोशिका, मल्लिका, चषक, पारी, पान भाजन ।
*काम्यते इति कंसः, "मावावद्य–" (उणा–५३४) इति सः पुंक्लीबलिङ्गोऽयम् ।
**(कंस)**–ન.–१०४९–કાંસુ.
द्र० असुराह्वशब्दः ।
**कंसक**–ન.–१०५७–રાતી હીરાકસી.
□पुष्पकासीस, नयनौषध ।
कंस्ते रञ्जयतीति कंसकम् ।
**(कंसजित्)**–पुं–२२१–વિષ્ણુ.
द्र० अच्युतशब्दः ।

Jain Education International       For Private & Personal Use Only       www.jainelibrary.org

**कंसोद्भवा**-स्त्री-१०५६-सौराष्ट्र देशनी माटी.

द्र० आढकीशब्दः ।

*कंसादुद्भवतीति कंसोद्भवा ।

**ककुद्**-१२६४-(शि. ११२)-બળદના બે ખભા ઉપરનો ટેકરો.

द्र० अंशकूटशब्दः ।

**ककुद**-पुंन.-१२५४-બળદના બે ખભા ઉપરનો ટેકરો.

द्र० अंशकूटशब्दः ।

*ककते इति ककुदं पुंक्लीबलिङ्गः, "ककेर्णिद्वा" (उणा-२४३) इत्युदः, ककुत्-ककुदावपि ।

**ककुदावर्त**-पुं-१२४३ (शि. १८१)-विशिष्ट આવર્તવાળો ઘોડો.

☐[ककुदिन् शे. १८१] ।

**ककुदी**-पुं-१२३३ (शे.१८१)-विशिष्ट આવર્ત વાળો ઘોડો.

☐[ककुदावर्त शे. १८१] ।

**ककुद्मत्**-पुं.-२२५७-જુવાન બળદ.

द्र० अनडुहशब्दः ।

*ककुदस्यास्तीति ककुद्मान्, उर्म्यादित्वाद् मतोर्वत्वं न भवति ।

**ककुद्मती**-स्त्री-६०७-કેડ.

☐कट, कटि, श्रोणि, कलत्र, कटीर, काञ्चीपद ।

*ककुत् पार्श्वनिःसृतोंऽशोऽस्त्यस्याः इति ककुद्मती ।

**ककुभ्**-स्त्री-१६६-દિશા.

☐काष्ठा, आशा, दिश्, हरित् ।

*कं वायुं स्कुभ्नाति विस्तारयति इति ककुप् "ककुप् त्रिष्टुबनुष्टुभः" (उणा-९३२) इति क्विबन्तो निपात्यते, अयं स्त्रीलिङ्गः ।

**ककुभ**-पुं-२९१-વીણાનો નીચેનો ભાગ

☐प्रसेवक ।

कक्यते इति ककुभः "ककेरुभः" (उणा-३३३) इत्युभः, दण्डाधःशब्दगाम्भीर्यार्थं दारुमयं खण्डं यद् भस्त्रया आच्छाद्यते ।

**ककुभ**-पुं-११३५-અર્જુન વૃક્ષ.

द्र०अर्जुनशब्दः ।

*ककते इति ककुभः "ककेरुभः" (उणा-३३३) ककुभो व्यापकत्वादस्य सन्तीति वा, कं स्कुभ्नाति वा, पृषोदरादित्वात् ।

**कक्कोल**-न.-६३८-કંકોલ, યક્ષ કર્દમમાંની એક વસ્તુ.

*कचते दीप्यते इति कक्कोलं, "पिञ्छोलकल्लोल"-(उणा-४९५) इत्योले निपात्यते ।

**कक्कोलक**-न.-६४६-કંકોલ.

☐कोलक, कोशफल ।

*कचते दीप्यते इति कक्कोल, "पिञ्छोलकल्लोल-" (उणा-४९५) इत्योले निपात्यते, के कक्कोलकम् ।

**कक्खट**-पुं-१३८६-કઠોર સ્પર્શ.

☐निष्ठुर, क्रूर, परुष, कर्कश, खर, दृढ, कठोर, कठिन, जरठ, जठर, मूर्तिमत्, मूर्त [खक्खट, जरढ शि. १२६] ।

*"कक्ख हसने" कक्ख्यते इति कक्खटः, "दिव्यवि-" (उणा-१४२) इत्यटः, खक्कट इत्यन्ये ।

**कक्ष**-पुं-१११०-મોટું જંગલ.

द्र० अटवीशब्दः ।

*कषतीति कक्षः "मावावदि-" (उणा-५६४) इति सः ।

**कक्षा** स्त्री-पुं-५८९-કાખ.

☐भुजकोटर, दोर्मूल, खण्डिक ।

*कष्यते इति कक्षा, पुंस्त्रीलिङ्गः, "मावावदि-" (उणा-५६४) इति सः ।

**कक्षा**-स्त्री-६७५-વસ્ત્રનો છેડો.

☐कच्छा, कच्छाटिका, (कच्छाटी) ।

*कषति गुह्यं इति कक्षा "मावा-" (उणा-५६४) इति सः, परिधानस्य पश्चादञ्चले ।

**कक्षा**-स्त्री-१४६३-સમાનપણું.

द्र०अनुकारशब्दः ।

*कक्षणमिति कक्षा ।

**कक्षा**-स्त्री-१२३२-(शि.११०)-હાથીની કેડ ઉપર બાંધવાનો ચામડાનો દોર.

द्र०कक्ष्याशब्दः ।

**कक्षापट**-पुं-६७६-વસ્ત્રનો ટુકડો.

☐कौपीन [कक्षापुट शि. ५५] ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*कक्षायाः पटः इति कक्षापटः, कक्षापुटः इत्येके ।

**कक्षापुट**–પું–૬૭૬ (શિ. ૫૫)–વસ્ત્રનો ટુકડો.

□कक्षापट, कौपीन ।

**कक्षीकृत्**–પું–૧૪૮૯–(શિ. ૧૩૪)–સ્વીકાર કરેલુ.

द्र०अभ्युपगतशब्दः ।

**कक्षीवत्**–પું–૮૫૩–સ્ફોટાયન, વ્યાકરણના મહા· વિદ્વાન.

□स्फोटायन, (स्फोटन), [स्फौटायन शि.७५]।

*कक्षावद् योगोऽस्त्यस्येति कक्षीवान् "चर्मण्वत्यष्ठीवद्"– ॥२।१।९६॥ इति मतौ निपात्यते ।

**कक्ष्या**–સ્ત્રી–૧૨૩૨–હાથીની કેડ ઉપર બાંધવાનો દોર.

□दूष्या, वरत्रा, 'यूष्या' [कक्षा शि. ११०]।

*कक्षायां मध्यप्रदेशे भवा इति कक्ष्या ।

**कखटी**–સ્ત્રી–૧૦૩૭–(શિ.૯૧)–ખડી.

द्र०कठिनीशब्दः ।

**कङ्क**–પું–૭૦૭–યુધિષ્ઠિર.

द्र०अजमीढशब्दः ।

*कङ्को ब्राह्मणलिङ्गत्वात्, यद् **गौडः**–'कृतान्ते लोहपृष्ठे च कङ्को ब्राह्मणलिङ्गिनि" युधिष्ठिरो हि ब्राह्मणच्छद्मना विराटावासेऽवात्सीत् इति ।

**कङ्क**–પું–૧૩૩૩ કંક નામનું પક્ષી જેના પીછાથી બાણની પુંખ થાય છે.

□कमनच्छद, लोहपृष्ठ, दीर्घपाद, कर्कट, स्कन्धमल्लक ।

*कङ्कते गच्छतीति कङ्कः ।

**कङ्कट**–પું ૭૬૬–બખ્તર, કવચ.

द्र०उरश्छदशब्दः ।

*कङ्कते यात्यङ्गं इति कङ्कटः, "दिव्यवि–" (उणा–१४२) इत्यटः, कङ्कटत्याच्छादयाति वा ।

**कङ्कटिक**–પું–૨૦૦( શે૧૪૨)–શંકર.

द्र०अट्टहासिन्शब्दः ।

**कङ्कण**–ન.–૬૬૩–કડુ, વલય, બંગડી.

द्र० आवापशब्दः ।

*कङ्कते हस्तमिति कङ्कणम् ।

**'कङ्कणी'**–સ્ત્રી–૬૬૫–ઘૂઘરી.

द्र० किङ्किणीशब्दः ।

**कङ्कत**–પું–૬૮૮–કાંસકો, કાંસકી.

□केशमार्जन, प्रसाधन ।

*कङ्कते याति शिरः इति कङ्कतः, त्रिलिङ्गः, "दृपृभृ–" (उणा–२०७) इत्यतः, कङ्कान् दन्तांस्तनाति इति वा ।

**कङ्कपत्र**–પું–૭૭૮–બાણ.

द्र० अजिह्मगशब्दः ।

*कङ्कस्य पत्राण्यत्रेति कङ्कपत्रः ।

**कङ्कमुख**–પું–૯૦૯ સાણસી, ચીપીયો.

□संदंश ।

*कङ्कस्येव मुखमस्येति कङ्कमुखः ।

**कङ्काल**–ન.–૬૨૮–હાડપિંજર.

□करङ्कः, अस्थिपञ्जर ।

*कस्यते इति कंकालं, पुंक्लीबलिङ्गः, 'चात्वालकङ्काल–" (उणा–७४९) इत्यले निपात्यते, कंकान् अलति, कं कलयति वा ।

**कङ्केल्लि**–સ્ત્રી–૧૧૩૫–આસોપાલવનું ઝાડ.

□अशोक, 'वञ्जुल' ।

*कमुदकं केलति गच्छतीति कङ्केल्लिः, स्त्रीलिङ्गः, **यदमरशेषः**–

'स्त्रियां त्वशोके कङ्केल्लिः' पृषोदरादित्वात् ।

**कङ्गु**–સ્ત્રી–૧૧૭૬–કાંગ, પીળા ચોખા.

□कङ्गुनी, क्वङ्गु, प्रियङ्गु, प्रीततण्डुला, 'कङ्गू' ।

*कायतीति कङ्गुः, "प्रीकैपे–" (उणा ७६१) इति कङ्गु ।

**कङ्गुनी**–સ્ત્રી–૧૧૭૬–કાંગ, પીળા ચોખા.

द्र० कङ्गुशब्दः ।

*कङ्गतीति कङ्गुनी, "दिननग्न–" (उणा–२६८) इति ने निपात्यते ।

**'कङ्गू'**–સ્ત્રી–૧૧૭૬–કાંગ.

द्र० कङ्गुशब्दः ।

**कच**–પું–૫૬૭–કેશ, વાળ.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

□( शिरशिज) केश, तीथवाक, चिकुर, कुन्तल, वाल ।
[वृजिन, वेल्लिताग्र, स्त्र शे. ११६ । चिहुर शि. ४५]
*कचन्ते इति कचाः ।

**कचश्मश्रुनखाप्रवृद्धि**-स्त्री-६२-दाढी-मूछना वाळ अने नख न वधे तेवो तीर्थंकरनो अतिशय.
*कचानां केशानामुपलक्षणत्वात् लोम्नां च, श्मश्रुणः कूर्चस्य, नखानां पाणिपादजानामप्रवृद्धिरवस्थितस्वभावत्वमिति सप्तदशोऽतिशयः ।

**कच्चर**-न.-१४३५-मलिन, मेलुं.
□मलिन, म्लान, कश्मल, मलीमस, (मलदूषित) [कल्मष शि.१२९]
*कुत्सितं चरतीति कच्चरम् ।

**कच्चित्**-अ.-१५४०-ईष्ट प्रश्न जणावनार.
*कु त्सितं-चिनोतीति कच्चित्, यथा- "कच्चिज्जीवति मे माता?" इति ।

**कच्छ**-पुं-९५३-जलथी व्याप्त देश.
*कच्यते इति कच्छः, पुंक्लीबलिङ्गः, "तुदिमदि-" (उणा-१२४) इति छक् ।

**कच्छ**-न.-१०७७-तीर, किनारो.
□कूल, प्रपात, रोधस्, तट, तीर, प्रतीर ।
*कच्यते इति कच्छः "तुदिमदि-" (उणा-१२४) इति छक् ।

**कच्छप**-पुं-१९३-नव निधि पैकी पांचमो निधि.
*कच्छपाकारत्वात् कच्छपः ।

**कच्छप**-पुं-१३५३-काचबो.
□कमठ, कूर्म, क्रोडपाद, चतुर्गति, पञ्चाङ्गगुप्त, दौलेय, जीवथ, [उहार शि. १२२] ।
*कच्छोऽनूपप्रायः, कूर्मपादो वा, कच्छं पातीति कच्छपः, कच्छेन पिबतीति वा, कत् कुत्सितं शपतीति वा ।

**कच्छपी**-स्त्री-२८८-सरस्वतीनी वीणा.
*कच्छपसदृशत्वात् कच्छपी ।

**कच्छपी**-स्त्री-१३५३-काचबी.
□दुली, 'कमठी, डुली' ।

**कच्छा**-स्त्री-६७५-वस्त्रनो छेडो, काछडी.
द्र० कक्षाशब्दः ।



*कच्यते बध्यते इति कच्छा, "तुदिमदि-" (उणा-१२४) इति छक् । परिधानस्य पश्चादञ्चले ।

**कच्छाटिका**-स्त्री-६७५-वस्त्रनो छेडो, काछडी.
द्र० कक्षाशब्दः ।
*कच्छैव कच्छाटी, ग्रामटीवधूटीवत्, के कच्छाटिका । परिधानस्य पश्चादञ्चले ।

**(कच्छाटी)**-स्त्री-६७५-वस्त्रनो छेडो, काछडी.
द्र० कक्षाशब्दः ।
*कच्छैव कच्छाटी, ग्रामटीवधूटीवत् । "कच्छाटी पुंस्त्रीयोः" इति **व्याडिः** । परिधानस्य पश्चादञ्चले ।

**कच्छुर**-पुं-४६०-सजोखम अने कफना रोगवाळो.
□पामन. [पामर शि. ३३] ।
*कच्छुरस्त्यस्येति कच्छुरः, "कच्छ्वाडुरः" (७।२।३९) इति डुरः प्रत्ययः ।

**कच्छू**-स्त्री-४६४-धा, व्रण.
□पामन्, (पामा), खस विचर्चिका ।
*कषति त्वचमिति कच्छूः, स्त्रीलिङ्गः "कषेण्डंच्छौ च-" (उणा-८३१)-इति ऊःप्रत्ययः ।

**कज्जल**-न.-६८६-काजळ.
□अञ्जन ।
*कजति-व्यथते चक्षुरिति कज्जलं 'मुरलोरल-" (उणा-४७४) इत्यले निपात्यते ।

**कज्जलध्वज**-पुं-६८६-दीवो.
□दीप, प्रदीप, स्नेहप्रिय, गृहमणि, दशाकर्ष, दशेन्धन ।
*कज्जलं ध्वजोऽस्येति कज्जलध्वजः ।

**कञ्चुक**-पुं न.-६७४-चोळी, कांचळी वगेरे.
द्र० अङ्गिकाशब्दः ।
*कञ्च्यते बध्यते इति कञ्चुकः, पुंक्लीबलिङ्गः, "कञ्चुका-" (उणा-५७) इत्युके निपात्यते ।

**कञ्चुक**-पुं न.-७६७-चोळी, योद्धा वगेरेनुं छातीनुं सुतराउ बख्तर.
□निचोलक, कर्पास, वारबाण ।
*कञ्च्यते बध्यते इति कञ्चुकः, पुंक्लीबलिङ्गोऽयम् ।

**कञ्चुक**-पुं न.-१३१५-सापनी कांचळी.
द्र० अहिकोशशब्दः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*कञ्चुक इव कञ्चुकः, पुंक्लीबलिङ्गः, कञ्च्यते बध्यतेऽनेन वा ।

**कञ्चुकिन्**-पुं-७२७-અંતઃપુરનો રક્ષક.

□सौविदल्ल, स्थापत्य, सौविद ।

*कञ्चुक विनीतवेषार्थमस्त्येषां इति कञ्चुकिनः

**कञ्चुकिन्**-पुं-१३०४-રાજસર્પ, એ મોટા વાળો સાપ.

द्र० अहिशब्दः ।

*कञ्चुकोऽस्त्यस्येति कञ्चुकी ।

**कञ्चुलिका**-स्त्री-६७४-ચોળી, કાંચળી.

द्र० अङ्गिकाशब्दः ।

*कञ्च्यते दीप्यतेऽनया, कञ्च्यते बध्यते वा कञ्चुली "कुमुलतुमुल"-(उणा-४८७) इत्युले निपात्यते, के कञ्चुलिका. अर्थात् स्त्रिया एव कं चोलतीति वा ।

**कट**-त्रि. न.-६०७-કેડ.

द्र० ककुद्मतीशब्दः ।

*कटत्यावृणोतीति कटः, पुंक्लीबलिङ्गः ।

**कट**-पुं-१०१७-સાદડી, ચટાઈ.

□किलिञ्ज ।

*कटत्यावृणोतीति कटः. वीरणादिनिर्मितः त्रिलिङ्गः ।

**कट**-पुं-१२२५-હાથીનું ગંડસ્થળ.

□गण्ड, करट ।

*कटति वर्षति मदमिति कटः ।

**कटक**-पुं-६६३-वींटी, वेढ.

द्र० आवापशब्दः ।

* कटतीति कटकः "वृकृत-" (उणा-५४०) इत्यकः ।

**कटक**-पुं न.-७४६-લશ્કર.

द्र० अनीकशब्दः ।

कटत्यावृणोति पृथ्वीं इति कटकं पुंक्लीबलिङ्गः, "दृक" (उणा-२७) इत्यकः ।

**कटक**-पुं न.-१०३३-કુદરતી ગુફા.

□मेखला, नितम्ब ।

*कटकत्यावृणोतीति कटकः, पुंक्लीबलिङ्गः ।

**कटप्रू**-पुं-२०० (शे. ४८)-શંકર. મહાદેવ.

द्र० अट्टहासिन्शब्दः ।

**कटल्लक**-पुं-११८८-કારેલી

द्र० कटील्लकशब्द : ।

**कटाक्ष**-पुं-५७८-વાંકી નજરે જોવું તે.

द्र० अक्षिविकूणितशब्दः ।

*कटस्य कपोलस्याक्षि कटाक्षः "संकटाभ्याम्"(७।३।८६) इत्यत्समासान्तः ।

**कटाटङ्क**-पुं-२०० (शे. ४८) શંકર, મહાદેવ.

द्र० अट्टहासिन्शब्दः ।

**कटाह**-त्रि.-१०२२-લોઢાની કડાઈ, તવી.

□कर्पर ।

*कटत्यावृणोतीति कटाहः, त्रिलिङ्गः, "वृकटि-" (उणा-५९१) इत्याहः प्रत्ययः ।

**कटाह**-स्त्री-१२८३ (शेष-१८३)-પાડો.

द्र० कासरशब्दः ।

**कटि**-स्त्री-६०७-કેડ.

द्र० ककुद्मतीशब्दः ।

*कट्यते आव्रियते इति कटिः, स्त्रीलिङ्गः, "पदिपठि-" (उणा-६०७) इति इः ।

**कटिप्रोथ**-पुं(द्वि.व.)-६०९-કુલા, ધગડા,

□पुत, स्फिज, 'स्फिच्' ।

*प्रथेते इति प्रोथौ, कटेः प्रोथौ इतिकटिप्रोथौ ।

**कटिमालिका**-स्त्री-६६४ (शे. १३५)-સ્ત્રીની કેડનો કંદોરો.

द्र० कटिसूत्रशब्दः ।

**कटिल्लक**-पुं-११८८-કારેલી.

□कारवेल्ल, 'कठिल्लक (कटल्लक), सुषवी, (सुसवी)।'

*कटत्यावृणोतीति कटिल्लः, 'भिल्लाछमल्ल-' (उणा-४६४) इति ले निपात्यते, कटिं लातीति वा, पृषोदरादित्वाद् द्वित्वम् ।

**कटिसूत्र**-न-६६४-સ્ત્રીની કેડનો કંદોરો.

□मेखला, कलाप, रसना, 'रसना' सारसन, काञ्ची, सप्तकी, [लालिनी, कटिमालिका शे. १३५] ।

*कटेः सूत्रमिति कटिसूत्रम् ।

**कटीर**-न.-६०७-કેડ.

द्र० ककुद्मतीशब्दः ।

*कट्यते इति कटीरं "कृशॄपॄ-" (उणा-४१८) इतीरः प्रत्ययः ।

**कटु**-पुं-१३८९-તીખુ કડુરસ.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

☐ओषण, मुखशोधन ।
*कटत्यावृणोतीति कटुः "भृमृतृ"–(उणा-७१६) इति उःप्रत्ययः ।

**कटुक्वाण**–पुं–१३३०–टीटोडी.
द्र० उत्पादशयनशब्दः ।
*कटुः क्वाणोऽस्येति कटुक्वाणः ।

**कटोलवीणा**–स्त्री–२९०–चंडालनी वीणा.
☐चाण्डालिका, [वल्लकी, काण्डवीणा, कुवीणा, डक्कारी, किंनरी शे. ८३ सारिका खुङ्गणी शे. ८४] ।
*कट्यते तन्त्रीभिराव्रियते इति कटोलः 'कटिप–" (उणा–४९३) इत्योलः, कटोलाख्या वीणेति कटोलवीणा ।

**कद्वर**–पुं–३५०–अत्यंत खराब.
☐अतिकुत्सित ( कद्वर )।
*कटत्यावृणोतीति कद्वरः, "कृगृशृदृवृगृचति"–(उणा–४४१) इति वरट्, कुत्सितं वृणोति कद्वर इत्यन्ये ।

**कद्वर**–न. ४०९ ( शे. १०० ) पा भागनां पाणी वाळुं दही.
☐तक्र, [सारण शे. १००, अर्शोघ्न, परमरस, शे. १०१] ।

**कठिन**–पुं–१३८७–कठोर स्पर्श, निष्ठुर.
द्र० कक्खटशब्दः ।
*कठतीति कठिनः, "श्याकठि–" (उणा–२८२) इतीनः ।

**कठिनी**–स्त्री–१०३७–धोळी धातु, खडी.
☐शुक्लधातु, पाकशुक्ला, खटिनी, खटी [कक्खटी शि. ९१] ।
*कठत्यनयेति कठिनी, "श्याकठि–" (उणा–२८२) इतीनः ।

'**कठिल्लक**'–पुं–११८८–कारेली.
द्र० कटिल्लकशब्दः ।

**कठोर**–पुं–१३८७–निष्ठुर.
द्र० कक्खटशब्दः ।
☐कठतीति कठोरः, "कठिचकि–"(उणा–४३३) इत्योरः प्रत्ययः ।

**कड**–पुं–३४९ (शे. ९३)–मूंगो.
द्र० अवाचूशब्दः ।

**कडङ्गर**–पुं–११८२–पराळ वगेरेनो भूको.
☐बुस, 'बुष' ।
*कडन्ति माद्यन्त्यनेन पशवः इति कडङ्गरः, "कडेरेवर–" (उणा–४४५) इत्यङ्गरः ।

**कडार**–पुं–१३९७–पीळोरंग.
☐पीतरक्त, पिञ्जर, कपिल, पिङ्गल, श्याव, पिशङ्ग, कपिश, हरि, बभ्रु, कद्रु, पिङ्ग ।
*कडतीति कडारः, "अग्यङ्गि–" (उणा–४०५) इत्यारः ।

**(कडिन्दिका)**–स्त्री–२५८–आन्वीक्षिकी वि. विद्या
☐कलिन्दिका, सर्वविद्या ।

**कण**–पु. स्त्री–१४२७–लव, लेश, अल्प.
☐त्रुटि 'त्रुटी' मात्रा, लव, लेश ।
*कणति निमीलतीति कणः, पुंस्त्रीलिङ्गः ।

**(कणति)** –स्त्री– १४०८–दुःखी माणसनो आर्तनाद.
☐कणित ।
*कणतिरार्तशब्दे ।

**कणय**–पुं–७८७ (शे. १५१) करणपत्रना अग्रभाग जेवुं शस्त्र.
☐लोहमात्र ।

**कणा**–स्त्री–४२१–पीपरीमूळ, गंठोडा.
द्र० उपकुल्याशब्दः ।
*कणाः सन्त्यस्याः कणा ।

**कणा**–स्त्री–४२२–जीरु.
द्र० अजाजीशब्दः ।
*कणाः सन्त्यस्याः कणा ।

**कणाद्**–पुं–८६२ (शि. ७६)–वैशेषिक.
☐वैशेषिक, औलूक्य ।

**कणित**–न.–१४०८–दुःखथी पीडितनो आर्तस्वर
☐(कणति) ।
*व्याधिप्रहारादिभिः पीडितानां शब्दः कणन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कणितम् , "कणतिरार्तशब्दे" ।

**कणिश**–ન. પું-૧૧૮૧-કણશલું.

□सस्यशीर्षक, (सस्यमञ्जरी), 'कणिष', [कनिश शि. १०७] ।

*कणति वातेन इति कणिशम्, पुंक्लीबलिङ्गः, "कुलिकनि-" (उणा-५२५) इति किशः, कनिशमपि ।

**कणिशाद्यर्जन**–ન. ८६५–ધાન્યની મંજરી, શીંગ વગેરે ગ્રહણ કરવું તે.

□शिल ।

*कणिशं धान्यमञ्जरी आदिशब्दात् शिबादी तस्यार्जनं ग्रहणम् ।

**'कणिष'**–પું-૧૧૮૧-કણસવું,

द्र० कणिशशब्दः ।

**कण्टक**-પું–૬૨-કાંટા ઊંધા થઈ જાય તે, તીર્થંકરનો દશમો અતિશય.

*अधोमुखाः कण्टकाः भवन्तीति दशमोऽतिशयः ।

**कण्टक**-પું ન.–૩૦૫–રોમાંચ.

द्र०उद्धुषणशब्दः ।

*कण्टतीति कण्टकः तरुरोम, "नकद"–(उणा-६६६ २७) इत्यकः कण्टकतुल्यत्वात् कण्टकः, पुंक्लीबलिङ्गः ।

**कण्टकारिका**–સ્ત્રી-૧૧૫૭–બેઠી ભોંય રીંગણી.

□व्याघ्री, निर्दिग्धिका, 'निदिग्धिका, स्पृशी, बृहती, प्रचोदनी, कुली क्षुद्रा, दुःस्पर्शा, राष्ट्रिका'

*कण्टकानियर्त्तीति कण्टकारी, के कण्टकारिका ।

**कण्टकाशन**–પું-૧૨૫૪-ઊંટ.

द्र० उष्ट्रशब्दः ।

*कण्टका अशनमस्येति कण्टकाशनः ।

**कण्ठ**-પું–૫૮૮–ગળું.

□गल, निगरण ।

*कणयति शब्दायते इति कण्ठः कण्ठते वा, पुंलिङ्गोऽयम् । **वाचस्पतिस्तु**–"ग्रीवामूले तु कण्ठोऽस्त्री" इति क्लीबेऽप्याह ।

**कण्ठकूणिका**–સ્ત્રી–૨૮૭–વીણા, સારંગી

□वीणा, घोषवती, विपञ्ची, वल्लकी ।

*कण्ठ कूणयते इति कण्ठकूणिका ।

**कण्ठबन्ध**-પું-૧૨૩૨-હાથીને ગળે બાંધવાનું બંધન

□कलापक ।

*कण्ठो बध्यतेऽनेनेति कण्ठबन्धः ।

**कण्ठभूषा**–સ્ત્રી–૬૫૭–ડોકનું આભૂષણ, કંઠી વગેરે.

□ग्रैवेयक ।

**कण्ठाग्नि**–પું-૧૩૧૭ (શેષ ૨૮૭)–પક્ષી.

द्र०अगौकस्शब्दः ।

**कण्ठिका**–સ્ત્રી–૬૬૨–એક સેરનો હાર.

□एकावली, एकयष्टिका ।

*कणति कण्ठते वा कण्ठा, के कण्ठिका ।

**कण्ठीरव**–પું-૧૨૮૩-સિંહ.

द्र०इभारिशब्दः ।

*कण्ठे रवो ध्वनिरस्येति कण्ठीरवः पृषोदरादित्वादीत्वम् ।

**कण्ठेकाल**-પું–૧૯૫–શંકર, મહાદેવ.

द्र०अट्टहासिन्शब्दः ।

*कण्ठे कालोऽस्येति कण्ठेकालः, "अमूर्धमस्तकात् स्वाङ्गादकामे" ॥३।२।२२॥ इति सप्तम्या अलुप् ।

**कण्डन**–ન.–૧૦૧૭–ધાન્ય વગેરે ખાંડવું તે

□अवघात ।

*कण्ड्यते इति कण्डनम् ।

**कण्डरा**–સ્ત્રી–૬૩૧-મહાસ્નાયુ, મોટી નસ

□महास्नायु ।

*कण्डते माद्यतीति कण्डरा, "जठर-" (उणा-४०३) इत्यरे निपात्यते ।

**'कण्डुरा'**–સ્ત્રી–૧૧૫૧–કૌવચ.

द्र०आत्मगुप्ताशब्दः ।

**कण्डू**-સ્ત્રી–૪૬૪–ખરજ, ખરજવું.

□कण्डूयन, खर्जू, कण्डूया [कण्डूति, खर्जूति शि.३३] ।

*कषति वपुः "कषेर्णर्छौ च-" (उणा-८३१) इति ऊः कण्डूय्यते वा "भ्यादिभ्यो वा" ॥५।३।११५॥ इति क्विप् ।

**कण्डूति**–સ્ત્રી–૪૬૪ (શિ. ૩૩)–ખરજ, ખરજવું

द्र०कण्डुशब्दः ।

**कण्डूयन**–ન.–૪૬૪–ખરજ, ખરજવું.

द्र०कण्डुशब्दः ।

*कषति वपुः "कषेर्णर्छौ च-" (उणा-८३१)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति ऊः कण्डूय्यते वा, अनटि कण्डूयनम् ।

**कण्डूया**–स्त्री–४६४–ખરજ, ખરજવું.

द्र०कण्डूशब्दः ।

*कषति वपुः "कषेण्र्ड छौ च–" (उणा–८३१) इति ऊः, कण्डूय्यते वा, "शसि–" ।।५।३।१०५।। इति अप्रत्यये कण्डूया कण्डूतिरपि ।

**'कण्डूरा'**–स्त्री–११५१–કૌવચ.

द्र०आत्मगुप्ताशब्दः ।

**कण्डोलक**–पुं–१०१७–ટોપલો, ટોપલી, કરંડીયો.

☐पिट, [पिटक शि.८९] ।

*कण्डूयते इति कण्डोलः "कटिपटि–" (उणा–४८३) इत्योलः, के कण्डोलकः ।

**'कण्व'**–न.–९०४–સુરાબીજ.

द्र०किण्वशब्दः ।

**कतृण**–न–११९१–રોહિડો, એક જાતનું સુગંધી ઘાસ.

☐सौगन्धिक, देवजग्ध, पौर, रौहिष ।

*कुत्सितं तृणमिति कतृणं "तृणे जातौ" ॥३।२।१३२॥ इति कोः कदादेशः ।

**कथंकथिकता**–स्त्री–२६३–પ્રશ્ન.

द्र०अनुयोजनशब्दः ।

*कथंकथिकमिति जल्पोऽस्यामिति कथंकथिकता, मयूरव्यंसकादित्वात् साधुः ।

**कथम्**–अ–१५४२ (शे. २०५)–કેવી રીતે.

**कदक**–पुं–६८१–ચંદરવો.

☐उल्लोच, वितान, चन्द्रोदय ।

*कुत्सितमकतीति कदकः ।

**कदध्वन्**–पुं–९८४–ખરાબ રસ્તો.

☐व्यध्व, दुरध्व, विपथ, कापथ ।

*कुत्सितोऽध्वा इति कदध्वा ।

**कदन**–न–३७०–હિંસા.

द्र०अपासनशब्दः ।

*कदेः सौत्रस्य कदनम् ।

**कदम्ब**–पुं–१०५४–સ્વર્ણ અથવા રૌપ્ય માક્ષિક.

द्र०अजनामकशब्दः ।

*कदम्बकुसुमाकारत्वात् कदम्बः ।

**कदम्ब**–पुं–११३८–કદંબ વૃક્ષ.

☐हलिप्रिय, निप (धाराकदम्ब, राजकदम्ब) 'प्रियक, हरिप्रिय' ।

*"कदिः सौत्रः" कद्यते इति कदम्बः, "कदेर्णिद्वा" (उणा–३२२) इत्यम्बः, कुत्सितमम्बते वा । धाराकदम्बो राजकदम्बश्चासौ, धूलिकदम्बोऽन्यः ।

**कदम्बक**–पुं–११८०–સરસવ.

☐सर्षप, तन्तुभ, 'तुन्तुभ' ।

*कुत्सितमम्बते इति कदम्बकः ।

**कदम्बक**–न. १४११–સમૂહ, સમુદાય.

द्र०उत्करशब्दः ।

*"कदिः सौत्रः" कद्यते इति कदम्बं, "कदेर्णिद्वा" (उणा–३२२) इत्यम्बः, के कदम्बकम्, कुत्सितमम्बते वा ।

**कदर्य**–पुं–३६८–કંજુસ માણસ.

☐कृपण, मितम्पच, कीनाश, तद्धन, क्षुद्र, दृढमुष्टि, किम्पचान ।

*कुत्सितोऽर्यः स्वामीति कदर्यः ।

**'कदल'**–पुं–११३६–કેળ.

द्र०कदलीशब्दः ।

**कदलिन्**–पुं–१२९४ હરણની એક જાત.

**कदली**–स्त्री–११३६–કેળ.

☐रम्भा, मोचा, 'कदल, अंशुमत्फला, काष्ठीला वारणबुसा (वारणबुषा)' ।

*"कदिः सौत्रः" कद्यते इति कदली "मृदिकन्दि–" (उणा–४६५) इत्यलः, केन वायुना दल्यते वा, के दलमस्या इति वा ।

**कदली**–स्त्री–१२९४–હરણનો એક પ્રકાર.

द्र०एणशब्दः ।

*कद्यते इति कदली 'मृदिकन्दि–" (उणा–४६५) इत्यलः, स्त्रियामयम्, **यदाह**–

"कदली तु बिले शेते, मृदुमक्षैव कर्बुरैः ।
नीलाग्रै रोमभिर्युक्ता, सा विंशत्यङ्गुलायता" ॥

**अमरस्त्वयम्**– मत्वर्थीयेनन्तः आह ।

**कदाचित्**–अ.–१५३३–કોઈક વખત.

☐जातु, कर्हिचित् ।

*यथा–"न कदाचिदनीदृशं जगत्" ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**कदुष्ण**-पुं-१३८६-थोडुं गरम.

☐कोष्ण, कवोष्ण, मन्दोष्ण, ईषदुष्ण ।

*ईषदुष्णः कोष्णः 'कोः कद्-" ॥३।२।१३०॥ इति कदादेशे कदुष्णः ।

**कद्रु**-पुं-१३९७-लाल मिश्रित पीळो वर्ण

द्र०कडारशब्दः ।

*कत् कुत्सितं द्रवतीति कद्रुः "हरिपीति-" (उणा-७४५) इति उः प्रत्ययः ।

**कद्वद**-पुं-३४७-खराब बोलनार.

☐दुर्वाच् ।

*कुत्सितं वदतीति कद्वदः "रथवदे" ॥३।२।१३१॥ इति कोः कदादेशः ।

(**कद्वर**) -पुं-३५०-अत्यंत खराब.

☐कद्वर, अतिकुत्सित ।

*कुत्सितं वृणोतीति कद्वर **इत्यन्ये** ।

**कनक**-न.-१०४३-सोनुं.

द्र०अर्जुनशब्दः ।

*कनति दीप्यते इति कनकम्, "दृकृन्-" (उणा-२७) इत्यकः ।

**कनकाध्यक्ष**-पुं-७१३-सुवर्ण उपरनो अधिकारी.

☐भौरिक, [हिमाध्यक्ष, हैरिक शि.६२] ।

*कनकस्याध्यक्षः इति कनकाध्यक्षः ।

**कनकालुका**-स्त्री-७१८-सोनानी झारी, कळश.

☐भृङ्गार ।

*कनकस्यालूः कनकालूः, के कनकालुका ।

**कनकाह्वय**-पुं-११५१-धतुरो.

☐धत्तूर, 'उन्मत्त, कितव, धूर्त, धुस्तुर, धुस्तूर, धूस्तूर, धुतुर, मातुल, मदन' [धुतूर शि.१०४] ।

*कनकाह्वयः, भुक्तेऽस्मिन् हेमवर्णपृथ्वीदर्शनात्।

**कनन**-पुं-४५३-काणो.

☐काण, एकदृश (एकाक्ष) ।

*कनति दीप्यते एकदृष्टया इति कननः ।

**कनिश**-न.-११८२ -(शि. १०७)-कणसलुं.

द्र०कणिशशब्दः ।

**कनिष्ठ**-पुं-५५२-नानो भाई.

द्र०अनुजशब्दः ।

*अतिशयेन अल्पः कनिष्ठः, "गुणाङ्गा-" ॥७।३।९॥ इतीष्ठे "अल्पयूनोः कन्वा" ॥७।४।३३॥ इति कनादेशः ।

**कनिष्ठ**-न.-१४२८-(शि-१२८) अत्यंत थोडुं. घणुं नानुं.

द्र० अणीयश्शब्द ।

*"अल्पयूनोः कन वा" ॥७।४।३३॥ इति कनादेशः कनीयः कनिष्ठमपि ।

**कनिष्ठा**-स्त्री.-५९३-टचली आंगळी.

☐कनीनिका ।

*अत्यल्पा इति कनिष्ठा ।

**कनी**-स्त्री-५१०-कुमारी.

☐कन्या, कुमारी ।

*कनति अचि कनी "वयस्यनन्त्ये" ॥२।४।२१॥ इति ङ्याम् ।

**कनीनिका**-स्त्री.-५७५-आंखनी कीकी.

☐तारा, (तारका) ।

*कनति दीप्यते इति कनीनिका "कनेरीनकः" (उणा-७३) इति ।

**कनीनिका**-स्त्री--५९३-टचली आंगळी.

☐ कनिष्ठा ।

*कनति दीप्यते इति कनीनिका ।

**कनीयस्**-स्त्री-५५२-नानोभाई.

द्र० अनुजशब्दः ।

*अतिशयेन युवा कनीयान् ।

**कनीयस्**-न.-१४२८-अत्यंत थोडुं, घणुं नानुं.

द्र० अणीयश्शब्दः ।

*"अल्पयूनोः कन् वा" ॥७।८।३३॥ इति कनादेशः, कनीयः कनिष्ठमपि ।

**कनीयस**-न.-१०४०-तांबु.

द्र० उदुम्बरशब्दः ।

*कनति दीप्यते इति कनीयसम् "फनस"-(उणा-५६२) इत्यसे निपात्यते ।

**कन्तु**-पुं -२२८(शि. १६)-कामदेव.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**कन्द**-पुं.-११६६-કમળ વગેરેનું મૂળ.

□करहाट, शिफा, 'शिफाकन्द' ।

*कनतीति कन्दः "शाशपि" (उणा-२३७) इति दः, पुंक्लीबलिङ्गः, कन्द्यतेऽन्विष्यते वा ।

**कन्द**-पुं.-११८९-સૂરણ કન્દ.

□अर्शोघ्न, सूरण, (सुरण) ।

*कन्द्यते इति कन्दः, पुंक्लीबलिङ्गः, मूलविशेषः ।

**कन्दर**-पुं.-न.स्त्री-१०३३-કૃત્રિમ ગુફા.

□दरी ।

*कन्दन्ते विप्लवन्तेऽस्मिन् इति कन्दरः, त्रिलिङ्गः, "ऋच्छिचटि"- (उणा-३९७) इत्यरः, कं दीर्यते, कं दृणातीति वा, कन्दाः सन्त्यत्र वा, अश्मादित्वाद् रः ।

**कन्दराकर**-पुं. १०२७ (शे. १५८) પર્વત.

द्र० अचलशब्द ।

**कन्दर्प**-पुं.-२२८-કામદેવ.

द्र० अङ्गजशब्दः ।

*कं अव्ययं कुत्सायाम्, कं दर्पोऽस्येति कन्दर्पः ।

**कन्दर्पा**-स्त्री.-४५ શ્રીધર્મનાથ ભગવાનની શાસનદેવી.

*कमित्यव्ययं, कं कुत्सितं दायतीति कन्दर्पा ।

**'कन्दलिन'**-पुं-१२९४-હરણની એક જાત.

द्र० एणशब्दः ।

**कन्दली**-स्त्री.-पुं.-न.-१२९४-હરણની એક જાત.

द्र० एणशब्दः ।

*कन्दान् लातीति कन्दली, श्यामवर्णा, हस्तायामा, महोदरी, त्रिलिङ्गोऽयम् । **अमरस्त्वम्** मत्वर्थीयेनन्तः आह ।

**कन्दु**-पुं.-स्त्री.-९२१-લોઢાનું વાસણ, તવી, કડાઈ, વગેરે.

□स्वेदनिका ।

*कन्दन्त्येनामिति कन्दुः, पुंस्त्रीलिङ्गः, भृमृतृ-" (उणा-७१६) इत्युः ।

**कन्दुक**-पुं.-न.-६८९-દડો.

□गेन्दुक, [गन्दुक शि. ५९]।

*काम्यते क्रीडार्थिभिरिति कन्दुकः, पुंक्लीबलिङ्गः, "कमिति मेर्देन्तश्च" (उणा-५४) इति उकः, कन्दुरेव वा "कुमारीक्रीडनेयसोः," ॥७।२।१६॥ इति कः, के शिरो नमनोन्नमनेक्षणाद् दुनोतीति वा ।

**कन्धरा**-स्त्री.-५८६-ડોક.

□धमनि, ग्रीवा, शिरोधि, शिरोधरा ।

*कं शिरो धारयतीति कन्धरा "धारेर्धर्च" ॥५।१।११३॥ इति खो, धरादेशश्च ।

**कन्धरामध्य**-न.-५८७-ડોકનો મધ્યભાગ.

□कृक ।

**कन्यकुब्ज**-न-९७३-કાન્યકુબ્જ, કનોજદેશ.

□महोदय, कन्याकुब्ज, गाधिपुर, कौश, कुशस्थल ।

*कन्याः कुब्जा अत्रेति कन्यकुब्जम्, तत्र हि जमदग्निना शापेन नरपतेः कन्याः कुब्जीकृता इति प्रसिद्धिः, "ङ्यापो बहुलं"-॥२।८।९८॥ इति ह्रस्वः, ह्रस्वत्वाभावे कन्याकुब्जम् ।

**कन्यस**-पुं.-५५२ ( शे. ११६ ) નાનોભાઈ

द्र० अनुजशब्दः ।

**कन्या**-स्त्री.-५१०-કુમારી.

□कन्या, कनी ।

*कुमारयति क्रीडयतीति कुमारी, कुत्सिता मारोऽस्या वाऽनूढत्वात् ।

**(कन्या)**-स्त्री-११६-કન્યારાશિ.

**कन्याकुब्ज**-न.-९७४-કાન્યકુબ્જ, કનોજદેશ.

द्र० कन्यकुब्जशब्दः ।

*कन्याः कुब्जा अत्र कन्यकुब्जम्, तत्र हि जमदग्निना शापेन नरपतेः कन्याः कुब्जीकृता इति प्रसिद्धिः, "ङ्यापो बहुलं"-॥२।४।९९॥ इति ह्रस्वः ह्रस्वत्वाऽभावे कन्याकुब्यम् ।

**कपट**-न.-पु.-३७८-છળ, કપટ.

द्र० उपधिशब्दः ।

*कम्पयत्यनेनेति कपटं, पुंक्लीबलिङ्गः, "कपट-कीकटादयः' (उणा-१४४) इति साधुः, के मूर्ध्नि पटमिवाच्छादकमिति वा ।

**कपर्द**-पुं-२००-શંકરની જટા.

□जटाजूट ।

*कं शिरः पिपर्तीति कपर्दः, "शारापि-" (उणा-२३७) इति बहुवचनाद् दः ।

**कपर्द**-पुं-१२०६-कोडी.

□हिरण्य, पणास्थिक, वराटक, [श्वेत, कपर्दक शे.१७४] ।

*के पर्दते इति कपर्दः, शेषश्चात्र-"स्यात्तु श्वेतः कपर्दके" ।

**कपर्दिन्**-पुं-१९६-शंकर, महादेव.

द्र.अट्टहासिन्शब्दः ।

*कपर्दोऽस्यास्तीति कपर्दी ।

**कपाट**-पुं. न. स्त्री.-१००७-कमाड, બારણું.

द्र. अररशब्दः ।

*कम्पते इति कपाटः, त्रिलिङ्गः, "कपाट विराट-" (उणा-१४८) इत्याटे निपात्यते, कं शिरः पाटयति प्रविशतामिति वा जपादित्वाद् वत्वे कवाटोऽपि ।

**कपाल**-पुं न.-६२७-કપાળ, માથાની ખોપરી.

□कर्पर, [शकल शि. ४८] ।

*कपिः सौत्रः, कप्यते इति कपालं, पुंक्लीबलिङ्गः, "ऋकृमृ-" (उणा-४७५) इत्यालः, कं पालयति वा तच्च मूर्ध्नोऽर्धास्थि, घटादिखण्डेऽप्युपचारात्, शकलमपि ।

**कपालभृत्**-पुं-१९९-शंकर, મહાદેવ.

□द्र०अट्टहासिन्शब्दः ।

*कपालं बिभर्तीति कपालभृत्, यौगिकत्वात् कपालीति ।

**(कपालिन्)**-पुं-१९९-शंकर મહાદેવ.

द्र०अट्टहासिन्शब्दः ।

**कपालिनी**-स्त्री-२०६-ચામુંડા.

□चामुण्डा, चर्चिका, चर्ममुण्डा, मार्जारकर्णिका, कर्णमोटी, महागन्धा, भैरवी [महाचण्डी, चण्डमुण्डा शे.६२] ।

*कपालमस्त्यस्याः इति कपालिनी ।

**कपि** पुं-१२९१-વાંદરો.

□मर्कट, कीश, प्लवङ्गम, प्लङ्गव, प्लवग शाखामृग, हरि, बलीमुख 'बलिमुख', वनौकस, वानर, [प्रवङ्ग शि.१४४] ।

*कम्पते चलतीति कपिः, "अम्भिकुण्ठि-" (उणा-६१४) इति इर्नलोपश्च ।

**कपि**-पुं-९८ (शेष १०)-સૂર્ય.

द्र०अंशुशब्दः ।

**कपि**-पुं-२१९ (શે. ७५)-વિષ્ણુ, નારાયણ.

द्र०अंशुशब्दः ।

**कपि**-पुं-१२१८-શેષ(१७७) હાથી.

द्र०अनेकपशब्दः ।

**'कपिकच्छु'**-स्त्री-११५१-કૌવચ.

द्र०आत्मगुप्ताशब्दः ।

**कपिकच्छू**-स्त्री-११५१-કૌવચ.

द्र० आत्मगुप्ताशब्दः ।

*कपीन् कषतीति कपिकच्छूः, स्त्रीलिङ्गः, "कपेर्णच्छौ च षः" (उणा-८३२) इति ऊः ।

**कपित्थ**-पुं-११५१-કોઠું.

□दधिफल, कपित्थ, दधित्थ, ग्राहिन्, मन्मथ, पुष्पफल, दन्तशठ ।

*कपयोऽस्मिन् तिष्ठन्तीति कपित्थः, कपिप्रियत्वात् कपिरिव तिष्ठतीति वा, पृषोदरादित्वात् तत्वम् ।

**कपिध्वज**-पुं-७०९-અર્જુન.

द्र०अर्जुनशब्दः ।

*कपिर्ध्वजोऽस्येति कपिध्वजः ।

**कपिल**-पुं-१३९६-લાલ મિશ્રિત પીળો વર્ણ.

द्र०कडारशब्दः ।

*"कवृङ् वर्णे" कवते इति कपिलः, "स्थण्डिल-" (उणा-४८४) इतीले निपात्यते, कपिवर्णं लातीति वा ।

**कपिल** पुं-२१९ (शेष ७०)-વિષ્ણુ, નારાયણ.

द्र०अच्युतशब्दः ।

**कपिल**-पुं-१२८०-કૂતરો.

द्र०अस्थिभुज्शब्दः ।

**कपिला**-पु-१०४८-એકજાતનું પિત્તળ.

□ब्राह्मी, राज्ञी, ब्रह्मरीति, महेश्वरी ।

*कपिला वर्णेन ।

**कापलाञ्जन**-पुं-२०० (શેષ ४७)-શંકર, મહાદેવ.

द्र०अट्टहासिन्शब्दः ।

**कपिलोह**-न.-१०४७-પિત્તળ.

द्र०आरकूटशब्दः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*कपिवर्णं लोहमिति कपिलोहम् ।

**कपिश**-पुं-१३९६-લાલ મિશ્રિત પીળો વર્ણ.

द्र०कडारशब्दः ।

*कपिमं कटवर्णोऽस्त्यस्येति कपिशः लोमादित्वाद् शः ।

**कपिशीर्ष**-न.-९८१-કિલ્લાનાં કાંગરાં.

☐ प्राकाराग्र

*कपेरिव शीर्षमस्येति कपिशीर्षम् ।

**'कपीतन'**-पुं-११५२-જંગલી આંબો.

द्र०आम्रातकशब्दः ।

**'कपूय'**-पुं-१४४३-અધમ.

द्र०अणकशब्दः ।

**कपोणि**-पु-५९० (शि ४६) કોણી.

द्र०कफणिशब्दः ।

**कपोत**-पुं-१३३९-કબૂતર.

☐पारापत, कलरव, रक्तलोचन, [पारावत शि. १२१] ।

*'कबृङ् वर्णे' कब्यते इति कपोतः "कबेरोत् पृच" (उणा-२१७) इति साधुः ॥

**कपोतपाली**-पु १०१०-કબૂતરખાનું, લાકડાની પરબડી.

☐विटङ्क ।

*कपोतान् पक्षिणः पालयतीति कपोतपाली ।

**कपोताभ**-पुं-१३९४-કબૂતરના જેવો રંગ.

☐कापोत ।

*कपोतस्येव आभाऽस्येति कपोताभः ।

**कपोल**-पुं-५८२-ગાલની પાસેનો ભાગ.

*कपिः सौत्रः, कप्यते इति कपोलः "कटिपटि-" (उणा-४९३) इत्यलः प्रत्ययः ।

**कपोली**-स्त्री-६१४-ઢીંચણનો આગલો ભાગ.

*जानोरग्रिमो भागः, कपेः सौत्रस्य "कटिपटि-" (उणा-४९३) इत्योले कपोली ।

**कफ**-पुं-४६२-આયુર્વેદ પ્રમાણે શરીરની ત્રણ ધાતુમાંની એક ધાતુ, કફ.

☐श्लेष्मन्, बलाश, स्नेहभू, खट, [शिङ्घाणक, खेट शे. १०७] ।

*कात्यनेनेति कफः "शफकफ-" (उणा-३१६) इति फे निपात्यते, कात् फलतीति वा ।

अ. २०

**कफकूर्चिका**-स्त्री-६३३-લાળ

द्र०आस्यासवशब्दः ।

*कफस्य कूर्चिकेव कफकूर्चिका ।

**कफणि**-स्त्री-५९०-કોણી

☐कफोणि, (कफाणि), भुजामध्य, कूर्पर, [रत्निपृष्ठक, बाहूपबाहूसन्धि शे.१२४, कपोणि, शि.४६ कुर्पर शि. ४७] ।

*कं फणति इति कफणिः, स्त्रीलिङ्गः "कूर्परः "कफणिर्निषण्" इति पुंस्यपि वैजयन्ती ।

**(कफाणि)** स्त्री-५९०-કોણી.

द्र०कफणिशब्दः ।

**कफिन्**-पुं-४६०-શ્લેષ્મ કે કફના રોગવાળો

☐श्लेष्मल, श्लेष्मण ।

*कफोऽस्यास्तीति कफी ।

**कफोणि**-स्त्री-५९०-કોણી.

द्र०कफणिशब्दः ।

*कं फणति गच्छतीति कफोणिः स्त्रिलिङ्गः, पृषोदरादित्वात् कफाणिरपि । **शेषश्चात्र**-"कफणौ रत्निपृष्ठकम् बाहूपबाहुसन्धिश्च ॥" इति ।

**कबन्ध**-पुं न.-५६५-નાચતું ધડ,

☐रुण्ड ।

*कूयते शब्द्यते इति कबन्धः, पुंक्लीबलिङ्गः, "कोरन्धः" (उणा-२५७) इत्यन्धः, कस्य शिरसो बन्धोऽत्रेति वा केन बध्यत इति वा, पृषोदरादित्वात् ।

**कबन्ध**-न.-१०७०-ચોખ્ખુ પાણી

द्र०अप्शब्दः ।

*कसुखं वायुं वह्निं वा बध्नातीति कबन्धम्, कम्, अन्धम्, इति द्वे नाम्नी इत्येके ।

**कबर**-पुं-१४६९-મિશ્રિત, એકઠું થયેલું.

☐कम्रब, मिश्र, संपृक्त, खचित ।

*कूयते इति कबरः, "ऋच्छिचटि-" (उणा-३९७) इत्यरः ।

**कबरी**-स्त्री-५७०-કેશરચના, અંબોડો.

☐केशवेष (बर्बरी शे.११९) ।

*केशानां वेषे रचनायां कूयते इति कबरी, "ऋच्छिचटि"-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(उणा–३९७) इत्यरे "भाजगोण—" ॥२।४।३०॥ इति ङीः, कं वृणोतीति वा । शेषश्चात्र—

**'कबित्थ'**–पुं–११५१–કોઠ, કોઠી.

द्र० कपित्थशब्दः ।

**कमठ**–पुं–१३५३–કાચબો.

द्र० कच्छपशब्दः ।

*काम्यते यज्ञार्थमिति कमठः, 'मृजुश्रु–" (उणा–१६७) इत्यठः, के मठति निवसतीति वा ।

**कमण्डलु**–पुं न.–८१६–સંન્યાસીનું જલપાત્ર.

☐कुण्डिका ।

*कं पानीयमनित्यऽत्रेति कमण्डलुः, पुंक्लीबलिङ्गः, "गूहलु-गुग्गलु-कमण्डलवः" (उणा–८२४) इति साधुः, कं जलं अण्डे मध्ये लातीति वा ।

**कमन**–पुं–२११–બ્રહ્મા.

द्र० अजशब्दः ।

*कामयतेऽभिलषति सुतामिति कमनः ।

**कमन**–पुं–२२७–કામદેવ.

द्र० अङ्गजशब्दः ।

*कामयते शृङ्गारमिति कमनः, "रम्यादिभ्यः कर्तरि" (५।३।१२६) इत्यनट् ।

**कमन**–पुं–४३४–(शि. ३१)–કામી, વાસનાયુક્ત.

द्र० अभिकशब्दः ।

**कमनच्छद**–पुं–१३३३–કંકપક્ષી.

द्र० कङ्कशब्दः ।

*कमनः, कान्तश्छदोऽस्येति कमनच्छदः ।

**कमनीय**–न.–१४४५–સુંદર, મનોહર.

द्र० अभिरामशब्दः ।

*काम्यते इति अनीये कमनीयम् ।

**'कमन्ध'**–न.–१०७०–પાણી.

द्र० अपूशब्दः ।

**कमर**–पुं–४३४–કામી.

द्र० अभिकशब्दः ।

*कामयते इति कमरः, कच्छिचटि–" (उणा-३९७) इत्यरः ।

**कमल**–न–१०६९– પાણી.

द्र० अपूशब्दः ।

*काम्यते इति कमलम्, "मृदिकन्दि-" (उणा–४६५) इत्य लः ।

**कमल**–न.–११६०–કમળ.

द्र० अरविन्दशब्दः ।

*काम्यते श्रिया इति कमलं, "मृदिकन्दि-" (उणा–४६५) इत्यलः, कमम्भोऽलति भूषयति वा, केन मल्यत इति वा ।

**(कमलजन्मन)**–पुं–२१३–બ્રહ્મા

द्र० अच्युतशब्दः ।

**कमला**–स्त्री–२२६ લક્ષ્મી.

द्र० आशब्दः ।

*कमलमस्त्यस्याः इति कमला ।

**कमलिनी**–स्त्री–११६०(शि.१०५)–કમળનો વેલો.

द्र० नलिनीशब्दः ।

**कमलोत्तर**-न–११५९-કસુંબો, કસુંભ.

☐लट्वा, महारजन, कुसुम्भ, 'वह्निशिख' ।

*कमलेभ्य उत्तरं वर्णाधिक्यात् इति कमलोत्तरम् ।

**कमितृ**–पुं–४३४–કામી.

द्र० अभिकशब्दः ।

*कमनशीलः, तृनि कमिता ।

**कम्प**–पुं–३०६-કંપ, ધ્રુજવું તે.

☐वेपथु ।

*कम्पनमिति कम्पः ।

**कम्पन**–न.–१४५५–ચપલ, અનિત્ય.

द्र० अस्थिरशब्दः ।

*कम्पनशीलं कम्पनं, "इङ्गितः–"(५।२।४४) इत्यनः ।

**कम्पाक**–पुं–११०६–વાયુ, પવન.

द्र० अनिलशब्दः ।

*कम्पाकश्चिह्नमस्येति कम्पाकः ।

**कम्पित**–न.–१४८१-કંપેલું.

द्र० अन्दोलितशब्दः ।

*कम्प्यते इति कम्पितम् ।

**कम्प्र**–न,–१४५५-અનિત્ય.

द्र० अस्थिरशब्दः ।

*कम्पनशीलं, "स्म्यजस–" (५।२।७९) इति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रे कम्प्रम् ।

**कम्बल**-पुं-स्त्री-६७०-ઊનનું વસ્ત્ર, કંબલ.

□उर्णायु, आविक, औरभ्र, रल्लक ।

*काम्यते इति कम्बलः, पुंस्त्रीलिङ्गः, "शमि-कमि-" (उणा-४९९) इति बलः प्रत्ययः ।

**कम्बल**-पुं-१३११-એક પ્રકારનો નાગ.

□अश्वतर, धृतराष्ट्र, बलाहक ।

*कामयते इति कम्बलः ।

**कम्बल** न.-१०७० (शेष. १६५)-પાણી.

द्र० अप्शब्दः ।

**कम्बलिवाह्यक**-न. पुं-७५३-બળદગાડી.

□गन्त्री ।

*कम्बलिभिर्दान्तैर्वोढव्यं कम्बलिवाह्यम्, पुंक्लीबलिङ्गः ।

**कम्बि**-स्त्री-१०२१-કડછી.

□'कम्बी, दर्वी, दर्वि', खजाका, ।

*काम्यते इति कम्बिः, "छविछिवि-" (उणा-७०६) इति वौ निपात्यते ।

**'कम्बी'**-स्त्री-१०२१-કડછી

द्र० काम्बिशब्दः ।

**कम्बु**-पुं न.-१२०४-શંખ

□वारिज, त्रिरेख, षोडशावर्त, शङ्ख ।

*काम्यते इति कम्बुः, पुंक्लीबलिङ्गः, "कम्यमिभ्यां-" (उणा-७९९) इति बुः ।

**कम्बुग्रीवा**-स्त्री-५८६-ત્રણ રેખાવાળી ડોક, શંખાકાર ડોક

*रेखात्रयाङ्किता, शङ्खाकृतिर्वा ग्रीवा कम्बुग्रीवा ।

**कम्भारी**-स्त्री-१३४३-સીવણ નામની વનસ્પતિ

द्र० काश्मरी शब्द ।

**कम्र**-पुं-४३४-કામી

द्र० अभिकशब्दः ।

*कमनशीलः इति कम्रः, "स्म्यजस"-(५।२।७९) इति रः ।

**कम्र** न.-१४४५-સુંદર, મનોહર.

द्र० अभिराम शब्दः ।

*काम्यते इति कम्रं, "स्म्यजस-" (५।२।७९) इति बाहुलकात् कर्मण्यपि रः ।

**कर** (परि.)-पुं-५-આ શબ્દ લગાડતા જનક વાચક શબ્દ બને છે.

**कर**-पुं-१००-કિરણ

द्र० अंशुशब्दः ।

*कीर्यते इति करः, अल् ।

**कर**-पुं-५९१-હાથનો પંજો.

□पञ्चशाख, शय, शम, हस्त, पाणि, [भुजदल, सल शे. १२४] ।

*कुर्वन्त्यनेन, कार्यते वा करः ।

**कर**-पुं-७४५-મહેસુલ.

□बलि, भागधेय ।

*कीर्यते क्रियते वा प्रत्येकमिति करः ।

**कर**-पुं-१२२४-હાથીની સૂંઢ.

□हस्तिनासा, शुण्डा, हस्त ।

*करोति, किरत्यनेन वेति करः ।

**करक**-पु न. स्त्री.-१६६-પાણીના કરા

□घनोपल, [अम्बुघन, मेघकफ, मेघास्थिमिञ्जिका शे. २९, बीजोदक, तोयडिम्भ, वर्षाबीज इरावर, शे. ३०] ।

*कीर्यते इति करकःत्रिलिङ्गः "दृकृनृ"-(उणा-२७) इत्यादिना अकः । **शेषश्चात्र**-"करकेऽबुघनो मेघकामो मेघास्थि-पुञ्जिका । बीजोदकं तोयडिम्भो वर्षाबीजमिरावरम् ।

**करक** पुं-न.-१०२१-ઝારી, નાનું પાણીનું પાત્ર.

द्र० आलूशब्दः ।

*किरत्यम्भः इति करकः, "दृकृनृ-"उणा-२७) इत्यकः, पुंक्लीबलिङ्गोऽयम्

**'करकट'** पु-१३५२-કરચલો

द्र० कर्कट शब्द ।

**करकपात्रिका**-स्त्री-१०२५-ચામડાની ઝારી, ચામડાનું પાત્ર.

*करकवत् पिबन्त्यनया इति के करकपात्रिका ।

**करङ्क**-पुं ६२८-મજ્જા, હાડકાની ચરબી.

□ककाल, अस्पिच्जर ।

*कीर्यते श्वादिभिरिति करङ्कः, "करोऽङ्को रो लश्च वा" (उणा-६२) इति अङ्कः प्रत्ययः ।

**करङ्क** पुं-१०२२-નાળીયેરની કાચલી.

*किरत्यम्बु इति करङ्कः, "किरोङ्को-" (उणा ६२) इत्यकः ।

**करज**-पुं-५९४-નખ

□कामाङ्कुश, महाराज, नखर, नख, करशूक, भुजाकण्ट, पुनर्भव, पुनर्नव, (पाणिज, कररुह) ।

*कराज्जातः इति करजः, यौगिकत्वात् पाणिज-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

करुहादयः ।

**'करज'**-પું-૧૧૪૦-કરંજ વૃક્ષ

द्र० करञ्ज शब्द ।

**करञ्ज**-પું-૧૧૪૦-કરંજ વૃક્ષ, કરમદાનું ઝાડ.

☐नक्तमाल, 'चिरबिल्व, ( चिरिबिल्व ) रक्तमाल, करज' ।

*करोतीति करञ्जः, "कृगोऽञ्जः' (उणा-१३६) करं जयतीति वा ।

**करट**-પું-૧૨૨૫-હાથીનું ગંડસ્થળ.

☐गण्ड, कट ।

*करोति मदमिति करटः, "दिव्यवि"- (उणा-१४२) इत्यटः ।

**करट**-પું-૧૩૨૨-કાગડો.

द्र० अन्यभृत्शब्दः ।

*करोति शब्दमिति करटः, "दिव्यवि-" (उणा १४२) इत्यटः, 'क' इति रटतीति वा ।

**करट**-ન.-૬૪૫-(શે. ૧૩૨)-કેશર.

द्र० असृक्संज्ञशब्दः ।

**(करट)**-ન.-૨૮૭-મૃદંગ ઢોલ, તબલા, વગેરે

द्र० आनद्धशब्दः ।

**करटा**-સ્ત્રી-૧૨૬૯-કષ્ટથી દોહી શકાય તેવી ગાય.

☐दुःखदोह्या ।

*करोति खेदमिति करटा, "दिव्यवि-" (उणा १४२) इत्यटः, दुःशीलेत्यर्थः ।

**करटिन**-પું-૧૨૧૭-હાથી.

द्र० अनेकपशब्दः ।

*करटः कपालोऽस्त्यस्येति करटी ।

**करटु**-પું-૧૩૩૭-અશુભ બોલનાર એક પક્ષી.

☐कर्करेटु, करेटु, कर्कराटुक, (कर्कराटु) ।

*क इति रटतीति करटुः, "केवयुभुरणु-" (उणा ७४६) इति उप्रत्यये निपात्यते ।

**करण**-ન.-૮૨-આસન, પદ્માસન વગેરે.

☐आसन ।

*क्रियते मनोऽवश्यमनेनेति करणम् ।

**करण**-ન.-૫૬૩-શરીર

द्र० अङ्गशब्दः ।

क्रियतेऽनेनेति करणम् ।

**करण**-પું-૮૯૭-વૈશ્ય પુરુષ અને શૂદ્ર સ્ત્રીથી ઉત્પન્ન થયેલ મનુષ્ય.

द्र० अङ्गशब्दः ।

*करोतीति करणः, नद्यादित्वाद् अनः ।

**करण**-ન.-૧૩૮૩-ચક્ષુ વગેરે ઇન્દ્રિય.

द्र० अक्षशब्दः ।

*क्रियतेऽनेनेति करणम् ।

**करण**-પું-૪૮૪ (શે. ૧૦૭) લેખક, લહિયો.

द्र० अक्षरचरणशब्दः ।

**करण**-ન.-૫૧૮-(શે૫૧૧)-લગ્ન સમયે હાથમાં લેપ કરવો તે.

**करणत्राण**-ન.-૫૬૭-મસ્તક.

द्र० उत्तमाङ्गशब्दः ।

*करणानीन्द्रियाणि त्रायन्तेऽनेनेति करणत्राणम् ।

**करतोया**-સ્ત્રી ૧૦૮૫-પાર્વતીના વિવાહમાં કન્યાદાનના જળથી ઉત્પન્ન થયેલી નદી.

☐सदानीरा ।

*गौरीविवाहे हरहस्तात् प्रदानतो या जाता सा करतोया ।

**करपत्रक**-ન-૯૧૮-કરવત.

☐क्रकच ।

*करैसंचार्यं शस्त्रं इति करपत्रं, करशब्दोच्चारणेन पततीति वा त्रट् ।

**करपाल**-પું-૭૮૨ (શે. १४१) તલવાર.

द्र० असिशब्दः ।

**करभ**-પું-૫૯૨-હાથના કાંડાથી ટચલી આંગળી સુધીનો ભાગ.

*मणिबन्धात् कनिष्ठा यावत् करे भातीति करभः ।

**करभ**-પું-૧૨૫૫-ત્રણ વરસનો ઊંટ.

*कीर्यते इति करभः, 'कृशृगृ'-(उणा-३२९) इत्यभः, कं शिरो रभत उन्नमयतीति वा ।

**करभूषण**-ન.-૬૬૨-પોંચી, કડું, બંગડી.

द्र० आवापशब्दः ।

*करस्य भूषणमिति करभूषणम् ।

**करमाल**-પું-૧૧૦૪-ધૂમાડો.

द्र० अग्निवाहशब्दः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*कार्यते वायुना इति करमालः, "चात्वाल–" (उणा–४८०) इत्याले निपात्यते ।

**करम्ब**–पुं.–१४६९–मिश्रित, એકઠું થયેલું.

☐कब्बर, मिश्र, संपृक्त, खचित ।

*क्रियते इति करम्बः, "कृकडि–" (उणा–३२१) इत्यम्बः ।

**करम्ब**–पुं–३९९(शे. ५६) દહીં છાંટેલો સાથવો, કરંબો.

☐करम्भ, दधिसक्तु ।

**करम्भ**–पुं–३९९–દહીં છાંટેલો સાથવો, કરંબો.

☐दधिसक्तु, [करम्ब शे० ५६] ।

*करोति तृप्तिमिति करम्भः, "कृकलेरम्भः" (उणा–३३६) इत्यम्भः केन रभ्यते मील्यते वा ।

**(कररुह)**–पुं–५९४––નખ.

द्र० करजशब्दः ।

**करवाल**–पुं–७८२–તલવાર.

द्र० असिशब्दः ।

*करं पालयतीति करपालः, जपादित्वाद् वत्वे करवालः, करे वालो वलनमस्येति वा ।

**करवालिका**–स्त्री–७८५–નાની તલવાર, કટારી.

द्र० ईलीशब्दः ।

*अल्पः करवालः करवालिका, **तरवालिकेत्यन्ये** "न्युब्जः खड्गः कडितलम्" इति **व्याडिः** ।

स **चास्माभिर्देश्यामुक्तः** ।

**करवीर**–न.–९८९–સ્મશાન.

☐श्मशान्, पितृवन, पितृगृह, प्रेतवन, प्रेतगृह ।

* करेवीर्यन्तेऽत्रेति करवीरम् ।

**करवीर**–पुं–११३७–કણેર.

☐हयमार, 'प्रतिहास, (प्रतीहास), शतप्रास, चण्डात', ।

*किरतीति करवीरः, "जम्बीर"–(उणा–४२२) इति निपात्यते, कृणोति हिनस्तीति करः स वीर इव मारकत्वात् करवीरः ।

**करवीरक**–पुं––११९७–એક પ્રકારનું સ્થાવર વિષ.

द्र० अङ्कोल्लसारशब्दः ।

*करवीरमूलजत्वात् करवीरः, **यदाह**— "करवीरं त्वश्वसारमूलजं सर्वतोभवम्" इति ।

**करवीरक**–पुं––२०९ (शे. १३)––કાર્તિકેય, શંકરનો પુત્ર.

द्र० अग्निभूशब्दः ।

**करवीरा**–स्त्री–१०६०–મણશીલ ધાતુ.

☐मनोगुप्ता, मनःशिला, नागमातृ, रोचनी, रसनेत्रिका, नेपाली, कुनटी, गोला, मनोह्वा, नागजिह्विका, [शिला, नैपाली शि. ९३] ।

* करे विशेषेण ईर्यते इति करवीरा ।

**करशाखा**–स्त्री–५९२–આંગળીઓ

द्र० अङ्गुलीशब्दः ।

*करस्य शाखेवेति करशाखा ।

**करशीकर**–पुं–१२२३–હાથીની સૂંઢમાંથી ઉડતા પાણીના બિંદુઓ.

☐वमथु ।

*करस्य शीकरोऽम्बुकणः इति करशीकरः ।

**करशूक**–पुं–५९४–નખ.

द्र० करजशब्दः ।

*करस्य शूक इव करशूकः ।

**करहाट**–पुं–११६६–કમળ વગેરેનાં મુલકન્દ.

☐शिफा, कन्द, 'शिफाकन्द' ।

*कं रहयन्तीति करहाः पद्मादयो जलोत्थास्तान- टतीति करहाटः, कीर्यते इति वा "कपाटविराट–" (उणा–१४८) इत्याटे निपात्यते ।

**कराली**–स्त्री–५१३ (शि.४०)–પત્ની પરણેલી સ્ત્રી.

द्र० उढाशब्दः ।

**करालिक**–पुं–१११४–વૃક્ષ, ઝાડ.

द्र० अङ्घ्रिपशब्दः ।

*करालमुच्चं शिखरमस्त्यस्येति करालिकः ।

**करालिक**–पुं–७८२ (शे. १४६) –તલવાર.

द्र० असिशब्दः ।

**करालिका**–स्त्री–२०५(शे.५९) –પાર્વતી.

द्र० अद्रिजाशब्दः ।

**करि**–पुं–१२१८–(शि. १०९) –હાથી.

द्र० अनेकपशब्दः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**करिन्**-પું-१२१७-હાથી.

द्र० अनेकपशब्दः ।

*करोऽस्त्यस्येति करी ।

**करीर**-પું-ન.-१०१९-ઘડો, કળશ.

□घट, कुट, कुम्भ, कलश, कलस, निप ।

*कीर्यते इति करीरः, पुंक्लीबलिङ्गः, "कृ_दृ" (उणा-४१८) इतीरः ।

**करीर** पुं. न.-११५०-કેરડો.

□क्रकर, 'ग्रन्थिल' ।

*करतीति करीरः, पुंक्लीबलिङ्गः, करिण ईरयति कण्टकैर्वा ॥

**करीर**-ન.-११८३-વંશ વગેરેનો અંકુર.

*करीरं वंशादेः अग्रं करीरवृक्षादेः ।

**करीष**-ન. પું-१२७३-સુકું છાણું.

□गोग्रन्थि, छगण ।

*कर्यतेऽग्नौ इति करीषं पुंक्लीबलिङ्गः 'कृतृभ्याम्' (उणा-५५३) इतीषः ।

**करिषाग्नि**-પું-११०१-છાણનો અગ્નિ

□छागण ।

*करीषस्याग्निरिति करीषाग्निः ।

**करुण**-પું-२९४-નવ રસમાંનો એકરસ

*किरति विक्षिपति चित्तानीति करुणः, "ऋक्रुवृधृ-रिभ्यः (उणा-१९६) इत्युणः ।

**करुण**-પું-११४९-કુટજ વૃક્ષ.

□मल्लिकापुष्प ।

*कीर्यते इति करुणः, "ऋक्रुवृ-" (उणा-१९६) इत्युणः ।

**करुणा**-સ્ત્રી-३६९-દયા, અનુકંપા.

द्र० अनुकम्पाशब्दः ।

*किरति चित्तमिति करुणा, "ऋक्रुवृ-" (उणा-१९६) इत्युणः ।

**करुणापर**-પું-३६८-દયાળુ

□दयालु, कृपालु, सूरत ।

*करुणायां पर इति करुणापर ।

**करेटु**-પું-१३३७-અશુભ બોલનાર એક જાતનું પક્ષી.

द्र० करटुशब्दः ।

*क इति रेटते इति करेटुः "केवयुभुरणु-" (उणा-७४६) इति उप्रत्यये निपात्यते ।

**करेणु**-પું સ્ત્રી.-१२१८—હાથી

द्र० अनेकपशब्दः ।

*करोति प्रमोदमिति करेणुः, स्त्रीध्वजोऽपि, पूंस्त्रीलिङ्गः, "कृहृभू":-(उणा-७७२) इत्येणुः प्रत्ययः । करेणुः सिन्दुररजोऽस्य वा ।

**करेणुभू**-પું-८५३-પાલકાપ્ય ઋષિ

□पाल्काप्य, [कारेणव शि. ७५] ।

*करेणोः करिण्या भवतीति करेणुभूः कारेण-वोऽपि ।

**करोटि**-સ્ત્રી-६२६-માથાનું હાડકું, કરોડ

□ (करोटी) ।

*करट्यते इति करोटिः, स्त्रीलिङ्गः, "स्वरेभ्यः इः" (उणा-६०६)ङ्यां करोटी ।

**(करोटी)** -સ્ત્રી-६२६ માથાનું હાડકું, કરોડ

करोटि

*करोट्यते इति करोटि स्त्रीलिङ्गः, स्वरेभ्यः इः" (उणा-६०६) ङ्यां करोटी ।

**कर्क**-પું.-१२३७-ધોળો ઘોડો

□कोकाह ।

* श्वेतवर्णेऽश्वे करोति प्रमोदमिति कर्कः "कृको वा" (उणा-२३) इति कः ।

**कर्कट**-પું-१३३४-કંક પક્ષી

द्र० कङ्कशब्दः ।

*"कर्किः सौत्रः", कर्कतीति कर्कटः "दिव्यवि" (उणा १४२) इत्यटः ।

**कर्कट**-પું-१३५२-જળચર, જલજંતુ

□कुलीर, 'कुलिर, करकट, कर्कड,' पिङ्गच-क्षुष् पार्श्वोदरप्रिय, द्विधागति, षोडशांह्रि, कुरचिल्ल, बहिश्चर ।

*"कर्किः सौत्रः" कर्कतीति कर्कटः, "दिव्यवि"-(उणा-१४२) इत्यटः ।

**(कर्कट)**-પું-११६-કર્ક રાશિ.

**कर्कटी**-સ્ત્રી-११८९-કાકડી

द्र० अर्वारुशब्दः ।

*कर्कति इति कर्कटी, "दिव्यवि-" (उणा-१४२ इत्यटः, हस्वः कर्क इति वा, ग्रामटीवत् ।

**'कर्कड'**-પુ.-१३५२-કરચલો

द्र० कर्कटशब्दः ।

**कर्कन्धु**–स्त्री–११३८–બોરડી

□कुवली, कोलि, 'कोली, कोला', बदरी [कर्कन्धू शि. १०२]।

*कर्कस्य अन्धुरिव कर्कन्धुः, कर्कन्धूरपि।

**कर्कन्धू** –स्त्री–११३८ (शि. १०२)–બોરડી

द्र० कर्कन्धुशब्दः।

**कर्कर**–पुं–६२६–હાડકું

द्र० अस्थिशब्दः।

* करोति मज्जानमिति कर्करः, "किशृवृभ्यः–" (उणा–४३५) इति बहुवचनात् करः।

**(कर्कराटु)** –पुं–१३३७–અશુભ બોલનાર એક પક્ષી.

द्र० करटुशब्दः।

*कर्कतीति कर्कराटुः, "केवयुभुरणु–" (उणा ७४६) इति उप्रत्यये निपात्यते।

**कर्कराटुक**–पुं–१३३७—અશુભ બોલનાર એક પક્ષી.

द्र० करटुशब्दः।

**कर्कराल** पुं ५६९ ગુંચળાવાળા વાળ વાંકા વાળ

द्र० अलकशब्दः।

*कर्करत्वेन कठोरत्वेन अलतीति कर्करालः।

**कर्करी**–स्त्री–१०२१–ઝારી, નાનું પાણીનું પાત્ર

द्र० आलूशब्दः।

*किरत्यम्भः इति कर्करी, "ऋतष्टित्" (उणा ९) इत्यप्रत्ययः सरुपद्विर्वं च।

**कर्करेटु**–पुं–१३३७–અશુભ બોલનાર એક પક્ષી.

द्र०करटुशब्दः।

*'कर्क' इति रेटते इति कर्करेटुः। "केवयु-भुरणु–" (७४६) इति उप्रत्यये निपात्यते।

**कर्कश**–पुं–१३८६–કઠોરસ્પર્શ, નિષ્ઠુર.

द्र०कक्खटशब्दः।

*कर्कोऽभिरुपगानमस्त्यस्येति कर्कशः, लोमादित्वात् शः।

**कर्कारु**–पुं–११८८–કોળું.

□कुष्माण्डक।

*'कर्किः सौत्रः' कर्कतीति कर्कारुः, पुंलिङ्गः, "कर्केरारुः" (उणा–८२३) करोति तृप्तिमिति कर्कः इयर्ति अरुर्बस्तिशोधनसरत्वात्, कर्कश्चासावरुश्चेति वा।

**कर्कोटक**–पुं–११९०–કંકોડી, તમાલપત્ર.

□किलासघ्न, तिक्तपत्र, सुगन्धक।

*करोति किलासहिंसामिति कर्कोटः, "कपोट-वकाट–" (उणा–१६१, इत्योटे निपात्यते, के कर्कोटकः।

**'कर्चूर'**–न.–१०४४–સોનું

द्र०अर्जुनशब्दः।

**कर्ण**–पुं–५७४–કાન

□श्रुति, श्रवस्, शब्दाधिष्ठान, पञ्जुष, महानाद, ध्वनिग्रह, श्रोत्र, श्रवण, [शब्दग्रह शि.४५]।

*कर्ण्यतेऽनेनेति कर्णः, किरत्यनेनेति वा "इणुवि" –(उणा–१८२) इति णः।

**कर्ण**–पुं–७११–કર્ણરાજા.

द्र०अङ्गराट्शब्दः।

*किरति शत्रूनिति कर्णः।

**कर्ण** –पुं.–८७९(शि.७८)–વહાણનું સુકાન હલેસું.

द्र०अरित्रशब्दः।

**कर्णकीटा**–स्त्री–१२१०–કાનખજૂરો.

□कर्णजलौका, 'कर्णजलूका, कर्णजलौकस्', शतप

*कर्णं कीटजतीति कर्णकीटा।

**'कर्णजलूका'**–स्त्री–१२१०–કાનખજૂરો

द्र०कीर्णकीटाशब्दः।

**'कर्णजलौकस्'**–स्त्री–१२१०–કાનખજૂરો.

द्र०कर्णकीटाशब्दः

**'कर्णजलौका'**–स्त्री–१२१०–કાનખજૂરો.

द्र०कर्णकीटाशब्दः

*कर्णस्य जलौकेव कर्णजलौका।

**कर्णजित्**–पुं–७१०–અર્જુન.

द्र०अर्जुनशब्दः।

*कर्णं जितवान् इति कर्णजित्, यौगिकत्वात् कर्णारिरित्यादयोऽपि।

**कर्णधार**–पुं–८७६–સુકાની.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

☐नाविक ।

*कर्णमरित्रं धारयतीति कर्णधारः, यद् दुर्गः "कर्णः श्रोत्रमरित्रं च" इति ।

**कर्णधारिणी**-स्त्री-१२१८ (शे. १७७)-હાથણી.

द्र० धेनुकाशब्दः ।

**कर्णपुर**-स्त्री-९७७-ચંપાપુરી, ભાગલપુર.

☐चम्पा, मालिनी, लोमपादपूर, (लोमपादपुरी, कर्णपुरी) ।

*कर्णः कौन्तेयः तस्य पूः इति कर्णपूः ।

**(कर्णपुरी)**-स्त्री-९७७-ચંપાપુરી, ભાગલપુર.

☐कर्णपूरशब्दः ।

**कर्णपूर**-पुं. न.-६५४-કાનનું આભૂષણ

☐उत्तंस, अवतंस ।

*कर्णं प्रयतीति कर्णपूरः, पुंक्लीबलिङ्गोऽयम् ।

**कर्णप्रान्त**-पुं-५७४ (शेष १२०)-કાનનો પ્રાન્તભાગ

☐[धारा शे.१२०] ।

**कर्णभूषण**-न-६५५-કાને પહેરવાનું આભૂષણ.

☐कर्णिका ।

* कर्णस्यभूषण-मिति कर्णभूषणम्

**कर्णमूल**-न.-१२२५-હાથીના કાનનું મૂળ.

☐चुलिका ।

*कर्णस्यमूल-मिति कर्णमूलम् ।

**कर्णमूल**-न.-५७४ (शेष १२०)-કાનનો મુળ ભાગ

☐[शीलक शे.१२०] ।

**कर्णमोटी**-स्त्री-२०६-ચામુંડાદેવી.

द्र० कपालिनीशब्दः ।

*कर्णान् मोटयति दैत्यानां इति कर्णमोटी ।

**कर्णलतिका**-स्त्री-५७४-કાનનો અગ્રભાગ.

☐पालि ।

*कर्णस्य लतेव कर्णलतिका **शेषश्चात्र**- कर्णप्रान्तस्तु धारा स्यात् कर्णमूलं तु शीलकम् ॥"

**कर्णवेष्टक**-पुं.-६५६-કુંડલ

☐ताडङ्क, ताडपत्र, (सौवर्ण) कुण्डल, [कर्णादर्श शे.१३५] ।

*कर्णं वेष्टते इति कर्णवेष्टः के कर्णवेष्टकः ।

**कर्णशष्कुली**-स्त्री-५७४-કાનમાં રહેલ પોલાણ.

☐वेष्टन ।

*शक्नोत्यनया श्रोतुं शष्कुली, कर्णस्य शष्कुली, कर्णशष्कुली ।

**कर्णसू** पुं-९८ (शेष ८) સૂર્ય.

द्र० अंशुशब्दः ।

**कर्णादर्श** -पुं-६५६ (शे. १३५)-કુંડલ

द्र० कर्णवेष्टकशब्दः ।

**कर्णान्दु**-पुं-६५६-કાનનું આભૂષણ.

☐उत्क्षिप्तिका, [कर्णान्दू शि.५४] ।

*कर्णयोरन्द्यते इति कर्णान्दुः, "भृमृत्-" (उणा-७१६) इति बहुवचनादुः, स्त्रीलिङ्गः **वैजयन्तीकारस्तु**- "कर्णान्दुः" इत्यूकारान्तमाह ।

**कर्णान्दु**- स्त्री-६५६-(शि.५४) કાનનું આભૂષણ

☐उत्क्षिप्तिका, कर्णान्दु ।

**कर्णारि** -पुं-७१०-અર્જુન

द्र० अर्जुनशब्दः ।

**कर्णिका**-स्त्री-६५५-કાને પહેરવાનું ઘરેણું

☐कर्णभूषण ।

*कर्णे भवा कर्णिका, "कर्णललाटात् कल्" ॥६।३।१४१॥ इति ।

**कर्णिका**-स्त्री-११६५-કમળના બીજનો ડોડો

☐बीजकोश, वराटक ।

*असत्यपि कर्णभवत्वे रुढत्वात् कर्णे भवा कर्णिका "कर्णललाटात्-" ॥६।३।१४१॥ इतिकल् ।

**कर्णिका**-स्त्री-१२२४-હાથીની આંગળી.

*किरत्यनया इति कर्णिका, "कुशिक-" (उणा-४५) इतीके निपात्यते, कर्णिकेव वा कर्णिका ।

**कर्णिकाचल**-पुं-१०३१-મેરુ પર્વત.

☐मेरु, रत्नसानु, सुमेरु, स्वर्गिरि, स्वर्गिगिरि, काञ्चनगिरि ।

*जम्बूद्वीपपद्मस्य कर्णिकाभूतोऽचलः कर्णिकाचलः ।

**कर्णिकार**-पुं-११४५-પીળી કરેણ, કણેર.

☐द्रु मोत्पल, 'परिव्याध' ।

* कर्णिकामियर्तीति कर्णिकारः ।

**कर्णिकाच्छाय**-न.-१०४५ (शेष १६४)-સોનું.

द्र० अर्जुनशब्दः ।

**कर्णीरथ**-पुं-७५३-ચકડોળ.

☐प्रवहण, डयन, रथगर्भक ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*कर्णाः सन्त्येष्विति कर्णिनः स्कन्धास्तेषु रथः कर्णीरथः पुंस्कन्धवाह्यो रथः, बाहुलकाद् दीर्घः, कर्ण्यां चतुष्काष्ठयां स्थितो रथ इति वा ।

**कर्णेजप** पुं-३८०-દુર્જન, ચાડીયો.

☐ दुर्जन, पिशुन, सूचक, नीच, द्विजिह्व, मत्सरिन्, खल, [क्षुद्र, प्रखल शे.९४] ।

* कर्णे जपति सूचयतीति कर्णेजपः "शोकापनुदतुन्द-परिमृजः" ॥५।१।१४३॥ इति के निपात्यते ।

**कर्तन**-न.-३७२-કાપવું તે.

☐कल्पन, वर्धन, छेद ।

*कृत्यते इति कर्तनम् ।

**कर्तनसाधन**-न-९११-ચરખો, રેંટીયો.

☐तर्कु ।

*कृत्यते इति कर्तनं तस्य साधनम् ।

**(कर्तरि)** स्त्री-७८१-બાણનું મૂલ.

☐पुङ्ख, कर्तरी ।

* कृत्यते छिद्यतेऽसौ इति कर्तरिः, काष्ठशृङ्गादिमयी "नदिवल्लर्यर्ति-" (उणा-६९८) इति'अरिः' ।

**(कर्तरि)**-स्त्री-९११-કાતર.

☐कृपाणी, कर्तरी, कल्पनी ।

*कृत्यतेऽनया इति कर्तरिः, "नदिवल्लयर्ति-" (उणा-६९८) इति'अरिः' ।

**कर्तरी**-स्त्री-७८१ બાણનું મૂલ.

☐पुङ्ख, (कर्तरि) ।

*कृत्यते छिद्यतेऽसौ इति कर्तरिः, काष्ठशृङ्गादिमयी "नदिवल्लर्यर्ति-"(उणा-६९८) इति'अरिः'ङ्यां कर्तरी ।

**कर्तरी**-स्त्री-९११-કાતર.

☐कृपाणी (कर्तरि) कल्पनी ।

*कृत्यतेऽनया इति कर्तरिः, "नदिवल्लयर्ति-" (उणा-६९८) इति'अरिः,' ङ्यां कर्तरी ।

**कर्तृ**-पुं-५ (પરિ.) આ શબ્દ લગાડતાં જનક વાચક શબ્દ બને છે.

**कर्दन**-न-१४०३-આંતરડાનો ગડગડાટ.

*कर्दते इति कर्दनम् ।

**कर्दम**-पुं-१०९०-કાદવ.

☐जम्बाल, चिकिल, पङ्क, निषद्वर, शाद, (विस्कल), [चिक्खल्ल शि. ९९] ।

*कर्दति निष्पीडितः इति कर्दमः, "सृपृप्रथि"—(उणा-३४७) इति'अमः' ।

**कर्दम**-पुं-११९८-એક પ્રકારનું સ્થાવર વિષ.

द्र० अङ्कोल्लसारशब्दः ।

*कर्दमस्य मत्त्वादिति कर्दमः ।

**कर्पट**-पुं. न.-६७६-વસ્ત્રનો ટુકડો, ગાભણું

☐नक्तक ।

* कल्पते इति कर्पटः, पुंक्लीबलिङ्गः, 'दिव्यवि"-(उणा-१४२) इति 'अटः' ।

**कर्पट**-न.-६६७-( शे. १३७ )-વસ્ત્ર.

द्र० अंशुकशब्दः ।

**कर्पर**-पु.-६२७-કપાળ.

☐कपाल, [शकल शि. ४८] ।

*कल्पते कापालिकानां इति कर्परः, "जठर-" (उणा-४०३) इति 'अरे' निपात्यते ।

**कर्पर** पु.-१०२२ લોઢાની કઢાઇ, તવી વગેરે.

☐कटाह ।

* कीर्यते इति कर्परः "जठर-" (उणा-४०३) इति 'अरे' निपात्यते ।

**कर्परिकातुत्थ**-न. १०५३-ખાપરીઉ, એક જાતનું મોરથુથુ.

☐अमृतासङ्ग, अञ्जन ।

*कल्पते रोगान् जेतुमिति कर्परिका, कर्परिका लक्षणं तुत्थमिति कर्परिकातुत्थम् ।

**कर्पास**-पुं. न.-११३९-કપાસનો છોડ.

☐'कार्पासी, कर्पासी,' बादर, 'बदरा', पिचव्य ।

*करोति शोभामिति कर्पासः पुंक्लीबलिङ्गः, "कुकुरिभ्यां पासः" (उणा-५८३) इति 'पासः' ।

**'कर्पासी'**-स्त्री-११३९-કપાસનો છોડ.

द्र०कार्यशब्दः ।

**कर्पूर**-पुं-६३८-કપૂર, યક્ષકર્દમમાં આવતી પાંચ પૈકીની એક વસ્તુ.

**कर्पूर**-पुं. न.-६४३-કપૂર.

☐हिमवालुका, घनसार, सिताभ्र, चन्द्र ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

*कल्पते इति कर्पूरः, पुंक्लीबलिङ्गः, "भीमसि"-(उणा-४२७) इति 'ऊरः' ।

**कबर**-पुं-१४६९-મિશ્રિત, એકઠું થયેલું.

☐करम्ब, मिश्र, संपृक्त, खचित ।

*कूयते इति कबरः "ऋच्छिचटि-" (उणा-३९७) इति 'अरः' ।

**कर्बर**-पुं-१८८-(शे. ३५) રાક્ષસ.

द्र० असृक्पशब्दः ।

**कर्बुर**-पुं-१८८-રાક્ષસ.

द्र० असृक्पशब्दः ।

*कर्बुरवर्णत्वात् कर्बुरः, कर्वति गच्छतीति वा, "वाश्यसि-" (उणा-४२३) इति 'उरः' ।

**कर्बुर**-न.-१०४४-સોનુ.

द्र० अर्जुनशब्दः ।

*कर्वति लोहमध्ये दृप्यतीति कर्बुरम्, "वाश्यसि"-(उणा-४२३) इति 'उरः', नानारूपत्वाद् वा ।

**कर्बुर**-पुं-१३९८-કાબર ચીતરો રંગ.

☐किर्म्मीर 'कमीर' एत, शबल, चित्र, कल्माष, चित्रल ।

*कर्बतीति कर्बुरः, "वाश्यसि"-(उणा-४२३) इति 'उरः' ।

**कर्बुरा**-स्त्री-२०५-( शे. ५५ )-પાર્વતી.

द्र० अद्रिजाशब्दः ।

**'कर्बूर'**-न-१०४४ સોનું.

द्र०अर्जुनशब्दः ।

**कर्मकर**-पुं-३६१-પગારદાર માણસ.

☐भृतक, भृतिभुज् वैतनिक ।

*कर्म करोतीति कर्मकरः, "भृतौ कर्मणः" (५।१।१०४) इति 'टः' ।

**कर्मकार**-पुं-३६२-પગાર વિના કામ કરનાર.

*निर्वेतनः कर्मकुर्वन् कर्मकारः ।

**कर्मक्षम**-पुं-३५४-કાર્ય કરવામાં સમર્થ.

☐अलङ्कर्मीण ।

*कर्मणि क्षमः शक्तः इति कर्मक्षमः ।

**कर्मठ**-पुं-३५४-આરંભેલા કાર્યને યત્ન પૂર્વક પૂર્ણ કરનાર.

☐कर्मशूर ।

*कर्मणि घटते इति कर्मठः, "तत्र घटते कर्मणष्ठः" (७।१।१३७) इति 'ठः' ।

**कर्मण्या**-स्त्री-३६२-પગાર.

☐भृति, निष्क्रय, पण, वेतन, मूल्य, निर्वेश, भरण, विधा, भर्मण्या, भर्म, भृत्या ।

* कर्मणि साधुः कर्मण्या ।

**कर्मन्**-पुं-न.-१४९७ ક્રિયા, કાર્ય.

☐क्रिया, विधा ।

*क्रियते इति कर्म, पुंक्लीबलिङ्गः, भावे कर्मणि वा मन् ।

**कर्मन्दिन्**-पु.-८०९-સંન્યાસી.

☐भिक्षु, सांन्यासिक, यति, रक्तवसन, परिव्राजक, तापस, पाराशरिन्, पारिकाङ्क्षिन, मस्करिन, पारिरक्षक, [तपस्विन् शि. ७१] ।

*कर्मन्देन प्रोक्तं भिक्षुसूत्रं वेत्त्यधीते वा कर्मन्दी "कृशाश्वकर्मन्दात्-" ।६।३।१९०। इति 'इन्' ।

**कर्मप्रवाद**-न.-२४७-ચૌદ પૂર્વ પૈકી આઠમા. પૂર્વનું નામ.

* ज्ञानावरणाद्यष्टविधं कर्म प्रकृतिस्थित्यनुभागप्रदेशादिभेदैरन्यैश्चोत्तरभेदैर्भिन्नं प्रवदतीति कर्मप्रवादम् ।

**कर्मभू**-स्त्री-९६३-ખેડેલી ભૂમિ.

☐कर्मान्त ।

*कर्मार्थं भूमिरिति कर्मभूः ।

**कर्मभूमि** स्त्री (બ.વ.)-९४६-કર્મ(અસિ, મષી, કૃષિ જ્યાં હોય તે) ભૂમિ.

*कर्मणां शुभाऽशुभानामुपार्जने भूमयः कर्मभूम्यः ।

**कर्मवाटी**-स्त्री-१४७-तिथि.

☐तिथि ।

* कर्मणां वाटीव कर्मवाटी, तत्प्रतिबद्धत्वात् तेषाम् ।

**कर्मशील**-पुं-३५४-સતત કાર્ય કરનાર.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

☐कार्म ।

*कर्मशीलमस्येति कर्मशीलः ।

**कर्मशूर**-पुं-३५४-આરંભાયેલ કાર્યને યત્નપૂર્વક પૂર્ણ કરનાર.

☐कर्मठ ।

*कर्मणि शूरः इति कर्मशूरः ।

**कर्मसचिव**-पुं-७१९ અમાત્ય સિવાયના કામ ઉપર નીમેલા મંત્રીઓ.

द्र० आयुक्तशब्दः ।

*कर्मसु सचिवः इति कर्मसचिवः, कर्मसहायः ।

**(कर्मसहाय)**-पुं-७१९ અમાત્ય સિવાયના કામ ઉપર નીમેલા મંત્રીઓ.

द्र० आयुक्तशब्दः ।

**कर्मसाक्षिन्**-पुं-९८-સૂર્ય.

द्र० अंशुशब्दः ।

*कर्मणां साक्षीति कर्मसाक्षी ।

**कर्मान्त**-पुं-९६३-ખેડેલી ભૂમિ.

☐कर्मभू ।

*कर्मणामन्तो निष्पत्तिरत्रेति कर्मान्तः ।

**कर्मार**-पुं-९२०-લુહાર.

☐व्योकार, लोहकार ।

* करोतीति कर्म्मारः "कृगो मादिश्च" (उणा-४०७) इति'आरः', कर्म इयर्तीति वा ।

**'कर्मार'**-पुं-११५३-વાંસ.

द्र०तृणध्वजशब्दः ।

**'कर्मीर'**-पुं-१३९७-કાબર ચીતરો રંગ.

द्र० कर्बुरशब्दः ।

**'कर्मेन्द्रिय'**-न-१३८४-હાથ, પગ, વાચા, ગુદા અને ગુહ્યન્દ્રિય કર્મેન્દ્રિય છે.

**(कर्वट)**-पु. न.-९७२-ચારસો પરગણામાં સુંદર નગર.

☐(द्रोणमुख) ।

**(कर्बुटिक)**-न.-९७२-બસ્સો ગામોમાં શ્રેષ્ઠ નગર.

**कर्ष**-पुं. न.-८८४ સોલ માષા પ્રમાણ.

☐अक्ष ।

* कर्षतीति कर्षः, पुंक्लीबलिङ्गोऽयम् ।

**कर्षक**-पुं-८९०-ખેડુત.

☐कुटुम्बिन्, क्षेत्रिन्, हलिन्, कृषिक, कार्षक, कृषवल, [क्षेत्राजीव शि. ७८] ।

*कर्षति भुवमिति कर्षकः

**कर्षचतुष्टय**-न-८४४-ચાર કર્ષ પ્રમાણ વજન.

☐पल ।

**कर्षण** न.-८६४-ખેતી.

* कृष्यते भूमिरस्मिन् इति कर्षणं कृषिः ।

**'कर्षफल'**-पुं-११४५-બહેડા નામનું ફળ.

द्र०अक्षशब्दः ।

**कर्षू**-स्त्री-१०८०-નદી.

द्र० आपगाशब्दः ।

*कर्षति रोधसीति कर्षूः स्त्रीलिङ्गः, "कृषिचमि-" (उणा-८२९) इति'ऊः' ।

**कर्हिचित्**-अ.-१५३३-કોઈ-વખત.

☐कदाचित्, जातु ।

*यथा-कर्हिचिद् भवतीति ।

**कल**-पुं-१४०९-મધુર અવાજ.

*कलते इति कलः, कं सुखं लातीति वा

**कलक**-पुं-१३४५-મચ્છ વિશેષ.

☐शकुल ।

*कल्यतीति कलकः, कलं कायतीति वा ।

**कलकण्ठ**-पुं-१३२१-કોયલ.

☐वनप्रिय, परभृत, ताम्राक्ष, कोकिल, पिक, काकपुष्ट, [मदोल्लापिन्, काकजात,रतोद्वह, मधुघोष, मधुकण्ठ, सुधाकण्ठ, कुहूमुख शे. १९०, घोषयित्नु, पोषयित्नु, कामताल कुनालिक शे. १९१, परपुष्ट, अन्यभृत् शि ११७] ।

*कलः कण्ठोऽस्येति कलकण्ठः ।

**कलकल**-पुं-१४०४-કોલાહલ

☐कोलाहल ।

*कल्यते इति कलकलः, "अदुपान्त्य ऋद्भ्यामश्रान्ते" (उणा-१४) इति 'अ' प्रत्ययो द्वित्वं च, कलो व्यक्तो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वा आभीक्ष्ण्ये द्वित्वम् ।

**कलकूणिका**-स्त्री ५२९-(शे.११२)અસતી, કુલટા સ્ત્રી.

द्र०अविनीताशब्दः ।

**कलङ्क**-पुं-१०६-લાંછન, ચિહ્ન.

द्र०अङ्कशब्दः ।

*किरति सन्देहमिति कलङ्कः, "किरोऽङ्को रो लश्च वा" (उणा-६२) इति'अङ्कः' ।

**कलत्र**-न.-५१३-પત્ની.

द्र०ऊढाशब्दः ।

*कडति माद्यतीति कडत्रं, लत्वे कलत्रं "घ्रुग्नक्षि-" (उणा-४५६) इति'अत्रः' ।

**कलत्र**-न-६०७-કેડ.

द्र०ककुद्मतीशब्दः ।

* कडति माद्यत्यनेनेति कलत्रम् ।

**कलधौत**-न-१०४३-રૂપું.

☐ रूप्य, तार, रजत, श्वेत (सित), दुर्वर्ण, (दुर्वर्णक) खर्जुर, हिमांशु, चन्द्राह्वय, हंसाह्वय, कुमुदाह्वय, [त्रापुष, वङ्ग, जीवन, वसु, भीरुक, शुभ्र, सौम्य, शोध्य, रुप्र, भीरू, जवीयस शे. १६२]

*कलं मनोज्ञं धौतमिति कलधौतम् ।

**कलधौत**-न-१०४४-સોનું.

द्र०अर्जुनशब्दः ।

*कलं सुवर्णकालिका तद्धौतमस्मिन् इति कलधौतम् ।

**कलभ**-पुं. न-१२२०-ત્રીશ વર્ષનો હાથી.

*कल्यते इति कलभः, पुंक्लीबलिङ्गः" कृशृगृ-" (उणा-३२९) इति'अभः', कलो भाति, कं लभते वा ।

**कलम**-पुं-११६९-કલમી ડાંગર, કલમી ચોખા.

☐कलामक ।

*कडति माद्यत्यनेनेति कडमः, "सुग्रथि-" (उणा-३४७) इति'मः, लत्वे कलमः ।

**(कलमूक)**-पुं-३४८-બહેરો અને મૂંગો.

द्र०अनेडमूकशब्दः ।

**कलम्ब**-पुं-७७८-બાણ.

द्र०अजिह्मगशब्दः ।

*कडति माद्यतीति कडम्बः, "कृकडि-" (उणा-३२१)इति 'अम्बः', लत्वे कलम्बः,के शिरसि कृतसन्धानो लम्बत इति वा ।

**कलम्बिका** (द्वि.व.)-स्त्री-५८७-ગ્રીવાની પાછલા ભાગની બંને ધમની, નાડી.

*के शिरसि लम्बेते इति कलम्बिके ।

**कलरव**-पुं-१३३९-કબૂતર.

☐पारापत, कपोत, रक्तलोचन, [पारावत शि. १२१] ।

*कलो मधुरो रवो ध्वनिरस्येति कलरवः ।

**कलल**-न-५४०-શુક્ર અને રુધિરનું મિશ્રણ, ગર્ભ વેષ્ટન ચર્મ.

☐उल्ब ।

कलयतीति कललं, शुक्रशोणितसमवायः "मृदिकन्दि"-(उणा-४६५) इति'अलः', के ललतीति वा ।

**कलविङ्क**-पुं-१३३१-ચકલો.

☐चटक, गृहबलिभुज्, कलविङ्क, [कुलिङ्ग' शि. ११९] ।

*कलते शब्दायते इति कलविङ्कः, "कलेरविङ्कः" (उणा-६५) इति,'अविङ्कः' ।

**कलश** त्रि-१०१९-ઘડો.

द्र०करीरशब्दः ।

*कलते संख्याति शब्दायते वा कलशः, "कलेष्टित्" (उणा-५३२) इति'अशः' त्रिलिङ्गोऽयम् ।

**कलशी**-स्त्री-१०२२-ગાગર, દહીં વલોવવાની ગોળી.

☐गर्गरी, मन्थनी ।

*कल्यते इति कलशिः ङ्यां कलशी कस्य अम्भसो राशिरत्रेति वा पृषोदरादित्वात् ।

**कलशीमुख** -पुं-२९४-( शे.८४ )-વાદ્યવિશેષ.

☐[दर्दर शे. ८४] ।

**कलशीसुत** -पुं-१२३-( शे.१८ )-અગસ્ત્ય ઋષિ.

द्र०अगस्तिशब्दः ।

**कलस** पुं-न. स्त्री-१०१९-ઘડો

द्र०करीरशब्दः ।

*केन जलेन लसतीति कलसः, त्रिलिङ्गोऽयम् ।

**कलह**-पुं-७९६-લડાઈ, ઝઘડો.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्र०अनीकशब्दः ।

*कल्यते क्षिप्यतेऽत्रेति कलहः, "कृपृकटि–" (उणा–५८९) इत्यहः, कलं हीनबलं हन्तीति वा "क्वचित्" ॥५।१।१७१॥ इति डः, कलां जहातीति वा "ङ्यापो बहुलं–" ॥२।४।९९॥ इति पूर्वस्य ह्रस्वः ।

**कलहंस**–पुं(ब.व.)-१३२७–બાલહંસ.

☐कादम्ब ।

*कलध्वनयो हंसाः इति कलहंसाः ।

**कला**–स्त्री–१०६–ચંદ્રનો સોળમો ભાગ.

*कलयति संख्यामिति कला ।

**कला**–स्त्री–१३६–પંદર લવ પ્રમાણ.

*कलयति कालमिति कला ।

**कला**–स्त्री–९००-કલા, કારીગરી.

☐शिल्प, विज्ञान ।

*"कलण् सङ्ख्यानगत्योरदन्तः" कल्यते इति कला "भीषिभूषि–" ॥५।३।१०९॥ इति बहुवचनाद् 'अङ्' ।

**कलाकेलि**–पुं–२२७–કામદેવ.

द्र०अङ्गजशब्दः ।

*कलासु केलिरस्येति कलाकेलिः ।

**कलाचिका**–स्त्री-५९०–કોણીથી નીચેનો કાંડા સુધીનો ભાગ.

☐प्रकोष्ठ, (उपबाहु) ।

*करमञ्चति, आचिनोति वा पृषोदरादित्वात् कलाचिका ।

**कलाद**–पुं–९०८–સોની.

☐नाडिंधम, स्वर्णकार, मुष्टिक ।

*कलां आदत्ते इति कलादः, कलं सुवर्णकालिकाम् आद्यति, आखण्डयतीति वा, अत एव कलं धौतं यत्रेति कलधौतम् ।

**कलाधिक** –पुं–१३२५-( शे.१९२ )–કુકડો.

द्र० कुक्कुटशब्दः ।

**(कलानिधि)**–पुं–१०५–ચન્દ્રમા.

द्र०अत्रिदृग्जशब्दः ।

**कलान्तर**–न.–८८१–વ્યાજ.

☐वृद्धि ।

*मूलद्रव्यस्यापरा कला इति कलान्तरम् ।

**कलाप**–पुं–६६४-સ્ત્રીની કેડનો કન્દોરો, મેખલા.

द्र०कटिसूत्रशब्दः ।

*कल्यते इति कलापः, "कलेरापः" (उणा–३०८) इति 'आपः' ।

**कलाप–पुं**–७८२–બાણ રાખવાનું ભાથું.

द्र०उपासङ्गशब्दः ।

*कल्यन्ते बाणा अनेनेति कलापः ।

**कलाप**–पुं–१३२०–મોરનું પીછું.

☐पिच्छ, बर्ह, शिखण्डक, (शिखण्ड), प्रचलाक । *कल्यते इति कलापः, कलां पातीति वा ।

**कलाप**–पुं–१४११–સમૂહ, સમુદાય.

द्र०उत्करशब्दः ।

*कल्यते इति कलापः, "कलेरापः" (उणा–३०८) इति 'आपः' ।

**कलापक**–पुं·१२३२-હાથીને ગળે બાંધવાનું બંધન.

☐कण्ठबन्ध ।

*कल्यते इति कलापः, के कलापकः, कलामाप्नोतीति वा ।

**कलापूर**–पुं–२९४-( शे. ८८ )–એક પ્રકારનું વાજિંત્ર.

**कलाभृत्**–पुं–१०५–ચંદ્રમા.

द्र०अत्रिदृग्जशब्दः ।

*कलां बिभर्तीति कलाभृत्, यौगिकत्वात् कलानिधिः ।

**कलामक**–पुं–११६९-કલમી ડાંગર, કલમી ચોખા.

☐कलम ।

* कलां कलनाममतीति कलामकः ।

**कलाय**–पुं–११७०–વટાણા.

☐सतीनक, हरेणु, खण्डिक, (त्रिपुट) ।

*कल्यते इति कलायः, त्रिपुटाख्यः, "कुलिलुलि"-(उणा–३७२) इति 'आय' कलामतीसारमयते वा, कं लातीति वा ।

**कलावती**–स्त्री-२८९–તુમ્બુરુની વીણા.

*कलाऽस्त्यस्यामिति कलावती ।

**कलि**–पुं–७९६–યુદ્ધ, લડાઈ.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्र०अनीकशब्दः ।

*कल्यते क्षिप्यतेऽनेति कलिः, पुंलिङ्गः, "पदि पठि-" (उणा-६०७) इति 'इः' ।

**कलि**-पुं.-११४५-બહેડા નામનું ફળ.

द्र०अक्षशब्दः ।

*कल्यते इति कलिः, पुंलिङ्गः कलिहेतुत्वाद्वा ।

**कलिका**-स्त्री-२९१-વીણાની વચ્ચે રહેલી વાંસની સળી.

☐वंशशलाका, कूणिका ।

*वीणाया मूले कलयति तन्त्रीमिति कलिका ।

**कलिका**-स्त्री-११२५-પુષ્પની કળી.

☐कोरकः ।

*कल्यते शब्द्यते इति कलिका, "क्रीकलि-" (उणा-३८) इति'इकः' ।

**कलिकारक**-पुं-८४९-નારદઋષિ.

☐नारद, देवब्रह्मन्, पिशुन ।

*कलिं करोतीति कलिकारकः ।

**कलिङ्ग**-पुं-१३३३ મસ્તક ચૂડ, કાકાકૌઆ નામનું પક્ષી.

☐भृङ्ग, धूम्याट ।

*कलते शब्दायते इति कलिङ्गः, "स्फुलि-कलि"- (उणा-१०२) इति'इङ्गक्' के मूर्ध्नि लिङ्गं चूडाऽस्येति वा, कलिं गच्छति प्राप्नोतीति वा ।

**'कलिद्रुम'**-पुं-११४५-બહેડા નામનું ફળ.

द्र०अक्षशब्दः ।

**कलिन्दतनया**स्त्री-१०८३-યમુના નદી.

द्र० कालिन्दीशब्दः ।

**कलिन्दपुत्री**-स्त्री-१०८३ (शि. ९७)-યમુના નદી.

द्र० कालिन्दीशब्दः ।

**कलिन्दिका**-स्त्री-२२८-આન્વીક્ષિકી વગેરે સર્વ-વિદ્યા.

☐ सर्वविद्या ।

*कलिन्दी भाजनविशेषः, तत्प्रतिकृतिः कलिन्दिका, डलयोरैक्य कडिन्दिका अपि ।

**कलिल**-न.-१४७२-દુઃખે પ્રવેશ કરી શકાય તેવું.

☐गहन ।

*कल्यते क्षिप्यतेऽत्रान्यत् कलिलम्, "कल्यनि-" (उणा-४८१) इति'इलः' ।

**कलुष**-न.-१०७१-મલિન, મેલું.

☐अनच्छ, आविल ।

*कल्यते इति कलुषम्, "ऋदृपनहि"-(उणा-५५) इति'उषः' ।

**कलुष**-न-१३८१-અશુભ, પાપ, દુષ્કૃત્ય.

द्र० अंहसूशब्दः ।

*कल्यते इति कलुषम्, ऋदृपनहि"-(उणा-५५७) इत्युषे कलुषं, कं सुखं लोषतीति वा ।

**कलुष**-पुं १२८३ (शे. १८३)-પાડો.

द्र० कासरशब्दः ।

**कलेवर**-न-५६४-शरीर.

द्र० अङ्गशब्दः ।

*कडति माद्यतीति कडेवरम्, "कडेरेवरा-" (उणा-४४५) इति 'एवरः', लत्वे कलेवरम् ।

**कल्क**-पुं. न.-१३८१-અશુભ, પાપ, દુષ્કૃત્ય.

द्र० अंहस्शब्दः ।

*कल्यते इति कल्कं, पुंक्लिबलिङ्गः, "भीण्शलि" (उणा-२१) इति 'कः' ।

**कल्प**-पुं-१६०-પ્રલય કાળ.

**कल्प**-पुं-१६१-પ્રલય કાળ.

☐युगान्त, कल्पान्त, संहार, प्रलय, क्षय, संवर्त्त, परिवर्त्त, समसुप्ति, जिहानक ।

*कल्पते जगदस्मिन् इति कल्पः ।

**कल्प**-पुं-१७९-કલ્પવૃક્ષ.

*कल्पः संकल्पपूरणत्वात् ।

**कल्प**-पुं-२५०-વેદના ૬ અંગ પૈકી બીજું અંગ.

*कर्मणां सिद्धरूपः प्रयोगः कल्प्यतेऽवगम्यतेऽनेनेति कल्पः । यद् **वाचस्पतिः**

'सिद्धरूपः प्रयोगो यैः, कर्मणामवगम्यते ।

ते कल्पा लक्षणार्थानि, सूत्राणीति प्रचक्षते" ॥१॥

**कल्पा**-पुं-७४३-ન્યાયશાસ્ત્ર.

द्र० अभ्रेषशब्दः ।

*कल्पनं कल्पः सामर्थ्यम् ।

**कल्प**-पुं-८३९-આચાર.

☐विधि, क्रम ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*कल्प्यतेऽनेन विनियोगशास्त्रेणेति कल्पः ।

**कल्पन**–ન.–૩૭૨–કાપવું તે.

☐कर्तन, वर्धन, छेद ।

*कल्प्यते इति कल्पनम् ।

**कल्पनी**-સ્ત્રી–૯૧૧–કાતર

☐कृपाणी, कर्तरी (कर्तरि) ।

*कल्पतेऽनया इति कल्पनी ।

**(कल्पावतंसिका)**-સ્ત્રી–૨૪૫ બાર ઉપાંગ પૈકી નવમું ઉપાંગ.

**कल्पान्त**–પું–૧૬૧–પ્રલયકાળ.

द्र० कल्पशब्दः ।

* कल्पस्यान्तोऽवधिरिति कल्पान्तः, अत्रैकः कल्पः क्षयार्थोऽन्यो ब्राह्मदिनार्थः,

यत् **शाश्वतः**–"कल्पः शास्त्रे विधौ न्याये । संवर्ते ब्रह्मणो दिने" । इति ।

**कल्पित**–પું–૧૨૨૧–યુદ્ધ માટે તૈયાર કરેલો હાથી.

☐सज्जित ।

*कल्प्यते स्मेति कल्पितः ।

**कल्मष**–ન.–૧૩૮૧–અશુભ, પાપ, દુષ્કૃત્ય.

द्र० अंहस्शब्दः ।

*कल्यते इति कल्मषं, "कलेर्मषः" (उणा-५६२) इति 'मष' ।

**कल्मष** –ન.–૧૪૩૫ (શિ. ૧૨૯)–મલિન, મેલુ.

द्र० कच्चरशब्दः ।

**कल्माष**–પું.–૧૩૯૮–કાબર ચીતરો રંગ.

द्र० कर्बुरशब्दः ।

*कल्यति वर्णान् इति कल्माषः, "कुलेश्च माषक्" (उणा–५६३) इति 'माष' ।

**(कल्माषपक्षिन)**–પું–૧૦૩–માઠર, સૂર્યના પારિપાર્શ્વિક દેવ.

**कल्य**–ન.–૧૩૯–પ્રાતઃકાળ.

द्र० अहर्मुखशब्दः ।

*कलासु साधु इति कल्यम् ।

**कल्य**-પું–૪૭૪–નીરોગી.

☐पटु, उल्लाघ, वार्त, नीरुज् ।

*कलयत्यारोग्यमिति कल्यः, "स्थाच्छा-" (उणा-३५७) इति यः, कलासु साधुरिति वा ।

**कल्य**–સ્ત્રી ન.–૯૦૨–મદિરા.

द्र० अब्धिजाशब्दः ।

* कल्यते इति कल्यं, स्त्रीक्लीबलिङ्गः ।

**कल्यपाल**-પું–૯૦૧–કલાલ, મદીરા વેચનાર.

द्र० आसुतीवलशब्दः ।

*कल्यं मद्यं पालयति रक्षतीति कल्यपालः ।

**कल्यवर्त**–પું–૪૨૫–પ્રભાતનું ભોજન, નાસ્તો.

☐प्रातराश ।

*कल्ये प्रभाते वर्त्यते इति कल्यवर्तः ।

**कल्या**–સ્ત્રી–૨૭૩–માંગલિક શબ્દ, શુભ વચન.

☐[काल्या शि. १८] ।

*कलासु साधुः कल्या, काल्या इति **कात्यायः** ।

**कल्याण**–ન.–૮૬–શુભ.

☐ श्वःश्रेयस, शुभ, शिव, श्वोवसीयस, श्रेयस्, क्षेम, भावुक, भविक, कुशल, मङ्गल, भद्र, मद्र, शस्त [भव्य, काम्य, सुकृत, सुनृत शे०२, मन्द्र, प्रशस्त शि. ५] ।

*कल्यते धार्यते इति कल्याणम्, "कल्याण-पर्याणादयः" (उणा–१९३) इति आणं अन्तो निपात्यते, कल्यं निरुजत्वमणतीति वा

**कल्याण**–ન.–૨૪૮–ચૌદ પૂર્વ પૈકી ૧૧મું પૂર્વ.

* कल्याणफलहेतुत्वात् कल्याणम् अवन्ध्यमिति चोच्यते ।

**कल्याण**–ન.–૧૦૪૩–સોનું.

द्र० अर्जुनशब्दः ।

*कल्यते इति कल्याणं "कल्याणपर्याणादयः–" (उणा-१९३) इति 'आण' अन्तो निपात्यते ।

**(कल्याणप्रवाद)**-ન.–૨૪૮–ચૌદ પૂર્વ પૈકી ૧૧ મું પૂર્વ.

☐कल्याण ।

**कल्लत्व**–ન.–૩૦૬–અવ્યક્ત સ્વર.

☐स्वरभेद ।

* कल्लत्वमव्यक्तत्वम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**कल्लोल**-पुं-१०७६-મોજા.

□लहरी, उल्लोल ।

* कल्यते, कल्लते वा कल्लोलः, "पिञ्छोल-" (उणा-४९५) इति 'ओल' अन्तो निपात्यते, कुत्सितो लोल इत्येके ।

**कवक**-पुं.-४२५-કોળીયો.

□ग्रास, गुडेरक, पिण्ड, गडोल, गुड, गण्डोल, कवल ।

*कौत्यनेनेति कवकः, "दक"-(उणा-२७) इति 'अकः' ।

**कवक**-नं-११८४-ચોમાસામાં ઊગતી છત્રાકાર કાગડાની ટોપી.

*कवकं छत्राकारव्यभूकन्दविशेषः ।

**कवच**-पुं.-न.-७६६-બખતર, કવચ.

द्र० उरश्छदशब्दः ।

*कवते इति कवचं, पुंक्लीबलिङ्गः, "कल्यवि-" (उणा-११४) इति 'अचः', कं वञ्चतीति वा ।

**कवचित**-पुं.-७६६-(शि. ६५) બખતર પહેરેલો માણસ.

□सन्नद्ध, व्यूढकंकट, दंशित, वर्मित, सज्ज ।

**कवल**-पुं.-न-४२६-કોળીયો.

द्र० कवकशब्दः ।

*कौत्यनेनेति कवलः, पुंक्लीबलिङ्गः, "कोर्वा" (उणा-४६९) इति 'अलः' ।

**कवाट**-पुं.-१००७-(शि. ८७) બારણું.

द्र० अररशब्दः ।

**कवि**-पुं.-११९-શુક્ર.

द्र० उशनस्शब्दः ।

*कवते इति कविः, कविजातत्वाद्वा ।

**कवि**-पुं.-२११-બ્રહ્મા.

द्र० अजशब्दः ।

*कवते वेदानिति कविः ।

**कवि**-पुं.-३४१-વિદ્વાન, પંડિત.

द्र० अभिरूपशब्दः ।

*कवते कौतीति वा कविः, कविताऽपि, "स्वरेभ्यः इः" (उणा-६०६) इति 'इः' ।

**कवि**-पुं.-८४६-વાલ્મીકિ ઋષિ.

□प्राचेतस, वाल्मीकि, वल्मीक, कुशिन्, मैत्रावरुण, वाल्मीक, [आदिकवि, मैत्रावरुणि शि.७४] ।

*कवते इति कविः, आदिकविरपि ।

**कविका**-स्त्री-१२५० લગામ ચોકડું.

□कवी, खलीन, कविया, मुखयन्त्रण, पञ्चाङ्गी, [खलिन शि.१११] ।

* कवते इति कविका 'कुशिक"-(उणा-४५) इति साधुः

**कवितृ**-पुं.-३४१-(शि. २२)-વિદ્વાન, પંડિત.

द्र० अभिरूपशब्दः ।

**कविय**-पुं.-न.-१२५०--લગામ, ચોકડું.

द्र० कविकाशब्दः ।

*कौतीति कवियं, पुंक्लीबलिङ्गः, "कौतेरियः-" (उणा-३७५) इति 'इयः' ।

**कवी**-स्त्री-१२५०-લગામ, ચોકડું.

द्र० कविकाशब्दः ।

*कवते दन्तचर्वणात् शब्दायते इति कविः, "स्वरेभ्य इः" (उणा-६०६) ङ्यां कवी ।

**कवोष्ण**-पुं.-१३८६-થોડું ઊનું.

□कोष्ण, कदुष्ण, मन्दोष्ण, ईषदुष्ण ।

*ईषदुष्णः कवोष्णः, "काकवौ वोष्णे" ॥३।२।१३७॥ इति साधुः ।

**कव्य**-न.-८३२-બ્રાહ્મણ દ્વારા પિતરોને આપવા યોગ્ય ઓદન.

*कूयते शब्दायते पितृभिरिति कव्यम् ।

**कशा**-स्त्री-१२५२-ચાબુક.

□चर्मदण्ड ।

*कशतीति कशा ।

**कशारुका**--स्त्री-६२७-(शि.४८)-પીઠનું હાડકું, બરડાની કરોડ.

□कशेरुका ।

**कशिपु**-पुं.-६८५-(शि. ५७)-ભોજન અને વસ્ત્ર.

□ कसिपु ।

**कशेरुका**-स्त्री.-न.-६२७-પીઠનું હાડકું, બરડાની કરોડ.

□ [कशारुका शि.४८]

*कस्यते इति कशेरु, क्लीबलिङ्गः, "शिग्रुग्रे" (उणा-८११) इति साधुः, स्त्रियामपि **वैजयन्ती** यदाह-"पृष्ठस्यास्थि कशेर्वना" इति के कशेरुका स्त्रीक्लीबलिङ्गः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'कशारुका' इति **मुनिः** ।

**कश्मल**-न.-८०१-મૂર્છા.

☐मोह, मूर्च्छा ।

*'कश् शब्दे' कशति वैचित्र्यादनेनेति कश्मलं,रुचि-कुटि–" (उणा-५०२) इति 'मलः' ।

**कश्मल**-न-१४३५-મલિન, મેલુ.

द्र० कच्चरशब्दः ।

*कशतीति कश्मलम्, "रुचिकुटि–" (उणा-५०२) इति 'मलक्' कल्मषमपि ।

**कश्मीर**-पुं.-९५८-કાશ્મીર દેશ.

☐माधुमत, सारस्वत, विकर्णिक ।

*'कश् शब्दे' ताल्व्यान्तः कशन्ति इति काश्मीरः "कशेमो ऽन्तश्च" (उणा-४२०) इति 'ईरः' ।

**कश्मीरजन्मन्**-न.-६४४-કેશર.

☐घुसृण वर्ण, लोहितचन्दन, वाह्लीक, कुङ्कुम, वह्निशिख, कालेय, जागुड, सकोचपिशुन, रक्त, धीर, पीतन, दीपन [करट, वासनीयक शे. १३२ प्रियङ्गु, पीतकाबेर, घोर, पुष्परजस्, वर, कुसुम्भ, जवापुष्प, जपापुष्प, कुसुमान्त, गौरव, शे. १३३, वाह्लिक, संकोच, पिशुन, वर्ण्य, असृक्संज्ञ, (असृक्पर्याय) [शि. ५१.]

*कश्मीरेषु जन्माऽस्येति कश्मीरजन्म ।

**कश्य**--न.-९०२-મદિરા.

द्र० अब्धिजाशब्दः ।

*कशादेशे साधु इति कश्यम् ।

**कश्य**-पुं.-१२३६-મધ્યમ ચાલનો ઘોડો.

*कशामर्हतीति कश्यः दण्डादित्वाद् 'यः' ।

**कश्य**-न.-१२४४-ઘોડાનો મધ્ય ભાગ.

*कशामर्हतीति कश्यम्, तत्र हि कशाघाताधिकारः, दण्डादित्वाद् 'यः' ।

**कष**-पुं.-९०९-કસોટીનો પથ્થર, શરણ.

☐शाण, निकष ।

* कष्यतेऽनेनेति कषः, "गोचरसंचर–" ॥५।८।-१३१॥ इति 'घः' ।

**कषाय**-पुं.-१३८९-કષાયેલો તૂરો રસ.

☐तुवर, 'तूवर' ।

*कषति श्लेष्माणमिति कषायः "कुलिलुलि–" (उणा-३७२) इति 'आयः' ।

**कष्ट**-न.-१३७१-દુઃખ, પીડા.

द्र० अर्त्तिशब्दः ।

*कषिष्यतीति कष्टं, "कषोऽनिटः" ॥५।३।३॥ इति भविष्यति 'क्तः' ।

**कसिपु**-पुं.-न.-६८५-ભોજન અને વસ્ત્ર.

☐ [कशिपु शि. ५१] ।

*कसति गच्छति क्लेशोऽनेनेति कसिपुः पुंक्लीबलिङ्गः, "कस्यर्ति–" (उणा- ७९८) इति इपुः ।

**अमरस्तु**—

"कशति क्लेशं कशिपुः" इति ताल्व्यमध्यमाह ।

**कस्तीर**-न.-१०४२-કલઈ.

द्र० आलीनशब्दः ।

*कसतीति कस्तीरम्, "जम्बीराभीर"–(उणा-४२२) इति 'ईर' अन्तो निपात्यते ।

**कस्तूरी**-स्त्री-६३८-યક્ષ કર્દમની પાંચ વસ્તુ પૈકી એક વસ્તુ.

**कस्तूरी**-स्त्री.-६३९-ચતુઃસમની ચાર વસ્તુ પૈકી એક વસ્તુ.

**कस्तूरी** स्त्री. ६४४-કસ્તૂરી, હરણની નાભિમાંથી ઉત્પન્ન થતું સુગંધી દ્રવ્ય.

☐मृगनाभिजा, मृगनाभि, मृगमद, गन्धधूली ।

*कसतीति कस्तूरि, "सिन्दूरकर्चुर–" (उणा-४३०) इति 'उर' अन्तो निपात्यते, विकसति सौगन्ध्यमस्यां वा, के स्तूयते इति वा, पृषोदरादित्वात् ।

**कह्लार**-न.-११६५-સંધ્યા વિકાસી કમલ, શરદ ઋતુનું શ્વેત કમલ.

☐सौगन्धिक ।

*कल्यते इति कह्लारं, "द्वार शृङ्गार"–(उणा-४११) इति'आर'अन्तो निपात्यते, के ह्लादते वा पृषोदरादित्वात्, शारदं शुक्लं चैतत् ।

**कह्व**-पुं.-१३३२-બગલો.

☐बक, बकोट ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

*के जले केन वा ह्वयते इति कह्नः

**कांस्य**–न.–१०४९–કાંસુ.

द्र० असुराह्वशब्दः ।

*कंसाय इदं द्रव्यं कंसीयं, तस्य विकारः कांस्यम्, "कंसीयाञ्ञयः" ॥६।२।४१॥ इति साधुः कंसमेव वा भेषजादित्वाद् ट्यण् ।

**कांस्य**-न.-१०४०- (शे. १६०) તાંબુ.

द्र० उदुम्बरशब्दः ।

**कांस्यनील**–न.–१०५२–મોરથુથુ નીલ અંજન.

☐मूषातुत्थ, हेमतार, वितुन्नक ।

*कांस्यवन्नीलमिति कांस्यनीलम् ।

**काक**-पुं.–१३२१–કાગડો.

द्र० अन्यभृत्शब्दः ।

*कायतीति काकः, "भीण्शलि"- (उणा–२१) इति'कः' वा शब्दं कायति वा. ककते लौल्यादिति वा; ईषत् कायति वा ।

**काककङ्गु**–स्त्री.–१०७८–કાંગ, એક જાતિનું ધાન્ય.

☐चीनक ।

*काकप्रिया कङ्गुः इति काककङ्गुः ।

**'काकचिञ्चा'**-स्त्री–११५५–ચણોઠી.

द्र०कृष्णलाशब्दः ।

**'काकचिञ्चि'**-स्त्री–११५५–ચણોઠી.

द्रकृष्णलाशब्दः ।

**'काकचिञ्ची'** स्त्री–११५५–ચણોઠી.

द्र० कृष्णलाशब्दः ।

**काकजात**-पुं-१३२१-(शे.) १६०-કોયલ.

द्र० कलकण्ठशब्दः ।

**काकतुण्ड**–पुं–६४१-કાગો અગર.

☐कोलागरु ।

*काकस्य तुण्ड इव कृष्णवर्णत्वादिति काकतुण्डः ।

**काकपक्ष**–पुं.–५७२–કાન સુધી પહોંચેલા વાળ.

☐शिखण्डक, शिखाण्डक ।

*काकपक्ष इव काकपक्षः ।

**काकपुष्ट**-पुं.–१३२१––કોયલ.

द्र० कलकण्ठशब्दः ।

* काकेन पुष्यते इति काकपुष्टः ।

**काकमाची**–स्त्री –११८८–કામફલનો વેલો.

☐वायसी ।

*काकवद् मचते वर्णेन संपृच्यते इति काकमाची।

**(काकल)**–पुं–५८८–કંઠનો મણિ.

☐ काकलक ।

*कु ईषत् कलः काकलः, के काकलकः ।

**काकलक**–पुं –५८८–કંઠનો મણિ.

☐ (काकल) ।

* कु ईषत् कलः काकलकः ।

**(काकलि)**–पुं.–स्त्री.-१४१०-ઝીણો અને મધુર શબ્દ.

☐ काकली ।

**काकली**- स्त्री.–१४१०–ઝીણો અને મધુર શબ્દ.

☐ (काकलि) ।

*ईषत्कलोऽस्यामिति काकली, यदाह– "निषादः काकलीसंज्ञो द्विःश्रुत्युत्कर्षणाद् भवेत्' । काकलिरपि ।

**काकारि**–पुं.–१३२४ ઘૂવડ.

द्र० उलूकशब्दः ।

* काकानामरिरिति काकारिः ।

**काकु**–पुं. स्त्री १४१०–શોક, ભય વગેરેથી થતો ધ્વનિમાં વિકાર.

☐ ध्वनिविकार ।

*कायत्यर्थान्तरमिति काकुः, पुंस्त्रीलिङ्गः, "कैशीशमि"(उणा–७४९) इति 'कुः', ककते प्रकृतार्थातिरिक्तं वाञ्छतीति वा, हृदयस्थस्तु प्रतीतेरीषद्भूमिर्वा, काकुर्जिह्वा तद्व्यापारसंपाद्यत्वाद्वा ।

**काकु** –स्त्री–५८५ (शे.१२३) –જીભ.

द्र० जिह्वाशब्दः ।

**काकुवाच**–स्त्री–२७५ શોક, ભય વગેરેથી સ્વર બદલાવો.

☐ उल्लाप ।

*काक्वा वचनं काकुवाक् ।

**काकुद**-न.-५८५–તાળવું.

☐तालु, [वक्त्रदल शे १२३] ।

*ककते जिह्वाऽत्रेति काकुदं, "ककेर्णिद्वा" (उणा–२४३) इति णिद्'उदः', काकुं ददातीति वा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**काकोदर**–પું.–૧૩૦૩ સર્પ, નાગ.

द्र० अहिशब्दः ।

*काकस्येवोदरमस्येति काकोदरः, काकोलं विषमुदरेऽस्येति वा ।

**काकोदुम्बरिका**–स्त्री–૧૧૩૩-કાળા ઉંબરાનું વૃક્ષ.

□फल्गु, मलयु, जघनेफला ।

*काकप्रिया उदुम्बरीति काकोदुम्बरिका ।

**काकोल**–પું ન.–૧૧૯૬–સ્થાવર વિષ.

द्र० अङ्कोल्लसारशब्दः ।

*ईषत् कोलति संस्त्यायति इति काकोलः, पुंक्लीबलिङ्गः, काकोलः, काकस्तद्वन्मेचको वा ।

**काकोल**–પું–૧૩૨૩–કાગડાની એક જાત.

*ईषत् कोलतीति काकोलः ।

**काक्ष**–પું–૫૭૮–કટાક્ષ, વાંકી નજરે જોવું તે.

द्र० अक्षिविकूणितशब्दः ।

*ईषद् विकूणितत्वाद् अक्ष्यत्रेति काक्षः, "अल्पे" ॥३।२।१३६॥ इति कादेशः "सक्थ्यक्ष्णः–" ॥७।३।१२६॥ इति 'ट' समासान्तः ।

**काक्षी**–स्त्री–૧૦૫૫–સૌરાષ્ટ્ર દેશની માટી.

द्र० आढकीशब्दः ।

*कक्षे भवा इति काक्षी ।

**काङ्क्षा**-स्त्री–૪૩૦–ઇચ્છા, અભિલાષા, મનોરથ.

द्र० अभिलाषशब्दः ।

*काङ्क्षणं काङ्क्षा ।

**काच**-પું–૩૬૪ સીકું.

□शिक्य ।

*कच्यते बध्यतेऽनेनेति काचः ।

**काच**–પું–૧૦૬૨–કાચ લવણ, બંગડી ખાર

□क्षार ।

*कच्यते बध्यते इति काचः ।

'**काचस्थाली**'–स्त्री–૧૧૪૪–કાંકચ, કાંચકી

द्र०पाटलाशब्दः ।

**काचिम** ન. ૧૦૭૦ (શેષ ૧૬૬)–કાચ જેવું સ્વચ્છ પાણી.

**काच्छी**–स्त्री–૧૦૫૬–સૌરાષ્ટ્ર દેશની માટી.

द्र० आढकीशब्दः ।

* कच्छदेशे भवा इति काच्छी ।

**काञ्चन**–પું.૨૩૬–સાત પૈકી પાંચમાં બુદ્ધ.

*काञ्चनवर्णत्वात् काञ्चनः ।

**काञ्चन**-ન.–૧૦૪૩–સોનું.

द्र० अर्जुनशब्दः ।

*कञ्चते दीप्यते इति काञ्चनम्, "विदनगगन"–(उणा–२७५) इति 'अने' निपात्यते ।

**काञ्चनगिरि**–પું–૧૦૩૨–મેરૂ પર્વત.

द्र० कर्णिकाचलशब्दः ।

*काञ्चनस्य गिरिः काञ्चनगिरिः ।

**काञ्चनी**–स्त्री–૪૧૮–હળદર.

□हरिद्रा, पीता, निशा, वरवर्णिनी ।

*काञ्चनवर्णत्वात् काञ्चनी ।

**काञ्चक** ન.–૪૨૫–કાંજી, રાબ.

द्र० अवन्तिसोमशब्दः ।

*कञ्चति दीपयति अग्निं, कच्यते बध्नाति दोषान् वा, इति काञ्चिकं, "कुसिकहृदिक-" (उणा–४५) इतीके निपात्यते, काञ्च्यां पुरि भवं वा ।

**काञ्ची** स्त्री–६६४–સ્ત્રીની કેડનો કંદોરો, મેખલા.

द्र० कटिसूत्रशब्दः ।

*कञ्चते दीप्यते, कञ्चयते बध्यते वा इति काञ्चिः, "कमिवमि–(उणा–६१८) इति णौ साधुः, ङ्यां काञ्ची ।

**काञ्चीपद**–ન.–૬૦૭–કેડ.

द्र० ककुद्मतीशब्दः ।

*काञ्च्याः पदं स्थानमिति काञ्चीपदम् ।

**काञ्जिक** ન.–૪૧૫ કાંજી, રાબ.

द्र० अवन्तिसोमशब्दः ।

*कञ्चयति दीपयति अग्निं, कच्चते बध्नाति दोषान् वा काञ्चिकं, "कुसिकहृदिक–" (उणा–४५) इतीके निपात्यते, काञ्च्यां पुरि भवं वा, चस्य जत्वे पञ्जिकावत् काञ्जिकं, कं जलमनक्तीति वा ।

**काण**–પું–૪૫૩-કાણો.

□कनन एकदृश्, (एकाक्ष) ।

*'कणण् निमीलने' काणयति चक्षुः इति काणः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**काण्ड**–पुं न..–७७८–બાણ.

द्र० अजिह्मगशब्दः ।

*कणत्यनेनाऽऽहतः इति काण्डः, पुंक्लीबलिङ्गः, "कण्यणि-" (उणा–१६९) इति णिद् 'ड': ।

**काण्ड**–पुं. न.–११८२–સાંઠો.

□नाल ।

*कणति भज्यमानः इति काण्डः, पुंक्लीबलिङ्गः।

**काण्ड**–न.–११८३–એરંડ, વાંસ વગેરેના કાંડ.

*काण्डमेरण्डवंशादेः ।

**काण्ड**-न. पुं–१४४२–અધમ, હલકું.

द्र० अणकशब्दः ।

*कणतीति काण्डं, पुंक्लीबलिङ्गः, "कण्यणि–" (उणा–१६९) इति णित् 'डः' ।

**काण्डपट**–पुं–६८०–કનાત, પડદો,

द्र० अपटीशब्दः ।

*काण्डः कुत्सितः पटः इति काण्डपटः ।

**काण्डपृष्ठ**–पुं–७७०–શસ્ત્રો વડે આજીવિકા ચલાવનાર.

□आयुधीय, शस्त्रजीविन, आयुधिक ।

*काण्डानि पृष्ठेऽस्येति काण्डपृष्ठः ।

**काण्डवत्**–पुं–७७१–બાણ ધારણ કરનાર.

□काण्डीर ।

*काण्डानि सन्त्यस्य काण्डीरः "काण्डाण्डभाण्डादीरः" (७।२।३८) मतौ काण्डवान् ।

**काण्डवीणा**–स्त्री–२९०–(शेष) ८३. ચાંડાલની વીણા.

द्र० कटोलवीणाशब्दः ।

**काण्डस्पृष्ट**–पुं–८५८–શસ્ત્રથી આજીવિકા ચલાવનાર

□शस्त्राजीव ।

*स्पृष्टानि काण्डान्यनेनेति काण्डस्पृष्टः, 'जातिकालसुखादेः" (३।१।१५२) इति क्तान्तस्य वा पूर्वनिपातः, काण्डोऽधमः स चासौ स्पृष्टश्चेति वा ।

**काण्डीर**–पुं–७७१–બાણ ધારણ કરનાર.

□काण्डवत् ।

*काण्डानि सन्त्यस्येति काण्डीरः, "काण्डाण्डभाण्डादीरः" (७।२।३८) इति 'ईरः' ।

**कातर**–पुं–३६५–બીકણ.

□दरित, चकित, भीत, भीरु, भीरुक, भीलुक, [त्रस्नु, त्रस्त शे. ६४] ।

*कायतीति कातरः, "अनिकाभ्यां तरः" (उणा ४३७) इति तरः, ईषत्तरति वा कातरः ।

**कातर**–पुं–८५२–(शि. ७५.) કાત્યાયન ઋષિ.

□कात्यायन, वररुचि, मेधाजित्, पुनर्वसु ।

**कात्यायन**–पुं–८५२–કાત્યાયન ઋષિ

□वररुचि, मेधाजित्, पुनर्वसु, [कात्य शि. ७५] ।

*कतस्यापत्यमिति कात्यः, तस्यापत्यं कात्यायनः "यञिञः" (६।१।५४) इति'आयनण्', कात्योऽप्यभेदोपचारात् इति ।

**कात्यायनी**–स्त्री–२०३–શંકરની સ્ત્રી, પાર્વતી.

द्र० अद्रिजाशब्दः ।

*कतस्यापत्यं वृद्धं इति कात्यायनी, गर्गादित्वाद् यञि "लोहितादिशकलान्तात्–" (२।४।६८) इति 'ङी' डायन् चान्तः ।

**कात्यायनी**–स्त्री–५३१-આધેડ વયની કષાયવર્ણના વસ્ત્ર ધારણ કરનારી સ્ત્રી.

*कतस्यापत्यमिवेति कात्यायनी, ऋषिपत्न्याकारत्वात् त्रिलक्षणेयम्, अर्धं वृद्धा अर्धवृद्धा, कषायेन रक्तं काषायं वसनमस्याः इति काषायवसना, नास्ति धवो अस्या इति अधवा रण्डेत्यर्थः ।

**कादम्ब**–पुं–१३२७–બાલહંસ, કલહંસ.

□कलहंस ।

* 'कदि वैक्लव्ये' सौत्रः, कन्दते प्रावृषि विक्लवन्ते इति कादम्बाः, "कदेर्णिद्वा" (उणा–३२२) इति 'अम्बः', कदम्बः, कदम्बस्येमे संघचारित्वादिति वा ।

**कादम्ब**–पुं–७७८–(शेष १४३) બાણ.

द्र० अजिह्मगशब्दः ।

**कादम्बरी**–स्त्री. न.–९०२–મદિરા.

द्र० अब्धिजाशब्दः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*कुत्सिताम्बरस्य नीलवासस इयं कादम्बरी स्त्री-क्लीबलिङ्गः, कुत्सितमम्बु यत्र क्षारत्वात् कदम्बुः समुद्रः तमियर्तीति वा, कादम्बे गिरौ अर्यते वा तत्र हि यादवैस्त्यक्ता, पृषोदरादित्वात् ।

**कादम्बिनी**–स्त्री–१६५–મેઘની શ્રેણિ.

☐मेघमाला, [कालिका शि. १३] ।

*कमाददते कादम्बाः मेघाः ते सन्त्यस्यामिति कादम्बिनी, कदम्बविकासः कादम्बः सोऽस्त्यस्यां वा, कालिकाऽपि ।

**'काद्रव'**–पुं–११७७–કોદરા.

द्र०उदालशब्दः ।

**काद्रवेय**–पुं–१३०७–નાગ, દેવયોનિવાળા સર્પો.

☐नाग ।

*कद्रवा अपत्यानि काद्रवेयाः, शुभ्रादित्वादेयण्, सर्पेभ्योऽन्ये देवयोनयोऽमी ।

**कानन**–ન.–१११०–જંગલ.

द्र० अटवीशब्दः ।

*कन्यते गम्यतेऽस्मिन् इति काननं "विदन"–(उणा–२७५) इति 'अन' अन्तो निपात्यते, कमनित्यस्मिन्निति वा ।

**कानीन**–पुं–५४७–કુંવારી સ્ત્રીનો પુત્ર. (વ્યાસ અને કર્ણ.)

*कन्याया अपत्यं कानीनः "कन्यात्रिवेण्याः कनीनत्रिवणं च" (६।१।६२)इति 'अण्' ।

**कानीन**–पुं–८४७–વ્યાસઋષિ.

☐वेदव्यास, माठर, द्वैपायन, पाराशर्य, बादरायण, व्यास ।

*कन्याया अपत्यमिति कानीनः, "कन्यात्रिवेण्या"–(६।१।६२) इत्यणि साधुः ।

**कान्त**–ન.–१४४४–સુંદર, મનોહર.

द्र० अभिरामशब्दः ।

*काम्यते इति कान्तम्, "ज्ञानेच्छार्चार्थ–" (५।२।९२) इति सति क्तः ।

**कान्त**–पुं–५१६–વહાલો પતિ, વર.

☐प्रेयस्, दयित, प्राणेश, वल्लभ, प्रिय हृदयेश, प्राणसम, प्रेष्ठ, प्रणयिन्, भर्तृ सेक्तृ, पति, वर, विवोढ रमण, भोक्तृ, रुच्य, वरयितृ, धव, [पाणिग्राह शि. ४१, परिणेतृ उपयन्तृ शि. ४२] ।

**कान्ता** –स्त्री–(પરિ. ૮)–આ શબ્દ પતિવાચક શબ્દથી લગાડી પત્નીવાચક શબ્દ બને છે.

**कान्ता**–स्त्री–५०४–મનોહર સ્ત્રી.

*काम्यते इति कान्ता ।

**कान्ता**–स्त्री–५१५–વહાલી સ્ત્રી.

☐प्रेयसी, दयिता, प्राणेशा, वल्लभा, प्रिया, हृदयेशा, प्राणसमा, प्रेष्ठा, प्रणयिनी [प्रेमवती शि. ४१] ।

**कान्तार**–पुं. ન.–९८५–વિકટ માર્ગ, ચોર કાંટાવાળો માર્ગ.

*काम्यते इति कान्तारः, पुंक्लीबलिङ्गः,' द्वारशृङ्गार"–(उणा–४११) इति 'आर' अन्तो निपात्यते, कस्य अम्भसोऽन्तमीयर्तीति वा ।

**कान्तार**–पुं ન.–१२१०–જંગલ.

द्र० अटवीशब्दः ।

काम्यते इति कान्तारं पुंक्लीबलिङ्ग, "द्वारशृङ्गार"–(उणा–४११) इति 'आर' अन्तो निपात्यते ।

**कान्तार**–पुं–११९४–જુદી જુદી જાતની શેરડી.

☐पुण्ड्र, (पुण्ड्रक) ।

*काम्यते इति कान्तारः, कान्तमूषमियर्तीति वा, कान्ता आरा भागा अस्येति वा ।

**कान्तारवासिनी**–स्त्री–२०५–(શે. ૫૦)–પાર્વતી.

द्र० अद्रिजाशब्दः ।

**कान्ति**–स्त्री–५०९–સાત્વિક, સાત અલંકાર પૈકી એક અલંકાર.

*कान्तिः रूपाद्यैः पुंभोगोपबृंहितैर्मध्याङ्गच्छाया ।

**कान्ति**–स्त्री–१५१२–શોભા, કાંતિ.

द्र०अभिख्याशब्दः ।

*काम्यतेऽनया इति कान्तिः ।

**कान्दविक**–पुं–९२१–કંદોઇ.

☐भक्ष्यकार ।

*कन्दु पण्यमस्येति कान्दविकः, "तदस्य पण्यम्" ॥६।४।५४॥ इतीकण्, "ऋवर्णोवर्ण–" ॥७।४।७२॥ इत्यादिना लक्ष्यानुरोधादिकण् इलोपाभावः, कन्दुना

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कृतं कान्दवं तत् पण्यमस्येति वा ।

**कान्दिशीक**-पुं-३६६-ભયભીત, ભયથી નાસી ગયેલ.

☐भयद्रुत ।

*कां दिशं व्रजामीत्याकुलः कान्दिशीकः, पृषोदरादित्वात् साधुः ।

**कापथ**-न.-९८४-ખરાબ માર્ગ.

☐व्यध्व, दुरध्व, कदध्वन्, विपथ ।

*कुत्सितः पन्थाः कापथम्, "काक्षपथोः" ॥३।२।१३४॥ इति कादेशः, "पथःसङ्ख्याऽव्ययोत्तरः" (हैमलिङ्गानु.नपुं. श्लो. ८) इति क्लीबत्वम्, **अमरस्तु** "विपथकापथशब्दौ" पुंस्याह, **गौडश्च** यदाह "व्यध्वो विपथकापथौ" इति ।

**कापिल**-पुं-८६२-સાંખ્ય.

☐साङ्ख्य ।

*कपिलेन कृतो ग्रन्थः इति कापिलः, तं वेत्त्यधीते वा कापिलः, कपिलस्यायमिति वा ।

**कापिश**-न-९०३-મદિરા.

द्र०अब्धिजाशब्दः ।

*कपिशमेव कापिशं प्रज्ञादित्वादण् ।

**कापिशायन**-न ९०२-મદિરા.

द्र०अब्धिजाशब्दः ।

*कापिश्यां नगर्यां भवमिति कापिशायनम्, "वल्ह्यूर्दि" ॥६।३।१४॥ इति ।

**कापोत**-पुं-९४५-સાજીક્ષાર, સાજીને બાળીને કરેલો ખાર.

☐स्वर्जिकाक्षार, सुखवर्चक, 'सर्जिकाक्षार' ।

*कपोतस्यायं कापोतः, कपोतवर्णः, कु ईषत् पूयते वा 'दम्यमि-" (उणा-२००) इति 'तः' ।

**कापोत**-न.-१०५१-સુરમો.

☐स्रोतोऽञ्जन, सौवीर, कृष्ण, यामुन ।

*कपोतस्येदं कापोतं, कपोतवर्णा वा ।

**कापोत**-पुं-१३९४-કબુતર, પારેવા જેવો રંગ.

☐कपोताभ ।

*कपोतस्यायमिति कापोतः ।

**(कापोत)**-न.-१४१५-પારેવાનો સમૂહ.

*कपोतानां समूहः इति कापोतम् "षष्ठयाः समूहे" ।६।२।९। इति 'अण्' ।

**काम**-पुं-७३-तीर्थंकरमां नहोय तेवा १८ દોષ પૈકી ૧૨ મો દોષ.

* कामो मन्मथ इति ।

**काम**-पुं-२७२-કામદેવ.

द्र०अङ्गजशब्दः ।

*कामयतेऽनेनेति कामः, "व्यञ्जनाद् घञ्" ॥५।३।१३२॥ कामोऽस्त्यस्य वा ।

**काम**-पुं. न-४३१-ઇચ્છા, અભિલાષા.

द्र० अभिलाषशब्दः ।

*कमनमिति कामः ।

**काम**-न-क्रि वि. १५०५-ઇચ્છા પ્રમાણે. તૃપ્તિ થાય ત્યાં સુધી.

द्र० इष्टशब्दः ।

*काम्यते इति कामम् अयमकारान्तोऽनव्ययः, यत् **शाश्वतः**-"कामे निकामे कामाख्या अव्ययास्तु मकारान्ताः" ॥

**कामकेलि**-पुं-५३७-मैथुन, કામક્રીડા.

☐सुरत, मोहन, रत, संवेशन, संप्रयोग, संभोग, रहस्, रति, ग्राम्यधर्म, निधुवन, पशुक्रिया, व्यवाय, मैथुन, [पशुधर्म शि.४४] ।

*कामस्य केलिरिति कामकेलिः ।

**कामगामिन्**-पुं-४९५-સ્વેચ્છાચારી.

☐अनुकामीन ।

*कामं गच्छतीत्येवंशीलो इति कामगामी ।

**कामताल**-पुं-१३२१-(શે ૧૯૧)-કોયલ.

द्र०कलकण्ठशब्दः ।

**कामध्वंसिन्**-पुं-२०८-શંકર, મહાદેવ.

द्र०अट्टहासिन्शब्दः ।

**कामन**-पुं-४३४-કામી, કામવાસના યુક્ત.

द्र०अनुकशब्दः ।

*कमनशीलः "इङितः" ॥५।२।४४॥ इति 'अन' अन्तः कामनः कमनोऽपि ।

**कामना**-स्त्री-४३१-(શેષ.१०४)-ઇચ્છા,અભિલાષા

द्र०अभिलाषशब्दः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**कामपाल**-पुं-२२४-બળદેવ.
द्र०अच्युताग्रजशब्दः ।
*कामान् पालयति, कामं स्मरं भ्रातृव्यत्वात् पालयति वा कामपालः ।

**कामम्**-अ.-१५४०-ઈચ્છા વિના અનુમતિ આપવી
*काम्यते इति कामं, बाहुलकादम् । यथा— ''कामं भवन्तु सरितो भुवि सुप्रतिष्ठाः'' ।

**कामयितृ**-पुं-४३४-કામી, કામવાસના યુક્ત
द्र०अनुकशब्दः ।
* कमनशीलः कामुकः तृनि कामयिता ।

**कामरुप**-पुं-(બ. વ.) ९५६-કામરૂપદેશ, આસામ.
☐प्राग्ज्योतिष ।
*कामतो रूपमत्रेति कामरुपाः ।

**कामरूप**-पुं-८९ (શે. ४)-દેવ
द्र०अनिमिषशब्दः ।

**कामरूपिन्**-पुं-१२८८-(શે १८५)-ભૂંડ.
द्र०आखनिकशब्दः ।

**'कामलता'**-स्त्री-६१०-પુરુષ ચિહ્ન, લિંગ.
☐पुंश्चिह्न, मेहन, शेप, शेपस्, शिश्न, मेढ्र, लिङ्ग [लङ्गुल, शङ्कु लाङ्गूल शेफ, शेफस् શે.१२८]
*कामस्य लतेव कामलता ।

**कामलेखा**-स्त्री-५३३-( શે. ११४ )-વેશ્યા.
द्र०गणिका शब्दः ।

**कामसख**-पुं-१५३-(શે. २३)-ચૈત્ર મહિનો.
द्र०चैत्रशब्दः ।

**कामाङ्कुश**-पुं-५९४-નખ.
द्र०करजशब्दः ।
*कामस्याङ्कुश इव कामाङ्कुशः ।

**कामायु**-१३३५ (શે. १९५)-ગીધપક્ષી.
द्र०गृध्रशब्दः ।

**कामायुष** पुं-२३१-ગરુડ પક્ષી
द्र०अरुणावरजशब्दः ।
*कामेन इच्छया आयुरस्येति कामायुः ।

**कामारि**-पुं-१०५५-હીરાકસી, માક્ષિક ધાતુ.
☐नाप्य, नदीज, तारारि, विटमाक्षिक ।
*कामस्याऽरिरिति कामारिः ।

**कामुक**-पुं-४३४-કામી, કામવાસના યુક્ત.
द्र०अनुकशब्दः ।
*कमनशीलः कामुकः, 'शुकम'-॥५।२।४०॥ इति 'उकण्' ।

**कामुका**-स्त्री-५२७-સામાન્ય ધનાદિકની ઇચ્છાવાળી સ્ત્રી.
*कमनशीला कामुका ।

**कामुकी**-स्त्री-५२७-મૈથુનની ઈચ્છાવાળી સ્ત્રી.
☐वृषस्यन्ती ।
*कमनशीला कामुकी ''भाजगोण-'' ॥२।४।३० इति रिरंसायां ङी ।

**काम्बल**-पुं-७५४-કાંબલથી ઢંકાયેલો રથ.
*कम्बलेन छन्नः काम्बलः, ''तेन छन्ने रथे'' ॥६।२।१३१॥ इति 'अण्' ।

**काम्बविक**-पुं-९१० મણિયાર,શંખ છીપના ઘરેણુ વેચનાર.
☐शाङ्खिक ।
*कम्बुघटनं शिल्पमस्येति काम्बविकः ''शिल्पम्'' ॥६।४।५२ इति इकण् ''ऋवर्णोवर्णात्''-॥७।३।३७॥ इति लक्ष्यानुरोधाद् इकण्, इकारस्य लोपो न भवति ।

**काम्बोज**-पुं-१२३५-કંબોજ દેશનો ઘોડો.
*कम्बोजदेशे भावाः काम्बोजाः ।

**कामिन्**-पुं-१३२८-(શે १९४)-સારસ પક્ષી.
द्र०कुरङ्करशब्दः ।

**काम्य**-नं-१४४५-સુંદર, મનોહર.
द्र०अभिरामशब्दः ।
*काम्यते इति काम्यम् ।

**काम्य**-न-८६-(શે.-२) કલ્યાણ, શુભ
द्र०कल्याणशब्दः ।
*चीयतेऽसौ कायः, ''चितिदेहा-'' ॥५।२।७९॥ इति घञ् कत्वं च ।

**काय**-न.-८४०-કનિષ્ઠા અને અનામિકા બે આંગળીઓના મૂળનું નામ.
*कनिष्ठयोर्मूले कः प्रजापतिर्देवताऽस्य कायं तीर्थम्, अञ्जलि मध्येन प्रजापतिभ्योऽञ्जलिदानात् ।

**कायमान**-न.-९९६-તૃણકાષ્ઠથી બનાવેલી ઝૂંપડી.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

☐तृणौकस् ।

*कायो मानमस्येति कायमानम् ।

**कायस्थ**-पुं-४८४-(शि. १०७)-લેખક, લહીયો.

द्र० अक्षरचणशब्दः ।

**'कायस्था'**-स्त्री-११४६-હરડે.

द्र० अभयाशब्दः ।

**कारकाद्यविपर्यास**-पुं-६९-કારક, કાળ, વચન, લિંગ વગેરેના વિરોધ વગરની પ્રભુની વાણીનો ૨૫ મો ગુણ.

*कारकाद्यविपर्यासः, कारककालवचनलिङ्गादिव्यत्यय वचनदोषापेतता ।

**कारकुक्षीय**-पुं-९५७-સાલ્વ દેશ.

☐साल्व ।

*कारकुक्षेरिमे कारकुक्षीयाः ।

**कारण**-न-१५१३-હેતુ, મુખ્ય કારણ.

☐निमित, हेतु, बीज, योनि, निबन्धन, निदान ।

*करोतीति कारणम् "कारणम्" ॥५।४।१२७॥ इति साधुः ।

**कारणा**-स्त्री-१३५८-નરકની પીડા.

☐यातना, तीव्रवेदना ।

* 'वृगृहिं साय मृ' इति हन्त्यर्थात् चुरादेः स्वार्थे णिजन्तः कारणं, कारणा ।

**कारणिक**-पुं-४७९-પરીક્ષા કરનાર.

☐परीक्षक, [आक्षपाटलिक शि. ३५] ।

*करणेनाऽधिकारिवर्गेण चरतीति कारणिकः ।

**कारण्डव**-पुं-१३४१-બતક પક્ષી.

☐मल्ल ।

*करोति शब्दमिति कारण्डवः, "कैरव-" (उणा-५२९) इत्यवे निपात्यते, करण्डे भवं कारण्डं पञ्जरबंधं वातिवा ।

**'कारम्भा'**-स्त्री-११४९-કાંગ.

द्र० प्रियङ्गुशब्दः ।

**कारवेल्ल**-पुं-११८८-કારેલી.

द्र० कटिल्लकशब्दः ।

*कारेण वेल्लतीति कारवेल्लः ।

**कारस्कर**-पुं-१११४- વૃક્ષ, ઝાડ.

द्र० अंह्रिपशब्दः ।

*कारं करोतीति कारस्करः, वर्चस्कादित्वात् साधुः ।

**कारा**-स्त्री-८०६-જેલ, કેદખાનું.

☐चार, गुप्ति, [चारक शि. ७१] ।

*क्रियते कीर्यते वाऽस्यामिति कारा, भिदादित्वादङ् साधुः ।

**कारिका**-स्त्री-२५८-થોડી વૃત્તિથી ઘણા અર્થનું સૂચન કરનાર.

*पदार्थान् गम्यान् करोतीति कारिका ।

**कारिन्**-पुं-८९९-શીલ્પી, કારીગર.

☐कारु, प्रकृति, शिल्पिन् ।

*करोतीति ग्रहादिणिनि कारी ।

**कारु**-पुं-८९९-શીલ્પી, કારીગર.

☐कारिन्, प्रकृति, शिल्पिन् ।

*करोति कृणोति वा कारुः, "कृवापा-" (उणा-१) इत्युण् ।

**कारुण्य**-न.-३६९-અનુકંપા, દયા.

द्र० अनुकम्पाशब्दः ।

*करुणस्यम् भावः कारुण्यम् करुणे व वा भेषजादित्वात् स्वार्थे ट्यण् ।

**कारूष**-पुं-९५९-એક દેશનું નામ.

☐बृहद्गृह ।

*कुर्वन्तीति कारुषाः, "कोरदूषा-" (उणा-५६१) इत्यूषे निपात्यते ।

**(कारेणव)** -पुं-८५३-પાલકાપ્ય મુનિ

☐पालकाप्य, करेणुभू ।

**कारोत्तम**-पुं-९०५-મંદિરમાંનો સ્વચ્છ ભાગ

☐मद्यमण्ड ।

*कारेण क्रियावशाद् उत्तमो मुख्यः कारोत्तमः सुरायें स्वच्छो भागः ।

**कार्तवीर्य**-पुं-६९३-આઠમા ચક્રવર્તી.

☐सुभूम ।

*कृतवीर्यस्यायं कार्तवीर्यः ।

**कार्तवीर्य**-पुं-७०२-કૃતવીર્યના પુત્ર, અર્જુન.

☐हैहय, दोःसहस्रभृत्, अर्जुन ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कृतवीर्यस्यापत्यं इति कार्तवीर्यः, "ऋष्यन्धकवृष्णि"- ॥६।१।६१॥ इत्यण् ।

**कार्तस्वर**–ન.–१०४४-સોનું.

द्र० अर्जुनशब्दः ।

* कृतस्वराऽऽकरे भवमिति कार्तस्वरम् ।

**कार्तान्तिक**–પું–४८२– જ્યોતિષી દૈવજ્ઞ.

द्र० आदेशिन् शब्दः ।

*कृतान्तं वेत्तीति कार्तान्तिकः ।

**कार्तिक**–પું–१५५ કાર્તિક માસ.

द्र० ऊर्जशब्दः ।

*कार्तिकी पौर्णमास्यस्य इति कार्तिकः ।

**कार्तिकिक**-પું-१५५-કાર્તિક માસ.

द्र० ऊर्जशब्दः ।

*कार्तिकी पौर्णमास्यस्येति कार्तिकिकः ।

**कार्पण्य**–ન.–३१९.-ગરીબાઈ, કૃપણતા.

☐दैन्य ।

*कृपणस्य भावः कार्पण्यम् ।

**कार्पास**–ન.–६६९-કપાસમાંથી બનેલું વસ્ત્ર.

☐बादर, (फाल) ।

*कर्पासफलस्य विकारः कार्पासम् ।

**'कार्पासी'**–સ્ત્રી–११३९–કપાસનો છોડ.

द्र० कर्पासशब्दः ।

**कार्म**–પું–३५४ સતત કાર્ય કરનાર.

☐कर्मशील ।

*कर्मशीलमस्येति कार्मः "अङ्गस्थाच्छत्रादेरञ्" ॥६।४।६०॥ इत्यञ् ।

**कार्मण**–ન.–१४९८–કામણ, ઔષધી– જડી બૂટી વગેરેથી વશ કરવું તે.

☐मूलकर्मन ।

*संदिष्टं कर्मैव कार्मणं, वृद्धपरंपरोपदेशात् "कर्मणः संदिष्टे" ॥७।२।१६७॥ इति स्वार्थिकोऽण् ।

**कार्मुक**–ન.–७७५–ધનુષ્ય.

द्र० अस्त्रशब्द ।

*कर्मणे शक्तमिति कार्मुकं, "योगकर्मभ्यां–" ॥६।४।९५॥ इत्युकञ् ।



**कार्य**–ન.–१५१४–કાર્ય, પ્રવૃત્તિ.

☐अर्थ, कृत्य, प्रयोजन ।

*क्रियते इति कार्यम्, घ्यण् ।

**(कार्वट)**–ન.–९७२–१०० ગામોમાં શ્રેષ્ઠ નગર.

**कार्षक**–પું–८९०–ખેડૂત.

द्र० कर्षकशब्दः ।

*कषतीति कृषिकः, "कृषेर्गुणवृद्धीच"(उणा-३१) इत्यके वृद्धौ च कार्षकः ।

**'कार्श्य'**–પું-११३८–શાલ.

द्र० सर्जशब्दः ।

**'कार्ष्य'**–પું–११३८–શાલ.

द्र० सर्जशब्दः ।

**काल**–પું–१२६– સમય, વખત.

☐समय, दिष्ट, अनेहस्, सर्वमूषक ।

*कालयति क्षिपति सर्वभावान्, कल्यतेऽसाविति वा ।

**काल**–પું–१८४-યમ, યમરાજ.

द्र० अर्कसूनुशब्दः ।

*कालयति क्षिपत्यायुरिति कालः ।

**काल**–પું–३२३–મૃત્યુ, મરણ.

द्र० अत्ययशब्दः ।

*कालयति क्षिपत्यायुरिति कालः ।

**काल** પું–१३९७–શ્યામવર્ણ.

द्र० असितशब्दः ।

*कालयति मनः इतिकालः ।

**काल**-પું–१२१-(શે.११)–શનિ.

द्र असितशब्दः ।

**काल**––પું.–२००–(શે. ४७) શંકર, મહાદેવ.

द्र० अट्टहासिन्शब्दः ।

**(काल–)** પું. १९३ -નવનિધિ પૈકી છઠ્ઠા નિધિનુ નામ.

**कालक**–ન.–६०४–કલેજુ, યકૃત, હૃદયનો જમણો ભાગ.

☐कालखण्ड, कालखञ्ज, कालेय, यकृत् ।

*कालमेव कालकम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**कालक**-પુ.-૬૨૮-શરીરમાં કાળું ચિહ્ન, તલ વગેરે.
☐तिलक, पिप्लु, जडुल, तिलकालक ।
*काल एव कालकः ।

**कालकण्टक**-પુ.-૧૩૩૨-જલકાગડો.
☐दात्यूह, जलरङ्कु, जलरञ्ज [कालकण्टक, शि. ११९, दात्योह, (दात्यौह) शि. १२०] ।
*कालाः कण्टका रोमोद्भेदा अस्येति कालकण्टकः "कालः कण्ठोऽस्येति कालकण्ठकः" इत्येके ।

**कालकण्ठक**-પુ.-૧૩૩૨-(શિ. ૧૧૯) જલ કાગડો
द्र० कालकण्टकशब्दः ।

**कालकर्णिका**-સ્ત્રી.-૧૩૮૦-દરિદ્રતા, અશુભ ભાગ્ય.
☐अलक्ष्मी, निर्ऋति ।
*कालस्य यमस्य कर्णिका कर्णाभरणमिव कालकर्णिका ।

**कालकुण्ठ**-પુ.--૨૨૯ (શિ.૬૯)-વિષ્ણુ, નારાયણ.
द्र० अच्युतशब्दः ।

**कालकूट**-પુ.-૧૧૯૬-એક પ્રકારનું સ્થાવર વિષ.
द्र० अङ्कोलसारशब्दः ।
*कालस्य वर्णस्य कूटोऽत्रेति कालकूटः, पुंक्लीबलिङ्गः, कालसम्बन्धी कूटो व्याजोवा ।

**कालकूट**- પુ.-૧૮૫-(શિ. ૩૭) યમરાજ
द्र० अन्तकशब्दः ।

**कालखञ्ज**-ન.-૬૦૫-કલેજું.
☐कालखण्ड, कालेय, कालक, यकृत् ।
*कालमपि भिन्नंस त् खञ्जयतीति कालखञ्जम् ।

**कालखण्ड**-ન.-૬૦૮-કલેજું.
☐कालखञ्ज, कालेय, कालक, यकृत् ।
*हृदयस्य दक्षिणपार्श्वे कालस्य मांसस्य खण्डमिति कालखण्ड, कृष्णमांसांशः

**कालग्रन्थि**-સ્ત્રી ૧૫૯-(શે. ૨૭)-વર્ષ.
द्र० अनुवत्सरशब्दः ।

**कालङ्कमा**-સ્ત્રી-૨૦૫ (શે ૬૦) પાર્વતી.
द्र० अद्रिजाशब्दः ।

**कालचक्र**-ન. ૧૨૮
બાર આરાનું એક કાળચક્ર થાય તે.
*द्वादशभिररैश्चक्रमिव चक्रं, कालस्य चक्रं कालचक्रम् ।

**कालञ्जरी**-સ્ત્રી.-૨૦૫-(શે. ૫૯) પાર્વતી.
द्र० अद्रिजाशब्दः ।

**कालदमनी**-સ્ત્રી.-૨૦૫-(શે. ૬૦) પાર્વતી.
द्र० अद्रिजाशब्दः ।

**कालधर्म**-પુ-૩૨૪-મૃત્યુ, મરણ.
द्र० अत्ययशब्दः ।
*कालो मृत्युदूतः, क्षणत्रुट्याद्यात्मको वा ।
**यदाह-**
"कालःसंहरति प्रजाः" तस्य धर्मः कालधर्मः संहारः ।

**कालनेमि**-પુ-૨૨૦-વિષ્ણુનો શત્રુ.
द्र० अरिष्टशब्दः ।
*कालस्य नेमिरिव कालनेमिः ।

(**कालनेमिहर**)-પુ.-૨૨૦-વિષ્ણુ.
द्र० अच्युतशब्दः ।

**कालपृष्ठ**-ન.-૭૧૧-કર્ણનું ધનુષ્ય.
*कालः पृष्ठेऽस्येति कालपृष्ठम् ।

**कालभृत**-પુ.-૯૮-(શે.૮) સૂર્ય.
द्र० अंशुशब्दः ।

**कालरात्रि**-સ્ત્રી.-૨૦૫-(શે.૪૯) પાર્વતી.
द्र० अद्रिजाशब्दः ।

**कालवृन्त**-પુ.- ૧૧૭૫-કળથી.
☐कुलत्थ ।
*कालं वृन्तमस्येति कालवृन्तः ।

**कालशेय**-ન.-૪૦૮-છાશ વલોવેલું દહીં.
द्र० अरिष्टशब्दः ।
*कलश्यां मन्थन्यां भवं कालशेयं, "दृति कुक्षिकलशि"-॥६।३।१३०॥ इत्येयण् ।

'**कालस्कन्ध**'-પુ-૧૧૪૬-તમાલવૃક્ષ.
द्र० तमालशब्दः ।

**कालागरु**-પુ.-૬૪૧-કાળો અગર.
☐काकतुण्ड ।

**कालानुसार्य**-ન.-૬૪૬-(શિ.૫૨)-પીળું ચંદન.
☐कालीयक, जापक, 'जायक' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**कालान्तरविष**–પું.–૧૩૧૩–કાલાન્તરે જેનું વિષ ચડે તેવા ઉંદર.

**कालायनी**–સ્ત્રી –૨૦૫–(શે.૫૬) પાર્વતી.

द्र० अद्रिजाशब्दः ।

**कालायस**–ન.–૧૦૩૭–લોઢું

द्र० अयस्शब्दः ।

*कालं चतदय श्चेति कालायसं, "सरोऽनोऽश्मायसोः" ।।७।।३।२२५।। इत्यट्समासान्तः ।

**कालासुहृद्**–પું.–૨૦૦–મહાદેવ.

द्र० अट्टहासिन्शब्दः ।

*कालस्यासुहृदिति कालासुहृत्, दक्षमखध्वंसे यमस्य जितत्वात्, यौगिकत्वात् यमजित् ।

**'कालास्थाली'**–સ્ત્રી.–૧૧૪૪–કાંસ્ય.

द्र० पाटलीशब्दः ।

**कालिका**–સ્ત્રી.–૪૪–શ્રી અભિનંદન સ્વામીની શાસન દેવીનું નામ.

*काल्येव कालिका वर्णेन ।

**कालिका**–સ્ત્રી.–૩૦૭–મલિનતા ફિક્કું.

□वैवर्ण्य ।

*कालस्य भावः कालिका, चोरादित्वादकञ्, कालयतीति णको वा ।

**कालिका**–સ્ત્રી–૧૦૫૫–ફટકડી.

द्र० आढकीशब्दः ।

*कालयति स्वामितिकालिका ।

**कालिका** –સ્ત્રી–૧૬૫(શિ. ૧૩)–મેઘની શ્રેણી.

□कादम्बिनी, मेघमाला ।

**कालिङ्ग** પું.–૧૦૯૮–એક જાતનું સ્થાવર વિષ.

द्र० अङ्कोलसारशब्दः ।

*कलिङ्गदेशे भवः कालिङ्गः ।

**कालिनी**–સ્ત્રી–૧૧૦–આર્દ્રા નક્ષત્ર.

□आर्द्रा, रौद्री ।

* कालोऽस्यामस्तीति कालिनी ।

**कालिन्दी** સ્ત્રી–૧૦૮૩–યમુના નદી.

□यमुना, यमभगिनी, सूर्यजा, यमी, (कालिन्दतनया) [कलिन्दपुत्री शि. ९७] ।

* कलिन्दाद्रेरियं कालिन्दी, कलिन्दतनयाऽपि ।

**(कालिन्दीकर्षण)**–પું.–૨૨૪–બળદેવ, કૃષ્ણના મોટા ભાઈ.

द्र० अच्युताग्रजशब्दः ।

**(कालिन्दीसू)**–પું.–૯૫–સૂર્ય.

द्र० अंशुशब्दः ।

**कालिन्दीसोदर**–પું–૧૮૫–યમ, યમરાજ.

द्र० अन्तकशब्दः ।

*कालिन्द्याः सोदरः कालिन्दीसोदरः ।

**कालिन्दीसोदर** (પરિ.)–પું–૯–યમ, યમરાજ.

**कालिय**–પું–૨૨૧–વિષ્ણુનો શત્રુ

द्र० अरिष्टशब्दः ।

*के पानीये आलयोऽस्येति कालियः, पृषोदरादित्वात् ।

द्र० अच्युतशब्दः ।

**कालियदमन** (પરિ.)–પું–૧૦–વિષ્ણુ.

**(कालियदमन)** –પું–૨૨૧–વિષ્ણુ.

द्र० अच्युतशब्दः ।

**कालियशासन** (પરિ.)–પું–૧૦–વિષ્ણુ.

द्र० अच्युतशब्दः ।

**कालियारि** (પરિ.)–પું–૧૦–વિષ્ણુ.

द्र० अच्युतशब्दः ।

**काली**–સ્ત્રી.–૨૦૩–પાર્વતી.

द्र० अद्रिजाशब्दः ।

*संहारमूर्तौ कृष्णवर्णत्वात् कालीति ।

**काली**–સ્ત્રી.–૨૩૯–સોળ વિદ્યાદેવી પૈકી નવમી વિદ્યાદેવી.

*कालवर्णत्वात् काली ।

**कालीयक**–ન.–૬૪૬–પીળું ચંદન.

□जापक, 'जायक', [कालानुसार्य शि. ५२]।

*कालायां भूमौ भवमिति कालीयं, के कालीयकम् ।

**कालेय**–ન.–૬૦૪–કલેજું, યકૃત.

□कालखण्ड, कालखञ्ज, कालक, यकृत् ।

*कु ईषद् लीयते श्लिष्यते हृदयेनेति कालेयम्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

" य एच्चातः" ॥५।२।२८॥, कलिर्देवताऽस्येति वा ।

**कालेय**–न.-६४५-કેશર.

द्र० कश्मीरजन्मनूशब्दः ।

*कु ईषल्लीयते इति कालेयम् ।

**काल्य**–न.-१३९-પ્રભાતકાળ.

द्र० अहर्मुखशब्दः ।

*प्राप्त कालोऽस्येति काल्यम्, "कालाद्यः" ॥६।४।१२६॥ इति यः, काले साध्विति वा ।

**काल्या**–स्त्री–१२६८-ગર્ભગ્રહણ સમયને પ્રાપ્ત થયેલી ગાય.

☐उपसर्या ।

*प्रजने गर्भग्रहणे प्राप्तः कालोऽस्याः इति काल्या ।

**काल्या** –स्त्री.-२७३ (शि.१८)-માંગલિક શબ્દ, શુભ વચન.

☐कल्या ।

**कावचिक**-न.-१४१७-બખ્તર પહેરેલા પુરુષોનો સમૂહ.

*कवचिनां समूहः कावचिकं, "कवचिहस्त्य-चित्ताच्चेकण्" ॥६।२।१४॥ इति ।

**कावेरी**-स्त्री–१०८४-કાવેરી નદી.

☐अर्धजाह्नवी ।

*कवेरस्य जलदेहस्येयं इति कावेरी ।

**काव्य**–पुं–११९–શુક્ર.

द्र० उशनस्शब्दः ।

*कवेरपत्यं इति काव्यः, "कुर्वादेर्ञ्यः" ॥६।१।१००॥ इति ञ्यः, कविरेव वा काव्यः, भेषजादित्वात् ट्यण् ।

**काश**-पुं–११९५–કાશ, તૃણ, કસાડો.

☐इषीका, 'कास' ।

*काशते इति काशः पुंक्लीबलिङ्गः ।

**(काशसंकाश)**-पुं–१४६२-કાશ પુષ્પના જેવા સફેદ કેશ.

*यथा–काशसंकाशाः केशाः ।

**काशि**-स्त्री–९७४-કાશી નગરી.

☐(काशी) वराणसी, वाराणसी, शिवपुरी ।

*काशते इति काशिः, स्त्रीलिङ्गः, "नदिपठि-" (उणा-६०७) इति इः ।

**(काशी)**-स्त्री–९७४–કાશી નગરી

द्र० काशिशब्दः ।

**काश्मरी**–स्त्री–११४३–સીવણ નામની વનસ્પતિ.

☐भद्रपर्णी श्रीपर्णी, गम्भीरी (कम्भारी) सर्वतोभद्रा, मधुपर्णिका, काश्मर्य" ।

*काशते इति काश्मरी, "जठर-"(उणा–४०३) इत्यरे निपात्यते ।

**'काश्मर्य'**–पुं–११४३-સીવણનું વૃક્ષ.

द्र० काश्मरीशब्दः ।

**काश्यप**–पुं–२३६–સાત બુદ્ધ પૈકી છઠ્ઠા બુદ્ધ

*कश्यपस्यापत्यं वृद्धमिति काश्यपः, विदादित्वादञ् ।

**काश्यप**–न.-६२२–માંસ.

द्र० आमिषशब्दः ।

*कश्यपस्येदं काश्यपम् ।

**काश्यपि**–पुं- १०२- સૂર્યનો સારથી અરુણ.

द्र० अनूरुशब्दः ।

*कश्यप स्यापत्यमिति काश्यपिः, ऋष्यणं बाधित्वा "बाह्वादिभ्यो गोत्रे" ॥६।१।३२॥ इतीञ् ।

**काश्यपि**-पुं.–२३१–ગરુડપક્ષી.

द्र० अरुणावरजशब्दः काश्यपिः ।

* कास्यपस्याऽपत्यं ।

**काश्यपी**-સ્ત્રી–९३७–પૃથ્વી.

द्र० अचलाशब्दः ।

* काश्यपस्येयं काश्यपी, भार्गवेण हि पृथ्वीं जित्वा अस्मै दत्ता ।

**काष्ठ**–न.–११२२–લાકડું.

☐दलिक, दारु ।

*काशते इति काष्ठं, "वनिकणि-" (उणा–१६२) इति ठः

**काष्ठकीट**–पुं–१२०३–લાકડાનો કીડો.

☐घुण ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*काष्ठोद्भवः कीटः काष्ठकीटः ।

**काष्ठकुद्दाल**-पुं-८७८-લાકડાની કોદાળી.

☐अभ्रि ।

*काष्ठैः कुद्दालः,काष्ठमयो वा: येन निखन्य भग्नं भग्नं पोतादि कुथेन पूर्यते ।

**काष्ठतक्ष**-पुं-९१७-સુથાર.

☐रथकृत्, स्थपति, त्वष्टृ, तक्षन्, वर्धकि । [रथकार शि. ८० ] ।

*काष्ठं तक्ष्णोतीति काष्ठतट् ।

**काष्ठा**-स्त्री-१३६-અઢાર નિમેષ પ્રમાણ.

*काशते इति काष्ठा, 'वनिकणिकाश्युषिभ्यष्ठः" (उणा-१६२) इति ठः ।

**काष्ठा**-स्त्री-१६६-દિશા.

☐आशा, दिग्, हरित्, ककुप् ।

*काशते इति काष्ठा ।

**काष्ठाद्वय**-न.-१३६-બે કાષ્ઠા પ્રમાણ

☐लव ।

**काष्ठाम्बुवाहिनी**-स्त्री-८७७-લાકડા અને પાણી ભરીને લાવવાનું પાત્ર.

☐द्रोणी ।

*काष्ठमम्बु च वहतीति काष्ठाऽम्बुवाहिनी ।

**क्षीरस्वामी** तु—

काष्ठमुपलक्षणं काष्ठाऽश्मादिमयी जलधारिणी द्रोणी इति व्याचख्यौ ।

**'काष्ठीला'**-स्त्री-११३६-કેળ.

द्र० कदलीशब्दः ।

**'कास'**-न.-११९५-કાશ તૃણ.

☐काश, इषीका ।

**कास**-पुं-४६४-ખાંસી.

☐क्षवथु ।

*"कासृङ् शब्दकुत्सायाम्" कासतेऽनेनेति कासः।

**कासर**-पुं-१२८३-પાડો.

☐महिष, यमवाहन, रजस्वल, वाहरिपु, लुलाय, सैरिभ, मह, धीरस्कन्ध, कृष्णश्रृङ्ग, जरन्त, दंशभीरुक, रक्ताक्ष, हंसकालीतनय, लालिक । [कलुष, पिङ्ग, कटाह, गद्गदस्वर, शे. १८३ हेरम्ब स्कन्धश्रृङ्ग, शे. १८४, यमरथ शि. ११३] ।

*"कासृङ् शब्दकुत्सायाम्" कासते इति कासरः, "ऋच्छिचटि-" (उणा-३९७) इत्यरः, घर्मार्तः कं जलं आसरति वा, ईषत् सरति महाकायत्वादिति वा ।

**कासार**-पुं न.-१०९४-તળાવ.

☐पद्माकर, तडाग, सरसी, सरस्, [तडाक, तटाक शि. ९९] ।

"कासृङ् शब्दकुत्सायाम्"

*इति दन्त्यान्तः कासन्ते बकादयोऽत्रेति कासारः, पुंक्लीबलिङ्गः । "अर्त्यङ्गि-" ( उणा-४०५ ) इत्यारः, कमामरत्यत्रेति वा ।

**कासीस**-न-१०५६-રાતી હીરાકશી.

☐धातुकासीस, खेचर, धातुशेखर ।

* कसतीति कासीकम्, "तलिकसिभ्यामी-" (उणा-५१६) इति ईसण् ।

**कासू**-स्त्री-७८७-(शे.१४८)-શક્તિ નામનું શસ્ત્ર.

☐महाफला, अष्टतालायता ।

**काहल**-पुं.-३४९-(शे.५२)-અસ્પષ્ટ બોલનાર.

☐लोहल, अस्फुटवाच् ।

**काहला**-स्त्री-२९४-(शे. ८५)-શીંગડાના જેવું વાજિંત્ર.

☐ [कुहाला, चण्डकोलाहला शे. ८५] ।

**किंवदन्ती**-स्त्री-२५९-લોકવાયકા.

☐जनश्रुति ।

*किं वदति जनोऽत्रेति किंवदन्ती "तृजिभूवदि" (उणा-२२१) इति टिदन्तः, यद्वा, उद्यते वदन्तिः कथा "वद्यवि-" (उणा-६६५) इत्यन्तिः, कुत्सिता वदन्तिः, ङ्यां किंवदन्ती ।

**किंशारु**-पुं-११८१-ધાન્યના દાણાનો પાતળો અગ્રભાગ.

☐सस्यशूक ।

* कुत्सितं श्रृणातीति किंशारुः, पुंलिङ्गः, "किमःश्रोणित्" (उणा-७२५) इत्युः ।

**किंशुक**-पुं.-११३६-ખાખરાનું ઝાડ.

☐त्रिपत्रक, पलाश, ब्रह्मपादप, 'पर्ण, वातपोथ' ।

*किञ्चित् शुकोनीलः इति किंशुकः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**'किकि'**-पुं.-१३२९-ચાષ પક્ષી.

द्र० किकीदिविशब्दः ।

**'किकिदीव'**-पुं.-१३२९-ચાષ પક્ષી.

द्र० किकीदिविशब्दः ।

**किकिदीवि**-पुं.-१३२९-(शि.११९)-ચાષ પક્ષી.

द्र० किकीदिविशब्दः ।

**किकी**-पु.-१३२९-(शि.११९)-ચાષપક્ષી.

द्र० किकीदिविशब्दः ।

**'किकीदीवि'**-पु.-१३२९-ચાષ પક્ષી.

द्र० किकीदिविशब्दः

**किकीदिवि**-पुं-१३२९-ચાષ પક્ષી.

☐चाष 'किकिदिवि, किकिदीवि, किकिदिव, किकीदिवी, किकीदिव, किकि, किकी; दिव,' [ किकी, दिवि, शि. ११८, किकिदीवि शि ११९] ।

*किकीति कुर्वन् दीव्यतीति किकीदिविः, "छवि-छिवि-" (उणा-७०६) इति वौ निपात्यते, 'द्वेनाम्नी' **'इत्यन्ये'**, किकिदीविरपि ।

**'किकोदिवि'**-पुं.-१३२९-ચાષ પક્ષી.

द्र० किकीदिविशब्दः ।

**'किक्रीदीवि'**-पुं-१३२९-ચાષ પક્ષી.

द्र० किकीद्रिविशब्दः ।

**किखि**-स्त्री-१२९०-શિયાળ જેવું પ્રાણી, લોંકડી.

*अल्पायां शिवाजातौ कौतीति किखिः, स्त्रीलिङ्गः, "कोर्डि खिः" (उणा-६२६) ।

**किङ्कण**-पुं-२९४-(शि.८८) વાદ્યવિશેષ, ઢોલ.

☐पणव ।

**(किङ्कणि)**-स्त्री-६६५-ઘુઘરી.

द्र० किङ्कणीशब्दः ।

**किङ्कणी**-स्त्री-६६५-ઘુઘરી.

☐ (किङ्कणि), क्षुद्रघण्टिका 'किङ्किणि,' [घर्घरी, विद्या, विद्यामणि शी.१३५, किङ्किणी शि.५४]

*कङ्कते याति कटिमिति किङ्कणिः, "कङ्केरिच्चास्य वा" (उणा-६३९) इत्यणिः, ङ्यां किङ्कणी। किञ्चित्क्वणतीति वा ।'किङ्किणीत्येके । शेषश्चात्र-"अथ किङ्कण्यां घर्घरी, विद्या विद्यामणिस्तथा ॥

**किङ्कर**-पुं.-३६०-ચાકર.

☐नियोज्य, परिचारक, डिङ्गर, भृत्य, चेट, गोप्य, पराचित, दास, प्रेष्य, परिस्कन्द, भुजिष्य, परिकर्मिन्, परान्न, परपिण्डाद, परजात, परैधित, [प्रतिचर शि. २४] ।

* किं करोमीत्याशां प्रतीक्षते इति किङ्करः, "किंयत्तद्बहोरः" ।।५।१।१०।। इति अः ।

**'किङ्किणी'**-स्त्री-६६५--ઘુઘરી.

द्र० किङ्कणीशब्दः ।

**किङ्किणी**-स्त्री-६६५(शि. ५४)-ઘુઘરી.

द्र० किङ्कणीशब्दः ।

**किङ्किरात**-पुं-११३५-પીળો બાણપુષ્પ, આસોપાલવનું ઝાડ.

☐कुरण्टक, [कुरुण्टक, कुरण्डक शि.१०१]।

*कुत्सितं किरतीति किङ्किरातः । "कृवृकलि-" (उणा-२०९) इत्यातक्, किञ्चित् किरातः खर्वो वा

**किञ्चन**-अ.-१५३६-થોડું, અલ્પ.

☐किञ्चित्, मनाक्, ईषत् ।

*किमपि चनतीति किञ्चन, यथा-'प्राचीमङ्कुरयन्ति किञ्चन रुचोराजीवजीवातवः ।

**किञ्चित्**-अ.-१५३६-અલ્પ, થોડું.

☐मनाक्, ईषत्, किञ्चन ।

*किमपि चिनोतीति किञ्चित् । यथा-"किञ्चित् कुञ्चितलोचनाभिरसकृत् घ्राताः कदम्बानिलाः ॥

**'किञ्चलक'**-पुं.-१२०३-અળસિયા.

द्र० किञ्चुलकशब्द ।

**किञ्चुलक**-पुं-१२०३-અળસિયા, જમીનના કીડા.

☐गण्डूपद, 'किञ्चिलक', कुसू, भूलता, 'महीलता', [किञ्चुलुक शि. १०८] ।

*किञ्चित् चुलुम्पतीति किञ्चुलकः, "कीचक-" (उणा-३३) इति अके निपात्यते। किञ्चुलुकोऽपि ।

**किञ्चुलुक**-पुं-१२०३-(शि. १०८) અળસિયા, જમીનના કીડા.

द्र० किञ्चुलकशब्दः ।

**किञ्जल्क**-न.-११६६-કેસરાં, કમળના તાંતણા, નાગકેસર.

☐केसर, 'केशर' ।

*किञ्चिज्जलति, किं कुत्सितं जीर्यते वा किञ्जल्कं,

"निष्कतुरुष्क-" (उणा-२६) इति के निपात्यते ।

**किटि**-पुं-१२८८-ભૂંડ

द्र० आखनिकशब्दः ।

*केटतीति किटिः, "नाम्युपान्त्य-" (उणा-६०९) इति किदिः ।

**किटिभ**-पुं-१२०९-માંકડ.

☐मत्कुण, कोलकुण, उद्दंश, उत्कुण ।

*केटतीति किटिभः, बाहुलकात् किदिभः, किटिं त्रासं बिभर्ति वा, "क्वचित्" ॥५।१।१७१॥ इति डः ।

**किट्ट**-न. पुं-६३१-કાન વગેરેનો મેલ.

☐मल ।

*केटतीति किट्टं, पुंक्लीबलिङ्गोऽयम ।

**किट्टवर्जित**-न.-६२९-શુક્ર, વીર્ય.

द्र० आनन्दप्रभवशब्दः ।

*किट्टेन मलेन वर्जितमिति किट्टवर्जितम् ।

**किट्टिभ**-न.-१०७० (शे. १९६)-અતિક્ષાર વાળુ પાણી.

**किण**-पुं. न.-४६५-ડાઘ, ઘાનું ચિહ્ન.

*कणत्यनेनेति किणः, पुंक्लीबलिङ्गः, पृषोदरादित्वात् किणः सौत्रो वा ।

**किणालात**-पुं-१७४ (शे. ३२)-ઇન્દ્ર.

द्र० अच्युताग्रजशब्दः ।

**किण्व**-न.-९०४-સુરાબીજ, જેમાંથી મદ્ય બને છે તેવાબીજ.

☐'कण्व', नग्नहू, नग्नहु, मद्यबीज ।

* 'किणः सौत्रः' किण्यते इति किण्वम्, "निघृषि-" (उणा-५११) इति किद् वः ।

**किण्व**-न.-१३८१-અશુભ, પાપ, દુષ્કૃત.

द्र० अंहस्शब्दः ।

*'किणिः सौत्रः' किण्यते इति किण्वम् , "निघृषि-" (उणा-५११) इति किद्वः ।

**किण्विन**-पुं-१२३३ (शे.१७८)-ઘોડો.

द्र० अर्वन्शब्दः ।

**कितव**-पुं ४८५-લુચ્ચો, પાસા વડે જુગાર રમનાર.

☐द्युतकृत् , धूर्त, अक्षधूर्त, अक्षदेविन् ।

*केतति निवसति यत्र तत्रेति कितवः 'कितिकुडि-' (उणा-५१८) इति किद्वः, किं तवास्तीति पणते वा ।

**किन्नर**-पुं-४२-શ્રીધર્મનાથ ભગવાનના શાસન દેવ.

*किञ्चिन्नरः इति किन्नरः ।

**किन्नर**-पुं-९१-વ્યંતર દેવ.

**किन्नर**-पुं-१९४-કિન્નર દેવ.

☐किंपुरुष, तुरङ्गवदन, मयु ।

*कुत्सितो नरः, अश्वमुखत्वात् किंनरः, "किं क्षेपे ॥३।१।१२०॥ इति समासः ।

**किन्नरी**-स्त्री-२९०(शे. ८३)-ચાંડાલની વીણા.

द्र० कटोलवीणाशब्दः ।

**किन्नरेश**-पुं-१९०-કુબેરદેવ.

द्र० इच्छावसुशब्दः ।

*किन्नराणां ईशः किन्नरेशः ।

**किम्**-अ.-१५२८-બસ, પર્યાપ્ત.

☐कृतं, अलं, भवतु, अस्तु ।

*कौतीति किम्, 'कोर्डिम्' (उणा-९३९) । यथा **द्व्याश्रये**—

'गोत्रेण पुष्करावर्त ! किं त्वया गर्जितैः कृतम् ? विद्युताऽलं भवत्वद्भि-र्हँसा उत्बुर्बिलं घनम्" ॥

**किम्**-अ-१५३६-વિતર્ક, વિકલ્પ.

द्र० अहोशब्दः ।

*कौतीति किम्, यथा-"किं रज्जुः?, किं सर्पः' ? ।

**किमु**-अ.-१५३६-વિતર્ક, વિકલ્પ.

द्र०अहोशब्दः ।

* किमु इत्यव्ययसमुदायः । यथा-"खेदयेत किमु मानयेत्" ।

**किमुत**-अ-१५३५-અતિશય.

द्र०अतीवशब्दः ।

किमूयते इति किमुत,: "पुतपित्त" (उणा-२०४) इति निपात्यते ।

**किमुत**-अ-१५३६-વિકલ્પ, વિતર્ક.

द्र०अहोशब्दः ।

*किमुत इत्यव्ययसमुदायः, यथा-"किमुतरज्जुः, किमुत" सर्पः" ?।

**किम्पचान**-पुं-३६८-કંજૂસ માણસ.

द्र०क्षुद्रकदर्यशब्दः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

* किञ्चित् पचतीति किम्पचानः, "मुमुचान-" (उणा-२७८) इति बहुवचनादानान्तो निपात्यते ।

**किंपाक**-पुं-११४१ ते नामनुं झेरी वृक्ष.

□महाकाल ।

* कुत्सितं प्राणहरः पाकोऽस्य विषवृक्षत्वात् इति किंपाकः ।

**किम्पुरुष**-पुं-९१-व्यंतर देव.

**किम्पुरुष**-पुं-१९४ किन्नर देव.

*कुत्सितः पुरुषः किम्पुरुषः "किं क्षेपे" ।।३।१।११०।। इति समासः ।

**किम्पुरुषेश्वर**-पुं-१९०-कुबेर.

द्र०इच्छावसुशब्दः ।

*किंपुरुषाणां ईश्वरः इति किंपुरुषेश्वरः, यौगिकत्वाद् किंनरेशः ।

**कियदेतिका**-स्त्री-३००-उत्साह, वीररसनो स्थायी भाव.

द्र०अध्यवसायशब्दः ।

*कियदेतत् इति अभिप्रायोऽस्यामिति कियदेतिका, मयुरव्यंसकादित्वात् साधुः ।

**किर**-पुं-१२८७-भूंड.

द्र०आखनिकशब्दः ।

*किरति क्ष्मामिति किरः, "नाम्युपान्त्य-"।।५।१।५४।। इति कः ।

**किरण**-पुं-९५-सूर्य.

द्र०अंशुशब्दः ।

*किरति तमांसीति किरणः, "कगपकृपिवृषिभ्यः किंत्"-(उणा-१८८) इत्यणः ।

**किरण**-पुं-१००-किरण.

द्र०अंशुशब्दः ।

*किरति तमांसीति किरण, "कगपकृपिवृषिभ्यः किंत्-" (उणा-१८८) इत्यणः ।

**किरात**-पुं-४५३ (शे. १०५)-नाना शरीरवाळो.

□पृश्नि, अल्पतनु ।

*शेषश्चात्र-"किरातस्त्वल्पवर्ष्मणि" ।

**किरात**-पुं-९३४-भील.

□पुलिन्द, नाहल, निष्ट्य, शबर, वरुट, भट, माल, भिल्ल(म्लेच्छ) ।

*किरन्ति शरानिति किराताः, "कृवृकल्य-" (उणा-२०९) इत्यातक् ।

**किराती**-स्त्री-२०५ (शे. ५६)-पार्वती.

द्र०अद्रिजाशब्दः ।

**किरि**-पुं-१२८७-भूंड.

द्र०आखनिकशब्दः ।

*किरति क्ष्मामिति किरः, "नाम्युपान्त्य-" (उणा-६०९) इत्यादिना उणादिके किदिप्रत्यये किरिः ।

**किरिकिच्चिका** स्त्री-२९४ (शे. ८८) एक जातनुं वाजिंत्र.

**किरीट**-पुं-६५१-मुगट.

□मुकुट, मौलि, कोटीर, उष्णीष [मकुट शि ५२] ।

*कीर्यते इति किरीटम्, "तृकृकृषि-" (उणा १५१) इति किरीटः ।

**किरीटिन्**-पुं ७०९-अर्जुन.

द्र०अर्जुनशब्दः ।

*किरीटमस्त्यस्येति किरीटी ।

**किर्मीर**-पुं-१३९८-कावर चीतरो रंग.

द्र०कर्बुरशब्दः ।

*कीर्यते इति किर्मीरः, "जम्बीर-" (उणा-४२२) इतीरे निपात्यते ।

**किर्मीरनिषूदन**-पुं-७०८-भीम, भीमसेन.

□भीम, मरुत्पुत्र, वृकोदर, कीचकनिषूदन, बकनिषूदन, हिडिम्बनिषूदन ।

*किरतीति किर्मीरः, 'जम्बीराभीर-' (उणा-४२२) इतीरे निपात्यते. तेषां निषूदनः इति किर्मीर निषूदनः । यौगिकत्वात् किर्मीरारिरित्यादयोऽपि ।

**(किर्मीरारि)**-पुं-७०८-भीम, भीमसेन.

द्र० किर्मीरनिषूदनशब्दः ।

*किर्मीराणामरिरिति किमरारिः ।

**किल** -पुं-५५६ (शे.१०७)-क्रीडा रमत

द्र० कूर्दनशब्दः ।

**किलाटी**-स्त्री. पुं-४०५-दूधनो विकार, मावो.

□कूर्चिका, [कूचिका शि. २८] ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*किरति क्षुधमिति किलाटी, पुंस्त्रीलिङ्गः, "किरोलश्च वा" (उणा-१४७) इत्याटः ।

**किलास**-न.-४६७-ચામડીનો રોગ, કોઢ રોગ.

☐सिध्मन्, त्वक्पुष्प, सिध्म ।

*किलति श्वेतते इति किलासम्, "किलेःकित्" (उणा-५७५) इत्यासः ।

**किलासघ्न**-पुं-११९०-કંકોડી, તમાલ પત્ર.

☐कर्कोटक, तिक्तपत्र, सुगन्धक ।

*किलासं हन्तीति किलासघ्नः ।

**किलासिन्**-पुं-४६१-શ્વેત, કોઢના રોગવાળો.

☐सिध्मल ।

*किलासमस्त्यस्येति किलासी ।

**किलिकिञ्चित**-न.-५०७-સ્ત્રીઓના સ્વાભાવિક અલંકાર પૈકી એક અલંકાર.

*अलीकं किञ्चित् चित्तं किलीति कण्ठकूजितं वा निरुक्तात् किलिकिञ्चितं; सौभाग्यगर्वात् स्मितादीनां सङ्करः ।

**किलिञ्ज**-पुं-१०१७-સાદડી, ચટાઈ.

☐कट ।

*किल्यते क्षिप्यतेऽस्मिन् इति किलिञ्जः, उटजादौ निपात्यते ।

**किल्बिष**-न.-१३८१-અશુભ, પાપ, દુષ્કૃત્ય.

द्र० अंहसशब्दः ।

*कल्यते इति किल्बिषं, "कलेः किल्बचः" (उणा-५११) इतीषः ।

**'किशलय'**-न.-११२३-કૂંપળ

द्र० किसलशब्दः ।

**किशोर**-पुं-१२३३-નાની ઉંમરનો ઘોડો, વછેરો.

*कुश्यति वयसा, केशति हेषते वा किशोरः, "कोरुवोर-" (उणा-४३४) इत्योरे निपात्यते ।

**किसल**-न.-११२३-કૂંપળ, ઝીણા પાન.

☐किसलय, 'किशलय', पल्लव ।

*कसतीति किसलं, "मुरल"-(उणा-४७४) इत्यले निपातनात् किसलम्, किञ्चित् सलतीति वा, पृषोदरादित्वात् ।

**किसलय**-न.-११२३-કૂંપળ, ઝીણા પાન.

☐'किशलय', किसल, पल्लव ।

*कसतीति किसलयम्, "कसेरलादिरिच्चास्य-" (उणा-३६८) इत्ययः ।

**कीकट**-पुं-३५८-નિર્ધન, દીન.

द्र० अकिञ्चनशब्दः ।

*ककते इत कीकटः, "कपटकीकटादयः" (उणा-१४४) इति साधुः ।

**कीकट**-पुं(બ. વ.)-९६०-મગધ દેશ.

☐मगध ।

*ककन्ते इति कीकटाः, "कपटकीकटादयः" (उणा-१४४) इत्यटे निपात्यते ।

**कीकस**-न.-६२६-હાડકું

द्र० अस्थिशब्दः ।

*कीति कसति कीकसं, ककन्तेऽत्र श्वान इति वा "फनस-" (उणा-५७३) इत्यसे निपात्यते ।

**कीकस**-पुं-१२०२-નાના કરમિયા.

*कुत्सितं कसन्तीति कीकसाः, पृषोदरादित्वात् ।

**कीकसमुख**-पुं-१३१७ (शे.१८७-)પક્ષી.

द्र० अगौकसूशब्दः ।

**कीचक**-पुं-११५३-જે વાંસમાં પવન ભરવાથી શબ્દ થાય તે વાંસ.

*वाताद् हेतोः शब्दायमानः वंशः कचते बध्नाति शब्दं इति कीचकः, "कीचक"-(उणा-३३) इत्यके निपात्यते, कीति चकते वा, कीचेति कायति वा ।

**कीचकनिषूदन**-पुं-७०८-ભીમ, ભીમસેન.

द्र० किमीरनिषूदनशब्दः ।

*कच्यते बध्यते भीमेन इति कीचकः, "कीचकपेचक"-(उणा-३३) इत्यके निपात्यते । कीचकानां निषूदनः इति कीचकनिषूदनः ।

**कीटमणि**-पुं-१२१३ (शे. १७४)-ખદ્યોત, આગીયો, જીવડો.

द्र० खद्योतशब्दः ।

**कीन**-न.-६२३-માંસ



Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्र० आमिषशब्दः ।

*केनलयनेनेति कीनं, पृषोदरादित्वात् ।

**कीनाश**-पुं-१८४- યમ, યમરાજ.

द्र० अन्तकशब्दः ।

* कनति दीप्यते इति कीनाशः, "कनेरीश्चातः" (उणा-५३४) इत्याशः ।

**कीनाश**-पुं-१८७-રાક્ષસ.

द्र० असृक्पशब्दः ।

* कनति दीप्यते इति कीनाशः, कीनमामं मांसं अश्नातीति वा ।

**कीनाश**-पुं-३६८-કંજૂસ માણસ.

द्र०क्षुद्रकदर्यशब्दः ।

*कनति दीप्यते तृष्णया इति कीनाशः, "कनेरी-श्चातः" (उणा-५३४) इत्याशः ।

**कीर**-पुं-१३३५-પોપટ.

☐शुक, रक्ततुण्ड, फलादन, [ प्रियदर्शन, शे. १९५, श्रीमत्, मेधातिथि वाग्मिन् शे. १९६ मेधा-विन् शि. १२०] ।

*कायतीति कीरः, "घसिवशि-" (उणा-४१९) इति किदीरः, कीति शब्दमीरयति वा ।

**कीर्ण**-न १४७३-ખીચોખીચ, ભરપૂર.

द्र०आकीर्णशब्दः ।

*कीर्यते इति कीर्णम् ।

**कीर्ति**-२७३-યશ, કીર્તિ, વખાણ.

द्र०अभिख्याशब्दः ।

*कीर्त्यते इति कीर्तिः, "सातिहेतियूतिजूति-ज्ञप्तिकीर्ति-" ।।५।३।९४।। इति साधुः ।

**कील**-पुं-स्त्री.-१२७४-ગાય બાંધવાનો ખીલો.

☐पुष्पलक, शिव ।

*कीलयते रज्ज्वा बध्यतेऽस्मिन्निति कीलः, पुंस्त्रीलिङ्गः ।

**कीला**-स्त्री. पुं-११०२-અગ્નિની જવાળા.

☐हेति, शिखा, ज्वाला, अर्चिष् ।

*कीलतीति कीला, पुंस्त्रीलिङ्गः ।

**कीलाल**-न.-१०३९-ધોળું પાણી.

द्र० अप्शब्दः ।

*कील्यते बध्यते सेतुभिरिति कीलालम्, "ऋकृमृ" (उणा-४७५) इति आलः, कीला ज्वाला अलति वारयति वा ।

**कीलाल**-न.-६२२ (शे.१२८)-લોહી

द्र० असृग्शब्दः ।

**कीलित**-पुं.-४३८-બંધાયેલો કેદી.

☐बद्ध, निगडित, नद्ध, यन्त्रित, सित, संदा-नित, संयत ।

*कील्यते स्मेति कीलितः ।

**कीश**-पुं.-१२९१-વાંદરો

द्र० कपिशब्दः ।

*चिकेति जानातीति कीशः, "तिनिश-" (उणा-५३७) इतीशे निपात्यते, किति शब्दमिष्टे वा ।

**कु**-स्त्री-९३६-પૃથ્વી

द्र० अचलाशब्दः ।

*****कायति भूपमिति कुः, "पृकाहृषि"- (उणा-७२९) इति किदुः ।

**कुकर**-पुं-४५३-ठूंठो, હાથની ખોડવાળો માણસ.

☐कुणि ।

*कुत्सितः करो बाहुरस्य पाणिवैकल्यात् कुकरः ।

**कुकुद**-न.-१२६४-(शि. ११२) બળદના બે ખભા ઉપરનો ટેકરો

द्र० अंशकूटशब्दः ।

**कुकुन्दर** (द्वि. व.)-न.-६०८-નિતમ્બ, કુલામાં રહેલા બે ગોળાકાર ખાડા.

☐कुकुन्दुर [कटीकूप, उच्चिलिङ्ग, रतावुक शे. १२७]।

*कुत्सितं कुन्देते आप्लवेते इति कुकुन्दरे, क्लीबलिङ्गोऽयम् "जठर-" (उणा-४०३) इत्यरे निपात्यते ।

**भागुरिस्तु**—

"कुकुन्दरौ समाचष्टे, जनो जघनकूपकौ" ।

इति पुंस्याह ।

"श्वसुरकुकुन्दुर-" (उणा-४२६) इत्युरे कुकुन्दु-रोऽपि । **शेषश्चात्र**—

"कटीकूपौ तूच्चलिङ्गौ रतावुके" ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**(कुकुन्दर)** –न.–६०८–નિતમ્બ.

द्र० कुकुन्दरशब्दः ।

**'कुकुर'**–પુ.–१२७९–કુતરો.

द्र० अस्थिभुज्शब्दः ।

**कुकूल**–પું–ન.–११०१–ફોતરાનો અગ્નિ.

☐तुषानल ।

* कूयते इति कुकूलः पुंक्लीबलिङ्गः, "दुकूल-कुकूल–" (उणा ४९२) इति साधुः ।

**कुक्कुट**–પું–ન.१३२४–કુકડો.

☐निशावेदिन्, चरणायुध, कृकवाकु, ताम्रचुड, विवृताक्ष, शिखण्डिक, [दीर्घनाद, चर्मचूड, नखायुध, शे.१९१, मयुरचटक, शौण्ड, रणेच्छु, कलाधिक, आरणिन्, विष्किर, बोधि, नन्दीक, पुष्टिवर्धन शे. १९२, चित्रवाज, महायोगिन्, स्वस्तिक, मणिकण्टक, उपाकील, विशोक शे. १९३] ।

*कोकते गृह्णाति क्षुद्रजन्तूनिति कुक्कुटः, पुंक्लीबलिङ्गः, "नकुटकुक्कुट–" (उणा-१५५) इत्युटे निपात्यते । कुगित्युच्चारणेन कुटतीति वा ।

**शेषश्चात्र**

"कुक्कुटे तु दीर्घनादश्चर्मचूडो नखायुधः । मयूरचटकः शौण्डो, रणेच्छुश्च कलाधिकः ॥ आरणी विष्किरो बोधिर्नन्दीकः पुष्टिवर्धनः चित्रवाजा महायोगी, स्वस्तिको मणिकण्टकः ॥ उपाकीलो विशोलश्च ग्राजस्तु ग्रामकुक्कुटः ॥" इति॥

**कुक्कुटाभ**–પું–१३०६–વર્ણ અને અવાજમાં કુકડા જેવો સર્પ.

☐कुक्कुटाहि ।

**कुक्कुटाहि**–પું–१३०६–વર્ણ અને અવાજમાં કુકડા જેવો સર્પ

☐कुक्कुटाभ ।

*कुक्कुटावयवयोगात् कुक्कुटः, अवयवयोगादहिः, कुक्कुटश्चासावहिश्च कुक्कुटाहिः ।

**कुक्कुटि**–સ્ત્રી–३७८–દંભ પૂર્વક ચાલવું તે.

☐कुहना, दम्भचर्या ।

*कुक्कुट इवाचरति कुक्कुटयति, दम्भेन निभृतं चरति, कुक्कुटनं कुक्कुटिः, "स्वरेभ्य इः" (उणा–६०६)

**कुक्कुभ**–પું–१३४२–જંગલી કુકડો.

☐कुम्भकारकुक्कुट, कुहकस्वन ।

*कोकते इति कुक्कुभः, "कुकेः कोऽन्तश्च" (उणा ३३४) इत्युभः, कुकुशब्देन भातीति वा ।

**कुक्कुर**–પું–१२७८–કૂતરો.

द्र० अस्थिभुज्शब्दः ।

*कोकतेऽस्थ्यादिकमादत्ते इति कुक्कुरः । "श्वशुर–" (उणा–४२६) इत्युरे निपात्यते, कुकिति कुरति शब्दायते वा ।

**कुक्षि**–પું–६०४–પેટ.

द्र० उदरशब्दः ।

*कुष्णात्याहारं "पुषिप्लुषि–" (उणा–७०७) इति किति सौ कुक्षिः पुंलिङ्गः ।

**गौडस्तु**–

"उदरं कुक्षिरक्लीबे" इति स्त्रियामप्याह ।

**वाचस्पतिस्तु**—

"कुक्षिस्तु जठराधारे" इति जठरात् पृथगाह ।

**कुक्षिम्भरि**–પું–४२७–પેટભરો.

☐स्वोदरपूरक, आत्मम्भरि उदरम्भरि ।

*कुक्षिं बिभर्तीति कुक्षिम्भरिः, "कुक्ष्यात्मोदरात् भृगः खिः" ॥५।१।९०॥ इति खिः ।

**कुङ्कुम**–ન.–६४५–કેસર.

द्र० कश्मीरजन्मनशब्दः ।

* कुक्यते इति कुङ्कुमं, क्लीबलिङ्गोयम् ।

**वाचस्पतिस्तु**—

"निदाघेऽपि कुङ्कुमः सुखः स्यात्" इति पुंस्याह । कुन्दुमलिन्दुम–" (उणा–३५२) इति निपात्यते ।

**"कुङ्कुम**–પું–६३९–ચતુઃસમ પૈકીની એક વસ્તુ.

**कुच**–પું–(દ્વિ. વ.)–६०३–સ્તન.

द्र० उरोजशब्दः ।

*कुचतः संकुचतः इति कुचौ ।

**कुचन्दन**–ન.–६४२–રક્તચંદન.

☐पत्राङ्ग (पत्राङ्क), रक्तचन्दन, ताम्रसार, रञ्जन, तिलपर्णिका, (तिलपर्णी) ।

*कौ चन्दनमिति कुचन्दनम् ।

**कुचर**–પું–३४८–ખરાબ બોલનાર.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

☐कुवाद, [कुटिलाशय शि. २२] ।

*कुत्सितं चरतीति कुचरः, कुचरः कुटिलाशय इति कश्चित् ।

**कुज**–पुं–११६–મંગળ ગ્રહ.

द्र० अङ्गारकशब्दः ।

*कौ पृथिव्यां जातः इति कुजः, यौगिकत्वाद्भौमो, माहेयो, धरणीसुत इत्यादयः ।

**शेषश्चात्र**–

'भौमे व्योमोल्मुकैकाङ्गौ ।"

**(कुज)** –पुं–१११४–વૃક્ષ.

द्र० अंह्रिपशब्दः ।

**कुञ्चिका** स्त्री–१००५–ચાવી, કુંચી.

☐कूचिका, साधारणी, अह्लकुट ।

*कुञ्च्यतेऽनया इति कुञ्चिका, "नाम्निपुं सिच" ॥५।३।१२१॥ इति णकः ।

**कुञ्चित**–न.–१४५६–વાંકુ.

द्र० अरालशब्दः ।

*कुञ्च्यते स्मेति कुञ्चितम् ।

**कुञ्ज**–पुं–न.–१११५–લતાગૃહ.

☐निकुञ्ज, कुडङ्ग ।

*कवन्तेऽस्मिन् इति कुञ्जः, "कुबः कुब्–कुनौ च" (उणा–१२९) इति जः, पुंक्लीबलिङ्गोयम् ।

**कुञ्जर**–पुं–न.–१२१७–હાથી

द्र० अनेकपशब्दः ।

*कुजतीति कुञ्जरः, पुंक्लीबलिङ्गः, "जठर–" (उणा–४०३) इत्यरे निपात्यते, कुञ्जौ हनू दन्तौ वा अस्य स्त इति वा मध्वादित्वाद् रः, कौ जीर्यतीति वा, पृषोदरादित्वात् ।

**शेषश्चात्र**—

"अथ कुञ्जरे ॥
पेचकी पुष्करी पद्मी, पेचिलः सूचिकाधरः । विलोमजिह्वोऽन्तःस्वेदो,, महाकायो महामदः ॥ सूर्यकर्णो जलाकाङ्क्षो, जटी च षष्टिहायनः । असुरो दीर्घपवनः, शुण्डालः कपिरित्यपि ॥"

**कुञ्जर**–पुं–१४४०–આ શબ્દ ઉત્તરપદમાં જોડવાથી પ્રશંસા વાચક શબ્દ બને છે. દા. ત. નૃપકુંજર.

द्र० ऋषभशब्दः ।

*अश्वश्चासौ कुञ्जरश्च अश्वकुञ्जरः, "वृन्दारकनागकुञ्जरैः" ॥३।१।१०८॥ इति समासः ।

**कुञ्जराराति**–पुं–१२८६–અષ્ટાપદ સરભ.

द्र० अष्टपादशब्दः ।

*कुञ्जराणामरातिरिति कुञ्जराराति: ।

**कुञ्जराशन**–पुं–११३१–પીપળો.

द्र० अश्वत्थशब्दः ।

*कुञ्जरैरश्यते इति कुञ्जराशनः ।

**कुञ्जल**–न.–४१५–કાંજી, રાબ.

द्र० अवन्तिसोमशब्दः ।

*कुञ्जं लातीति कुञ्जलं, कुत्सितं जलमस्य वा, पृषोदरादित्वात् ।

**कुट**–पुं–स्त्री–९९०–ઘર.

द्र० अगारशब्दः ।

*कुट्यतेऽस्मिन्निति कुटः, स्त्रीपुंसलिङ्गः ।

**कुट**–पुं–न. १०१९ ઘડો, કળશ

द्र० करीरशब्दः ।

* कुटतीति कुटः, पुंक्लीबलिङ्गः ।

'**कुट**'–पुं–१११४–વૃક્ષ.

द्र० अंह्रिपशब्दः ।

**कुटक**–न.–८९१–હડ રહિત હળ.

☐निरीष, 'निरीश, कूटक' ।

*कुटतीति कुटकं, यस्याऽग्रे फालो बध्यते ।

**कुटक** (.–पुं–१०२३ (शि. ९०)–રવૈયો, બાંધવાનો ખીલો, થાંભલો.

द्र० कुटरशब्दः ।

**कुटज**–पुं–११३७–ઈન્દ્રજવનું ઝાડ.

☐गिरिमल्लिका, 'शक्र, वत्सक' ।

*कुटतीति कुटजः, "कुटेरजः" (उणा–१३०) कुटादित्वाद् गुणाभावः, कुटतो जायते वा ।

**कुटर**–पुं–१०२३–રવૈયો, બાંધવાનો ખીલો, થાંભલો

☐विष्कम्भ, मञ्जीर, 'कुठर', (दण्डकटक, दण्डकरोहक, मन्दीर), [कुटक शि ९०]

*कुटतीति कुटरः, "ऋच्छिचटि–" (उणा–३९७) इत्यरः, कुटादित्वाद् गुणाऽभावः कुटकोऽपि ।

**कुटहारिका**–स्त्री–५३४–દાસી.

☐पोटा, वोटा, चेटी, दासी, [गणेरुका, बडवा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कुम्भदासी शे. ११४] ।

*कुटं घटं हरतीति कुटहारिका ।

**कुटिल**-न.-१४५६ વાંકું.

द्र०अरालशब्दः ।

*कुटतीति कुटिलम्, "मूल्यनि--" (उणा-४८१) इतीलः, कुटादित्वाद् गुणाभावः ।

**(कुटिलकेश)** -पुं-५६९-વાંકડીયા વાળ.

द्र०अलकशब्दः ।

**कुटिलाशय**-पुं-३४८(शि २२) ખરાબ બોલનાર.

☐कुवाद, कुचर ।

**कुटुम्बव्यापृत**-पुं-४७८-કુટુંબ પોષણ કરવામાં ઉદ્યત.

☐उपाधि, अभ्यागारिक ।

*कुटुम्बे कलत्रादौ व्यापृतः, पोषणोद्युक्तः इति कुटुम्बव्यापृतः ।

**कुटुम्बिन्**-पुं-८९०-ખેડૂત.

द्र०कर्षकशब्दः ।

* कुटुम्बमस्त्यस्येति कुटुम्बी ।

**कुटुम्बिनी**-स्त्री-५१३-કુટુંબવાળી સ્ત્રી.

☐पुरन्ध्री ।

*कुटुम्बं पुत्रभृत्याद्यस्ति अस्याः इति कुटुम्बिनी ।

**(कुटुम्बिनी)**-स्त्री १४२१-કુટુંબનો સમુહ.

*कुटुम्बानां समूहः, "खलादिभ्यो लिन्" ॥६।२।२७॥ इति कुटुम्बिनी ।

**कुट्टनी**-स्त्री-५३३-દલાલ સ્ત્રી, પરપુરૂષનો સંયોગ કરાવનારી સ્ત્રી.

☐चुन्दी, शम्भली ।

*कुट्टयतीति कुट्टनी "रम्यादिभ्यः कर्तरि" ॥६।३।१२६॥ इत्यनट् ।

**कुट्टन्ती**-स्त्री-७८४(शे १४८)લાંબી છરી, છરો

द्र०पत्रपालशब्दः ।

**कुट्टार** -पुं-१०२७ (शे. १५८)-પર્વત

द्र०अचलशब्दः ।

**कुट्टिम**-न पुं-९९२-ઘરની પથ્થર વગેરેથી બાંધેલી ભૂમિ.

*कुट्टयते इति कुट्टिमः, पुंक्लीबलिङ्गः, "कुट्टि-वेष्टि-" (उणा-३४९) इतीमः ।

**कुट्टमित**-न.-५०८-સ્ત્રીઓના સ્વાભાવિક અલંકારો

द्र०किलिकिञ्चितशब्दः ।

*"कुट्टण् कुत्सनादौ," कुट्टेन मितं लक्ष्यादुत्वे कुट्टुमितमधरादिग्रहणाद् दुःखेऽपि हर्षः ।

**कुठ**-पुं-१११४-વૃક્ષ, ઝાડ.

द्र०अंह्रिपशब्दः ।

*"कुठिः सौत्रः" कोठतीति कुठः, "नाम्युपान्त्य-" ॥५।१।५४॥ इति कः ।

'**कुठर**'-पुं १०२३-રવૈયા બાંધવાનો ખીલો.

द्र० कुटरशब्दः ।

**कुठार**-पुं स्त्री-७८६-પરશુ, કુહાડો.

☐परशु, पशुं, पर्श्वध, परश्वध, स्वधिति ।

*"कुठिः सौत्रः", कोठतीति कुठारः, पुंस्त्रीलिङ्गः, "तुषिकुठिभ्यां कित्-" (उणा-४०८) इत्यारः, कुठान् वृक्षान् इयर्तीति वा ।

**कुडङ्ग** पुं-१११५-લતાગૃહ.

☐निकुञ्ज ।

*कुडतीति कुडङ्गः, "पतितमि"- (उणा-९८) इत्यङ्गः, कुटादित्वाद् गुणाभावः ।

**(कुडव)** -पुं-८८६-બે પસલી પ્રમાણ અર્ઘ.

*कुड्यते लक्ष्यते इति कुडवः ।

**कुड्मल**-न-पुं-११२६-અર્ધ ખીલેલી પુષ્પની કળી.

☐मुकुल ।

*कुटतीति कुड्मलं "रुचिकुटि-" (उणा-५०२) इति मलक् पुंक्लीबलिङ्गोऽयम् ।

**कुड्य**-न.-१००३-ભીંત.

☐भित्ति ।

*कोलति सस्त्यायतीति कुड्यम्, 'कुलेर्ड्चवा" (उणा-३६२) इति किद् यः, कुट्यां साध्विति वा पृषोदरादित्वाद् डत्वम्, क्लीबलिङ्गोऽयम् । **वाचस्पतिस्तु**-"कुड्यमस्त्रियाम्" इति पुंस्यप्याह ।

**कुड्यमत्स्य**-पु-१२९८-ગરોળી.

☐मुसली, गृहगोधिका, गृहगोलिका, माणिक्या, भित्तिका, पल्ली, गृहोलिका ।

*कुड्ये मत्स्य इव इति कुड्यमत्स्यः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**कुणप**–न.–पुं–५६४–મડદું કલેવર.

□शव, मृतक ।

*कुणति शब्दायते इति कुणपं, "भुजिकुति–" (उणा–३०५) इति किदपः, कुणं शब्दं पाति रक्षति वा, धनञ्जयाख्यस्य वायोः संभवात्, पुंक्लीबलिङ्गोऽयम् ।

**कुणि**–पुं–४५३–ठूंठो, હાથની ખોડવાળો.

□कुकर ।

*कुण्यते निन्द्यते इति कुणिः "नाम्युपान्त्य–" (उणा–६०९) इति किदिः । कोतीति वा "ऋच्छ–" (उणा–६३५) इति कित् णिः, कुत्सितः पाणिरस्येति नैरुक्ताः ।

**कुण्ठ**–पुं–३५३– ક્રિયામાં આળસુ.

*कुण्ठतीति कुण्ठः, कुणति शब्दायते न तु करोतीति वा "पीविशिकुणिपृषभ्यिः कित्" (उणा–१६३) इति ठः ।

**कुण्ड**–पुं–५५०–પતિ જીવતા છતાં જારથી ઉત્પન્ન પુત્र.

*कुण्ड्यते दह्यतेऽनेन कलमिति कुण्डः, अमृते जीवति भर्तरि जाराज्जातः । यत् **स्मृतिः**–"परनार्यां प्रजायेते, द्वौ सुतौ कुण्डगोलकौ । पत्यौ जीवति कुण्डश्च, मृते भर्तरि गोलकः ॥" इति ।

**कुण्ड**–न पुं स्त्री–१०१९–થાળી. તપેલી.

द्र०उखाशब्दः ।

*कुणति उपकरोतीति कुण्डम्, "कुगुहु–" (उणा–१७०) इति डः, त्रिलिङ्गोऽयम् ।

**कुण्डगोलक**–न.–४१६–કાંજી, રાબ.

द्र० अवन्तिसोमशब्दः ।

*कुण्डं गुडति रक्षति, लत्वे कुण्डगोलकम् ।

**कुण्डल**–न. पुं–६५६–કુંડલ.

द्र० कर्णवेष्टकशब्दः ।

*कुण्डते दहत्यलक्ष्मीमिति कुण्डलं, पुंक्लीबलिङ्गः, "मृदिकन्दि–" (उणा–४६५) इत्यलः ।

**शेषश्चात्र**–'अथ कुण्डले कर्णादर्शः" ।

**कुण्डलिन**–पुं.–१३०३–સર્પ; નાગ.

द्र० अहिशब्दः ।

*कुण्डलाकारताऽस्त्यस्येति कुण्डली ।

**कुण्डा** –स्त्री–२०५ (शे. ५७)–પાર્વતી.

द्र० अद्रिजाशब्दः ।

**कुण्डका**–स्त्री–८१६–કમણ્ડલુ.

□कमण्डलु ।

*कुण्डते इति कुण्डी, "भाजगोण–" ॥२।४।३०॥ इति ङीः, के कुण्डिका ।

**कुण्डिन**–पुं.–१२३३ (शे. १७८)–ઘોડો

द्र० अर्वन्शब्दः ।

**कुण्डिन**–न.–९७९ કુંડિનપુર, વિદર્ભ દેશની રાજધાની

□विदर्भा, [कुण्डिनपुर, कुण्डिनापुर शे० ५] ।

*कुड्यते पापमत्रेतिकुण्डिनम्, "शाकठि–" (उणा–२८२)इतीनः, कुण्डिनपुरम्, कुण्डिनापुरमित्यपि ।

**कुण्डिनपुर** –न. ९७९–(शि ८५)–કુંડિનપુર.

द्र०कुण्डिनशब्दः ।

**कुण्डिनापुर**–न. ९७९–(शि ८५)–કુંડિનપુર.

द्र० कुण्डिनशब्दः ।

**कुतप**–पुं न.–१४१–દિવસનો આઠમો ભાગ.

□श्राद्धकाल ।

*"कुतिः सौत्रः", कोतन्ति गच्छन्ति प्रीतिं पितरोऽस्मिन् इति कुतपः, पुंक्लीबलिङ्गः, "भुजकुति–" (उणा–३०५) इत्यादिना अपः कित्, कुं तपति सूर्योऽत्रेति वा । यो दिनस्याष्टमो भागः स कुतप इत्यर्थ । यत् **स्मृति**–"दिवसस्याष्टमे भागे, मन्दीभवति भास्करे । स कालः कुतपो यत्र, पितॄणां दत्त मक्षयम्" ॥

**कुतप**–पुं.–५४३–ભાણેજ.

□स्वस्रीय, भागिनेय, जामेय ।

*"कुत. सौत्रः", कोतति इति कुतपः "भुजिकुति–" (उणा–३०५) इति किदपः ।

**कुतापक**–पुं–१०३–માઠર સૂર્યના પારિપાર્શ્વિક દેવ.

**कुतुक**–न,–९२६–કૌતુક, તમાશો.

□कौतूहल, कौतुक, कुतूहल, [विनोद शि. ८१] ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*कुभूमिस्तुद्यतेऽनेन, कुत्सितं तन्यते वा इति कुतुकम्, "निष्कुतु"-(उणा-२६) इति निपात्यते ।
**कुतुप**-पुं न.-१०२५ घी तेल वगेरे भरवानुं नानुं चर्म पात्र.
*ह्रस्वा कुतूः कुतुपः, पुंक्लीबलिङ्गः, "कुत्वाड्डुपः" ॥७।३।४९॥ इति ।
**कुतू**-स्त्री-१०२५-घी तेल वगेरे भरवानुं चर्म पात्र.
*कुत्सितं तन्यते इति कुतूः, स्त्रीलिङ्गः, "भ्रमि-गमि"-(उणा-८४३) इति डिदुः ।
**कुतूहल**-न.-९२६-कौतुक, तमासो.
द्र० कुतुकशब्दः ।
*कुत्सितं तोहतीति कुतूहलम्, "मुरलोरल-" (उणा-४७४) इत्यले निपात्यते, विनोदोऽपि ।
**कुत्सा**-स्त्री-२७२-निंदा.
द्र० अपवादशब्दः ।
*कुत्सनमिति कुत्सा ।
**कुत्सित**-न.-१४४२-अधम.
द्र० अणकशब्दः ।
*कुत्स्यते इति कुत्सितम् ।
**कुथ**-पुं स्त्री. न.-६८०-हलकुं हाथी के रथ उपर नाखवानुं वस्त्र, झूल.
☐वर्ण, परिस्तोम, प्रवेणी, नवत, आस्तर, [वर्णपरिस्तोम शि. ५५, आस्तरण शि. ५६.] ।
*कुथ्यते क्लिश्यते इति कुथः, त्रिलिङ्गः, स्था-दित्वात्कः, क्रियते कीर्यते वा "पथयूथ"-(उणा-२३१) इति थे निपात्यते ।
**कुथ**-पुं-११९२-दर्भ, डाभ.
☐दर्भ, कुश, बर्हिष्, पवित्र ।
*कुथ्नातीति कुथः ।
**कुद्दाल**-पुं ८९२-कोदाळी.
☐गोदारण ।
*कुर्दल्यतेऽनेनेति कुद्दालः, पृषोदरादित्वात्, पुंस्ययम्, **वैजयन्ती** तु-"गौदारणम् कुद्दालम्" इति क्लीबमाह ।
**(कुध्र)**-पुं-१०२७-पर्वत.
द्र० अचलशब्दः ।
**कुनटी**-स्त्री-१०६०-मणसील धातु.
द्र० करवीराशब्दः
*कौ नटतीति कुनटी ।
**कुनाभि**-पुं-१९२-भंडार, निधान.
☐निधान, शेवधि, निधि ।
*कोः पृथिव्या नाभिरिव कुनाभिः, पुंसि ।
**कुनालिक**-पुं.-१३२१ (शे. १९१)-कोयल.
द्र० कलकण्ठशब्दः ।
**कुन्त**-पुं-७८५-भालो.
☐प्रास ।
*कुणतीति कुन्तः ।
**कुन्तल**-पुं. (ब. व.)-५६७-केश, वाळ.
द्र० कचशब्दः ।
*कुनन्ति दीप्यन्ते इति कुन्तलाः "मुरलोरल-" (उणा-४७४) इत्यले निपात्यते, कुन्ताकारं लान्ति वा ।
**कुन्तल**-पुं.-(ब. व.)९६१-कुन्तल देश.
☐उपहालक ।
*कनन्तीति कुन्तलाः, "मुरलो-" (उणा-४७४) इत्यले निपात्यते ।
**कुन्थु**-पुं.-२८-१७ मा तीर्थंकरनु नाम.
* कुपृथ्वीतस्यां स्थितवानिति कुन्थुः पृषोद-रादित्वात्, तथा गर्भस्थे भगवति जननी रत्नानां कुन्थुराशिं दृष्टवतीति कुन्थुः ।
**कुन्थु**-पुं-६९३-छठ्ठा चक्रवर्ती.
**कुन्द**-पुं.-१९३-सातमो निधि.
*कुन्दवर्णत्वात् कुन्दः ।
**कुन्द**-न.-पुं-९०९-फारको, भूमियंत्र.
☐भ्रम, यन्त्रक ।
*कवते शब्दायते इति कुन्दं, पुंक्लीबलिङ्गः, "वृतृकुसुभ्यो नोऽन्तश्च" (उणा-२४०) इति दः ।
**कुन्द्रा**-स्त्री २०५ (शे. १०)-पार्वती.
द्र० अद्रिजाशब्दः ।
**'कुन्दुरुकी'**-स्त्री-११५२-शल्लकी
द्र० गजप्रियाशब्दः ।
**कुपूय**-न-१४४३-अधम, हलकुं.
द्र० अणकशब्दः ।
**कुप्य**-न.-१०४६-सोना-रूपा सिवायनी धातु
*गोपाय्यते तदिति म्कुप्यं, हेमरूप्याभ्यामन्यत्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ताम्रादि, "कुप्यभिद्य–" ॥५।१।३९॥ इति क्यपि निपात्यते ।

**कुप्यशाला**–स्त्री-९९६–ठंकशाळ, वासण बनावववानुं स्थान.

□सन्धानी ।

*कुप्यं ताम्रादि तस्य शाला इति कुप्यशाला ।

**कुबेर**–पुं–४२–श्री मल्लिनाथ भग. ना शासन देव.

*कुत्सितं बेरं शरीरमस्येति कुबेरः ।

**कुबेर**–पुं.–१६९–उत्तर दिशानो स्वामी.

**कुबेर**–पुं–१८९–कुबेर देव.

द्र० इच्छावसुशब्दः ।

*कुत्सितं बेरं शरीरमस्य कुष्ठित्वात् ; कुबेरः कुयत इति वा "कुगुपतिकथि–" (उणा–४३१) इति केरः ।

**'कुबेराक्षी'**–स्त्री–११४४–कायफी.

द्र० पाटलाशब्दः ।

**कुब्ज**–पुं–४५३–कुंप डो.

□कुगड्ल, [न्युब्ज शि. ३२] ।

*कूयते इति कुब्जो वक्रनताङ्गः, "कुवः कुब्नौ च उणा–१२९) इति जक् । कुत्सितः उब्ज इति वा, पृषोदरादित्वात्, न्युब्जोऽपि ।

**कुब्ज**–न.–१४२९–ठुंठुं, नीचुं.

□न्यञ्च, नीच, ह्रस्व, मन्थर, खर्व, वामन ।

*कुयते इति कुब्जम, "कुव कुब्नौ च" (उणा-१२९) इति साधुः ।

**कुमार**–पुं–४२–बारमां तीर्थंकरनो उपासक यक्ष.

*कुमारयति क्रीडयतीति कुमारः ।

**कुमार**–पुं–२०९–कार्तिकेय शंकरनो पुत्र.

द्र० अग्निभूशब्दः ।

*कुकामयते ब्रह्म इति कुमारः ' कमेरत उच्च' (उणा–४९९) इत्यारः ।

*कुत्सितो ब्रह्मचारित्वाद् मारः स्मरोऽस्येति वा ।

**कुमार**–पुं–३३२–युवराज, कुमार.

□युवराज, भर्तृदारक ।

*कुमारयति क्रीडयतीति कुमारः ।

**(कुमार)**–पुं–३३८–बाळक, धावणुं बाळक.

द्र० अर्भशब्दः ।

*कामयते यदपि तदपि द्रष्टमिति कुमारः, "कमरतउच्च–" (उणा–४९९) इत्यारः कुमारयति क्रीडयति वा, कुत्सितो मारोऽस्येति वा ।

**कुमारक**पुं.–३३८–बाळक, धावणुं बाळक.

द्र० अर्भशब्दः ।

*कामयते यदपि तदपि द्रष्टमिति कुमारः "कमेरत उच्च–" (उणा–४९९) इत्यार, कुमारयति क्रीडयति वा, कुत्सितो मारोऽस्येति वा, स्वार्थे के कुमारकः ।

**कुमारपाल**–पुं–७१२–कुमारपाळ राजा.

□चौलुक्य, राजर्षि, परमार्हत, मृतस्वमोक्तृ, धर्मात्मन्, मारिव्यसनमारक ।

*कुमारान् शिशूनिव प्रजाः पालयतीति कुमारपालः, मयूरव्यंसकादित्वात् समासे साधु; कु पृथ्वीं मां लक्ष्मीं च अरमत्यर्थं पालयति व कुमारपालः ।

**(कुमारपालदेव)** –पुं.–३३६–पूज्यएवा कुमारपाळ राजा

**कुमारसू**–स्त्री–१०८१–गंगा नदी.

द्र० ऋषिकुल्याशब्दः ।

*कुमारं सूते इति कुमारसूः, स्त्रीलिङ्गोऽयम् ।

**कुमारी**–स्त्री–२०३–पार्वती.

द्र० अद्रिजाशब्दः ।

*कुमारी अवस्थाभेदात् ।

**कुमारी**–स्त्री–५१०–कुमारी, नव के दश वर्षनी कन्या.

□कन्या, कनी ।

*कुमारयति क्रीडयतीति कुमारी, कुत्सितो मारोऽस्या वाऽनूढत्वात् ।

**कुमालक**–पुं–९६०–सौवीर देश.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

□सौवीर ।

*कुं पृथ्वीं मलन्ते इति कुमालकाः ।

**कुमुख**-पुं.-१२८८ (शे १८५)-भूंड.

द्र० आखनिकशब्दः ।

**कुमुद्** न.-११६४ (शि. १०१)-चंद्र विकासी धोळुं कमळ.

द्र० कुमुदशब्दः ।

**कुमुद**-पुं.-१७०-चोथा दिग्गज.

*कुमुदवर्णत्वात् कुमुदः ।

**कुमुद**-न.-पुं ११६४-धोळुं कमळ.

□कैरव, गर्दभाह्वय [कुमुद् शि. १०१] ।

*काम्यते इति कुमुदं पुंक्लीबलिङ्गः, "कुमुद"-(उणा-२४४) इत्युदे निपात्यते, कौ मोदत इति वा, कुमुदपि ।

**कुमुद्बान्धव**-पुं-१०४-चन्द्रमा.

द्र० अत्रिदृग्जशब्दः ।

*कुमुदानां बान्धवः कुमुदबान्धवः, यौगिकत्वात् कैरवबन्धुरित्यादयः, सुहृदपि बन्धुप्रायत्वाद्बन्धुरेवेति कुमुदसुहृदित्यादयोऽपि ।

(**कुमुदसुहृद्**) -पुं-१०४-चंद्रमा.

द्र० अत्रिदृग्जशब्दः ।

**कुमुदावास**-पुं.-९५४-कुमुद-पोयणा वाळो देश.

□कुमुद्वत् ।

*कुमुदानां आवासः कुमुदावासः ।

(**कुमुदाह्वय**) -न.-१०४३-चांदी.

द्र० कलधौतशब्दः ।

*कुमुदस्याभिख्या यस्य तत्तथा कुमुदाह्वयम् ।

**कुमुदिनी**-स्त्री-११६३ (शि. १०५)-कुमुदनो वेलो.

□कैरविणी, कुमुद्वती ।

**कुमुदिनीपति**-पुं.-१०४-चंद्रमा.

द्र० अत्रिदृग्जशब्दः ।

*कुमुदिन्या पतिः कुमुदिनीपतिः, यौगिकत्वात् कुमुद्वतीशः ।

**कुमुद्वत्**-पुं.-९५४-पोयणा वाळो देश.

□कुमुदावास ।

*कुमुदानि सन्त्यत्र, कुमुदानां निवास इति वा कुमुद्वान् । "नडकुमुद-" ॥६।२।७४॥ इति चातुरर्थिको डिद् मतुप्रत्ययः ।

**कुमुद्वती**-स्त्री-११६३-कुमुदनो वेलो.

□कैरविणी, [कुमुदिनी शि. १०५] ।

*कुमुदानि सन्त्यस्यामिति कुमुद्वती "नडकुमुद"-॥६।२।७४॥ इति डिद् मतुः, व्यञ्जनान्ताद्वा "तदस्य"-॥७।२।१॥ इति मतुः, कुमुदिन्यपि ।

(**कुमुद्वतीश**)-पुं.-१०४-चंद्रमा.

द्र० अत्रिदृग्जशब्दः ।

*कुमुद्वतीनामीशः कुमुद्वतीशः ।

**कुमोदक**-पुं.-२१६-विष्णु, नारायण.

द्र० अच्युतशब्दः ।

*कुं पृथ्वीं मोदयतीति कुमोदकः ।

**कुम्बा**-स्त्री-८२४-यज्ञने फरती करेली अतिगहन वाड.

*कुम्ब्यते आच्छाद्यतेऽनया इति कुम्बा, 'भिषि-भूषि-" ॥५।३।१०९॥ इति अङ् ।

**कुम्भ** -पुं-३८-श्री मल्लिनाथ भगवानना पितानुं नाम

*गुणपयसामाधारभूतत्वात् कुम्भ इव कुम्भः ।

**कुम्भ**-पुं-स्त्री-१०१९-घडो.

द्र०करीरशब्दः ।

*कायत्यम्भसा भ्रियमाणः कुम्भः पुंस्त्रीलिङ्गः "काकुसिभ्यां-" (उणा-३३७) इति कुम्भः, कैरुम्भ्यते वा पृषोदरादित्वात् ।

**कुम्भ**(द्वि. व.)पुं-१२२६-हाथीना लमणानो भाग.

*कुम्भाकृती मांसपिण्डौ कुम्भौ ।

(**कुम्भ**) -पुं-११६-११ मी राशि..

**कुम्भकार**-पुं-९२६-कुंभार.

□कुलाल, दण्डभृत्, चक्रजीवक ।

* कुम्भं करोतीति कुम्भकारः ।

**कुम्भकारकुक्कुट**-पुं-१३४२-रानी कुकडो.

□कुक्कुभ, कुहकस्वन ।

*कुम्भेति शब्दं करोतीति कुम्भकारः, स कुक्कुटइव कुम्भकारकुक्कुटः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**कुम्भदासी**-स्त्री-५३४ (शे. ११४)-દાસી.
द्र०कुटहारिकाशब्दः ।
**कुम्भशाला**-स्त्री-९९९-કુંભારનો નિભાડો.
□पाकपुटी, (कुम्भशाल) ।
*कुम्भानां घटनाय शाला इति कुम्भशाला ।
**कुम्भिन**-पुं-१२१७-હાથી.
द्र०अनेकपशब्दः ।
*कुम्भावस्य स्तः इति कुम्भी ।
**कुम्भिन्**-पुं-१३४९-મગરમચ્છ.
द्र०आलास्यशब्दः ।
*कुम्भाकारताऽस्त्यस्येति कुम्भी ।
**कुम्भी**-स्त्री-१०१९-થાળી તપેલી.
द्र०उखाशब्दः ।
*कायतीति कुम्भी, "काकुसिभ्यां-" (उणा-३३७) इति कुम्भः, ङ्यां कुम्भी । द्वौ द्वौ भिन्नार्था-वित्येके ।
**कुम्भीनस**-पुं-१३०४-સર્પ, નાગ.
द्र०अहिशब्दः ।
*कुम्भीव नासिकाऽस्येति कुम्भीनसः, "अस्थूला-च्च-" ॥७।३।१६१॥ इति नसादेशः ।
**कुम्भीर**-पुं-१३४९-મગરમચ્છ.
द्र०आलास्यशब्दः ।
*स्कुम्नातीति कुम्भीरः, "जम्बीर-" (उणा-४२२) इतीरे निपात्यते, कुम्भेन ईरयति वा ।
**कुरङ्कर**-पुं-१३२८-સારસપક્ષી.
□सारस, लक्ष्मण, पुष्कराख्य, [दीर्घजानुक, गोनर्द, मैथुनिन्, कामिन, श्येनाक्ष, रक्तमस्तक शे. १६४] ।
*कुरमिति शब्दं करोतीति कुरङ्करः ।
**कुरङ्ग**-पुं-१२९३-હરણ.
□मृग, सारङ्ग, वातायु, हरिण, 'वनायु', [अजिनयोनि शे. १८६, वानायु शि. ११५] ।
*कुरति मार्यमाणः इति कुरङ्गः,"विडिविलि-" (उणा-१०२) इति किदङ्गः, कौ रङ्गतीति वा ।
**कुरचिल्ल**-पुं-१३५२-કરચલો, જલજન્તુ.
द्र०कर्कटशब्दः ।
*कुरन् चिल्लतीति कुरचिल्लः ।
**कुरण्ट** पुं-१२००-અગ્રબીજ.
**कुरण्टक**-११३५-પીળો આણપુષ્પ, આસો-પાલવનું ઝાડ.
द्र०किङ्किरातशब्दः ।
* रण्टिः सौत्रः' कौ रण्टतीति कुरण्टकः, "कोरु रुण्टिरण्टिभ्यः" (उणा-२८) इत्यकः कुरुण्टकोऽपि, कुरण्डक इत्यन्ये ।
**कुरण्ड**-पुं-४७०-અંડકોશનીવૃદ્ધિ.
□वृद्धि, अण्डवर्धन ।
*कुत्सितं रमतेऽनेनेति कुरण्डः, "पञ्चमाड्डः" (उणा-१६८) इति डः ।
**कुरण्डक**-पुं-११३५ (शि १०१)-આસોપાલવનું ઝાડ
द्र०किङ्किरातशब्दः ।
**कुरर**-पुं-१३३५-માછલાનો નાશ કરનાર કુરર પક્ષી
□उत्क्रोश, मत्स्यनाशन ।
*कुरतीति कुररः, "मृद्युन्दि-" (उणा-३९९) इति किदरः, 'कुर' इति शब्दं राति वा ।
**कुररी**-स्त्री-१२७७-ઘેટી.
द्र०अविलाशब्दः ।
*कुरति शब्दायते इति कुररी, 'मृद्युन्दि-' (उणा-३९९) इति किदरः ।
**कुरु**-पु.-९४६-५ દેવકુરુ અને ५ ઉત્તરકુરુ
**कुरुक्षेत्र** न.-९५०- કુરુક્ષેત્રનો બાર યોજન સુધીનો ભાગ
□ धर्मक्षेत्र ।
* कुरवोऽत्र क्षयन्ति स्मेति कुरुक्षेत्रं, तच्च द्वादशयोजनावधि भवति ।
**कुरुण्टक**-पुं.-११३५ (शि. १०१) આસો-પાલવનું ઝાડ
द्र० किङ्किरातशब्दः ।
**कुरुल**-पुं ५६९-લલાટ ઉપરના લટકતાવાળ
□ भ्रमरक, भ्रमरालक ।

* कु ईषल्लुलतीति कुरुलः, पृषोदरादित्वात् ।

**यल्लक्ष्यम्–**

"कुरुलालसभ्रूलेहे" इति ।

**कुरुविन्द**–न.–१०६१–हिंगळो

☐ हंसपाद, हिङ्गुल, [हिङ्गुल शि. ८३ ]

* कुरून् विन्दन्तीति कुरुविन्दम्, "निगवादे-र्नाम्नि" ।।५।१।६१।। इति शः ।

**कुरुविन्द**–पु.–११९३–मोथ

☐ मेघनामन, मुस्ता, [मुस्तक शि. १०८]

* कुरून देशं विन्दन्तीति कुरुविन्दः ।

**कुरुविस्त**–पुं–८८४–એક સુવર્ણ પલ.

* कुरुदेशे प्रसिद्धो विस्तो हेमपलमिति कुरुविस्तः ।

**यन्माला–**

"पलेन हि सुवर्णस्य कुरुविस्तः" ।

**कुर्कुर**–पुं. १२७९–કૂતરો.

द्र० अस्थिभुक्शब्दः ।

*किरत्यस्थीति कुर्कुरः, "श्वशुर"–(उणा–४२६) इत्युरे निपात्यते ।

**कुर्पर**–पुं.–५९० (शि. ४७)–કોણી.

द्र० कफणिशब्दः ।

**कुल**–न.–५०३–કુળ, વંશ.

द्र० अन्वयशब्दः ।

* कोलति संस्त्यायतीति कुलम् ।

**कुल**–न.–९९०–ઘર.

द्र० अगारशब्दः ।

* कोलन्ति अत्रेति कुलम्, स्थादित्वात् कः ।

**कुल**–न. १४१३–સજાતીય પ્રાણીઓનો સમુદાય.

* कोलतीति कुलम्, यथा विप्रकुलम्, मृगकुलम्।

**कुलक**–पुं.४८५(शि. ३६)–કુલવાન.

☐ कुलिक, कुलश्रेष्ठिन् ।

**कुलटा**–स्त्री–५२९–અસતી, કુલટા

द्र० अविनीताशब्दः ।

* कोलतीति कुलटा, "कुलिविलिभ्यां कित्–" (उणा–१४३) इत्यटः, कुलान्यटति शीलं भेत्तुं वा पृषोदरादित्वात्, कुत्सितं लटतीति वा ।

**शेषश्चात्र–**

"कुलटायां तु दुःश्रुङ्गी, बन्धुदा कलकूणिका ।
घर्षणी लाच्छनी खण्डशीला मदननालिका ।।
त्रिलोचना मनोहारी ।।" इति ।।

**कुलत्थ**–पुं ११७५–કળથી

☐ कालवृन्त ।

* कुले तिष्ठतीति कुलत्थः, पृषोदरादित्वात् ।

**कुलत्थिका**–स्त्री १०६२–કાળો સુરમો

☐ कुलाली, चक्षुष्या, (दृक्प्रसादा) ।

* कुले तिष्ठति कुलत्था, पृषोदरादित्वात्, कुलत्थ प्रकृतिर्वा ।

**कुलत्थिका**-स्त्री–११७५–નાની કળથી.

☐ ताम्रवृन्ता ।

* ह्रस्वः कुलत्थः कुलत्थिका ।

**कुलदेवता**–स्त्री २०५ (शि. १०) –પાર્વતી.

द्र० अद्रिजाशब्दः ।

**कुलधारक**–पुं.–५४२–(शि. ११४) પુત્ર.

द्र० अङ्गजशब्दः ।

**कुलनाश**-पुं–१२५३–ઊંટ.

द्र० उष्ट्रशब्दः ।

* कुलं नाशयतीति कुलनाशः ।

**(कुलपालिका)**–स्त्री.–५१५–કુલીનસ્ત્રી

☐ कुलस्त्री, कुलबालिका ।

* कुलस्य पालिकेति कुलपालिका ।

**कुलबालिका**-स्त्री.५१५–કુલીન સ્ત્રી.

☐ कुलस्त्री, (कुलपालिका) ।

* कुलस्य बालिका कुलबालिका, कुलपालिकेत्य**मरः**

**कुलश्रेष्ठिन**–पुं–४८५-કુલવાન, નગરશેઠ.

☐कुलिक, [कुलक शि. ३६ ] ।

*कुले वणिग्वृन्दे श्रेष्ठत्वमस्त्यस्येति कुलश्रेष्ठी ।

**कुलस्त्री**–स्त्री–५१५–કુલીન સ્ત્રી.

☐कुलबालिका, (कुलपालिका)

*कुलस्य स्त्रीति कुलस्त्री ।

**कुला**-स्त्री–२०५–(शि.–५८)-પાર્વતી.

द्र० अद्रिजाशब्दः ।

**कुलाय**-पुं–१३१९–પક્ષીનો માળો.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

☐नीड ।

*कोलन्त्यत्रेति कुलायः, "कुलिलुलि-" (उणा-३७२) इति कायः, कुलमेति वा ।

**कुलाल**–पुं–९१६–કુંભાર.

☐कुम्भकार, दण्डभृत्, चक्रजीवक ।

*कोलति संस्त्यायतीति कुलालः, "कुलिपिलि–" (उणा–४७६) इति किदालः, कुलानि गृहाणि अलतीति वा, कुं मृदं लालयते मृद्नाति वा ।

**कुलाली**-स्त्री–१०६२–કાળો સુરમો.

द्र० कुलत्थिकाशब्दः ।

* कुलमलतीति कुलाली ।

**कुलाह**–पुं–१२४१–કંઈક પીળો અને જાનુ-પ્રદેશમાં કાળા વર્ણવાળો ઘોડો.

*कुलमाजिहीते इति कुलाहः ।

**कुलीक**–पुं–४८५–કુલવાન નગરશેઠ.

☐कुलश्रेष्टिन्, [कुलक शि. ३६] ।

*कुलमस्त्यस्येति कुलिकः, कुलं कायतीति कुलिकः, **इत्यमरः** ।

**कुलिक**–पु–१३१०–ધૂમાડા જેવી કાન્તિવાળો નાગ.

*प्रशस्यं कुलमस्त्यस्येति कुलिकः ।

**कुलिङ्ग**–पुं–१३३१ (शि. ११९)–ચકલો.

द्र० कलविङ्कशब्दः ।

**कुलिङ्कक**–पुं–१३३१–ચકલો.

द्र० कलविङ्कशब्दः ।

*कोलतीति कुलिङ्ककः, 'कुलिचिरिभ्यामिङ्ककू" (उणा–६४) इति ।

**'कुलिर'**–पुं–१३५२–કરચલો.

द्र० कर्कटशब्दः ।

**कुलिश**–पुं न.–१८१–ઇન્દ્રનું વજ્ર.

द्र० अशनिशब्दः ।

*कोलति सङ्घीकरोति भयदत्वात् गिरीन् इति कुलिशः, पुंक्लीबलिङ्गः, "कुलिकनि–" (उणा–५३५) इति किशः, कुलिनः कुलपर्वतान् श्यति पक्षच्छेदेन तनूकरोतीति वा, कुत्सितं लिशति तक्ष्णोत्यरीनिति वा ।

**कुलिशाङ्कुशा**–स्त्री–२३९–સોળવિદ્યાદેવી પૈકી ચોથી વિદ્યાદેવી.

*कुलिशमयमङ्कुशमस्याः कुलिशाङ्कुशा ।

**कुली**–स्त्री–५५४–પત્નીની મોટી બહેન.

☐ज्येष्ठश्वश्रू ।

*कोलतीति कुली ।

**'कुलि'**–स्त्री–११५७–બેઠી ભોંય રીંગણી.

द्र० कण्टकारिकाशब्दः ।

**कुलीन**–पुं–५०२–કુલવાન.

द्र० अभिजातशब्दः ।

*कुलस्यापत्यं कुलीनः, "कुलादीनः" ॥६।१।९६॥ इति ।

**कुलीन**–पुं–१२३४–કુલીન ઘોડો.

☐आजानेय ।

*कुलीनः प्रशस्य कुलोद्भवः, पारसीकादिः ।

**कुलीनक**–पुं–११७३–જંગલી મગ.

☐तुवरक, निगूढक, खण्डिन् ।

*कौ लीयते इति कुलीनकः, "कीचक–" (उणा–३३) इत्यके निपात्यते ।

**कुलीनस**–न.–१०७०–ચોખ્ખું પાણી.

द्र० अप्शब्दः ।

*कौ लीनं श्लिष्टं स्यतीति कुलीनसम् ।

**कुलीर**–पुं–न. १३५२ –કરચલો, જલજન્તુ.

द्र० कर्कटशब्दः ।

*कोलतीति कुलीरः, पुंक्लीबलिङ्गः, "घसिवशि–" (उणा–४१९) इति किदीरः, कुलीनमीरयति वा जनकभक्ष्यत्वात् ।

यत् **कौटिल्यः**—

"कटकसधर्माणो हि राजपुत्रा जनकभक्ष्याः" इति ।

**कुलुक** न.–६३२–જીભનો મેલ.

*कोलति संस्त्यायतीति कुलकं, "कञ्चुकांशुक–" (उणा–५७) इत्युके निपात्यते ।

**कुलेश्वरी**–स्त्री.–२०५ (शे. ५९)–પાર્વતી.

द्र० अद्रिजाशब्दः ।

**कुल्माष**–पुं–११७५ (शि. १०७)–અર્ધા પાકેલા અડદ.

☐कुल्मास, यावक ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(कुल्माष)–न–४१५–કાંજી રાબ.

द्र० अवन्तिसोमशब्दः ।

**कुल्माषाभिषुत**–पुं–४१५–કાંજી રાબ.

द्र०अवन्तिसोमशब्दः ।

*कुल्माषैर्यवादिभिरर्द्धस्विन्नैरभिषूय तैरविवास्यते स्मेति कुल्माषाभिषुतः, व्यस्तमपि तेन कुल्माषमभिषुतं चेति ।

**शेषश्चात्र—**

"कुल्माषाभिषुते पुनः । गृहाम्बुमधुरा च" ॥

**कुल्मास**–पुं–११७५–અર્ધ પાકેલા અડદ વગેરે.

☐यावक, [कुल्माष शि. १०७] ।

*कोलतीति कुल्मासः, अर्धस्विन्नो माषादिः, 'कलिकुलिभ्यां मासक्" (उणा–५८४) कुल्वेन मस्यति परिणमते वा पृषोदरादित्वात्, कुल्माषोऽपि ।

**कुल्य**–पुं–५०२–કુલવાન.

द्र० अभिजातशब्दः ।

*कुलस्यापत्यमिति कुल्यः, "यैयकआवक्समासे वा" ॥६।१।९७॥ इति ।

**कुल्य**–न पुं–६२५–હાડકું.

द्र० अस्थिशब्दः ।

*कुले शरीरे साधु इति कुल्यं, पुंक्लीबलिङ्गः ।

**कुल्या**–स्त्री–१०८०–નદી.

द्र० आपगाशब्दः ।

*कोलति जलैः संस्त्यायतीति कुल्या, "कुलेर्ङ्-च वा" (उणा–३६२) इति किद् यः ।

**कुल्या**–स्त्री–१०८९–પાણીની ખાઈ, નીક.

☐पान, सारणि, (सारणी), [नीका शे. १६९]

*कोलति संस्त्यायत्यम्भसा इति कुल्या ।

**कुव**–न.–११६३–કમુદ, પોયણું.

☐उत्पल, कुवलय,कुवेल, कुवल ।

*कुत्सितं वातीति कुवम्, "क्वचित" (५।१।१७१) इति डः ।

**कुवल**–न. पुं.–११६३–કમુદ, પોયણું.

☐उत्पल, कुवलय, कुवेल, कुव ।

*कवते भृङ्गारावैः इति कुवलं पुंक्लीबलिङ्गः, "कोर्वा" (उणा–४६९) इति किदलः, कौ वलतीति वा ।

**कुवलय**–न.–११६३–કમુદ, પોયણું.

☐उत्पल, कुवेल, कुवल, कुव ।

*कौ वलति प्राणितीति कुवलयं "कुगुवलि" (उणा–३६५) इत्ययः, कुत्सितो बहिर्वलयः, पत्र-वेष्टनमस्येति वा ।

**कुवलाश्व**–पुं.–७०१–ધુન્ધુમાર રાજા.

☐धुन्धुमार ।

*कुवलं कुवलयं तद्वर्णा अश्वा अस्येति कुवलाश्वः ।

**कुवली**–स्त्री–पुं–न.–११३८–બોરડી.

द्र० कर्कन्धुशब्दः ।

*कौतीति कुवली त्रिलिङ्गः, "कोर्वा" (उणा–४६९) इति किदलः, कौ भूमौ वलतीति वा ।

**कुवाट**–पुं.–१००७–કમાડ, બારણું.

द्र० अररशब्दः ।

*कुत्सितं वट्यतेऽनेनेति कुवाटः ।

**कुवाद**–पुं.–३४८–ખરાબ બોલનાર.

☐कुचर. [कुटिलाशय शि. २२] ।

*कुत्सितो वादोऽस्येति कुवादः ।

**कुविन्द**–पुं–९१३–વણકર, વસ્ત્ર વણનાર.

☐तन्त्रवाय, [तन्तुवाय शि० ७९] ।

*कुं विन्दतीति कुविन्दः, "निगवादेर्नाम्नि–" ॥५।२।६२॥ इति शः ।

**कुवीणा** –स्त्री–२९० (शे ८३)–ચાંડાલની વીણા.

द्र० कटोलवीणाशब्दः ।

**कुवेणी**–स्त्री–९२९–માછલા પકડવાનો કરંડિયો.

☐मत्स्यबन्धनी ।

*कुत्सितं वेणन्तेऽस्यां मत्स्याः इति कुवेणी ।

**कुवेल**–न.–११६३–કમુદ, પોયણું.

☐उत्पल, कुवलय, कुवल, कुव ।

*कौ वेलतीति कुवेलम् ।

**कुश**–पुं–७०४–રામનો પુત્ર.

*कुशयतीति कुशः, कुशनिर्मितत्वाद्वा ।

**कुश**–न.–१०६९–થોડું પાણી.

द्र०अप्शब्दः ।

*कुशयति भिनत्तीति कुशं, कुं श्यतीति वा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**कुश**–पुं न.–११९२– દર્ભ, ડાભ.

□दर्भ, कुथ, बर्हिष्, पवित्र ।

*को शेते इति कुशः, पुंक्लीबलिङ्गः, "क्वचित्" ॥५।१।१७१॥ इति डः ।

**कुशल**–न.–८६–કલ્યાણ.

द्र०कल्याणशब्दः ।

*कुश्यति पुण्यात्मना सम्बध्यते इति कुशलम्, "तृपिवपिकुपिकुशि–" (उणा–४६८) इत्यलक्, कुशं लातीति वा ।

**कुशल**–पुं–३४३–નિપુણ, હોંશિયાર.

द्र०अभिज्ञशब्दः ।

*कुशान् लातीति कुशलः, ते हि व्युत्पन्नैरादातुं शक्याः, कुश्यतीति वा, "तृपिवपि–" (उणा–४६८) इत्यलक् ।

**कुशस्थल**–न.–९७४– કાન્યકુબ્જ,કનોજ.

द्र०कन्यकुब्जशब्दः ।

*कुशानां स्थलमिति कुशस्थलम् ।

**कुशा**–स्त्री–१२५२–દોરી, લગામ.

द्र०अवक्षेपणीशब्दः ।

*कुश्यतीति कुशा ।

**कुशाग्रीयमति**–पुं–३४४–તીક્ષ્ણ બુદ્ધિવાળો.

□सूक्ष्मदर्शिन् ।

*कुशाग्रस्य तुल्या तीक्ष्णत्वात् कुशाग्रीया, "कुशाग्रादीयः" ॥७।२।११६॥ इति ईयः, कुशाग्रीया मतिरस्येतिकुशाग्रीयमतिः ।

**कुशारणि**–पुं–८५०–દુર્વાસા ઋષિ.

□दुर्वासस् ।

*कुशारणिग्रहणात् कुशारणिः ।

**कुशिक**–पुं–८९१–કોસ.

□फाल, कृषक, फल ।

*कुष्णाति भुवमिति कुशिकः, "कुशिकहृदिक"– (उणा–४५) इतीके निपात्यते ।

**कुशिन**–पुं–८४६–વાલ્મીકિ ઋષિ.

□द्र०कविशब्दः ।

*कुशाः सन्त्यस्येति कुशी ।

**कुशी**–स्त्री–१०३९–લોઢાની કોશ.

□(फाल) ।

*कुश्यतीति कुशी फालः, यत् **शाश्वतः**– "कुशो दर्भः कुशी फालः" कुत्सितं श्यतीति वा, "भाजगोण"– ॥२।४।३०॥ इति ङीः ।

**कुशीलव**–पुं–३२९–ચારણ.

□चारण ।

कुत्सितं शील वातीति कुशीलवः ।

**कुशीलव**–पुं (द्वि. व.)–७०४–કુશ અને લવ.

*कुश्यतीति कुशः, कुशनिर्मितत्वाद्वा, लुनाति शत्रूनिति लवः, द्वावप्येकेन वचसा कुशश्च लवश्च कुशीलवौ, राजदन्तादित्वात्साधुः ।

**कुशूल**–पुं–१०१२,(शि. ८८)–અન્નનો ભંડાર.

□अन्नकोष्टक, कुसूल ।

**कुशेशय**–न.–११६०–કમળ.

द्र०अरविन्दशब्दः ।

*कुशे जले शेते इति कुशेशयं, "शयवासिवासेष्वकालात्" ॥३।२।२५॥ इति सप्तम्यलुप् ।

**कुषाकु**–पुं–११०० (शे. १७०)–અગ્નિ.

द्र०अग्निशब्दः ।

**कुष्ठ**–न.–४६६–ધોળો કોઢરોગ.

□श्वित्र, पाण्डुर, (श्वेत) ।

*कुष्णातीति कुष्ठं, "कुषेर्वा" (उणा–१६४) इति कित् ठः, कुत्सिते तिष्ठतीति वा "गोऽम्बाऽम्ब–" ॥२।३।३०॥ इति षत्वम् ।

**कुष्ठ**–पुं–११९७–સ્થાવર વિષ.

द्र०अङ्कोलसारशब्दः ।

*कुष्णातीति कुष्ठः, कुष्ठसदृशत्वाद् वा । **यदाह**– "कुष्ठं तु कुष्ठसदृशमुग्रगन्धं भ्रमिपदम्" ।

**कुष्ठारि**–पुं–१०५७–ગન્ધક.

□गन्धाश्मन्, शुल्वारि, पामारि, गन्धिक, गन्धक, सौगन्धिक, शुकपुच्छ ।

*कुष्ठस्य अरिरिति कुष्ठारिः ।

**(कुष्माण्डी)**–स्त्री–४६– અંબિકા દેવી.

□अम्बिका ।

**कुसीद**–पुं–८८०–વ્યાજનોધંધો.

द्र०अर्थप्रयोगशब्दः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*"कुसच् श्लेषे दन्त्यान्तः" कुस्यतीति कुसीदम्, "कुसेरिदेदौ" (उणा-२४१) इतीदः, कुत्सितं सीदत्यनेनेति वा, पृषोदरादित्वात् ।

**कुसीदिक**-पुं-८८०-व्याजथी आजीविका चलावनार

☐वृद्ध्याजीव, द्वैगुणिक, वार्धुषिक, वार्धुषि ।

*कुसीदवृद्धिं गृह्णाति इति कुसीदिकः, "कुसीदाधिकट्" ॥६।४।३५॥

**कुसुम**-पु-४२ श्री पद्म प्रभ स्वामी भ.ना शासनदेव

*कुस्यति युज्यते पद्मप्रभोपासनायेति कुसुमः, "उद्धटिकुल्यलि –" (उणा-३५१) इति उमः ।

**कुसुम**-न. पुं-१२२४-पुष्प, फूल.

☐प्रसून, सुम, पुष्प, सून, सुमनस, प्रसव, मणीवक ।

*कुस्यतीति कुसुमं, पुंक्लीबलिङ्गः, "उद्धटि"– (उणा-३५२) इति किदुमः ।

**कुसुम** न.–५३६ (शि. ४४)–स्त्रीरज.

☐स्त्रीधर्म, पुष्प, आर्तव, रजस् ।

**(कुसुमधन्वन्)** –पुं-२२८-कामदेव.

द्र०अङ्गजशब्दः ।

**कुसुमपुर**–न.–९७६–पाटलिपुत्र, पटन.

☐पाटलिपुत्र ।

*कुसुमबहुलं पुरमिति कुसुमपुरम् ।

**(कुसुमबाण)** पुं–२२८–कामदेव.

द्र०अङ्गजशब्दः ।

**कुसुमान्त**-न-६४५-(शे. १३३) केशर.

द्र० कश्मीरजन्मन् शब्दः ।

**(कुसुमायुध)** २२८–कामदेव.

द्र०अङ्गजशब्दः ।

**कुसुम्भ**–न. पुं.-११५९ कसुंबो.

☐लट्वा, महारजन, कमलोत्तर, 'वह्निशिख' ।

*कुस्यतीति कुसुम्भं, "काकुसिभ्यां कुम्भः" (उणा –३३७) पुंक्लीबलिङ्गोऽयम् ।

**कुसुम्भ** न.-६४५ (शे. १३३)-केशर.

द्र०कश्मीरजन्मनशब्दः ।

**कुसू**-पु-१२०३–अळसिया, जमीनना कीडा.

द्र०किञ्चुलकशब्दः ।

*कोर्भूमेः सूते इति कुसूः, कुं मृदं सूते वा, मृदुत्सर्गात् ।

**कुसूल**–पुं-१०१२-अन्ननो कोठार.

☐अन्नकोष्टक. [कुशूल शि. ८८] ।

*"कुसच् संश्लेषे दन्त्यान्तः" कुस्यति धान्येनेति कुसूलः, 'कुलपुलकुसिभ्यः कित्" (उणा–४९०) इत्युलः, तालव्यमध्योप्ययम् ।

**कुसृति**-स्त्री–३७७–माया, लुच्चाई.

☐माया, शठता, शाठ्य, निकृति ।

*कुत्सिता सृतिर्हिंसार्थेमिति कुसृतिः ।

**कुसृति**–स्त्री-९२६-ईन्द्रजाळ, जादुगीरी.

☐इन्द्रजाल, कुहुक (कुहक), जाल ।

*कुत्सिता सृतिरिति कुसृतिः ।

**कुस्तुम्बुरु**–न. पुं-४१९-धाणा, कोथमीर.

☐ धान्याक, धन्या, धन्याक, धान्यक [अल्लुका शे० १०१] ।

*कुत्सिता तुम्बुरुः कुस्तुम्बुरुरौषधिजातिः, वचर्स्कादित्वात् तत्फलमपि कुस्तुम्बुरु, पुंक्लीबलिङ्गः ।

**शेषश्चात्र**–"अथ स्यात् कुस्तुम्बुरुरल्लुका" ।

**कुह**-पुं.–१८९–कुबेर देव.

द्र०इच्छावसुशब्दः ।

*कुहयते विस्मापयते इति कुहः ।

**कुहक**–पुं–३७७–ठग, धूर्त.

☐धूर्त, वञ्चक, व्यंसक, दाण्डाजिनिक, मायिन्, जालिक, [मायाविन्, मायिक शि. २१] ।

*कुहयते विस्मापयते इति कुहकः, कुहकमिन्द्रजालं वा यस्यास्ति ।

**(कुहक)** न.–९२६-ईन्द्रजाळ, जादुगीरी.

☐इन्द्रजाल, कुहुक, जाल, कुसृति ।

**कुहकस्वन**-पुं-१३४२–जंगली कुकडो.

कुम्भकारकुक्कुट, कुक्कुभ ।

*'कुहक' इति स्वनोऽस्येति कुहकस्वनः ।

**कुहन**–पुं–३९१–ईर्षाळु.

☐ईर्ष्यालु ।

*कुहयते विस्मापयते इति कुहनः ।

**कुहना**–स्त्री–३७९–दंभ पूर्वक चालवुं.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

☐कुक्कुटि, दम्भचर्या ।

*कुहयतेऽनया इति कुहना, दम्भेन परविस्मापनार्थं मिथ्याकल्पना ।

**कुहर**–न.–१३६३–छिद्र, भिल.

द्र०अन्तरशब्दः ।

*कुहयते इति कुहरम् ‘मृद्रुन्दि–” उणा–३९९), इति किदरः, कुत्सितं हरतीति वा, कुं हरति शून्यत्वादिति वा ।

**कुहाला** स्त्री–२९४ (शे. ८५)–शिंगडा जेवुं वाजित्र.

☐काहला, चण्डकोलाहला ।

**कुहावती**–स्त्री–२०५ (शे ५४) पार्वती.

द्र०अद्रिजाशब्दः ।

**कुहु**–स्त्री–१५१ अमास.

☐कुहू ।

*कुहयते विस्मापयते इति कुहुः, स्त्रीलिङ्गः, “पृकाहृषि–’ (उणा ७२९) इति उः कित् ।

**कुहुक**–न.–९२६–ईन्द्रजाळ.

☐इन्द्रजाल, कुहक, जाल, कुसृति ।

*कुहयते विस्मापयते इति कुहुकं “मिवमि–” (उणा–५१) इत्युकः, कुहकमपि ।

**कुहू** स्त्री–१५२–अमास.

☐कुहु ।

* कुहयते विस्मापयते इति कुहुः ‘नृतिशृधिरुषिकुहिभ्यः कित् (उणा–८४४) इति ऊः तेन कुहूः ।

**कुहूमुख** पुं–१३२१ (शे. १९०)–कोयल.

द्र०कलकण्ठशब्दः ।

**कूकुद**–पुं–४७५–सत्कार करी अलंकृत कन्या आपनार.

☐[कूपद, पारिमित शे. १०७] ।

*कोकते आदत्ते धर्ममिति कूकुदः, कुमुदादौ उदे निपात्यते । ब्राह्मे विवाहे दाताऽयम् ।

**यन्मनुः**–“आच्छाद्य चार्हयित्वाच, श्रुतशीलवते स्वयम् आहूय दानं कन्याया, ब्राह्मो धर्मः प्रकीर्तितः ॥ ”

**शेषश्चात्र**–“स्यात् कूकुदे तु कूपदः पारिमितः” ॥

**कूचिका**–स्त्री–९२२–चितारानी पींछी.

☐तूलिका ।

*कूचतीति कूचिका ।

**कूचिका**–स्त्री–१००५–कुंची, चावी.

☐कुञ्चिका, साधारणी, अङ्कुट ।

*कूचतीति कूचिका ।

**कूचिका**–स्त्री–४०५ (शि. २८)–मावो.

☐किलाटी, कूर्चिका ।

**(कूजन)**–न.–१४०७–पक्षीनो शब्द.

☐कूजित ।

**कूजित**–न.–१४०७–पक्षीनो शब्द.

☐कूजन ।

*कूजनमिति कूजितम् ।

**कूट**–न. पुं–३७८–छळ कपट.

द्र० उपधिशब्दः ।

*कूटयति दहति अनेनेति कूटं, पुंक्लीबलिङ्गः ।

**कूट**–न. पुं–९२०–लोढानो घण.

☐अयोघन ।

*कूट्यते हन्यतेऽनेनेति कूटं, पुंक्लीबलिङ्गः ।

**कूट**–न. पुं.–१०३२–पर्वतनुं शिखर.

☐शृङ्ग, शिखर ।

*कूटयते–दह्यतेऽर्कदावाभ्यां इति कूटम्, पुंक्लीबलिङ्गः ।

**कूट**–पुं–१२५९ भांगेला शिंगडावाळो बळद.

☐भग्नविषाणक ।

*कूट्यते इति कूटः ।

**कूट**–न.–पुं–१४११–समूह, समुदाय.

द्र० उत्करशब्दः ।

*कूटयते इति कूटं, पुंक्लीबलिङ्गः ।

**‘कूटक’**–न.–८९१–हंड रहित हळ.

द्र० कुट्टकशब्दः ।

**कूटकृत**–पुं–२०० (शे. ४४)–शंकर महादेव.

द्र० अट्टहासिनशब्दः ।

**कूटयन्त्र**–न.–९३२–पशु पक्षीने पकडवानो फांसो.

☐उन्माथ, [पाशयन्त्र शि. ८२.] ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*कूटेन छलेन यन्त्यते अनेनेति कूटयन्त्रम्, पाशयन्त्रमित्येके ।

**कूटसाक्षिन्**–પું.–૮૮૨ (શે. ૧૫૫)–ખોટું બોલનાર સાક્ષી.

**कूटस्थ**–ન.–૧૪૫૩–અનંત કાળ સુધી એક રૂપે રહે તે આકાશાદિ.

☐कालव्यापिन् ।

*कूटेन अचलत्वेन तिष्ठतीति कूटस्थमाकाशात्मादि ।

**कूणिका**–સ્ત્રી–૨૯૧–વીણાની વચ્ચે રહેલી વાંસની સળી.

☐कलिका, वंशशलाका ।

*कूणयते तन्त्रीमिति कूणिका ।

**कूणिका**–સ્ત્રી–૧૨૬૪–બળદનું શિંગડું.

☐विषाण, श्रृङ्ग ।

*कूणयतीति कूणिः, इयां स्वार्थे के च कूणिका ।

**कूणितेक्षण**–પું.–૧૩૩૫ (શે. ૧૯૫)–ગીધ.

द्र० गृध्रशब्दः ।

**कूप**–પું સ્ત્રી–૧૦૯૧–કૂવો.

☐उदपान, अन्धु, प्रहि ।

*कौति प्रतिशब्देन इति कूपः, पुंस्त्रीलिङ्गः, "युसुकु–" (उणा–२९७) इति प उत्वं च, कुत्सिताः कौर्वा आपोऽत्रेति वा, पृषोदरादित्वात् ।

**कूपक**–પું.–૮૭૭–વહાણનો કૂવાસ્તંભ, જેમાં નાવ બંધાય તે સઢ

☐गुणवृक्ष ।

*कूपे आधारगर्ते कायतीति कूपकः, **गौडस्तु**–जलान्तस्तरून् कूपकानाह ।

**कूपक**–પું.–૧૦૮૮–વહેલાઓ, પાણી કાઢવા કરાતા ખાડા.

☐विदारक ।

*कूपप्रतिकृतयः कूपकाः, शुष्कनद्यादौ हि जलार्थं गर्ताः क्रियन्ते । यत् **कात्यः** विवरान् कूपकानाहुः।

**कूपज**–પું.–૬૩૦ (શે. ૧૨૯)–રૂવાંડાં.

द्र० तनूरुहशब्दः ।

**कूपद्**–પું.–૪૭૫ (શે. ૧૦૭)–સત્કાર પૂર્વક અલંકૃત કન્યાદાન કરનાર.

अ. २६

☐कूकुद, [पारिमित शे. १०७] ।

**कूबर**–ન. પું–૭૫૬–ધૂંસરીનું લાકડું.

☐युगन्धर ।

*कवते इति कूबरं, "नीमीकु–" (उणा–४४३) इति वरट्, दीर्घत्वं च, पुंक्लीबलिङ्गोऽयम् ।

**कूर**–ન. પું–૩૯૫–ભોજન, ભાત.

द्र० अन्धस्शब्दः ।

*कौत्यनेनेति कूरं, पुंक्लीबलिङ्गः, "खुरक्षुर–" (उणा–३९६) इति रान्तो निपात्यते ।

**कूर्च**–ન–૫૮૦–બે ભવાંનો આગલો ભાગ.

☐कूर्प ।

*कीर्यते इति कूर्चं, पुंक्लीबलिङ्गः, "कूर्च-चूर्च–" (उणा–११३) इति चे निपात्यते ।

**कूर्च**–ન.પું–૫૮૩–મૂછ, દાઢી.

द्र० आस्यलोमनशब्दः ।

*कीर्यते इति कूर्चं, पुंक्लीबलिङ्गः ।

**कूर्च**–ન. પું–૬૧૭–કાંડા, અંગૂઠો અને આંગળીઓની ઉપરનો ભાગ.

*किरत्यनेनेति कूर्चं पुंक्लीबलिङ्गः ।

**कूर्चशिरस्** ન. પું–૬૧૭–કૂર્ચનો અગ્ર ભાગ.

☐अंह्रिस्कन्ध ।

*कूर्चस्य शिरः कूर्चशिरः ।

**कूर्चिका**–સ્ત્રી–૪૦૫–દૂધનો વિકાર, માવો.

☐किलाटी, [कूचिका शि. २८] ।

*कूर्चस्तन्मस्तु तदस्त्यस्याः इति कूर्चिका, कूचतीति कूचिका **इत्येके** ।

**कूर्दन**–ન.–૫૫૬–ક્રીડા રમત.

☐केलि, द्रव, परीहास, क्रीडा, लीला, नर्मन, देवन, खेला, ललन, वर्कर [सुत्रोत्सव, रागरस, विनोद, किल शे. ११७] ।

*कूर्धते इति कूर्दनम् ।

**कूर्प**–ન.–૫૮૦–બે ભવાંનો વચલો ભાગ.

☐कूर्च ।

*कीर्यते इति कूर्पं, "कृगृशृम्य ऊर्चान्तस्य" (उणा–२९८) इति पः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**कूर्पर**-पुं-५९०-કોણી.

द्र० कफणिशब्दः ।

*कल्पते कुरति वा कूर्परः, "जठरक्कर-" (उणा-४०३) इत्यरे निपात्यते, कूर्परोऽपि ।

**कूर्पास**-पुं.-७६७-ચોળી, કાંચળી, યોદ્ધાનું છાતીનું સુતરાઉ બખ્તર.

☐ निचोलक, वारवाण, कञ्चुक ।

*कुरतीति कूर्पासः, "कृकुरिभ्यां पासः "(उणा-५८३) इति पासः ।

**कूर्पास**-पुं.-६७४ (शि. ५५)-ચોળી, કાંચળી.

द्र० अङ्गिकाशब्दः ।

*कुरतीति कूर्पासः, "कृकुरिभ्यां पासः" (उणा-५८३) इति पासः ।

**कूर्पासक** पुं-३७४-ચોળી, કાંચળી.

द्र० अङ्गिकाशब्दः ।

*कुरतीति कूर्पासः, "कृकुरिभ्यां पासः" (उणा-५८३) के कूर्पासकः, कूर्परेऽस्यते वा, कूर्पासोऽपि ।

**कूर्म**-पुं-४८-કાચબો, શ્રી મુનિસુવ્રત ભગ.નું લંછન

**कूर्म**-पु. १३५३-કાચબો

द्र० कच्छपशब्दः ।

* किरति कुरति वा कूर्मः, "रुक्मग्रीष्म-" (उणा-३४६) इति मे निपात्यते ।

**कूल**-न. १०७७-કાંઠો, તીર, કિનારો

द्र० कच्छशब्दः ।

* कूलत्यावृणोतीति कूलम् ।

**कूलङ्कषा**-स्त्री-१०८०-નદી.

द्र० आपगाशब्दः ।

* कूलं कषति भिनत्ति इति कूलङ्कषा, "कूला-भ्रकरीष-" ॥ ५।२।११० ॥ इति खः ।

**कूलभू**-स्त्री १०७७-સમુદ્ર કાંઠાની ભૂમિ, કિનારો.

☐ मर्यादा ।

*कूलस्य समुद्रतटस्य भूः कूलभूः ।

**कूष्माण्डक**-पुं २१-શંકરનો ગણ.

☐ केलिकिल ।

**कूष्माण्डक**-पुं. ११८८-કોળું,

☐ कर्कारु ।

* कुष्यते इति कूष्माण्डः, "पिचण्ड-"(उणा-२७६) इत्यण्डे निपात्यते, कोरुष्मणाऽनिति इति वा, कुत्सितमुष्मा अण्डेषु बीजेष्वस्य वा, पित्तकारित्वात् ।

**कृक**-पुं. ५८७-ડોકનો મધ્ય ભાગ

☐ कन्धरामध्य ।

* क्रियतेऽसौ इति कृकः, "कृगो वा" (उणा-२३) इति कित् कः ।

**कृकण**-पुं-१३३८-સફેદ તેતર.

☐ क्रकर ।

* करोति शब्दमिति कृकणः, "चिक्कण-" (उणा-१९०) इत्यणे निपात्यते, 'कृ' इति कणति वा, कृकं नयति वा ।

**'कृकलाश'**-पु. १२९९-કાચંડો.

द्र० कृकलासशब्दः ।

**कृकलास** पुं.-કાચંડો સરડો.

☐ सरट, प्रतिसूर्य, शयानक, 'कृकलास, कृकलाश,' (प्रतिसूर्यशयानक) ।

*कृकं शिरोग्रीवं लासयतीति कृकलासः ।

**कृकवाकु**-पु १३२५-ગામડાંનો કૂકડો.

द्र० कुक्कुटशब्दः ।

*कृकेण शिरोग्रीवेण, कृकमव्यक्तं वा वक्तीति कृकवाकुः, "कृकस्थूराद्वचः कृ च" (उणा-७२८) इति णिदुः ।

**कृकाटिका**-स्त्री-५८६-ડોક અને માથાની સંધિનો પાછલો ભાગ.

☐ अवटु, घाटा, [शिरःपीठ शे. १२४] ।

*कृकं कन्धरामध्यं अटतीति कृकाटिका ग्रीवा-पश्चाद्भागः ।

**'कृकलास'**-पुं १२९९-કાંચડો.

द्र० कृकलासशब्दः ।

**कृच्छ्र**-न.-पुं ८४२-ચાન્દ્રાયણ, પાપનો નાશ કરનાર તપ વિશેષ.

☐ सान्तपन, (चान्द्रायण) ।

*कृन्तति पापमिति कृच्छ्रं नाम तपः, पुंक्ली-बलिङ्गः ।

**कृच्छ्र**-न १३७१-કઠિન, દુઃખ, પીડા.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्र० अस्तिशब्दः ।

*कृन्ततीति कृच्छ्रं "कृतेः कृक्कच्छ्रौ च" (उणा-३९५) इति रः ।

**कृत्**-(परि.)पुं ५-જન્યજનક ભાવ સંબંધમાં જન્યથી લગાડાતો શબ્દ. જેમકે વિશ્વકૃત્

**कृतकर्मन्**-पुं ३४२-પ્રવીણ, હોંશિયાર, નિપુણ.

द्र० अभिज्ञशब्दः ।

*कृतं कर्माऽनेनेति कृतकर्मा । यौगिकत्वात् कृतार्थः, कृतकृत्यः, कृती च ।

**कृतकृत्य**-पुं. ३४२-(शि. २२) પ્રવીણ નિપુણ.

द्र० अभिज्ञशब्दः ।

**कृतघ्न**-पुं १२८० (शे. १८२) કૂતરો.

द्र० अस्थिभुज्शब्दः ।

**कृतपुङ्ख**-पुं. ७७२-બાણ સારી રીતે વાપરી જાણનાર.

☐कृतहस्त, सुप्रयुक्तशर ।

*कृताः पुङ्खा अनेनेति कृतपुङ्खः ।

**कृतम्**-अ. १५२७-બસ,પર્યાપ્ત સર્યું.

☐अलं, भवतु, अस्तु, किम् ।

*कृतमिति त्याद्यन्तप्रतिरूपकोऽव्ययः । यथा **द्व्याश्रये** "गोत्रेण पुष्करावर्त ! किं त्वया गर्जितैः कृतम् ? विद्युताऽलं भवत्वद्भिर्हंसा उच्चुर्विलं घनम्" ॥

**कृतमाल**-पुं. ११४० ગરમાળો.

द्र० आरग्वधशब्दः ।

*कृतमतीसारं मलते धारयतीति कृतमालः ।

**कृतमुख**-पुं. ३४२-પ્રવીણ, હોંશિયાર, નિપુણ.

द्र० अभिज्ञशब्दः ।

*कृतं संस्कृतं मुखमस्येति कृतमुखः ।

**कृतलक्षण**-पुं. ४३७-ગુણો વડે પ્રસિદ્ધિ પામેલો

☐आहतलक्षण ।

*कृताः प्रसिद्धा लक्षणरूपा गुणा अस्येति कृत लक्षणः ।

**कृतवर्मन्**-पुं. ३७-13માં શ્રી વિમલનાથ ભ.ના પિતાનું નામ.

*कृतं वर्माऽनेनेति कृतवर्मा ।

**कृतसापत्निका**-स्त्री ५२७-પરણેલી સ્ત્રી.

☐अध्यूढा, अधिविन्ना।

*कृतं सापत्नं सपत्नीभावोऽस्याः इति कृतसापत्निका ।

**कृतहस्त**-पुं ३४२-પ્રવીણ હોંશિયાર, નિપુણ.

द्र० अभिज्ञशब्दः ।

*कृतो वशीकृतो हस्तोऽनेनेति कृतहस्तः ।

**कृतहस्त**-पुं. ७७२-બાણ સારી રીતે વાપરી જાણનાર.

☐कृतपुङ्ख, सुप्रयुक्तशर ।

*कृतौ सिद्धौ हस्तावस्येति कृतहस्तः ।

**कृतान्त**-पुं २८४-યમ, યમરાજ.

द्र० अन्तकशब्दः ।

*कृतोऽन्तोऽनेनेति कृतान्तः ।

**कृतान्त**-पुं २४२-આગમ, સિદ્ધાંત.

द्र० आगमशब्दः ।

*कृतोऽन्तो निश्चयोऽस्येति कृतान्तः ।

**कृतान्त**-(परि.) पुं. १९ યમરાજ.

**कृतान्तजनक**-पुं. ९५-સૂર્ય.

द्र० अंशुशब्दः ।

* कृतान्तस्य जनकः कृतान्तजनकः, यौगिकत्वात् यमसूरित्यादयोऽपि ।

**कृतार्थ**-पुं ५२ અતીત ૧૯માં તીર્થંકર

*कृतोऽर्थः पूजाऽस्येति कृतार्थः ।

**कृतार्थ**-पु. ३४३ (शि. २२) પ્રવીણ, હોંશિયાર.

द्र०अभिज्ञशब्दः ।

**कृतिन्**-पुं. ३४१ વિદ્વાન, પંડિત.

द्र० अभिरूपशब्दः

*कृतमस्यास्तीति कृती, कृतकृत्यः ।

**कृतिन्**-पुं. ३४२ (शि. २२) પ્રવીણ, નિપુણ.

द्र० अभिज्ञशब्दः।

**कृत्त**-न. २४९० છેદાયેલું, કાપેલું.

☐छिन्न, लून, छित, दित, छेदित, खण्डित, वृक्ण, 'दात' [छात शि. १३४] ।

*कृत्यते इति कृत्तम् ।

**कृत्ति**-स्त्री. ६३०-ચામડી.

द्र० अजिनशब्दः ।

*कृत्यतेऽसाविति कृत्तिः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**कृत्तिका**—स्त्री. १०९—કૃત્તિકા નક્ષત્ર.
□बहुला, अग्निदेवा ।
*कृन्तन्ति शुभमिति कृत्तिकाः, "कृतिपुति-" (उणा-७६) इत्यादिना तिक् कित् ।

**कृत्तिकाभव**—पुं-१०५ (शे. १२)—ચન્દ્રમા.
द्र० अत्रिदृग्जशब्दः ।

**कृत्तिकासुत**—पुं-२०८—કાર્તિકેય, શંકરનો પુત્ર.
द्र० अग्निभूशब्दः ।
*कृत्तिकानां सुतः कृत्तिकासुतः, यौगिकत्वात् बाहुलेयः ।

**कृत्तिवासस्**—पुं-१९८—શંકર, મહાદેવ.
द्र० अट्टहासिन्शब्दः ।
*कृत्तिः वासोऽस्येति कृत्तिवासाः, गजाजिनसंव्यानत्वात्, यौगिकत्वात् चर्मवसनः ।

**कृत्य**-न.-१५१४-કાર્ય પ્રવૃત્તિ.
□कार्य, अर्थ, प्रयोजन ।
*क्रियते इति कृत्यम्, "कृवृषि-" ॥५।१।४२॥ इति वा क्यप् ।

**कृत्रिमधूप**—पुं-६४८—અનેક દ્રવ્યોનો બનાવેલ દશાંગ ધૂપ.
□वृकधूप, तुरुष्क, सिल्ह, 'सिहल', पिण्डक, [सिल्हक, यानन शि. ५२] ।
*कृत्रिमश्चासौ धूपश्चेति कृत्रिमधूपः ।

**कृत्स्न**—न.-१४३३—સમસ્ત બધું.
द्र० अखण्डशब्दः ।
*"कृतैप् संवेष्टने" कृत्यते त्यज्यतेऽनेनेति कृत्स्नम्, "कृत्यशौभ्यां स्नक्" (उणा-२९४) ।

**कृपण**—पुं-३६७—કંજૂસ માણસ.
द्र० क्षुद्रकदर्यशब्दः ।
*कल्पते इति कृपणः, "कृपॄकृषि-" (उणा-१८८) इति अणक् ।

**कृपा**—स्त्री-३६९—અનુકંપા, દયા.
द्र० अनुकम्पाशब्दः ।
*कृपणं कृपा "मृगयेच्छा-" ॥५।३।१०१॥ इति साधुः ।

**कृपाण**—पुं-७८२—તલવાર.
द्र० असिशब्दः ।
*कल्पते इति कृपाणः, "कृपिविषि-" (उणा-१९१) इत्याणक् ।

**कृपाणिका**—स्त्री-७८४—કાતર, છરી.
द्र० असिधेनुशब्दः ।
*कल्पते इति कृपाणी, के कृपाणिका ।

**कृपाणी**—स्त्री-९११-કાતર, છરી.
□कर्त्तरी, (कर्त्तरि) कल्पनी ।
*कल्पते इति कृपाणी, "कृपिविषि-" (उणा-१९१) इत्याणक् ।

**कृपाणी**-स्त्री-७८४—છરી.
द्र० असिधेनुशब्दः ।
*कल्पते इति कृपाणी ।

**कृपालु**—पुं-३६८—દયાળુ.
□दयालु, करुणापर, सूरत ।
*कृपाऽस्त्यस्येति कृपालुः, 'कृपाहृदयादालुः" ॥७।२।४२॥ इत्यालुः ।

**कृपीट**—न.-१०७० (शे. १६४)—પાણી પાણી.
द्र० अप्शब्दः ।

**कृपीटयोनि**—पुं-१०९७—અગ્નિ.
द्र० अग्निशब्दः ।
*कृपीटस्याम्भसो योनिर्भूमजत्वाद् मेघानां इति कृपीटयोनिः । 'कृपीटं योनिरस्य' इत्येके ।
**यदाहुः**-
"अद्भ्योऽग्निर्ब्रह्मणः क्षत्रमश्मनो लोहमुत्थितम्" ॥

**कृमि**—पुं-१२०२-શરીરની અંદર ઉત્પન્ન થનાર કરમિયા.

**कृमि**—पुं-१२१०—કરોળીયો.
द्र० अष्टपाद्शब्दः ।
*करोति जालमिति कृमिः, "कृभूभ्यां कित्" (उणा-६९०) इति मिः, क्रिमिरपि ।

**कृमिज**—न.-६४०—અગરુ, અગર.
द्र० अगरुशब्दः ।
*कृमिभिर्जन्यते इति कृमिजं "क्वचित्" ॥५।१।१७१॥ इति डः, कृमिजग्धमित्यपि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**कृमिजगन्ध** न.-६४० (शि. ५१)-અગરુ, અગર.
द्र० अगरुशब्दः ।

**कृमिजा**-स्त्री-६८६-લાખ.
□लाक्षा, द्रुमामय, राक्षा, रङ्गमाता, पलङ्कषा, जतु, क्षतघ्ना ।
*कृमिभिर्जन्यते इति कृमिजा, "क्वचित्" ॥५।१।१७१॥ इति डः ।

**कृमिपर्वत**-पुं-१७० રાફડો.
□वल्मीक, वम्रीकूट, वामलूर, नाकु, शक्रशिरस् ।
*कृमीणां पर्वत इव कृमिपर्वतः ।

**कृमिला**-स्त्री-५५८-ઘણી વાર પ્રસવ કરનારી સ્ત્રી.
□बहुप्रसू ।
*अपत्यानि भूयस्त्वात् कृमीनिव लाति जनयतीति कृमिला ।

**कृश**-पुं-४४९-દુબળો પાતળો.
द्र० अमांसशब्दः ।
*कृश्यति स्मेति कृशः, "अनुपसर्गाः क्षीब-" ॥४।२।८०॥ इति क्ते निपात्यते ।

**कृश**-न.-१४२७-નાનું, થોડું.
द्र० अणुशब्दः ।
*करोतीति कृशम्, "कृवृभृ-" (उणा-५२८) इति कित् शः, कृश्यति वा ।

**कृशानु**-पुं-१०९८-અગ્નિ.
द्र० अग्निशब्दः ।
*कृश्यति दाह्याभावे इति कृशानुः, "कशेरानुक्" (उणा-७९४) ।

**कृशाश्विन्**-पुं-३२९-ચારણ.
द्र० आजीवशब्दः ।
*कृशाश्वेन प्रोक्तं नटसूत्रं वेत्त्यधीते वा कृशाश्वी, "कृशाश्वकर्मन्दादिन्" ॥६।३।१९०॥ इति इन् ।

**(कृशेतर)**-पुं-१७-જાડું.

**कृषक**-पुं-८९२-હળ, કોસ-જેનાથી ભૂમિ ખેડાય છે તે હળ.
□फाल, कुशिक, फल ।
*कर्षन्त्यनेनेति कृषकः, " कृषेर्गुणवृद्धी च " (उणा-३१) इति किदकः ।

**(कृषक)**-पुं-८९०-ખેડૂત.
द्र० कर्षकशब्दः ।

**कृषि**-स्त्री-८९६-ખેતી.
□अनृत, [प्रमृत शि. ७६] ।

**कृषिक**-पुं-८९०-ખેડૂત.
द्र० कर्षकशब्दः ।
*कषतीति कृषिकः, "पापुलि"—(उणा-४१) इति किदिकः कृषकोऽपि ।

**कृषिविल**-पुं-८९०-ખેડૂત.
द्र० कर्षकशब्दः ।
*कृषिरस्त्यस्येति कृषिवलः, 'कृष्यादिभ्यो वलच्' ॥७।२।२७॥ "वलच्यऽपित्रादेः" ॥३।२।८२॥ इति दीर्घः ।

**कृष्टि**-पुं-३४१-વિદ્વાન, પંડિત.
द्र० अभिरूपशब्दः ।
*कर्षति विविङ्क्ते इति कृष्टिः, "दमुषिकृषि-" (उणा-६५१) इति तिक् ।

**कृष्ण**-(परि) पुं-१७-કાળું.
□असित, सितेतर ।

**कृष्ण**-पुं-२१५-વિષ્ણુ, નારાયણ, કૃષ્ણ.
द्र० अच्युतशब्दः ।
*कृष्णवर्णत्वात् कृष्णः ।

**कृष्ण**-न.-४१९-કાળાં મરી.
द्र० ऊषणशब्दः ।
*कृष्णं वर्णेन, कर्षति तैक्ष्ण्याद् वा ।

**कृष्ण**-पुं-६९७-કૃષ્ણ, વાસુદેવ.
□वसुदेवभू ।
*कृष्णवर्णत्वात् कृष्णः, कर्षति शत्रूनितिवा ।

**कृष्ण**-न.-१०५१-સુરમો.
□स्त्रोतोऽञ्जन, कापोत सौवीर, यामुन ।
*कृष्णं वर्णेन ।

**कृष्ण** पुं-१३९७-શ્યામવર્ણ.
द्र० असितशब्दः ।
*कर्षति वर्णानिति कृष्णः, "वृवीह्वा-" (उणा-१८३) इति कित् णः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**कृष्ण**-पुं-१४७ (शे. २२)-कृष्णपक्ष.

□निशाह्वय ।

**कृष्ण**-न.-१०४१ (शे. १६०)-सीसुं.

द्र० गण्डुपदभवशब्दः ।

**कृष्णकर्मन्**-पुं-८५५-दुराचारी ब्राह्मण.

□शिश्विदान, (दुराचार) ।

*कृष्णं मलिनं कर्माऽचारोऽस्येति कृष्णकर्मा दुराचारः, "शिश्विदानः कृष्णकर्मा" **इत्यमरः** ।

**कृष्णकाक**-पुं-१३१३-काळो कागडो.

द्र० काकोलशब्दः ।

*कृष्णश्चासौ काकः कृष्णकाकः ।

**कृष्णतण्डुला**-स्त्री-४११ (शे. १०३)-पीपर.

द्र० उपकुल्याशब्दः ।

**कृष्णपक्ष**-पुं-७२० (शे. १३९)-अर्जुन.

द्र० अर्जुनशब्दः ।

**कृष्णपिङ्गला**-स्त्री.-२०५ (शे. ५१)-पार्वती.

द्र० अद्रिजाशब्दः ।

**कृष्णभूम**-पुं.-९५३-काळीभूमिवाळो देश.

द्र० उदगूभूमशब्दः ।

*कृष्णा भूमिरस्येति कृष्णभूमः, "सङ्ख्यापाण्डूदक्कृष्णाद् भूमेः" ॥७।३।७८॥ इत्यत् समासान्तः ।

**कृष्णमृत्तिक**-पुं-९५३-काळीभूमिवाळो देश.

द्र० उदगूभूमशब्दः ।

*कृष्णा मृत्तिकाऽस्येति कृष्णमृत्तिकः ।

**कृष्णला**-स्त्री-११५५-चणोठी.

□गुञ्जा, 'काकचिञ्ची, काकचिञ्च, काकचिञ्चा ।'

*कृष्णं प्रान्तं लातीति कृष्णला ।

**कृष्णवर्त्मन्**-पुं-१०९८-अग्नि.

द्र० अग्निशब्दः ।

*कृष्णो धूमो वर्त्माऽस्येति कृष्णवर्त्मा ।

**कृष्णशार**-पुं-१९४-हरणनी जात, एक प्रकार.

*कृष्णेन वर्णेन शारः शबलः इति कृष्णशारः ।

**कृष्णशृङ्ग**-पुं-१२८२-पाडो.

द्र० कासरशब्दः ।

*कृष्णं शृङ्गमस्येति कृष्णशृङ्गः ।

**'कृष्णसार'**-पुं-१२९४-एक प्रकारनी हरणनी जात.

**कृष्णस्वसृ**-स्त्री-२०४-पार्वती.

द्र० अद्रिजाशब्दः ।

*कृष्णस्य स्वसा कृष्णस्वसा, नन्दपुत्रीत्वात् ।

**कृष्णा**-स्त्री-४२१-पीपर.

द्र० उपकुल्याशब्दः ।

*कृष्णा वर्णेन, कर्षति कफं वा ।

**कृष्णा**-स्त्री-७१०-द्रौपदी.

□पाञ्चाली, द्रौपदी, सैरन्ध्री, नित्ययौवना, वेदिजा, याज्ञसेनी ।

*कर्षति मनः कृष्णा, वर्णेन वा ।

**कृष्णा**-स्त्री-२०५ (शे. ४९)-पार्वती.

द्र० अद्रिजाशब्दः ।

**कृष्णामिष**-न.-१०३८-लोढुं.

द्र०-अयस्शब्दः ।

*कृष्णेन वस्तुना आमिषति स्पर्धते इति कृष्णामिषम् ।

**कृष्णावास**-पुं-११३१-पीपळो.

द्र० अश्वत्थशब्दः ।

*कृष्णस्यावासः कृष्णावासः ।

**कृष्णिका**-स्त्री-४१९-राइ.

द्र० असुरीशब्दः ।

*कृष्णेव कृष्णिका वर्णेन ।

**कृसर**-पुं स्त्री-३९८-तल मिश्रित अन्न.

□त्रिसर ।

*क्रियते पर्वणीति कृसरः, "कृधूतन्यृपिभ्यः कित्" (उणा-४४०) इति सरः ।

पुंस्त्रीलिङ्गोऽयम्, क्लीबेऽपि **वैजयन्ती**, यदाह-"तिलतन्दुलमाषैस्तु कृसरा त्रिसरा त्रयी" ॥ इति ॥

**केकर**-पुं-४५८-त्रांसी आंख वाळो.

□वलिर ।

*'किः सौत्रः' कयतीति केकरः, वक्रदृष्टिः "किशृभ्यः :" (उणा-४३५) इति करः, के मूर्ध्नि करोत्यक्षिणी चलतारकत्वादिति वा ।

**केका**-स्त्री-१३२०-मोरनी वाणी, टहुकार.

*कायत्यनया इति केका, "निष्कतुरुष्क-" (उणा-२६) इति के निपात्यते, के मूर्ध्नि कायतीति वा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**केकिन्**–पुं–१३१९–મોર.

☐सर्पभुज्, मयूर, बर्हिण, नीलकण्ठ, मेघसुहृत्, शिखिन्, (शिखाबल) शुक्लापाङ्ग [चित्रपिङ्गल, नृत्यप्रिय, स्थिरमद, खिलखिल, गरव्रत शे. १८८, मार्जारकण्ठ, मरुक, मेघनादानुलासक, मयुक, बहुलग्रीव नगावास, चन्द्रकिन् शे. १८९, बर्हिन् शि. ११७]।

द्र०अत्रिदृग्जशब्दः ।

**खस्फटिक**-(द्वि. व.)-पुं-१०६८-સૂર્ય, ચંદ્રકાંત મણિ તે.

☐(आकाशस्फटिक) ।

**खातक**-न.-१०९४-ખોદેલી તળાવડી.

☐पुष्करिणी, तडागिका ।

*खन्यते खातं ह्रस्वं खातं इति खातकम् ।

**खातिका**-स्त्री-१०९५-ખાઈ

☐परिखा, खेया ।

*खातैव इति खातिका दुर्गवेष्टनहेतुः ।

**खादन**-न.-४२३ ભોજન,જમવું.

द्र०अदनशब्दः ।

*खाद्यते इति खादनम् ।

**खादन**-(ब. व.) पुं-५८४-દાંત.

☐द्विज, रद, रदन, दशन, दन्त, दंश, मल्लक, [मुखखुर, खरु, दालु शे. १२२।१२३] ।

*खादन्त्येभिः इति खादनाः ।

**खानि**-स्त्री-१०३६-ખાણ.

☐आकर, खनि, गञ्जा ।

*खन्यन्ते धातवोऽस्यां इति खानिः स्त्रीलिङ्गः "कृशकुटि-" (उणा-६१९) इति वा णिदिः ।

**खापगा**-स्त्री-१०८२-ગંગાનદી.

द० ऋषिकुल्याशब्दः ।

*खस्य आपगा इति खापगा ।

**खारी**-स्त्री-८८६-સોળ-દ્રોણ પ્રમાણ.

*षोडशभिः द्रोणैः खन्यते इति खारी, "द्वार-शृङ्गार"-(उणा-४११) इत्यारे निपात्यते ।

**(खारीक)**-पुं-९६९-એક ખારી પ્રમાણ ધાન્ય વાવી શકાય તેવું ખેતર.

*खार्या वापः इति खारीकः ।

**खिल**-न.-९४०-ખેડયા વગરના ખેતરની ભૂમિ.

☐अप्रहत ।

*खलन्त्यत्र मूषिकाद्याः इति खिलम्, पृषोदरादित्वादित्वम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**खिलखिल्ल**—પું-૧૩૨૦ (શે. ૧૮૮)-મોર.

द्र०केकिन्शब्दः ।

**खुङ्खणी**—સ્ત્રી-૨૯૦ (શે. ૪)-ચાંડાલની વીણા.

द्र०कटोलवीणाशब्दः ।

**खुङ्गाह**—પું-૧૨૩૮-કાળો ઘોડો.

*खुरैः गाहते इति खुङ्गाहः ।

**खुर** (બ. વ.)-પું ન.–૧૨૪૪–ખરી.

☐शफ ।

*खुरन्ति विलिखन्ति क्ष्मां इति खुराः ।

**खुरणस्**—પું-૪૫૨-તીક્ષ્ણ નાકવાળો, પશુની ખરી જેવા નાકવાળો.

☐खुरणस, (विकटघोण) ।

*खुराकृतिर्नासिकाऽस्य इति खुरणाः ।

**खुरणस**—પું-૪૫૨-તીક્ષ્ણ નાક વાળો, પશુની ખરી જેવા નાકવાળો.

☐खुरणस्, (विकटघोण)।

**खुरली**—સ્ત્રી-૭૮૮-શસ્ત્ર કલાનો અભ્યાસ.

द्र०अभ्यासशब्दः ।

*खुरन्ति छिन्दन्त्यस्यां इति खुरली, "मुरलोरल"–(उणा-४७४) इत्यले निपात्यते ।

**खुरोपम**—પું-૭૮૭ (શે. ૧૪૮)-અસ્ત્રા જેવું શસ્ત્ર [ખરપલી].

☐पट्टिस ।

**खेचर**—ન.-૧૦૫૬ રાતી હીરાકસી.

☐कासीस, धातुकासीस, धातुशेखर ।

*खे चरति इति खेचरम् ।

**खेट**—પું-૯૭૨-નગરનો અર્ધો ભાગ.

*खिट्यते इति खेटः ।

**खेट**—ન.-૧૪૪૩-અધમ, હલકુ.

द्र०अधमशब्दः ।

*खेटति त्रस्यति इति खेटम् ।

**खेट**—પું-૪૬૨ (શે. ૧૦૭)-કફ.

द्र०कफशब्दः ।

**खेटक**—ન.-૭૮૩-ઢાલ, ફલક.

द्र०अड्डनशब्दः ।

*खेटयत्युत्त्रासयति इति खेटकम्, पुंक्लीबलिङ्गः खेटमपि ।

**खेद**—પું-૨૯૯-શોક, કરૂણ રસનો સ્થાયીભાવ.

☐शोक, शुच, शोचन ।

*खेदनं इति खेदः ।

**खेय**—ન.-૧૦૯૫-ખાઈ

☐परिखा, खातिका ।

*खन्यते इति खेयम्, "खेयमृषोद्ये"- ॥५।१।३८॥ इति साधुः ।

**खेलनी**—સ્ત્રી-૪૮૭-શેત્રંજ વગેરેની સોગટી.

☐शार, शारि ।

*खेल्यतेऽनया इति खेलनी ।

**खेला**—સ્ત્રી-૫૫૬-રમત ક્રીડા.

द्र०कूर्दनशब्दः ।

*खेलनं इति खेला ।

**खोङ्गाह**—પું-૧૨૩૭-ધોળો અને પીળો ઘોડો.

*खमुद्गाहते इति खोङ्गाहः, पृषोदरादित्वात् ।

**खोड**—પું-૪૫૫-લંગડો.

☐खञ्जक, (खञ्ज), खोर ।

*खोडति गतौ प्रतिहन्यते इति खोडः, "खोडृ-प्रतिघाते" ।

**खोर**—પું-૪૫૫-લંગડો

☐खञ्जक (खञ्ज) खोड ।

*खोरति इति खोरः ।

**खोल**—ન.-૭૬૮ (શિ. ૬૭)-પાઘડી.

द्र०शिरस्कशब्दः ।

**ख्यात**—પું-૧૪૯૩-પ્રસિદ્ધ, વિખ્યાત.

☐प्रतीत, प्रज्ञात, वित्त, प्रथित, विश्रुत, विज्ञात।

*ख्यायते स्म इति ख्यातः ।

卐

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## 'ग'

**गगन**–ન.–१६३–આકાશ.

द्र०अनन्तशब्दः ।

*गच्छन्त्यनेन देवा इति गगनं, "वियद्गगन-गहनादयः" (उणा–२७५) इत्यनान्तो निपात्यते ।

(**गगन**)–ન.–१०५१–અબરખ.

द्र० अभ्रकशब्दः ।

**गगनध्वज**–પું–९७–સૂર્ય.

द्र०अंशुशब्दः ।

**गगनाध्वग**–પું–९७–સૂર્ય.

द्र० अंशुशब्दः ।

**गङ्गा**–સ્ત્રી–१०८१–ગંગાનદી.

द्र०ऋषिकुल्याशब्दः ।

*गच्छति समुद्रं इति गङ्गा, "गम्यमि"–(उणा–९२) इति गः, गामगं वा गच्छतीति वा पृषोदरादित्वात् ।

**गङ्गाधर**–પું–७५–શંકર, મહાદેવ.

द्र०अट्टहासिन्शब्दः ।

**गङ्गाधर**–પું–१९९–શંકર, મહાદેવ.

द्र०अट्टहासिन्शब्दः ।

**गङ्गाभृत**–પું–१९९–શંકર, મહાદેવ.

द्र०अट्टहासिन्शब्दः ।

*गङ्गां बिभर्ति इति गङ्गाभृत् ।

**गङ्गासुत** પું–२०८–શંકરનો પુત્ર.

द्र०अग्निभूशब्दः ।

*गङ्गायाः सुतः इति गङ्गासुतः ।

**गच्छ**–પું–१११४–વૃક્ષ, ઝાડ.

द्र०अगशब्दः ।

*गम्यते इति गच्छः, "तुदिमदि"– (उणा–१२४) इति छक् ।

**गज**–પું–४७–શ્રી અજિતનાથ ભગ. નું લાંછન.

**गज**–પું–७५१–સેનાનું પ્રથમ અંગ.

**गज**–પું–१२१७–હાથી.

द्र०अनेकपशब्दः ।

*गजति माद्यति गर्जति वा गजः ।

**गजता**–સ્ત્રી–१४२२– હાથીનો સમૂહ.

*गजानां समूहः इति गजता ।

**गजता**–સ્ત્રી–१२२३–હાથીનો સમુદાય.

□घटा, 'हास्तिक' ।

**गजपुर**–ન.–९७८–દિલ્હી, હસ્તિનાપુર.

□हास्तिनपुर, हस्तिनीपुर, हस्तिनापुर, गजाह्वय ।

**गजप्रिया**–સ્ત્રી–११५२–શરૂ, શાલેડુ.

□सल्लकी, 'गजभक्ष्या, (गजभक्षा), सुवहा, सुरभी (सुरभि) रसा, महेरणा, (महेरुणा) कुन्दुरुकी, (शल्लकी, सिल्लकी), हलदिनी, (ह्लादिनी)' ।

*गजस्यप्रिया इति गजप्रिया ।

**गजाजीव**–પું(બ. વ.)–७६२–મહાવત.

□आधोरण, हस्तिपक, इभपालक (मण्ठ) ।

*गजान् गजेभ्यो गजेषु वा आजीवन्ति इति गजाजीवाः ।

**गजास्य**–પું–२०७– ગણેશ, વિનાયક.

द्र०आखुगशब्दः ।

*गजस्येवाऽऽस्यमस्य इति गजास्यः ।

(**गजासुरद्वेषिन**)–પું–२००–શંકર મહાદેવ.

द्र०अट्टहासिन्शब्दः ।

**गजासुहृद्**–પું–२००–શંકર, મહાદેવ.

द्र० अट्टहासिन्शब्दः ।

*गजस्य असुहृत् इति गजासुहृत् गजासुरहन्तृत्वात् ।

**गजाह्वय**–९७८–દિલ્હી, હસ્તિનાપુર.

□गजपुर, हस्तिनीपुर, हस्तिनापुर, हास्तिनपुर ।

**गञ्जा**–સ્ત્રી–१००१–દારૂ પીવાનું સ્થાન.

□मदिरागृह ।

*गञ्जन्ति नदन्त्यस्यां क्षीवा इति गञ्जा ।

**गञ्जा**–સ્ત્રી–પું–१०३६–ખાણ.

□आकर, खनि, खानि ।

*गञ्जन्ति शब्दायन्तेऽस्यां इति गञ्जा, पुंस्त्रीलिङ्गः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**गडक**-पुं-१३४५-શકુલ મચ્છનું બાળક.
□शकुलार्भक ।
*गडति पुच्छाच्छोटनात् सिञ्चति इति गडकः ।
**गडयित्नु**-१६४ (शि. २८)-મેઘ વાદળ
द्र०अभ्रशब्दः ।
**गडु**-पुं-४६६-પીઠમાં થયેલ ગાંઠા, ખુંધ.
□पृष्ठग्रन्थि ।
*गडति वैरूप्यं सिञ्चति इति गडुः, पुंलिङ्गः "भृमृतृ"-(उणा-७१६) इति उः ।
**'गडुची'**-स्त्री-११५७-ગળો
द्र०अमृताशब्दः ।
**गडुल**-पुं-४५३-કૂબડો, કુબ્જ.
□कुब्ज [न्युब्ज शि. ३२] ।
*गडुः पृष्ठग्रन्थिरस्यास्ति इति गडुलः, सिध्मादित्वाल्लः ।
**गडूची**-स्त्री-११५७ ગળો.
द्र०अमृताशब्दः ।
*गुडति रक्षति कफं इति गडूची, "गुडेरूचट्" (उणा-१२०) ।
**गडोल**-पुं-४२५-કોળીઓ.
द्र०कवकशब्दः ।
*गडयते इति गडोलः, "पिञ्छोल-" (उणा-४९५) इत्योले निपात्यते ।
**गण**-पुं-३१-સરખી વાચના લેનારા મુનિઓનો સમુદાય.
**गण**-पुं-(પ. વ.)-२०१-શંકરના ગણો.
□प्रमथ, पार्षद, (परिषद) ।
*गण्यन्ते दिव्यपदप्राप्त्येति गणाः ।
**गण**-पुं-१४११-સમૂહ સમુદાય.
द्र०उत्करशब्दः ।
*गण्यते इति गणः ।
**गणक**-पुं-४८२-જ્યોતિષી, જોષ.
द्र०आदेशिन्शब्दः ।
*गणयति इति गणकः ।
**गणदेवता**-स्त्री-८९ (શે. ७)-ગણદેવતાઓ.
**(गणनाथ)-पुं**-११९ શંકર, મહાદેવ.
द्र०अट्टहासिन्शब्दः ।
**गणनायिका**-स्त्री-२०५ (શે. ५३)-પાર્વતી.
द्र०अद्रिजाशब्दः ।
**(गणनीय)**-न.-८७२-ગણી શકાય તેવું.
□गण्य, गणेय, संख्येय ।
**गणरात्र**-पुं न.-१४३-રાત્રિનો સમુહ.
□निशागण ।
*गणा रात्रयः समाहृता इति गणरात्रः पुंक्लीबलिङ्गः, "संख्यातैक"—।।७।३।११९।। इत्यादिना अत्समासान्तः ।
**गणाधिप**-पुं-(બ व.)-३१-ગણધર ભગવાન.
*गणानां अधिपाः इति गणाधिपाः ।
**गणि**-पुं-७८-આચારાંગ વગેરે પ્રવચન જાણનાર.
□अनूचान ।
*गण्यते पूज्यतया इति गणिः "स्वरेभ्य इः"-(उणा-६०६) इति इः ।
**गणिका**-स्त्री-५३२-વેશ્યા..
□साधारणस्त्री, वेश्या पण्याङ्गना, पणाङ्गना, भुजिष्या, लञ्जिका, रूपाजीवा [खगालिका, वरवाणि, कामलेखा, क्षुद्रा शे. ११३, ११४] ।
**गणिका**-स्त्री-३३४-ગણિકા વેશ્યા.
□अञ्जुका ।
*गणयति ईश्वरानीश्वरौ इति गणिका, गणः पेटकोऽस्त्यस्याः ।
**(गणिका)**-स्त्री-१२१८ (શે. ११७)-હાથણી.
□धेनुका, वशा (हस्तिनी) [वासिता, कर्णधारिणी शे. ११७.] ।
**'गणिका'** स्त्री-११४८-જુઈ.
द्र०मागधीशब्दः ।
**गणिकापति**-पुं ५१९-ગણિકાનો પતિ.
□भुजङ्ग ।
**गणिकाभृति**-स्त्री-३६३ ગણિકાનો પગાર.
□भोग, [भाटि शे ९४] ।
*गणिकायाः भृतिर्वेतनं इति गणिकाभृतिः ।
**गणिपिटक**-न.-२४५-દ્વાદશાંગી.
□द्वादशांगी ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**गणेय**-न.-८७२ ગણી શકાય તેવું.

□गण्य, संख्येय, (गणनीय) ।

*गणेयम् "गयहृदयादयः" (उणा-३७०) इति-एये निपात्यते यद् वाचस्पतिः– "गणनीयं तु गणेयम्" इति ।

**गणेरुका**-स्त्री–५३३ (शे. १९४) દાસી.

द्र०कुटहारिकाशब्दः ।

**गणेश**-पुं–२०७–ગણેશ વિનાયક.

द्र०आखुगशब्दः ।

*गणानां ईशः इति गणेशः यौगिकत्वात् प्रथमाभिधः ।

**गणेश्वर**–पु–१२८५ (शे १८४) સિંહ.

द्र०इभारिशब्दः ।

**गण्ड**–पुं–४६६ વિસ્ફોટક ફોલ્લો.

□स्फोटक, पिटक, [विस्फोट शि. ३३] ।

*गच्छति विकारं इति गण्डः, "पञ्चमाड्डुः" (उणा–१६८) इति डः ।

**गण्ड**–पुं–५८२-કપોલની આગળનો ભાગ, લમણું.

*कपोलात् परो गण्डति इति गण्डः, गल्लादयस्त्रयोऽल्पविशेषत्वादेकार्था **इत्येके** ।

**गण्ड**–पु–१२२५–હાથીનું ગંડસ્થલ.

□करट, कट ।

**गण्डक**–पुं–१२८७–ગેંડો.

□खड्गिन्, खड्ग, वाध्रीणस ।

*गण्डति संहन्यते इति गण्डकः ।

**गण्डमाल**–पुं-४६७ કંઠમાળ.

□गलगण्ड ।

*गण्डान् स्फोटन् मलते इति गण्डमालः ।

**गण्डशैल**–पुं-(બ. વ.)-१०३६ પર્વતમાંથી છૂટા પડેલા મોટા પથ્થર.

*शैलस्य गण्डा इव गण्डाः शैला इव वा गण्डशैलाः, गिरेः स्थूलाऽश्मानश्च्युता भूकम्पादिना गलिताः ।

**गण्डि** स्त्री-११२०-મુળથી લઇને શાખા સુધીનો ભાગ.

□प्रकाण्ड, (गण्डिका) ।

अ. ३०

**(गण्डिका)**–स्त्री–११२०–મૂળમાંથી લઇને શાખા સુધીનો ભાગ.

□गण्डि, प्रकाण्ड ।

**गण्डूपद** पुं–१२०३–અળસિયા.

□किञ्चुलक, 'किञ्चिलक, कुसू, भूलता–(महीलता) [किञ्चुलक शि. १०८] ।

*गण्डा ग्रन्थयः पदान्यस्य इति गण्डूपदः ।

**गण्डूपदभव**–न –१०४१–સીસુ.

सीस, 'सीसक', सीसपत्रक, नाग, वप्र, सिन्दूरकारण, वर्ध्र, स्वर्णारि, योगेष्ट, यवनेष्ट, सुवर्णक, [महाबल, चीन पट्ट, समोलूक, कृष्ण, त्रपुबन्धक शे १६०] ।

*गण्डूपदेभ्यो भवति इति गण्डूपदभवम् ।

**गण्डूपदी**-स्त्री-१२०३ ગંડોલા.

□शिली ।

*गण्डूः पदान्यस्या इति गण्डूपदी ।

**गण्डूष**–पुं–५९८–પાણીના આધાર રૂપે બનાવેલી પસલી (ચાંગળું)

□चुलक, चल, [चलुक शि ४७] ।

*गण्डयति इति गण्डूषः "खलिफलि"–(उणा–५६०) इत्यूषः ।

**गण्डोल**–पुं–४२६–કોળીઓ.

द्र०कवकशब्दः ।

*गण्डति वदनैकदेशे भवति इति गण्डोलः, "कटिपटि"-(उणा४९३) इत्योलः ।

**गण्य**–न.-८७२–ગણી શકાય તેવું

□गणेय, संख्येयं, (गणनीय) ।

*गण्यते इति गण्यम् ।

**गताक्ष**–पुं–४५७–આંધળો.

□अन्ध, (चक्षुर्विकल), [अनेडमूक शे. १०६] ।

**गति**-स्त्री–४७०–લોહી ઝરતું વ્રણ, નાસુર.

□नाडीव्रण ।

*गच्छत्यनया रुधिरं इति गतिः ।

**गति**-स्त्री–१५००–ચાલવું, વિહાર.

द्र०ईर्याशब्दः ।

*गमनं इति गतिः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**गद**-पुं.-४६३-રોગ.

द्र०अपाटवशब्दः ।

*गदति व्यथां इति गदः ।

**गदयित्नु**-पुं.-१६४ (શે. २८)-મેઘ વાદળ.

द्र०अभ्रशब्दः ।

**गदाग्रज**-पुं-२१६-વિષ્ણુ, નારાયણ.

द्र०अच्युतशब्दः ।

*गदस्याऽग्रजो इति गदाग्रजः ।

**(गदाधर)**-पुं-२१९-વિષ્ણુ નારાયણ.

द्र०अच्युतशब्दः ।

**गदान्तक** पुं-(द्वि. व.)-१८२ (શે. ३१)-સ્વર્ગના વૈદ્ય.

द्र०अश्विजशब्दः ।

**गदाभृत्**-पुं-२१९-વિષ્ણુ, નારાયણ.

द्र०अच्युतशब्दः ।

*गदां बिभर्ति इति गदाभृत्, यौगिकत्वात् गदाधरः ।

**गदित**-न.-२४१ (શે. ८२)-વાણી, વચન.

द्र०भाषितशब्दः ।

**गदिनी**-स्त्री-२०५ (શે. ५३)-પાર્વતી.

द्र०अद्रिजाशब्दः ।

**गद्गदस्वर**-पुं-१२८३ (શે. १८३)-પાડો.

द्र०कासरशब्दः ।

**गन्त्री**-स्त्री-७५३-બેલગાડી.

☐कम्बलिवाह्य ।

*गमनशीला इति गन्त्री ।

**गन्दुक**-पुं-६८९(શિ.५९)-દડો.

☐कन्दुक, गेन्दुक ।

**गन्ध**-पुं-१३९०-સુગંધ.

☐जनमनोहारिन्, सुरभि, घ्राणतर्पण, समाकर्षिन्, निर्हारिन् ।

*गन्धयते इति गन्धः, घ्राणग्राह्योऽर्थः सः ।

**गन्धक**-पुं-१०५७-ગંધક.

☐गन्धाश्मन्, शुल्वारि, पामारि, कुष्ठारि, गन्धिक, सौगन्धिक, शुकपुच्छ ।

**गन्धकालिका**-स्त्री.-८४७-વ્યાસ ઋષિની માતા.

☐सत्यवती, वासवी, योजनगन्धा, दाशेयी शालङ्कायनजा, [गन्धवती, मत्स्योदरी शे. १५४ ] ।

*गन्धेन युक्ता काली श्यामी इति गन्धकाली के गन्धकालिका ।

**गन्धज्ञा**-स्त्री-५८०-નાક.

☐नासिका, नासा, घ्राण, घोण, विकूणिका, नक्र, नर्कुटक, शिङ्घिनी, [गन्धहृत्, नसा, गन्धवहा, नस्या, नासिक्य, गन्धनालिका शे. १२१] ।

*गन्धं जानाति इति गन्धज्ञा ।

**गन्धदारु**-पुं-६४० (શે. १३२)-અગરુ, અગર.

द्र०अगरुशब्दः ।

**गन्धधूली**-स्त्री-६४४-કસ્તુરી.

द्र०कस्तूरीशब्दः ।

*गन्धप्रधाना धूली इति गन्धधूली ।

**गन्धनालिका**-स्त्री-५८१ (શે. १२१)-નાક.

द्र०गन्धज्ञाशब्दः ।

**गन्धपिशाचिका**-स्त्री-६४९-એક સ્થાનેથી બીજે સ્થાને જતો ધૂપ.

*गन्धेन पिशाचिकेवाऽस्खलिता दृश्यगतित्वाद् इति गन्धपिशाचिका ।

**'गन्धफली'**-स्त्री-११४९-કાંગ.

द्र०प्रियङ्गुशब्दः ।

**गन्धमातृ**-स्त्री.-९३६-પૃથ્વી.

द्र० अचलाशब्दः ।

*गन्धस्य मातेव इति गन्धमाता, भुवो गन्धगुणाऽऽम्नानात् ।

**गन्धमूषी**-स्त्री-१३०१-છછુંદરી.

☐छुछुन्दरी, (गन्धमूषिका) ।

*गन्धप्रधाना मूषी इति गन्धमूषी ।

**गन्धमूषिका**-स्त्री-१३०१-છછુંદરી.

•छुछुन्दरी, (गन्धमूषिका) ।

**गन्धरस**-पुं-१०६३-હીરાબોળ.

☐बोल, प्राण, पिण्ड, गोपरस, शश, [गोप; रस शि. ९४] ।

*गन्धप्रधानो रसः इति गन्धरसः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**गन्धर्व**–पुं–४३–श्रीकुंथुनाथ ભગ.ના શાસનદેવ.

*गन्धयते अर्दयति विघ्नान् इति गन्धर्वः ।

**गन्धर्व** पुं–(બ. વ.)–९१–વ્યંતરદેવ.

**गन्धर्व** पुं–(બ. વ.)–१८३–હાહા વગેરે ગન્ધર્વો, દેવોના ગવૈયા.

☐गान्धर्व, देवगायन ।

*गन्धयन्ते हिंसन्ति दुःखं इति गन्धर्वा "गन्धे· र् चान्तः" (उणा–५०८) इति वः गौर्ध्रियते वाक् सप्तस्वरसंपन्ना तिष्ठत्यत्रेति वा ।

**गन्धर्व**–पुं–१२३३–ઘોડો.

द्र०अर्वन्शब्दः ।

*गन्ध्यतेऽर्ध्यते इति गन्धर्वः "गन्धेरर्चान्तः" (उणा–५०८) इति वः ।

**'गन्धहस्तक'**–पुं.–११५०–એરંડો.

द्र० एरण्डशब्दः ।

**गन्धवती**-स्त्री–८४८ (शे. १५४)–વ્યાસ ઋષિની માતા.

द्र०गन्धकालिकाशब्दः ।

**गन्धवह**–पुं–११०६–પવન.

द्र०अङ्कतिशब्दः ।

*गन्धस्य वहो इति गन्धवहः ।

**गन्धवहा**–स्त्री-५८१ (शे. १२१)–નાક.

द्र०गन्धज्ञाशब्दः ।

**गन्धवाह**–पुं–११०७ (शि. १००)–પવન.

द्र०अङ्कतिशब्दः ।

*गन्धस्य वहो इति गन्धवाहः ।

**गन्धसार**–पुं–६४१–ચંદન, સુખડ.

☐श्रीखण्ड, रोहणद्रुम, मलयज, चन्दन, [एकाङ्ग, भद्रश्री, फलकिन् शे. १३१] ।

*गन्धेन सारो इति गन्धसारः ।

**गन्धहृत्**-पुं–५८१–(शे. १२१)–નાક.

द्र०गन्धज्ञाशब्दः ।

**गन्धाम्बुवर्ष**–न.–६३–સુગંધી જલનો વરસાદ, ભગ. નો ૩૦ મો અતિશય.

**गन्धाश्मन्**–पुं–१०५७–ગંધક.

द्र० गंधकशब्दः ।

*गन्धप्रधानोऽश्मा इति गन्धाश्मा ।

**गन्धिक**–पुं–१०५७ ગંધક.

द्र० गन्धकशब्दः ।

*गन्धोऽस्त्यस्य इति गन्धिकः ।

**गन्धोत्तमा**–स्त्री–९०२–મદિરા.

द्र० अब्धिजाशब्दः ।

*गन्धेन उत्तमा इति गन्धोत्तमा ।

**गन्धोली**–१२१५–ભમરા જેવું ચંચલ પાંખવાળું જીવડું.

☐तैलाटी, वरटा, 'वरटी' ।

*गन्धयति अर्दयति इति गन्धोली, "पिञ्छोल–" (उणा–४९५) इत्योले निपात्यते ।

**गभस्ति**–पुं–९५–સૂર્ય.

द्र० अंशुशब्दः ।

*गृध्यते अभिकाङ्क्ष्यते लोकैरसाविति गभस्तिः "गृधेगंभच–" (उणा–६६१) इति अस्तिक् गृधेर्गभा· देशश्च, गां बभस्ति दीपयतीति वा पृषोदरादित्वात् ।

**गभस्ति**–पुं–१००–કિરણ.

द्र० अंशुशब्दः ।

**(गभस्तिपाणि)**–पुं–९६–સૂર્ય.

द्र० अंशुशब्दः ।

**गभीर** न.–१०७१–ગંભીર, ઊંડુ.

☐निम्न, गम्भीर ।

*गच्छति जलमत्र इति गभीरम्, "जम्बीरगभीर–" (उणा–४२२) इति इरे निपात्यते ।

*गच्छति जलमत्र इति गभीरम्, "जम्बीरगभीर"- (उणा–४२२) इति ईरे निपात्यते ।

**गमन**-न.-७८९–ગમન પ્રયાણ.

द्र० अभिनिर्याणशब्दः ।

*गम्यते इति गमनम् ।

**गम्भीर**–न.–१०७१–ગંભીર, ઊંડુ.

☐निम्न, गभीर ।

**गम्भीरवेदिन्**–पुं–१२२२–અંકુશને નહિ ગણનારો હાથી.

☐अवमताङ्कुश ।

*गाम्भीर्येण' वेदयति इति गम्भीरवेदी **यदाहुः**– त्वग्भेदात् शोणितश्रावादामांसं व्यथनादपि । संज्ञां न

लभते यस्तु, गजो गम्भीरवेदसौ ।"

'गम्भीरी'-स्त्री-११४३ सीवणनुं वृक्ष.

द्र० काश्मरीशब्दः ।

गया-स्त्री ९७३-गय राजर्षिनुं नगर, गयानामनुं तीर्थ.

*गच्छन्ति अस्यां इति गया, "गयहृदया"-(उणा-३७०) इत्यये निपात्यते ।

गर-पुं-१३१४-बनावटी झेर.

☐चार, उपविष ।

*गिरति जीवं इति गरः, कृत्रिममौषधादियोगजनितं विषम् ।

गरभ-पुं-५४०-गर्भ.

☐गर्भ, भ्रूण, दोहदलक्षण ।

*गीर्यते इति गर्भ, गृदृरमि-" (उणा-३२७) इति भः

*'कृशृग-" (उणा-३२९) इत्यभे गरभः ।

गरल-पुं न.-११९५-झेर, विष.

☐विष, क्ष्वेड, रस, तीक्ष्ण ।

*गीर्यते रागिभिः इति गरलः, "मुरलोरल"-(उणा-४७४) इति साधुः, गरं लातीति वा पुंक्लीबलिङ्गः ।

गरवत-पुं-१३२० (शे. १८८)-मोर.

द्र० केकिन्शब्दः ।

गरुड-पुं-४३-श्री शांतिनाथ भग.ना शासनदेव.

*गरुड इव गरुडः प्रचण्डत्वाद् ।

गरुड-पुं-२३०-गरुड पक्षी.

द्र० अरुणावरजशब्दः ।

*गिलति नागान् इति गरुडः "गजदवभभ्य उट उडश्च"-(उणा-१५३) इत्युडः, गरुद्भिर्डयते इति वा पृषोदरादित्वात् डस्य लत्वे गरुलः ।

(गरुड)-पुं-७८०-बाणनो एक प्रकार.

(गरुडगामिन)-पुं-२२१-विष्णु.

द्र० अच्युतशब्दः ।

गरुडाग्रज-पुं-१०२-सूर्यनो सारथि, अरुण.

द्र० अनूरुशब्दः ।

*गरुडस्याग्रजो इति गरुडाग्रजः ।

गरुडाङ्क-पुं-२१४-विष्णु.

द्र० अच्युतशब्दः ।

गरुत्-पुं न.-१३१८-पक्षीनी पांख.

☐पत्त्र, पतत्त्र, पिच्छ, वाज, तनूरुह, पक्ष, छद, [पिच्छ शि. ११७] ।

*गिरति खं इति गरुत् "ग्रोमादिर्वा"-(उणा-८९०) इत्युत् पुंक्लीबलिङ्गः ।

गरुत्मत्-पुं-२३१-गरुड पक्षी.

द्र० अरुणावरजशब्दः ।

*गरुतः पक्षाः सन्त्यस्य इति गरुत्मान् ऊर्म्यादित्वात् वत्वं न भवति ।

'गरुत्यमत्'-१३१७-पक्षी

द्र० अगौकस्शब्दः ।

गरुल-पुं-२३०-गरुड पक्षी.

द्र० अरुणावरजशब्दः ।

गर्गरी-स्त्री-१०२२-गागर, दहीं वलोवानी गोळी.

☐कलशि, मन्थनी ।

*गिरति दधि इति गर्गरी, "ऋतष्टित्"-(उणा-९) इत्यप्रत्ययः सरूपद्वित्वं च ।

गर्ज-पुं-१२१८-हाथी.

द्र० अनेकपशब्दः ।

*गर्जति इति गर्जः ।

गर्ज-पुं-१४०५-हाथीनी गर्जना.

☐बृंहित , [गर्जा-शि. १२७]

*गर्जनं इति गर्जः ।

गर्जा-स्त्री-१४०५-(शि. १२७) हाथीनी गर्जना

☐बृंहित, गर्ज ।

*गर्जनं इति गर्जा ।

गर्जि-पुं-१४०६-मेघनी गर्जना.

☐स्तनित, गर्जित, स्वनित, रसित, [ध्वनित वगेरे] ।

*गर्जनं गर्जितं "पदिपठि"-(उणा-६०७) इति इप्रत्यये गर्जिः पुंलिङ्गः ।

गर्जित-पुं-१२२०-मदोन्मत्त हाथी.

☐मत्त, प्रभिन्न ।

*गर्जा संजाताऽस्य इति गर्जितः ।

गर्जित-पुं-१४०६-मेघनी गर्जना.

द्र० गर्जिशब्दः ।

*गर्जनं इति गर्जितः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**गर्त्त**–पुं स्त्री–१३६४–भूमिनो खाडो.

द्र० अगाधशब्दः ।

*गिरति इति गर्त्तः पुंस्त्रीलिङ्गः "दम्यमि–" (उणा–२००) इति तः ।

**गर्त्तिका**–स्त्री–९९९–तंतु शाळा.

☐तन्तुशाला, [तन्तुशाल] ।

*कुविन्दस्थितये गर्तोऽस्त्यस्यां इति गर्त्तिका, "अतोऽनेकस्वरात्" ॥७।२।६॥ इतीकः ।

**गर्दभ**–पुं–१२५६–गधेडो.

द्र० खरशब्दः ।

*गर्दति शब्दायते इति गर्दभः, "कृशृगृ"–(उणा–३२९) इत्यभः ।

**गर्दभाह्वय**–न. ११६४–चंद्रविकासी सफेद कमळ.

द्र० कुमुदशब्दः ।

*गर्दभस्याह्वयोऽस्य इति गर्दभाह्वयम् ।

**गर्दभी**–स्त्री–१२०८–छाणना कीडा, गद्हीआ.

☐गोमयोत्था ।

*गर्दभवर्णत्वाद् गर्दभी ।

**गर्द्ध**–पु–४३०–ईच्छा, अभिलाषा.

द्र० अभिलाषशब्दः ।

*गर्धनं इति गर्द्धः ।

**गर्धन**–पुं–४२९–अतिलोभी.

द्र० अभिलाषुकशब्दः ।

*गर्दनशीलः' भूषा"–॥५।२।४२॥ इत्यनं गर्धनः ।

**गर्भ**–पुं–५४०–गर्भ.

☐गरभ, भ्रूण, दोहदलक्षण ।

*गीर्यते इति गर्भः, "गृदृरमि"–(उणा–३२७) इति भः ।

**गर्भ**–पुं–६०४–पेट.

द्र० उदरशब्दः ।

*गिरत्याहारं इति गर्भः, "गृदृरमि"–(उणा–३२७) इति भः ।

**गर्भक**–न.–१४४–बे रात्रि.

☐रजनीद्वन्द्व ।

*गर्भयतीति गर्भकम् अन्तर्भूतदिनत्वात् ।

**गर्भक**–पुं–६५१–केशमां धारण करवानी पुष्पमाळा.

*केशमध्यगतं पुष्पदाम गर्भस्थत्वाद् गर्भकः ।

**गर्भपाकिन्**–पुं–११६८–पोतानी मेळे पाकता चोखा.

☐षष्टिक ।

*गर्भे पच्यते स्वयमेवेत्येवंशीलो गर्भपाकी णिनि न्यङ्क्वादित्वात् साधुः ।

**गर्भवती**–स्त्री–५३८–सगर्भा स्त्री.

द्र० अन्तर्वत्नीशब्दः ।

*गर्भोऽस्त्यस्या इति गर्भवती ।

**गर्भागार**–न.–९९५–ओरडो, शयनगृह.

द्र० अपवरकशब्दः ।

*अगारस्य गर्भो इति गर्भागारं, राजदन्तादित्वात् पूर्वनिपातः ।

**गर्भाशय**–पुं–५४०–गर्भस्थान, गर्भाशय.

☐जरायु, उल्ब ।

*गर्भ आशेतेऽत्र इति गर्भाशयः ।

**गर्भिणी**–स्त्री–१२६६–गर्भिणी गाय.

☐प्रष्ठौही, 'पष्ठौही' ।

*गर्भोऽस्त्यस्या इति गर्भिणी ।

**गर्व**–पुं–३१६–अभिमान गर्व.

द्र० अभिमानशब्दः ।

*गर्वणं इति गर्वः गिरतीव परमिति वा "लटिखटि"–(उणा–५०५) इति वः पुंलिङ्गः **वैजयन्तीकास्तु** "अभिमानस्त्वहङ्कारो गर्वोऽस्त्री" इत्याह ।

(**गर्ह**)–पुं–२७१–निंदा.

द्र० अवर्णशब्दः ।

*गर्हणं इति गर्हः ।

**गर्हणा**–स्त्री–२७१–निंदा.

द्र० अवर्णशब्दः ।

*गर्हणं इति गर्हणा ।

**गर्हा**–स्त्री–२७१ (शि. १७)–निंदा.

द्र० अवर्णशब्दः ।

**गर्ह्य**–न.–१४४२–अधम, हलकुं.

द्र० अधमशब्दः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*गह्यते इति गह्यम् ।

**गल**-पुं-५८८-કંઠ.

□निगरण, कण्ठ ।

*गिरत्यनेन "पुंनाम्नि"-।।५।३।१३०।। इति घे लत्वे च गलः, गिलतीति वा ।

**गलकम्बल**-पुं-१२६४-બળદના ગળા નીચે લટકતી ગોદડી

□सास्ना ।

*गलस्य कम्बल इव लम्बमानत्वाद् गलकम्बलः ।

**गलगण्ड**-पुं-४६७-કંઠમાલ રોગ.

□गण्डमाल ।

*गले गण्डो इति गलगण्डः ।

**गलशुण्डिका**-स्त्री-५८५-પડજીભી.

□सुधास्रवा, घण्टिका, लम्बिका ।

*गलस्य शुण्डेव इति गलशुण्डिका ।

**गलन्ती**-स्त्री-१०२१-ઝારી, નાનું પાણીનું પાત્ર.

द्र० आलूशब्दः ।

*गलति अम्भोऽस्यां इति गलन्ती, "सीमन्त" (उणा-२२२) इत्यन्ते निपात्यते ।

**गलस्तनी**-स्त्री-१२७५-બકરી.

द्र० अजाशब्दः ।

*गले स्तनौ अस्या इति गलस्तनी ।

**गलाङ्कुर**-पुं-४६७-ગંડમાળનો એક ગળાનો રોગ.

□रोहिणी ।

*गलेऽङ्कुर इति गलाङ्कुरः ।

**गलि**-पुं-१२६३-શક્તિ હોવા છતાં ધુરાને વહન ન કરનાર બળદ

□दुष्टवृष ।

*गलति भक्षयत्येव इति गलिः, "पदिपठि"-(उणा-६०७) इति इः ।

**गलित**-न.-१४९०-પડી ગયેલ, ગળેલું.

□पतित, च्युत, स्रस्त, भ्रष्ट, स्कन्न, पन्न, 'ध्वस्त' ।

*गलति स्म इति गलितम् ।

**गल्ल**-पुं-५८२-ગાલ, કપોલ.

*गल्यतेऽनेन इति गल्लः "शामाश्या"-(उणा ४६२) इति बहुवचनाद् लः ।

**गल्वर्क**-पुं-९०६-મદિરા પીવાનું પાત્ર.

द्र० अनुतर्षणशब्दः ।

*गलन्त्यनेन इति गल्वर्कः, "निष्कतुरुष्क"-(उणा-२६) इति के निपात्यते ।

**गवय**-पुं.१२८६-રોઝ.

□वनगव, गोसदृक्ष, अश्ववारण ।

*गवते इति गवयः "कुगुवलि"-(उणा-३६५) इत्ययः ।

**गवल**-पुं-१२८३-જંગલી પાડો.

*गवते शब्दायते इति गवलः, "मृदिकन्दि-" (उणा-४६५) इत्यलः ।

**गवाक्ष**-पुं-१०१२-ગોખ, જાળી, બારી.

□वातायन, जालक ।

*गोरक्षीव इति गवाक्षः, "अक्ष्णोऽप्राण्यङ्गे" ।।७।३।८५।। इत्यट् समासान्तः, "गोर्नाम्न्यवोऽक्षे" ।।१।२।२८।। इत्यवादेशः ।

**'गवाक्षी'**-स्त्री-११५७-ઈન્દ્રવારણી.

द्र० इन्द्रवारुणीशब्दः ।

**गवीधुका**-स्त्री-११७९ (शि.१०७) -બરંટી, બંટી.

□गवेधुका. गवेधु, 'गवेडु' ।

**गवीश्वर**-पुं-८८८-ગાયવાળો, ગાયનો માલિક.

□गोमत् गोमिन्, [गवेश्वर शि. ७८]

*गवामीश्वरो इति गवीश्वरः ।

**'गवेडु'**-स्त्री-११७९-બરંટી.

द्र० गवेधुशब्दः ।

**गवेधु**-स्त्री-११७९-બરંટી, બંટી.

□गवेधु 'गवेडु' [गवीधुका शि. १०७] ।

*गवाऽम्भसा एधते इति गवेधुः, स्त्रीलिङ्गः "भृमृ-"-(उणा-७१६) इति बहुवचनादुः ।

**गवेधुका**-स्त्री-११७९-બરંટી, બંટી.

□गवेधु 'गवेडु' [गवीधुका शि. १०७] ।

*गूयते इति गवेधुका मुन्यन्नं, "गुड इधुक-एधुकौ" (उणा-७४) गवीधुकाऽपि ।

**गवेश्वर**-पुं-८८८ (शि.७८) ગાયવાળો,ગાયમાલિક.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

□गोमत्, गोमिन्, गवीश्वर ।

**गवेषित**-ન.-૧૪૯૧-શોધેલું.

द्र० अन्विष्टशब्दः ।

*'गवेषण् मार्गणे' गवेष्यते इति गवेषितम् ।

**(गवोद्ध)**-પું-૧૪૪૧-ઉત્તમ ગાય, બળદ.

**गव्य**-ન.-૧૨૭૩-દૂધ, દહીં વગેરે.

*सर्वं क्षीरादि गोरिदं गविभवमित्यादिष्वर्थेषु वा गव्यम् ।

**गव्य**-ન.-४०४ (શે. ૧૦૦)-દુધ.

द्र०ऊधस्यशब्दः ।

**गव्या**-સ્ત્રી ન.-૭૭૬-ધનુષ્યની દોરી, પણછ.

□मौर्वी, जीव, गुण शिञ्जा, बाणासन, द्रुणा, शिञ्जिनी, ज्या ।

*गोभ्यो बाणेभ्यो हिता इति गव्या, स्त्रीक्लीबलिङ्गः, "गोः स्वरे यः" ॥६।१।२७॥ इति यः ।

**गव्या**-સ્ત્રી-૮૮૮-બે કોશ, બે ગાઉ.

□गोरुत, गव्यूत, गव्यूति ।

*गोभ्यो हिता इति गव्या ।

**गव्या**-સ્ત્રી-૧૪૨૧-ગાયનો સમુહ

□गोत्रा ।

*गवां समूहः इति गव्या " पाशादेश्च ल्यः" ॥६।२।२५॥ इति ल्यः ।

**गव्यूत**-ન.-૮૮૭-એક ગાઉ, બે હજાર દંડ પ્રમાણ.

□क्रोश ।

*दण्डानां द्वौ सहस्रौ गवां यूतिरत्र इति गव्यूतं पृषोदरादित्वात् ।

**गव्यूत**-ન.-૮૮૮-બે ગાઉ.

द्र०गव्याशब्दः ।

*गवां यूतिरत्र इति गव्यूतम् ।

**गव्यूति**-પું સ્ત્રી-૮૮૮-બે ગાઉ.

द्र०गव्याशब्दः ।

*गवां यूतिः इति गव्यूतिः पुंस्त्रीलिङ्गः पृषोदरादित्वात् ।

**गहन**-ન.-૧૧૧૦-જંગલ, વન.

द्र०अटवीशब्दः ।

*गाह्यते इति गहनं "विदन-" (उणा-२७५) इत्यने निपात्यते ।

**गहन**-ન.-૧૪૭૨-દુઃખે પ્રવેશ કરી શકાય તેવું.

□कलिल ।

*गाह्यते व्याप्तत्वाद् इति गहनं "विदन"-(उणा-२७५) इत्यने निपात्यते ।

**गह्वर**-પું ન.-૧૦૩૩ સ્વાભાવિક ગુફા.

□गुहा ।

*गूहति गाह्यते वा इति गह्वरम् पुंक्लीबलिङ्गः, "तीवर"- (उणा-४४४) इति वरटि निपात्यते, गह्वाः सन्त्यत्र वा, अश्मादित्वाद् रः ।

**गह्वर**-પું-૧૪૦૨-આંતર હૃદયનું રૂદન, ગદ્‌ગદ્ કંઠે રૂદન.

* रुदितमपुष्टं गद्‌गदस्वरत्वादजातोच्चपूत्कारं गाहते हृदयान्तः इति गह्वरः "जठर"-(उणा-४०३) इत्यरे निपात्यते ।

**गाङ्गेय**-ન.-૧૦૪૩-સોનું.

द्र० अर्जुनशब्दः ।

*गङ्गाया अपत्यं इति गाङ्गेयं शुभ्रादित्वादेयण् ।

**(गाङ्गेय)**-પું-૨૦૮-શંકરપુત્ર.

द्र० अग्निभूशब्दः ।

**गाढ**-ન.-૧૪૪૭-નિરન્તર.

द्र० अविरलशब्दः ।

*गाह्यते इति गाढम् ।

**गाढ**-ન.-૧૫૦૫-અતિશય ઘણું.

द० अतिमर्यादशब्दः ।

*गाहते स्म इति गाढम् ।

**गाणिक्य**-ન.-૧૪૨૦-ગણિકાનો સમૂહ.

*गणिकानां समूहो इति गाणिक्यम्, "गणिकाया ण्यः" ॥६।२।१७॥ ।

**गाण्डिव**-પું-૭૧૦-અર્જુનનું ધનુષ્ય.

□गाण्डीव ।

*गाण्डिरस्त्यस्य इति गाण्डिवम्, मण्यादित्वाद् वः पुंक्लीबलिङ्गः ।

**गाण्डीव**-પું ન.-૭૧૦-અર્જુનનું ધનુષ્ય.

□गाण्डिव ।

*गाण्डी धनुष्पर्व सा अस्ति अस्य इति गाण्डीवम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**गात्र**-न.-५६३-શરીર.

द्र० अङ्गशब्दः ।

*गच्छति इति गात्रम्, "गमेरा च" (उणा-४५३) इति त्रः ।

**गात्र**-स्त्री न.-१२२८-હાથીના પગ જાંઘ વગેરે.

*गच्छति अनेन इति गात्रं स्त्रीक्लीबलिङ्गः हस्तिनः पूर्वः पादजङ्घादिभागः ।

**गात्र**-न.-५६६ (શે. ११८)-શરીરના અવયવ.

द्र० अङ्गशब्दः ।

**गात्रसंकोचिन**-पुं-१३०२-એક જાતનો બિલાડો.

☐जाहक, मण्डली ।

*गात्रं संकोचयति इति गात्रसंकोची ।

**गात्रसंप्लव**-पुं-१३४०-પ્લવપક્ષી, જલમાં ડુબકી મારનાર પક્ષી.

☐प्लव ।

*गात्रेण संप्लवते इति गात्रसंप्लवः ।

**गात्रानुलेपनी**-स्त्री-६३९-વાટેલી વસ્તુનો લેપ.

☐वर्ति ।

*गात्रं अनुलिप्यतेऽनया इति गात्रानुलेपनी ।

**(गाधिनन्दन)**-पुं-८५०-विश्वामित्र.

☐त्रिशङ्कुयाजिन्, गाधेय, विश्वामित्र, कौशिक ।

**गाधिपुर**-न.-९७४-કાન્યકુબ્જ કનોજ

द्र० कन्यकुब्जशब्दः ।

*गाधे राज्ञः पुरं इति गाधिपुरम् ।

**गाधेय**-पु-८५०-विश्वामित्र.

☐त्रिशङ्कुयाजिन्, विश्वामित्र, कौशिक, (गाधिनन्दन) ।

*गाधेरपत्यं इति गाधेयः "इतोऽनिञः" ॥६।१।७२॥ इत्येयण् गाधिनन्दनोऽपि ।

**गान**-न.-२८०-ગીત ગાયન.

☐गीत, गेय, गीति, गांधर्व ।

*प्रावेशिक्यादिध्रुवा रूप गानम् ।

**गान्धर्व**-न.-२८०-ગીત ગાયન

☐गीत, गेय, गीति, गान ।

*गन्धर्वैः कृतं इति गान्धर्वम् ।

**गान्धर्व**-(બ. વ.)-पुं-१८३-દેવોના ગવૈયા.(હાહા વગેરે ગન્ધર્વો.)

☐गन्धर्व, देवगायन, (हाहा-हूहू, तुम्बुरु, वृषणाश्व, विश्वावसु, वसुरुचि) ।

*गान्धर्वा एव इति गान्धर्वाः ।

**गाधर्वी** स्त्री-२०५ (શે. ५५)-પાર્વતી.

द्र० अद्रिजाशब्दः ।

**गान्धार**-पुं-१४०१-વીણા કે કંઠમાંથી બોલાતા સ્વર.

*गां वाचं धारयति इति गान्धारः, गन्धवहमित्र्यत्ति वा यदाह-"वायुः समुत्थितो नाभेः कण्ठशीर्षसमाहतः । नानागन्धवहः पुण्यैर्गान्धारस्तेन हेतुना ॥"

**गान्धारी**-स्त्री४६-શ્રી નમિનાથ ભગ.ની શાસનદેવી.

*गां धारयतीति गान्धारी पृषोदरादित्वात् ।

**गान्धारी**-स्त्री-२४०-१०મી વિદ્યાદેવી.

*गांधार यतीति गान्धारी, पृषोदरादित्वात् ।

**गामिन्**-पुं-९ (प.)-આ શબ્દ લગાડવાથી વાહક વાચક શબ્દ બને છે જેમ વૃષગામી.

**गारुड**-न.-१०४४-સોનું.

द्र० अर्जुनशब्दः ।

*गारुडस्येदं इति गारुडम् ।

**गारुत्मत्**-न.-१०६४-મરકતમણિ, પન્ના.

☐मरकत, अश्मगर्भ, हरिन्मणि, (अश्मयोनि) ।

*गरुत्मत इदं जातं विषं हन्तुं गारुत्मतम् ।

**(गार्गक)**-पुं-१४१६-ગર્ગઋષિના વંશજ.

**गार्गी** स्त्री-२०५ (શે. ५५)-પાર્વતી.

द्र० अद्रिजाशब्दः ।

**गार्ध्रपक्ष**-पुं-७७८-બાણ.

द्र० अजिह्मगशब्दः ।

*गृध्रपक्षस्यायं इति गार्ध्रपक्षः ।

**गार्भिण**-न.-१४१५-ગર્ભિણીઓનો સમૂહ.

*गार्भिणीनां समूहः इति गार्भिणम् ।

**गार्हपत्य**-पुं-८२६-ત્રીજા પ્રકારનો અગ્નિ.

*गृहपतिना संप्रयुक्तो इति गार्हपत्यः, "हृद्य-पत्य"-॥७।१।११॥ इति ये निपात्यते ।

**गालव**-पुं-११५९-લોધ્ર, લોધર.

☐लोध्र, गोध्र, तिल्व, शावर, मार्जन ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*गाल्यति स्रावयति अक्षि गालवः "कैरव"-(उणा-५१९) इत्यवे निपात्यते ।

**गालि**-स्त्री-२७२-ગાળ.

□विरुद्धशंसन ।

*गालयते गुणान् इति गालिः ।

**गिर्**-स्त्री-२४१-સરસ્વતીદેવી, વાણી.

□वाच्, ब्राह्मी, भारती, गो, वाणी, भाषा, सरस्वती, श्रुतदेवी ।

*गृणाति इति गीः ।

**गिरि**-पुं-६८८-ગેડી રમવાનું સાધન.

□गुड, बालक्रीडनक गिरियक, गिरिगुड, [गिरिक, गिरीयक शि. ५८]

*गीर्यते इति गिरिः पुंलिङ्गः, "नाम्युपान्त्य'-(उणा-६०९) इति किदिः ।

**गिरि**-पुं-१०२७-પર્વત.

द्र० अचलशब्दः ।

*गीर्यते इति गिरिः "नाम्युपान्त्य"-(उणा-६०९) इति किः ।

**गिरिक**-पुं-६८९ (शि. ५८)-ગેડી રમવાનું સાધન.

द्र० गिरिशब्दः ।

**गिरिकर्णी**-स्त्री-११५६-ગરણી.

□अपराजिता ।

*गिरिरश्मेव कर्णोऽस्या इति गिरिकर्णी ।

**गिरिका**-पुं-१३०१-નાનો ઉંદર.

□बालमूषिका, (खटाखु) ।

*गिरति इति गिरिका "कुशिक"-(उणा-४५) इतीके साधुः ।

**गिरिगुड**-पु-६८९-ગેડી રમવાનું સાધન.

द्र०गिरिशब्दः ।

□गीर्यते गुड्यते च गिरिगुडः पृषोदरादित्वात्साधुः ।

**गिरिज**-न.-१०६२-શિલાજિત.

द्र०अश्मजशब्दः ।

*गिरेः जायते इति गिरिजम् ।

**(गिरिज)**-न.-१०५१-અબરખ.

द्र०अभ्रकशब्दः ।

**गिरिजामल**-न.-१०५१-અબરખ.

द्र०अभ्रकशब्दः ।

*गिरिजाया गौर्या मलं इति गिरिजामलं, गिरिजं च तदमलं चेति वा ।

**गिरिमल्लिका** स्त्री-११३७-ઇન્દ્રજવનું ઝાડ.

द्र०कुटजशब्दः ।

*गिरिणा मल्लयते धार्यते इति गिरिमल्लिका, गिरौ मल्लिकेव वा ।

**गिरियक**-पुं-६८९-ગેડી રમવાનું સાધન.

द्र०गिरिशब्दः ।

*गीर्यते याति च इतिगिरियकः ।

**गिरिश**-पुं-१९६-શંકર મહાદેવ.

द्र०अट्टहासिन्शब्दः ।

*गिरिरस्यास्ति इति गिरिशः, "लोम पिच्छादेः शेलम् ॥७।२।२८॥ इति शः, गिरौ शेते, गिरिं श्यति उपभोगेन तनूकरोतीति वा ।

**गिरिसार**-न.-१०३८-લોખંડ.

द्र० अयस्शब्दः ।

*गिरेः सारं इति गिरिसारम् ।

**गिरीयक**-पुं-६७९ (शि.५८)-ગેડી રમવાનું સાધન.

द्र०गिरिशब्दः ।

**गिरीश**-पुं-१९६-શંકર મહાદેવ.

द्र०अट्टहासिन्शब्दः ।

*गिरेरीशो इति गिरीशः ।

**गीःपति**-पुं-११९-ગુરુ, બૃહસ્પતિ.

द्र०आङ्गिरसशब्दः ।

*गिरः पतिः इति गीःपतिः ।

**गीःपतीष्टिकृत्**-पुं-८१८-બૃહસ્પતિસવનામનો યજ્ઞ કરનાર.

□स्थपति ।

*गीःपतेर्बृहस्पतेः इष्टिं यज्ञं करोतीति गीःपतीष्टिकृत् ।

**गीत**-न.-२८०-ગાયન, ગીત.

द्र०गानशब्दः ।

*रागगीत्यादिकं गीतम् ।

**गीति**-स्त्री,-२८०- ગીત, ગાયન.



Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्र० गानशब्दः ।

**गीरथ**-पुं-११९-(शे. १५)-ગુરુ, બૃહસ્પતિ.

द्र०आङ्गिरसशब्दः ।

**गीर्वाण**-पुं-१९ (પ.)-દેવ.

**गीर्वाण** (બ. વ.)-પું-८९-દેવતા.

द्र०अनिमिषशब्दः ।

*गीरेव वाणोऽस्त्रं येषां ते गीर्वाणाः ।

**गीर्पति**-पुं-११९ -ગુરુ, બૃહસ્પતિ.

द्र०आङ्गिरसशब्दः ।

*गीरः पतिः गीःपतिः ।

'**गुग्गुल**'-पुं-११४२-ગૂગળનું ઝાડ.

द्र० गुग्गुलुशब्दः ।

**गुग्गुलु**-पुं-११४२-ગૂગળનું ઝાડ.

☐पलङ्कष, 'कुम्भ, उलूखलक कौशिक, गुग्गुल, पुर' ।

*गूयते इति गुग्गुलुः, पुंलिङ्गः "गृहलुगुग्गुलु-कमण्डलवः" (उणा-८२४) इति साधुः ।

**गुच्छ**-पुं-६६०-બત્રીશ શેરનો હાર.

**गुच्छ**-पुं-११२६-નહિં ખીલેલી કુંપળનો ગુચ્છો.

☐गुच्छ, स्तबक, गुत्सक, गुलुञ्छ, [गुलुञ्छु, लुम्बी शि. १०१] ।

*गूयते इति गुच्छः "तुदिमदि-" (उणा-१२४) इति छकि गुच्छः ।

**गुच्छ**-पुं-११८२-ધાન્યનો છોડ, ધાન્ય વગેરેની નાળ.

☐स्तम्ब ।

*गुध्यतेऽनेन इति गुच्छः ।

**गुञ्छ**-पुं-११२६-નહિં ખીલેલી કુંપળોનો ગુચ્છો

द्र०गुच्छशब्दः ।

*गूयते इति गुञ्छः, "गुलुञ्छ"-(उणा-१२६) इति छे निपात्यते ।

**गुञ्जा**-स्त्री-८८३-ચણોઠી રતિ.

☐रक्तिका ।

**गुञ्जा**-स्त्री-११५५-ચણોઠી.

द्र०कृष्णलाशब्दः ।

*गुञ्जति शिम्ब्या इति गुञ्जा ।

**गुड**-पुं-४०२-ગોળ.

☐इक्षुरसक्वाथ ।

*गूयते क्वथ्यते इति गुडः, 'कुगुहुनी-" (उणा-१७०) इति डः कित्, गुडति रक्षति वा ।

**गुड**-पुं-४२५-કોળીઓ.

द्र०कवकशब्दः ।

*गुडति इति गुडः, गूयते वा ।

**गुड**-पुं-६८८-ગેડી રમવાનું સાધન.

द्र०गिरिशब्दः ।

*गुड्यते इति गुडः, स्थादित्वात् कः ।

**गुडपुष्प**-पुं-११४१-મહુડો.

☐मधूक, मधुष्ठील, मधुद्रुम, 'मधुक, वान-प्रस्थ' ।

*गुडवद् मधुरं पुष्पं अस्य इति गुडपुष्पः ।

**गुडफल**-पुं-११४२-પીલુનું ઝાડ.

☐पीलु, सिन, स्रंसिन्' ।

*गुडवद् मधुरं फलमस्य इति गुडफलः ।

**गुडाकोश**-पुं-७०९-અર્જુન.

द्र०अर्जुनशब्दः ।

*गुडा गुटिका तदाकाराः केशा अस्य इति गुडाकोशः ।

**गुडूची**-स्त्री-११५७-ગળો.

द्र०अमृताशब्दः ।

*गुडति रक्षति कफं इति गुडूची "गुडेरूचट्"-(उणा-१२०) इति उचट् ।

**गुडेरक**-पुं-४२५-કોળીયો.

द्र०कवकशब्दः ।

*गुड्यते, इति गुडेरः, "कुगुपति"-(उणा-४३१) इति किदेरः के गुडेरकः ।

**गुण**-पुं-७२२-રસોઇયો.

द्र०आरलिकशब्दः ।

*गुणयति इति गुणः ।

**गुण**-(બ. વ.)-पुं-७३५-સંધિ વિગ્રહ વગેરે રાજ્યોપયોગી ૬ ગુણો.

*गुण्यन्ते इति गुणाः, राज्योपकारकाः ।

**गुण**-पुं-७७६-ધનુષ્યની દોરી, પણછ

द्र०गव्याशब्दः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*गुण्यतेऽभ्यस्यते इति गुणः ।

**गुण**-पुं-९२८-દોરી, દોરડું.

☐शुम्ब, वटारक, रज्जु, शुल्व, तन्त्री, (तन्त्रि) वटी ।

*गुण्यते अभ्यस्यते इति गुणः ।

**गुण**-पुं-१४४१-ગૌણ, અપ્રધાન.

द्र०अप्रधानशब्दः ।

*गुण्यते इति गुणः ।

**गुणग्राम**-पुं-१४१४-ગુણોનો સમૂહ.

**गुणलयनिका**-स्त्री-६८२-વસ્ત્રનું નાનું ઘર, રાવટી.

☐केणिका, पटकुटी ।

*गुणा लीयन्तेऽस्यां इति गुणलयनिका गुणलयनी अपि ।

**गुणवृक्ष**-पुं-८७७-સઢ, વહાણનો કૂવાસ્તંભ.

☐कूपक ।

*गुणयुक्तो वृक्ष इव गुणवृक्षः यत्र नौ रज्ज्वा बध्यते पोते ध्वजपटाद्याधार इत्येके ।

**गुणाधिष्ठानक**-पुं-६०३ (शे.१२५)-હૃદય, અન્તઃકરણ.

द्र०स्तनान्तरशब्दः ।

**गुणाब्धि**-पुं-२३५ (शे. ८२)-બુદ્ધ સુગત.

द्र०अद्वयशब्दः ।

**गुणित**-न.-१४८३-ગુણાકાર કરેલ.

☐आहत ।

*गुण्यते इति गुणितम् ।

**गुणोत्कर्ष**-पुं-१३७५-ગુણોનું ઉત્કૃષ્ટપણું, ઉત્કર્ષ.

☐परभाग ।

*गुणानामुत्कर्षो इति गुणोत्कर्षः ।

**गुण्डित**-न.-१४८३-ધૂળથી ખરડાયેલું.

☐रूषित ।

*गुण्ड्यते स्म इति गुण्डितम् ।

**गुण्डिव**-पुं-१२९१-થોડું શિયાળને મળતું પ્રાણી.

☐लोपाक ।

*बृहति शिवाभेदे गृणाति इति गुण्डिवः "प्रह्वाह्वा"-(उणा-५१४) इति वे निपात्यते ।

**गुत्स**-पुं-११२६-નહિ ખીલેલી કુંપળોનો ગુચ્છો.

द्र० गुच्छशब्दः ।

*गुध्यति वेष्टते इति गुत्सः ।

**गुत्सक**-पुं-११२६-નહિ ખીલેલી કુંપળોનો ગુચ્છો.

द्र० गुच्छशब्दः ।

*गुध्यति वेष्टते गुत्सः "गुधिगृधेस्त च" (उणा-५६८) इति कित् सः ।

**गुद**-पुं न.-६१२-ગુદા.

द्र० अधोमर्मन्शब्दः ।

*"गुत् पुरीषोत्सर्गे," गुवत्यनेन इति गुदं - पुंक्लीबलिङ्गः, "गोः कित्" (उणा-२३९) इति दः गोदते वा ।

**गुदकील**-पुं-४६८ (शि. ३४)-હરસ, મસા.

☐दुर्नामन्, अर्शस्, गुदाङ्कुर ।

**गुदग्रह**-पुं-४६९ મળ મૂત્રાદિ રોકવાથી થતો રોગ, આફરો.

☐उदावर्त ।

*गुदे ग्रहणं इति गुदग्रहः ।

**गुदाङ्कुर**-पुं-४६८-હરસ, મસા.

☐दुर्नामन्, अर्शस् [गुदकील-शि. ३४] ।

*गुदस्योऽङ्कुरो इति गुदाङ्कुरः, गुदकीलोऽपि ।

**गुन्दल**-पुं-१४०८-મૃદંગનો શબ્દ.

*गुन्देति शब्दं लाति इति गुन्दलः ।

**गुन्द्र**-पुं-११९२-મુંજ તૃણ.

☐तेजन, मुञ्ज, शर ।

*गुणैर्दोषा द्रान्त्यस्मिन् इति गुन्द्रः, पृषोदरादित्वात् ।

**गुन्द्रा**-स्त्री-११९३-ઉત્તમ મોથ, ભદ્રમોથ.

☐'भद्रमुस्तक' ।

*मुस्ता उत्तमा गोदन्तेऽनया इति गुन्द्रा "खुरक्षुर"-(उणा-३९६) इति रे निपात्यते, गुणैर्दोषा द्रान्त्यस्यामिति वा ।

**गुन्द्राल**-पुं-१३४०-જીવંજીવ પક્ષી.

☐जीवंजीव, विषदर्शनमृत्युक ।

*गुन्द्रामलति इति गुन्द्रालः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**गुप्त**-न.-१४८३-સંતાયેલ.

☐गूढ ।

*गुप्यते स्म इति गुप्तम् ।

**गुप्त**-न.-१४९७-રક્ષણ કરાયેલ.

द्र० अवितशब्दः ।

*गुप्यते इति गुप्तम् ।

**गुप्तचर**-पुं-२२५-(शे. ७७) બલદેવ.

द्र० अच्युताग्रजशब्दः ।

**गुप्ति**-स्त्री-८०६-જેલ, કેદખાનું.

☐चार, कारा [चारक शि. ७१] ।

*गुप्यतेऽस्यां इति गुप्तिर्बन्धनागारम् ।

**गुम्फ**-पुं-६५३-રચના, ગૂંથણી.

☐सन्दर्भ, रचना, श्रन्थन, ग्रन्थन, [परिस्पन्द, प्रतियत्न शे. १३४] ।

*गुम्फनं इति गुम्फः ।

**गुरु**-पुं-७७-ધર્મોપદેશ આપનાર ગુરુ.

☐धर्मोपदेशक ।

*गृणाति धर्मं इति गुरुः, 'कृग्रऋत उर्च" (उणा-७३४) इति उः ।

**गुरु**-पुं-११९-ગુરુ, બૃહસ્પતિ.

द्र० आङ्गिरसशब्दः ।

*गृणात्युपदिशाति इति गुरुः "कृग्रऋतउच्च" (उणा-७३४) इति उः ।

**गुरु**-न.-१४३०-વિશાળ મોટું.

द्र० उरुशब्दः ।

*गिरति इति गुरु ।

**गुरुक्रम**-पुं-८०-સંપ્રદાય, ગુરુપરંપરાગતઉપદેશ.

☐पारम्पर्य, आम्नाय, सम्प्रदाय ।

*गुरोः क्रम इति गुरुक्रमः ।

**गुरुहन्**-पुं-८५८-ગુરુને હણનાર.

☐नरकीलक ।

*गुरुं हन्ति इति गुरुहा ।

**गुरुदैवत** पुं-१११-પુષ્ય નક્ષત્ર.

☐पुष्य, तिष्य, सिध्य ।

*गुरुर्दैवतमस्य इति गुरुदैवतः ।

**गुरुपत्र**-न.-१०४२-કલઈ.

द्र० आलीनकशब्दः ।

*गुरुपत्रमस्य इति गुरुपत्रम् ।

**(गुरुपाद)**-(બ. વ.)-पुं-३३६-પૂજ્યગુરુ.

**गुर्विणी**-स्त्री-५३८-ગર્ભવતી, સગર્ભાસ્ત્રી.

द्र० अन्तर्वत्नीशब्दः ।

*गुरुर्गर्भोऽस्त्यस्या इति गुर्विणी, शिखादित्वादिनि पृषोदरादित्वात् साधुः, "ङ्यादेर्नामिनो"-॥२।१।६३॥ इति दीर्घस्यानित्यत्वेन ज्ञापितत्वात् अवश्यं गुर्वेति गर्भपालनायेति वा ।

**गुर्वी**-स्त्री-५३९-ગર્ભવતી, સગર્ભાસ્ત્રી.

द्र० अन्तर्वत्नीशब्दः ।

*गुर्वी गर्भत्वात् ।

**गुल**-पुं-६११-ગુહ્યનો મધ્યભાગ.

☐मणि, गुह्यमध्य ।

*गुडति रक्षति इति गुलः ।

**गुलुच्छ**-पुं न.-११२६-નહિં ખીલેલી કુંપળોનો ગુચ્છો.

द्र० गुच्छशब्दः ।

*गुडयते इति गुलुञ्छः, "गुलुञ्छ"-(उणा-१२६) इति छे निपात्यते, पुंस्ययम्, क्लीबेऽपि **वाचस्पतिः**-यदाह—"गुलुच्छोऽस्त्री," इति ।

**गुलुञ्छु**-पुं-११२६ (शि. १०१)-નહિં ખીલેલી કુંપળોનો ગુચ્છો.

द्र० गुच्छशब्दः ।

**गुल्फ**-पुं स्त्री-६१५-ઘુંટણ પગની એડી.

☐चरणग्रन्थि, घुटिक, घुण्टक, घुट ।

*गलति इति गुल्फः पादग्रन्थिः, पार्श्वनिसृतः "कलिगरस्योच्च" (उणा-३१५) इति फः पुंस्त्रीलिङ्गः ।

**गुल्म**-पुं न.-४६९-પેટનીગાંઠ, બરોલ.

☐उदरग्रन्थि ।

*गुप्यत्यऽनेन इति गुल्मः पुंक्लीबलिङ्गः "रुक्मग्रीष्म"-(उणा-३४६) इति मे निपात्यते ।

**गुल्म**-पु न.-६०५-બરોલ, હૃદયની ડાબી બાજુનો માંસ પિંડ.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

☐प्लीहन् ।

*गुप्यते रक्ष्यते इति गुल्मः पुंक्लीबलिङ्गः "रुक्मग्रीष्म"–(उणा–३४६) इति मे निपात्यते ।

**गुल्म**–पुं न.–७४८–સેનામુખથી ત્રણ ગણું.

*सेनामुखं त्रिगुणं गुडति इति गुल्मः पुंक्लीबलिङ्गः ।

**गुल्म**–पुं न.–११२०–થડ અને શાખાવિનાનું વૃક્ષ.

☐स्तम्ब, विटप ।

*गुडति इति गुल्मः पुंक्लीबलिङ्गः ।

**गुल्मिनी**–स्त्री–१११८–ગુચ્છવાળી વેલડી, વિસ્તૃત-વેલ.

☐प्रतानिनी, उलप, वीरुध् ।

*गुल्मोऽस्त्यस्या इति गुल्मिनी ।

**गुल्य**–पुं–१३८८–મધુરરસ.

☐मधुर, रसज्येष्ठ, स्वादु, मधूलक, (मधूल)।

*गुडे साधुः इति गुल्यः ।

**गुह**–पुं–२०९–કાર્તિકેય, શંકરપુત્ર.

द्र० अग्निजन्मन्शब्दः ।

*गूहति सेनां इति गुहः ।

**गुहा**–स्त्री–१०३३–સ્વાભાવિક ગુફા.

☐गह्वर ।

*गुह्यतेऽनया इति गुहा भिदादित्वादङ् ।

**गुह्य**–न.–६११–સ્ત્રી/પુરુષ ચિન્હ, યોનિ અને લિંગ.

☐प्रजनन, उपस्थ ।

*गुह्यते इति गुह्यं "कुवृषि–" ॥५।१।४२॥ इति क्यप् ।

**गुह्य**–न.–७४२–ગુપ્ત રાખવા યોગ્ય.

☐रहस्य ।

*गुह्यते इति गुह्यं, "कुवृषि"–॥५।१।४२॥ इति क्यप् ।

**गुह्यक**–पुं–१९४–યક્ષ.

☐यक्ष, पुण्यजन, राजन, वटवासिन् ।

*गुह्यं वित्तं करोति गुह्यकः, गूहतीति वा "कीचक"–(उणा–३३) इत्यादिशब्दाद् निपात्यते ।

**(गुह्यकेश)**–पुं–१९०–કુબેરદેવ.

द्र० इच्छावसुशब्दः ।

**गुह्यगुरु**–पुं–२०० (शे. ४२)–શંકર, મહાદેવ.

द्र० अट्टहासिन्शब्दः ।

**गुह्यमध्य**–न.–६११–ગુહ્યનો મધ્યભાગ.

☐गुल्मणि ।

*गुह्यस्य मध्यं इति गुह्यमध्यम् ।

**गूढ**–न.–१४८३–ગુપ્ત સંતાયેલ.

☐गुप्त ।

*गुह्यते स्म इति गूढम् ।

**गूढपथ**–न.–१३६९–ચિત્ત, મન.

द्र० अन्तःकरणशब्दः ।

*गूढः पन्था अस्य इति गूढपथम् ।

**गूढपाद्**–पुं–१३०४–સર્પ, નાગ.

द्र० अहिशब्दः ।

*गूढाः पादा अस्य इति गूढपात् पाद समानार्थः पाच्छब्दोऽस्ति ।

**गूढपुरुष**–पुं–७३३–ચર પુરુષ.

द्र० अवसर्पशब्दः ।

*गूढश्चासौ पुरुषश्च इति गूढपुरुषः ।

**गूढभोजन**–पुं–१२३३ (शे. १७९)–ઘોડો.

द्र० अश्वशब्दः ।

**गूथ**–पुं न.–६३४–વિષ્ઠા..

द्र०अवस्करशब्दः ।

*गूयते उत्सृज्यते इति गूथं पुंक्लीबलिङ्गः, "पथ-यूथ"–(उणा–२३१) इति थे निपात्यते ।

**गून**–न.–१४९५–હગેલું.

☐हन्न ।

*'गुत् पुरीषोत्सर्गे' गूयते स्म इति गूनम् "दुगो रूच" ॥४।२।७७॥ इति साधुः ।

**गूवाक**–पुं–११५४–સોપારીનું ઝાડ.

द्र०क्रमुकशब्दः

*गुवत्यनेन स्वं संवत्वा इति गूवाकः "मवाक–श्यामाक"–(उणा–३७) इत्याके निपात्यते ।

**गृञ्जन** पुं न.–११८७–ગાજર, લાલ લસણ, ડુંગળી.

☐रसोन, दीर्घपत्रक ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*गृञ्ज्ये कुत्सितः शब्द्यते इति गृञ्जनः, पुंक्लीबलिङ्गः ।

**गृध्नु**—पुं-४२९-અતિલોભી.

द्र० अभिलाषुकशब्दः ।

*गर्धनशीलो इति गृध्नुः, "त्रसिगृधि"-।।५।२।३२।। इति क्नुः ।

**गृध्र**—पुं-१३३५-ગીધ પક્ષી.

☐दाक्षाय्य, दूरदृश्, [पुरुषव्याघ्र, कामायु, कुणितेक्षण, सुदर्शन, शकुनि, आज शे. १९५] ।

*गृध्यति मांसं इति गृध्रः, "ऋज्यजि"-(उणा-३८८) इति किद् रः ।

**गृष्टि**—स्त्री-१२६८-એકવાર પ્રસવ કરનારી ગાય.

*गिरति इति गृष्टिः "ग्रो गृप च" (उणा-६४९) इति तिः ।

**गृह** (બ. વ.)—पुं न.-५१२-પત્ની, પરણેલી સ્ત્રી.

द्र० ऊढाशब्दः ।

*गृहवासहेतुभूतत्वाद् गृहाः पुंक्लीबलिङ्गः पुंस्यय बहुवचनान्तएव ।

**गृह**—पुं-९८९-ઘર.

द्र० अगारशब्दः ।

*गृह्णाति पुरुषोपार्जितं द्रव्यमिति गृहम्, "गेहे ग्रहः" ।।५।१।५५।। इति कः पुंक्लीबलिङ्गः ।

**गृहगोधिका**—स्त्री-१२९७-ગરોળી.

द्र० कुड्यमत्स्यशब्दः ।

*गृहशब्दात् परे गोधिका, गृहं गुध्यति इति गृहगोधिका, गृहस्य गोधेव वा ।

**गृहगोलिका** स्त्री-१२९७-ગરોળી

द्र० कुड्यमत्स्यशब्दः ।

*गृहशब्दात् परे गोलिका गृहं गुडति इति गृह गोलिका ।

**गृहजालिका**—स्त्री-३१४-(शे० ९१) આકાર છુપાવવો તે.

द्र० अवहित्थाशब्दः ।

**गृहपति**—पुं-७३४-ઘરધણી, દાન આપનાર

☐सत्रिन् ।

*गृहस्य पतिः इति गृहपतिः ।

**गृहबलिभुज्**—पुं-१३३१-ચકલો.

☐चटक, कलविङ्क, कलिङ्कक, [कुलिङ्ग शि ११९] ।

*गृहबलिं भुङ्क्ते इति गृहबलिभुक् ।

**गृहमणि**—पुं-६८७-દીવો.

द्र० कज्जलध्वजशब्दः ।

*गृहस्य मणिरिव इति गृहमणिः ।

**गृहमृग**—पुं-१२७९-કૂતરો.

द्र० अस्थिभुज् शब्दः ।

*गृहस्यमृग इति गृहमृगः ।

**गृहमेधिन्**—पुं-८०८-ગૃહસ્થ.

☐ज्येष्ठाश्रमी, गृहस्थ, गृहिन्, स्नातक ।

*गृहेण मेधते इति गृहमेधी ।

**गृह्यालु**—पुं.-४४५-ગ્રહણકરનાર.

☐ग्रहितृ ।

*गृह्यते इत्येवं शीलो गृह्यालुः ।

**गृहस्थ**—पुं-८०८-ગૃહસ્થ.

द्र० गृहमेधिन् शब्दः ।

☐गृहेतिष्ठति इति गृहस्थः ।

**गृहाम्बु**—न.-४१६-(शे. १०१) રાબ, કાંજી.

☐अवन्तिसोम ।

**गृहाराम**—पुं-१११२-ઘરની પાસેનો બગીચો કે વાડી.

☐निष्कुट ।

*गृहस्यारामः इति गृहारामः ।

**गृहावग्रहणी**—स्त्री-१००९-ઘરનો ઊંબરો.

द्र० उम्बरशब्दः ।

*गृहे अवगृह्येते द्वारशाम्बे अनया इति गृहावग्रहणी ।

**गृहिणी**—स्त्री-५१२-પત્ની, પરણેલી સ્ત્રી.

द्र० ऊढाशब्दः ।

*गृहमस्त्यस्या इति गृहिणी गेहिनीत्यपि ।

**गृहिन्**-पुं.-८०८-ગૃહસ્થ.

द्र० गृहमेधिन् शब्दः ।

*गृहमस्यास्ति इति गृही ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**गृहिन्**-पुं-८०७-બીજો ગૃહસ્થ આશ્રમ.

**गृहीतदिश्**-पुं-८०५-નાસી ગયેલો.

☐पलायित, नष्ट, तिरोहित ।

*गृहीता दिग्येन इति गृहीतदिक् ।

**गृहोलिका**-स्त्री-१२९८-ગરોળી.

द्र० कुड्यमत्स्यशब्दः ।

*गृह्णाति क्षुद्रजन्तुन् इति गृहोली, "ग्रह्यादृभ्यः कित्"-(उणा-४९४) इत्योलः के गृहोलिका ।

**गृह्य**-पुं-१३४३-(બ. વ.) ઘરે પાળેલા પશુપક્ષી.

☐छेक ।

*गृह्यन्ते इति गृह्याः "पदास्वैरि"-॥५।१। १४४॥ इति क्यप् ।

**गृह्यक**-पुं-३५६-પરાધીન, પરવશ.

☐नाथवत्, निघ्न, परतन्त्र, परायत्त, परवश, पराधीन, परच्छन्द, परवत्, [वश, आयत्त, अधीन शे. ९३].

*गृह्यते इति गृह्यः "पदास्वैरि-॥५।१।१४४॥ इति क्यप् वा स्वार्थे के गृह्यकः ।

**गेन्दुक**-पुं-६८९-દડો.

☐कन्दुक [गन्दुक शे. ५९] ।

*गाते गच्छति गा गच्छन् इन्दुकः इति गेन्दुकः, गाने इन्दुरिव वा पृषोदरादित्वात् गन्दुकोऽपि ।

**गेय**-न.२८०-ગીત, ગાયન.

द्र० गानशब्दः ।

*गीयते इति गेयम् ।

**गेह**-न.-९८९-ઘર.

द्र० अगारशब्दः ।

*केतन्ति निवसन्ति अत्र इति गेहम्, "कितो गे च" (उणा-५८७) इति हः ।

**गेहभू**-स्त्री-९८९-ઘર માટેની ભૂમિ, રહેવા યોગ્યભૂમિ.

☐वास्तु ।

*गेहाय भूमिः इति गेहभूः ।

**गेहिनी**-स्त्री-५१२-(शि ४०) પત્ની, પરણેલી સ્ત્રી.

द्र० ऊढाशब्दः ।

**गेहेनर्दिन्**-पुं-४७७-ઘરમાં શૂરો, કાયર.

☐गेहेशूर, पिण्डीशूर ।

*गेहे एव नर्दति इति गेहेनर्दी ।

**गेहेशूर**-पुं-४७७-ઘરમાં શૂરો, કાયર.

☐गेहेनर्दिन्, पिण्डीशूर ।

*गेहे शूरः इति गेहेशूरः ।

**गैरिक**-न.-१०३६-ગેરુ.

☐धातु ।

*गिरौ भवं इति गैरिकं अध्यात्मादित्वादिकण् ।

**गैरिक**-न.-१०४४-સોનું.

द्र० अर्जुनशब्दः ।

*गिरौ जातं इति गैरिकम् ।

**गैरेय**-न.-१०६२-શિલાજીત.

द्र० अश्मजशब्दः ।

*गिरौ भवं इति गैरेयम् नद्यादित्वाद् एयण्

**गो**-पुं-स्त्री-८७-દેવલોક, સ્વર્ગ

द्र०ऊर्ध्वलोकशब्दः ।

*गच्छन्त्याश्रयन्ति देवास्तामिति "द्युगमिभ्यां डोः" (उणा-८६७) इति डोप्र त्यये गौः स्त्रीपुंसलिङ्गः ।

**गो**-पुं-स्त्री-९९-કિરણ.

द्र० अंशुशब्दः ।

*गच्छत्यस्मात्तम इति गौः पुंस्त्रीलिङ्गः ।

**गो**-स्त्री-२४१-સરસ્વતી દેવી, વાણી.

द्र० गिर्शब्दः ।

*गच्छति गौः पुंस्त्रीलिङ्गः ।

**गो**-स्त्री-९३६-પૃથ્વી.

द्र० अचलाशब्दः ।

*गच्छन्त्यस्यां इति गौः, गोरूपधरत्वाद्वा ।

**गो**-पुं-१२५७-બળદ.

द्र० अनडुहशब्दः ।

*गच्छति इति गौः पुंस्त्रीलिङ्गः, "द्युगमिभ्याम्"-(उणा-८६७) इति डोः ।

**गो**-स्त्री-पुं-१२६५-ગાય.

द्र० अघ्न्याशब्दः ।

*गच्छति इति गौः पुंस्त्रीलिङ्गः ।

**गोकण्टक**-पुं-११५६-ગોખરૂ.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्र० गोक्षुरशब्दः ।

**गोकर्ण**-पुं-५९५-અંગૂઠો અનામિકા સહિત લંબાવે તેટલો લંબાઈ.

*अनामिकया ततेऽङ्गुष्ठे गोः कर्णाकृतिः इति गोकर्णः ।

**गोकर्ण**-पुं-१२९३-હરણ.

*गोरिव कर्णोऽस्य इति गोकर्णः ।

**गोकर्ण**-पुं-१३०४-(શે. ११५) સર્પ, નાગ.

द्र० अहिशब्दः ।

**गोकिराटिका**-स्त्री-१३३६-સારિકા, મેના.

☐ शारिका, पीतपादा, गोराटी, 'सारिका' ।

*गां किरति इति गोकिराटी, "किरोलश्चवा" (उणा-१४७) इत्याटः ।

**गोकुल**-न.-१२७३-ગાયોનો સમૂહ.

☐ व्रज, गोधन, धन ।

* गवां कुलं इति गोकुलम् ।

**गोकुलोद्भवा**-स्त्री-२०५-(શે०५१) શંકરની પત્ની, પાર્વતી.

द्र० अद्रिजाशब्दः ।

**गोक्षुर**-पुं-११५६-ગોખરુ.

☐ त्रिकण्टक, श्वदंष्ट्र, स्थल, शृङ्गाट, पलङ्कषा, इक्षुगन्धा, स्वादुकण्टक, गोकण्टक, वनशृङ्गाट' ।

* गाः क्षुरयति व्यथयति इति गोक्षुरः ।

**(गोगोयुग)** न.-१४२४-ગાયોનું યુગલ.

**गोग्रन्थि**-पुं-१२७३-અડાયા છાણા, સુકું છાણ.

☐ करीष, छगण ।

* गोमये शुष्के उद्दाने गोः पुरीषस्य ग्रन्थिः इति गोग्रन्थिः ।

**'गोडुम्बा'**-स्त्री-११५७-ઇન્દ્રવારણી

द्र० इन्द्रवारुणीशब्दः ।

**गोचर**-(બ.વ.) पुं-१३८४-વિષયોરુપ, રસ વગેરે પાંચ.

☐ इन्द्रियार्थ, विषय [अर्थ शि. १२५]

* गाव इन्द्रियाणि चरन्त्येषु इति गोचराः, "गोचरसंचर"-॥५।३।१३१॥ इति घः ।

**गोणी**-स्त्री-६७९-કાણા પડેલું વસ્ત્ર, ગુણી.

☐ शाणी, छिद्रवस्त्र ।

* गवा नीयते इति गोणी 'क्वचित्" ॥५।१।१७१॥ इति डे पृषोदरादित्वाद् णत्वं "भाजगोण"-॥२।४।३०॥ इति ङीः ।

**गोतम**-(બ.વ.)-पुं-३१-ગૌતમ કુળમાં ઉત્પન્ન થયેલ.

**गोतमान्वय**-पुं-२३७-શાક્યસિંહ, સાતમા બુદ્ધ.

द्र० अर्कबान्धवशब्दः ।

* गोतमोऽन्वयेऽस्य इति गोतमान्वयः ।

**(गोतल्लज)**-पुं-१४४१-ઉત્તમ બળદ કે ગાય.

**गोत्र**-न.-२६०-નામ.

द्र० आख्याशब्दः ।

* गूयतेऽनेन इति गोत्रम्, "हुयामा"-(उणा-४५१) इति त्रः ।

**गोत्र**-न.-५०३-કુલ, વંશ.

द्र० अन्वयशब्दः ।

* गूयते कथ्यतेऽनेन इति गोत्रम्, 'हुयामा"-(उणा-४५१) इति त्रः ।

**गोत्र**-पुं-१०२७-પર્વત

द्र० अचलशब्दः ।

* गां पृथ्वीं त्रायते इति गोत्रः ।

**गोत्रकीला** स्त्री-९३८-(શે. १५७)-પૃથ્વી.

द्र० अचलाशब्दः ।

**गोत्रा**-स्त्री-९३६-પૃથ્વી.

द्र० अचलाशब्दः ।

* गोत्राः शैलाः सन्त्यस्यां इति गोत्रा अभ्रादित्वादः गास्त्रायते वा ।

**गोत्रा** स्त्री-१४२१-ગાયોનો સમૂહ.

* "गोरथ"-॥६।२।२४॥ इति त्रलि गोत्रा ।

**गोद**-न.-६२५-મગજ.

☐ मस्तकस्नेह, मस्तिष्क, मस्तुलुङ्गक ।

* गवते इति गोदं कुमुदादौ निपात्यते, क्लीबलिङ्गोऽयम् ।

**वाचस्पतिस्तु**- "गोदोऽस्त्री मस्तुलुङ्गकम्" इति पुंस्यप्याह ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**गोदन्त**–न.–१०५९–હરતાલ.

द्र० आलशब्दः ।

*गोदन्तसदृशत्वाद् इति गोदन्तम्, गोपित्तमपि ।

**गोदा**–સ્ત્રી–१०८४–ગોદાવરી નદી.

☐ गोदावरी ।

* गां द्यति इति गोदा, गोदन्ते क्रीडन्त्यस्यामिति वा ।

**गोदारण**–न.–८९१–હળ.

☐ सीर, लाङ्गल, हल ।

* गौर्दार्यतेऽनेन इति गोदारणम् ।

**गोदारण**–न.–८९२–કોદાળી.

☐ कुद्दाल ।

* गौर्दार्यतेऽनेन इति गोदारणम् ।

**गोदावरी**–સ્ત્રી–१०८४–ગોદાવરી નદી.

☐ गोदा ।

* पयःपूरेण गां पृथ्वीं द्यति इति गोदावरी "मनवन"–॥५।१।१४७॥ इति वन्, "णस्वरावोषाद्वनोरश्च" ॥२।४।४॥ इति ङ्यां साधुः ।

**गोदुह्**–पुं–८८९–ગોવાળ.

द्र० आभीरशब्दः ।

* गां दोग्धि इति गोधुक् ।

**गोधन**–न.–१२७३–ગાયનો સમૂહ.

☐ व्रज, गोकुल, धन ।

* गाव एव धनमत्र इति गोधनम् ।

**गोधा**–સ્ત્રી–७७६–ચામડાનો બાહુબંધ.

☐ तल, (तला), ज्याघातवारण ।

* गुध्यते वेष्ट्यतेऽनया इति गोधा, भिदादित्वादङि साधुः ।

**गोधा**–સ્ત્રી–१२९७–ઘો.

☐ निहाका ।

* गुध्यति इति गोधा ।

**गोधि**–સ્ત્રી–५७३–કપાલ, લલાટ,

द्र० अलिकशब्दः ।

* गुध्यते पटादिना वेष्ट्यते इति गोधिः, स्त्रीलिङ्गः, "किलिपलि"–(उणा–६०८) इति इः ।

**गोधूम**–पुं–११७४–ઘઉં.

☐ सुमन ।

*गुध्यति परिवेष्टयति इति गोधूमः, "कुथिगुधेरूमः" (उणा–३५३), गांधु नाति वा "वीलिभिलि"–(उणा–३४०) इति किद् मः ।

**गोधूमचूर्ण**–न.–४०२–ઘઉંનો લોટ.

☐ समिता ।

**गोनर्द**–पुं १३२८–(शि० १६४) સારસ પક્ષી.

द्र० कुरङ्करशब्दः ।

**गोनस**–पुं–१३०६ ગાય જેવી નાસિકાવાળો સર્પ.

☐ तिलित्स, गोनास, घोणस ।

* गोरिव नासिकाऽस्य इति गोनसः "अस्थूलाच्च नसः" ॥६।३।१६१॥ इति नसादेशः ।

**गोनर्दीय**–पुं–८५१–પતંજલિઋષિ

☐ पतञ्जलि ।

*गोनर्दे भवो इति गोनर्दीयः, "दोरीयः" ॥६।३।३२॥ । इति ईयः

**गोनाग**–पुं–१४४१–ઉત્તમ બળદકે ગાય.

**गोनास**–पुं–१३०६–ગાયના જેવી નાસિકાવાળો સર્પ.

☐ तिलित्स, गोनस, घोणास ।

* गोरिव नासोऽस्य इति गोनासः ।

**गोप**–पुं–७२६–ઘણા ગામનો અધિકારી.

*बहुषु ग्रामेषु अधिकृतो गां भुवं पाति इति गोपः, गोपायतीतिवा ।

**गोप**–पुं–८८९–ગોવાળ.

द्र०आभीरशब्दः ।

*गाः पाति इति गोपः ।

**गोप**–पुं–१०६३–(शि० ९४) હીરાબોળ.

द्र०गन्धरसशब्दः ।

**गोपति**–पुं ९७–सूर्य

द्र०अंशुशब्दः ।

*गवां पतिः इति गोपतिः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**गोपति**-पुं-१२५९-સાંઢ, આખલો.
द्र०इट्चरशब्दः ।
*गवां पतिः इति गोपतिः ।

**गोपरस**-पुं-१०६३-હીરાબોળ.
द्र०गन्धरसशब्दः ।
*गां पाति रसोऽस्य इति गोपरसः, रसोऽपि भीमवत् ।

**गोपानसी**-स्त्री-१००९-ભારવટિયાં, વલભીને ઢાંકવાનું વાંકુ લાકડું.
☐(गोपानसि)
*गोपेन गोपनेन अनिति इति गोपानसिः "गोपादेरनेरसिः" (उणा-७०८) इत्यसिः, ङ्यां गोपानसी ।

**गोपायित**-न०-१४९७-રક્ષણ કરાયેલું.
द्र०अवितशब्दः ।
*गुप्यते इति गोपायितं "अशवितेवा" ॥३।४।४॥ इत्यायप्रत्यये गोपायितम् ।

**गोपाल**-पुं-८८९-ગોવાળ.
द्र० आभीरशब्दः ।
*गाः पालयति इति गोपालः ।

**गोपाल**-पुं-२०० (शे. ४३)-શંકર.
द्र० अट्टहासिनशब्दः ।

**गोपालिका**-स्त्री-१२०८-ગીંગોડી, ચીચડી.
☐महाभीरु ।
* गांपलति गच्छति इति गोपालिका ।

**गोपाली**-स्त्री-५१८ (शे. १०९)-વિલેપન, પીઠી વગેરે કરવી.
☐वर्णक ।

**गोपित्त**-न.-१०५९ (शि, ९२)-હરતાલ.
द्र० आलशब्दः ।

**गोपुच्छ**-पुं-६६१-બે શેરનો હાર.
*गोस्तनस्यार्धं द्वे लते गोपुच्छाकृतित्वाद् गोपुच्छः ।

**गोपुर**-न.-९८१-નગરનો દરવાજો.
☐पूर्द्वार ।
*गोप्यते इति गोपुरम्, "श्वशु"-(उणा ४२६) इति उरे निपात्यते ।

**गोपेन्द्र**-पुं-२१८-વિષ્ણુ, નારાયણ.
द्र० अच्युतशब्दः ।
*गोपानामिन्द्रो इति गोपेन्द्रः ।

**गोप्य**-पुं-३६०-ચાકર, નોકર.
द्र० किङ्करशब्दः ।
*गोपनीयो इति गोप्यः ।

(**गोप्रकाण्ड**)-न.-१४४१-ઉત્તમ બળદ કે ગાય.

(**गोमचर्चिका**)-स्त्री १४४१-ઉત્તમ બળદ કે ગાય.

**गोमत्**-पुं-८८८-ગાય વાળો, ગાયનો માલિક.
☐गवीश्वर, गोमिन्, [गवेश्वर शि. ७८] ।
*गावः सन्त्यस्य इति गोमान् ।

(**गोमतल्लिका**)-स्त्री-१४४१-ઉત્તમ બળદ કે ગાય.

**गोमती**-स्त्री-१०८५-ગોમતી નદી.
☐वासिष्ठी [गौतमी शि. ९७] ।
*गावो जलानि सन्त्यस्यां इति गोमती ।

**गोमय**-पुं-न.-१२७२-ગાયનું છાણ.
☐गोविश्, भूमिलेपन, [पवित्र-शि. ११३] ।
*गोः पुरीषं इति गोमयं पुंक्लीबलिङ्गः "गोः पुरीषे" ॥६।२।५०॥ इति मयट् ।

**गोमयोत्था**-स्त्री-१२०८-છાણના કીડા.
☐गर्दभी ।
*गोमयादुत्तिष्ठति इति गोमयोत्था ।

**गोमायु**-पुं-१२९०-શિયાળ.
द्र० क्रोष्टुशब्दः ।
*गां मिनाति इति गोमायुः "मिवहि"-(उणा-७२६) इति णिदुः ।

**गोमिन्**-पुं-८८८-ગાયવાળો, ગાયનો માલિક.
☐गवीश्वर, गोमत् [गवेश्वर शि. ७८] ।
*गावः सन्त्यस्य इति गोमी, "गोः" ॥७।२।५०॥ इति मिनि गोमी ।

**गोमुख**-पुं-४१-શ્રીઋષભ દેવના શાસન દેવ.
*गौरिव मुखमस्य इति गोमुखः ।

**गोमुख**-पुं-१३४९-મગરમચ્છ.
द्र० आलास्यशब्दः ।
*गौरिव मुखमस्य इति गोमुखः ।

**गोमेध** पुं–४३–શ્રી નેમિનાથ ભગ. ના શાસન દેવ.
*गां मेधते पवित्रीकरोति इति गोमेधः ।

**गोयुग**-न –१४२४–પશુઓના યુગલમાં પશુવાચક શબ્દ થકી ગોયુગ શબ્દ જોડવો. દા. ત. अश्वगोयुग

**गोरस**-पुं–४०४– તરત દોહેલું દૂધ.
द्र० ऊधस्यशब्दः ।
*गोर्धेन्वा रसो इति गोरसः ।

**गोरस**-पुं–४०६–દહીં, ગોરસ.
☐क्षीरज, दधि [श्रीधन, मङ्गल्य शे. १००] ।

**गोरस**-पुं–४०८–છાસ, વલોવેલું દહીં.
☐दण्डाहत, कालशेय, घोल, अरिष्ट, रसायन ।
*गोः धेन्वा रसो इति गारसः ।

**गोराटी**–स्त्री–१३३६–સારિકા, મેના.
द्र० गोकिराटीकाशब्दः ।
*गां रटति इति गोराटी ।

**गोरुत**-न.–८८७–બે કોશ, બે ગાઉ.
☐गव्या, गव्यूत, गव्यूति ।
*क्रोशौ द्वौ गवां रुतमत्र इति गोरुतम् ।

**गोलक**-पुं–५५०–પતિ મરી ગયા પછી જારથી ઉત્પન્ન થયેલો પુત્ર.
*गुड्यते लज्जावशाद् गोप्यते घञि लत्वे च गोलः, के गोलकः ।

**गोला**–स्त्री–१०६०–મહાશીલ ધાતુ.
द्र० कुनटीशब्दः ।
*गां लाति, गुडति वा इति गोला ।

**गोला**–स्त्री–२०५ (शे. ११)–પાર્વતી, શંકરપત્ની
द्र० अद्रिजाशब्दः ।

**गोलाङ्गूल**–पुं–१२९२–કાળામુખવાળો વાંદરો.
*गोरिव लम्बं लाङ्गूलमस्य इति गोलाङ्गूलः, गां लाङ्गयति, उल्लङ्घते वा ।

**'गोवन्दनी'**–स्त्री–११४९–કાંગ.
द्र० प्रियङ्गुशब्दः ।

**गोवर्धनधर**–पुं–२१८–વિષ્ણુ, નારાયણ.
द्र०अच्युतशब्दः ।
*गोवर्धनं धरति इति गोवर्धनधरः ।

**गोविन्द**–पुं–२१५–વિષ્ણુ, નારાયણ.
द्र० अच्युतशब्दः ।
*गां भुवं विन्दति इति गोविन्दः, वराहरूपेणोद्धारात् 'निगवादेर्नाम्नि" ।।५।१।६१।। इति शः, गोपत्वाद्वा ।

**गोविन्द**–पुं–८८९ ગાયોને માટે નિમાયેલ માણસ.
*गां विन्दति इति गोविन्दः "निगवादेर्नाम्नि" ।।५।१।६१।। इति शः ।

**गोविश्**–स्त्री–१२७२–ગાયનું છાણ.
☐गोमय, भूमिलेपन, [पवित्र शि० ११३] ।
*गवां विड् विष्ठा इति गोविट् ।

**गोवृन्दारक**–पुं–१४४१–ઉત્તમ બળદ કે ગાય.

**गोवृष**–पुं–१२५९–સાંઢ, આખલો.
द्र० इट्चरशब्दः ।
*वृषोऽनाकृष्टाण्डः गौश्चासौ वृषश्च इति गोवृषः, गवां वृषो बीजनिषेक्तेति वा ।

**गोशाला**–स्त्री–९९९–ગોશાળા.
☐सन्दानिनी ।
*गवां शाला इति गोशाला ।

**गोशीर्ष**-न.–पुं–६४२–ગોશીર્ષ ચંદન.
☐हरिचन्दन, तैलपर्णिक ।
*गोशीर्षगिरिभवत्वाद् गोशीर्षः, पुंलिङ्गः, गौडस्तु "गोशीर्षम्" इति क्लीबमाह ।

**गोष्ठ**–न.–पुं–९६४–ગાયનો વાડો.
☐गोस्थान ।
*गावस्तिष्ठन्त्यत्र इति गोष्ठं क्लीबलिङ्गः शाब्दिकास्तु 'गोष्ठो भूतपूर्व" इति पुंस्यपि प्रयुञ्जते, स्थादित्वात् कः "गोऽम्बाऽऽम्ब"–।।२।३।३०।। इति षत्वम् ।

**गोष्ठश्व**-पुं–४७७–દ્વેષ કરનાર પડોસી.
*स्वस्थानस्थो यः परान् द्वेष्टि स गोष्ठे श्वेव इति गोष्ठश्वः, "गोष्ठातेः शुनः" ।।७।३।२२।। इत्यट् समासान्तः ।

**गोष्ठी** –स्त्री–४८१–સભા.
द्र० आस्थाशब्दः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*गावो नानोक्तयस्तिष्ठन्त्यस्यां इति गोष्ठी, स्थादित्वात् के "गोऽम्बा" ॥२।३।३०॥ इति क्यप् ।

**गोस**-पुं-१३९-પ્રભાત કાળ.

द्र० अहर्मुखशब्दः ।

**गोसङ्ख्य**-पुं-८८९-ગોવાળ.

द्र० आभीरशब्दः ।

*गाः सङ्ख्याति संचष्टे वा इति गोसंख्यः, "समः ख्यः"—॥५।१।७७॥ इति डः ।

**गोसदृक्ष**-पुं-१२८६-રોઝ.

द्र० अश्ववारणशब्दः ।

*गाः सदृक्षो इति गोसदृक्षः ।

**गोसर्ग**-पुं-१३९-(शे० १८)-પ્રભાતકાળ.

द्र० अहर्मुखशब्दः ।

**गोस्तन**-पुं-६६१-ચાર સેરનો હાર.

**'गोस्तना'**-स्त्री-११५६-દ્રાક્ષ.

द्र० गोस्तनीशब्दः ।

**गोस्तनी**-स्त्री-११५५-દ્રાક્ષ, અંગુર.

☐द्राक्षा, मृद्वीका, हारहरा, 'गोस्तना, स्वाद्वी, मधुरसा' ।

*गोस्तनाभा इति गोस्तनी ।

**गोस्थान**-न.-९६४-ગાયોનો વાડો.

☐गोष्ठ ।

**'चिलिचिमि'**-पुं-१३४६-તૃણચારી મચ્છ.

द्र०चिलिचिमशब्दः ।

**चिल्ल**-पुं-४६१-ચીપડાભરેલી આંખવાળો.

द्र०क्लिन्ननेत्रशब्दः ।

**चिल्ल**-पुं-१३३४ સમડી.

☐ शकुनि, आतपिन्, 'आतायिन्' ।

*चिल्लति वातेन शिथिलीभवति इति चिल्लः ।

**चिहुर**-पुं-(બ. વ.) ५६८ (शि० ४५) કેશ, વાળ.

द्र० कचशब्दः ।

**चिह्न**-न०-१०६-લાંછન, ચિહ્ન.

द्र० अङ्कशब्दः ।

*चाहयति इति चिह्नं "दिननग्न"-(उणा-२६८) इत्यादिना नान्तो निपात्यते ।

**चीन**-पुं--१२९४ હરણનો એક પ્રકાર.

*चीयते इति चीनः शितक्रोडः ।

**चीन**-पुं-१०४१-(शि० १६०) સીસું.

द्र० गण्डूपदभवशब्दः ।

**चीनक**-पुं-११७८-કાંગ, એકજાતનુ હલકુ ધાન્ય.

☐ काक, कङ्गु ।

*चीयते इति चीनः, "दिननग्न"-(उणा-२६८) इति ने निपात्यते के चीनकः ।

**चीनपिष्ट**-न.-१०६१ સિન્દુર.

☐ सिन्दूर, नागज, नागरक्त, शृङ्गारभूषण, [शृङ्गार शि० ९३] ।

**चीर**-न०-६६६-વસ્ત્ર.

द्र० अंशुकशब्दः ।

*चीयते तन्तुभिः इति चारं "चिजि"-(उणा-३९२) इति रः दीर्घत्वं च ।

**चीरिल्ली**-पुं-१३४८-મોટું માછલું.

☐ महामत्स्य, तिमिङ्गिल, तिमिङ्गिलगिल, (नन्द्यावर्त्त) ।

*चिरं लीयते इति चीरिल्लिः पृषोदरादित्वात् ।

**चीरी**-पुं- १२१५-ભમરા જેવું ક્ષુદ્ર જંતુ, તમરું.

☐ चीरुका, झिल्लिका, झिल्लीका, 'झिल्लका' वर्षकरी, भृङ्गारिका, भृङ्गारी, 'झीरुका, झिरुका, झीरिका, झिरीका, झिरीरु' ।

*चिनोतिस्वरं इति चीरी "चिजि"-(उणा-३९२) इति रो दीर्घत्वं च चीती रिणातीति वा "क्वचित्" ॥५।१।१७१॥ इति डः ।

**चीरुका**-स्त्री-१२१५-ભમરાજેવું ક્ષુદ્રજંતુ, તમરું.

द्र० चीरीशब्दः ।

* चीति रौति इति चीरुका "निष्कतुरुष्क"-(उणा-२६) इति के निपात्यते ।

**चीवर**-न०-६७८-મુનિઓનું વસ્ત્ર.

☐ भिक्षुसङ्घाटी ।

*चीयते इति चीवरं "नोर्मीकुतुचेदीर्घश्च" (उणा-४४३) इति वरट् ।

**चुक्र**-पुं-न०-४१६-કાંજી, રાબ.

द्र० अवन्तिसोमशब्दः ।

*चकते तृप्यत्यनेन इति चुक्रं, पुंक्लीबलिङ्गः, "चकिरभिविक-" (उणा-३९३)इति रः ।

**चुक्र**-पुं-न०-४१७-આંબલી, કોકમ.

द्र० अम्लवेतसशब्दः ।

*चकते तृप्यत्यनेन इति चुक्रम्, पुंक्लीबलिङ्गः ।

**चुण्ठी** स्त्री-१०९३-નાનો કુવો.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्र० क्षुद्रकूपशब्दः ।

*चमन्त्याचमन्त्यस्यां इति चुण्टिः "चमेरुच्चातः" (उणा-६३२) इति टिः ङ्यां चुण्टी ।

**चुन्दी**-स्त्री-५३३-वेश्यानी દલાલ સ્ત્રી, કુટ્ટની.

☐ कुट्टनी, शम्भली ।

*"चुड्ड हावकरणे" चुड्डति इति चुन्दी पृषोदरादित्वात् देश्योऽयमित्यन्ये ।

**चुरी**-स्त्री-१०९३-નાનો કૂવો.

द्र० क्षुद्रकूपशब्दः ।

*चोरति इति चुरिः "नाम्युपान्त्य"-॥५।१।५४॥ इति कः, ङ्या चुरी ।

**चुलुक**-पुं-स्त्री-५९८-પાણીના આધારરૂપે બનાવેલી પસલી.

द्र० गण्डूषशब्दः ।

*"चुलुम्पः सौत्रः" चुलुम्पतीति चुलुकः, पुंस्त्रीलिङ्गः "कञ्चुकांशुक"-(उणा-५७) इत्युके निपात्यते ।

**चुल्ल**-पुं-४६१-ચીપડા ભરેલી આંખવાળો.

द्र० क्लिन्ननेत्रशब्दः ।

**(चुल्लि)**-स्त्री-१०१८-ચૂલો.

द्र० अधिश्रयणीशब्दः ।

**चुल्ली**-स्त्री-१०१८-ચૂલો.

द्र० अधिश्रयणीशब्दः ।

*चुल्लति इति चुल्लिः "किलपिलि"-(उणा-६०८) इति इः, ङ्यां चुल्ली ।

**चूचुक**-पुं-न.-६०३-સ્તનનો અગ્રભાગ.

☐ स्तनवृन्त, स्तनशिखा, स्तनमुख, (स्तनाग्र) [पिप्पल, मेचक शे० १२६] ।

*चल्यते बालेन इति चूचुकं, पुंक्लीबलिङ्गः "कञ्चुकां"-(उणा-५७) इत्युके निपात्यते, बालेन पीयमानं चूचिवत्यव्यक्तं कायति वा ।

**चूडा**-स्त्री-५७१-શિખા, ચોટલી.

द्र० केशीशब्दः ।

*चोटयते इति चूडा, भिदादित्वादङि निपात्यते ।

**चूडामणि**-पुं-६५०-મસ્તક ઉપરનો મણિ.

☐ शिरोमणि, (शिरोरत्न, चूडारत्न)

*चूडायां मणिः इति चूडामणिः चूडारत्नोऽपि ।

**(चूडारत्न)**-पुं-६५०-મસ્તક ઉપરનો મણિ.

☐ शिरोमणि, चूडामणि, (शिरोरत्न) ।

**चूत**-पुं-११३३-આંબો.

द्र० आम्रशब्दः ।

*श्चोतति चूष्यते वा चूतः "पुतपित्त"-(उणा-२०४) इति ते निपात्यते ।

**(चूत)**-न०-२२९-કામનીયોનિ-ઉત્પત્તિ.

**चूतक**-पुं-१०९३-નાનો કુવો.

द्र० क्षुद्रकूपशब्दः ।

*श्चोतति इति चूतकः "कीचक"-(उणा-३३) इत्यके निपात्यते ।

**चूर्ण**-पुं-६३७-અબીલ, પટવાસાદિ ચૂર્ણ.

☐ वासयोग ।

*चूर्यते इति चूर्णं पटवासादिक्षोदः पुंक्लीबलिङ्गः ।

**चूर्ण**-पुं-न०-९७०-કાંકરાવાળી ધૂળ.

☐ क्षोद ।

*चूर्यतेस्म इति चूर्णं पुंक्लीबलिङ्गः ।

**चूर्णकुन्तल**-पुं-५६९ ગુંચળા વાળા બાલ.

द्र० अलकशब्दः ।

*चूर्णाकारः कुन्तलः इति चूर्णकुन्तलः ।

**चूलिका**-स्त्री-२४५-દષ્ટિવાદનો પાંચમો ભેદ.

**चूलिका**-स्त्री १२२५-હાથીના કાનનું મૂળ.

द्र० ईषिकाशब्दः ।

*गजस्य कर्णमूलं चोद्यते पार्श्वगमनेऽङ्कुशेनास्यां चूलिका, भिदादिनिपातनादङ् ततः स्वार्थे कः ।

**'चूष्या'**-स्त्री-१२३२-હાથીની કંઠ ઉપર બાધવાનો દોરો.

द्र० कक्ष्याशब्दः ।

**चेट**-पुं-३६०-ચાકર, નોકર.

द्र० किङ्करशब्दः ।

*चेटति इति चेटः ।

**चेटी**-स्त्री-५३४-દાસી.

द्र० कुटहारिकाशब्दः ।

*चेटति इति चेटी ।

**चेटी**-स्त्री-३३४ દાસી.

☐ नीचा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**चेत्**-अ०-१५४२ જો, યદિના અર્થમાં.

□ यदि ।

*चिनोति इति चेत् "संश्चद्"-(उणा-८८२) इति निपात्यते ।

**'चेतकी'**-स्त्री-११४६-હરડે.

द्र० अभयाशब्दः ।

**चेतन**-पुं-१३६६ આત્મા, જીવ.

□ क्षेत्रज्ञ, आत्मन्, पुरुष [जीव शि० १२३] ।

*चेतयते इति चेतनः, जीवोऽपि ।

**चेतना**-स्त्री-३०८-બુદ્ધિ, मूर्ति.

द्र० उपलब्धिशब्दः ।

*चेतनं इति चेतना ।

**चेतस्**-न० १३६९-મન, ચિત્ત.

द्र० अन्तःकरणशब्दः ।

*चेतयते इति चेतः "अस्" (उणा-९५२) इत्यस् ।

**(चेतोभव)**-पुं-२२९-કામદેવનું યૌગિક નામ,

**चेदि**-पुं-(બ.વ.)-९५६-દેશવિશેષ (પૂર્વ હિન્દુસ્તાન)

□ चैपुर, डाहल, चैद्य ।

*चयन्ते इति चेदयः पृषोदरादित्वात् ।

**चेदिनगरी**-स्त्री-९७५ ચેદિદેશની નગરી, त्रिपुरी.

□ चेदीनां नगरी इति चेदिनगरी ।

**चेल**-न०-६६६ વસ્ત્ર.

द्र० अंशुकशब्दः ।

*चील्यते, चेलति वा इति चेलम् ।

**चेल**-न०-१४४३-અધમ, હલકું.

द्र० अधमशब्दः ।

*चेलति इति चेलम् ।

**चैत्य**-न०-९९४-જિન મંદિર, જૈન દેરાસર.

□ विहार, जिनसद्मन, 'आयतन' ।

*चीयते इति चैत्यम्, "शिक्यास्या"-(उणा-३६४) इति ये साधुः ।

**चैत्यद्रुम**-पुं-६२-અશોક વૃક્ષ.

**चैत्र**-पुं-१५३- ચૈત્રમાસ.

□ मधु, चैत्रिक, [मोहनिक, कामसख, फाल्गुनानुज, शि० २३] ।

*चैत्री पौर्णमास्यास्य इति चैत्रः ।

**चैत्ररथ**-न०-१९०-કુબેરનું ઉદ્યાન.

*चित्ररथेन निर्वृत्तं इति चैत्ररथं "तेन निर्वृते च" ॥६।२।७१॥ इत्यण् ।

**(चैत्रसख)**-पुं-२२९-કામદેવનું યૌગિક નામ.

**चैत्रिक**-पुं-१५३-ચૈત્રમાસ.

द्र० चैत्रशब्दः ।

*चैत्री पौर्णमास्यास्य इति चैत्रिकः ।

**चैद्य**-पुं-९५६(બ.વ.)-ચૈદ્યદેશ(પૂર્વ હિન્દુસ્તાન.)

□ चैपुर, डाहल चेदि ।

* चेदय एव चैद्याः भेषजादित्वात् ट्यण् ।

**चोक्ष**-न०-१४३६-ફોતરા વિનાનું, સાફ કરેલું.

□ निःशोध्य, अनवस्कर ।

*चुक्ष्यते इति चोक्षम् "लाक्षाद्राक्षा"-(उणा-५९७) इति निपात्यते ।

**चोच**-न०-११२१-વૃક્ષ વગેરેની છાલ.

□ त्वच्, छल्ली, वल्क, वल्कल, [त्वचा शि० १००] ।

*चन्यते इति चोचं "चमेडो चडञ्चौ" (उणा-१२२)।

**चोटी**-पुं-स्त्री-६७५-સાડી.

□ शाटी, शाटक ।

*चोटत्यलीभवति इति चोटः ङ्यां चोटी, पुंस्त्रीलिङ्गः ।

**चोदित**-न०-१४८२ (शि० १३४) પ્રેરણા કરેલું.

द्र० अस्तशब्दः ।

**चोद्य**-न०-३०४-આશ્ચર્ય.

द्र० अद्भुतशब्दः ।

*चोद्यते इति चोद्यम् ।

**चोर**-पुं-३८१-ચોરી કરનાર, ચોર.

द्र० एकागारिकशब्दः ।

*चोरयति इति चोरः, प्रज्ञाद्यणि चौरोऽपि ।

**चोरड**-पुं-३८२-(शि० ५५) ચોર.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्र० एकागारिकशब्दः ।

**चोल**-पुं-६७४-ચોલી કાંચળી વગેરે

द्र० अङ्गिकाशब्दः ।

*चुलिः सौत्रः, चुल्यतेऽनेन इति चोलः ।

**चौर**-पुं-३८२ (शि०२६) ચોરી કરનાર, ચોર.

द्र० एकागारिकशब्दः ।

**चौरिका** સ્ત્રી-ન०-३८३ ચોરી.

☐चौर्य, स्तेय [स्तैन्य शि०-२६]

*चोरायकत्रि इति चौरिका स्त्रीक्लीबलिङ्गः ।

**चौर्य**-न०-३८३ ચોરી.

द्र० चोरिकाशब्दः ।

*चौरस्य भावः कर्म वा इति चौर्यम् राजादित्वात् ट्यण् ।

**चौलुक्य**-पुं-७१२-કુમારપાલ મહારાજા.

द्र० कुमारपालशब्दः ।

*चुलुकस्य अपत्यं इति चौलुक्यः, गर्गादित्वात् यञ्, चुलुके भवः इति चुलुक्यः तस्य अयं इति वा ।

**च्युत**-न०-१४९०-પડી ગયેલું.

द्र० गलितशब्दः ।

*च्यवते स्म इति च्युतम् ।

**च्युति**-સ્ત્રી-६०९ સ્ત્રીનું ચિહ્‌ન, યોનિ.

द्र० अपत्यपथशब्दः ।

*च्यवन्तेऽस्यां इति च्युतिः, च्युतमनेन च्युत्यत आसिच्यते वा "नाम्युपान्त्य"-(उणा-६०९)इति किदिः।

**च्युति**-સ્ત્રી-६१२-ગુદા.

द्र० अधोमर्मन्शब्दः ।

*च्यवते मलोऽस्याः इति च्युतिः ।

## 'छ'

(**छइल्ल**)-पुं-३४३-અત્યન્ત હોશિયાર.

द्र०अभिज्ञशब्दः ।

**छग**-पुं-१२७५-બકરો.

द्र०अजशब्दः ।

*छ्यति इति छगः "शृङ्गशाङ्ग"-(उणा-९६) इति गे निपातनात् छगः ।

**छगण**-न.-१२७३-સુકું છાણ, છાણાં.

द्र०करीषशब्दः ।

*छाद्यते वह्निरनेन इति छगणं "चिक्कण"-(उणा-१९०) इत्यणे निपात्यते ।

**छगल**-पुं-१२७५-બકરો.

द्र०अजशब्दः ।

*छ्यति इति छगलः, "छोडगगादिर्वा"-(उणा-४७१) इत्यलः ।

**छत्र**-वि०-७१७-રાજાનું છત્ર.

द्र०आतपवारणशब्दः ।

*छाद्यतेऽनेन इति छत्रं त्रिलिङ्गः, "त्रट्" (उणा-४४६) इति त्रट् "छदेरिस्मन्"-।।४।२।३२।।इति ह्रस्वः ।

**छत्रत्रय**-न.-६१-પ્રભુનો ૧૯મો અતિશય (આકાશમાં ત્રણ છત્ર હોય તે)

**छत्रधार**-पुं-७६४-છત્રધારણ કરનાર.

☐छायाकर ।

*छत्रं धरति इति छत्रधरः ।

**छद्**-पुं-न.-११२३-પત્ર, પાંદડું.

☐पत्र, पलाश, छदन, बर्ह, पर्ण, दल ।

*छाद्यतेऽनेन इति छदं "पुंनाम्नि"-।।५।३।१३०।। इति घे "एकोपसर्गस्य"-।।४।२।३४। इति ह्रस्वः पुंक्लीबलिङ्गः ।

**छद्**-पुं-१३१८-ચાંચ.

द्र० गरुत्शब्दः ।

*छाद्यतेऽनेन इति छदः ।

**छदन**-न०-११२३-પત્ર, પાંદડું.

द्र० छदशब्दः ।

*छाद्यतेऽनेन इति छदनं युजादिपाठात् णिचोऽभावपक्षेऽनट् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**छदन**–ન૦–૧૪૭૭–આચ્છાદન, ઢાંકણ.

द्र० अन्तर्धिशब्दः ।

*छाद्यते इति छदनम्, छदेश्चुरादीनां प्रायो णिजन्तत्वाण्णिचोऽभावः, छदिरदन्तः इति **केचित्** ।

**(छदावलि)**–સ્ત્રી–૭૮૧–બાણની પૂંખમાં રહેલાં પીંછાં.

द्र० पक्षशब्दः ।

**छदिष्**–પું–૧૦૧૦–છાપરું.

☐ पटल ।

छाद्यतेऽनेन इति छदिः क्लीबलिङ्गः "रुच्यर्चि"–(उणा–९८९) इति इस् "छदेरिस्मन्"–॥४।२।३३॥ इति ह्रस्वः ।

**छद्मन्**–ન૦–૩૭૮–કપટ, છલ.

द्र० उपधिशब्दः ।

*छाद्यते रूपमनेन इति छद्म "छदेरिस्मन्–" ॥४।२।३३॥ इति मनि ह्रस्वः ।

**छन्द**––પું–૧૩૮૩–અભિપ્રાય.

द्र० अभिप्रायशब्दः ।

*छन्दत्याह्लादयति इति छन्दः "अच्" ॥५-१।४९॥ इत्यच् पृषोदरादित्वात् छत्वम् ।

**छन्दस्** ન૦–૨૪૯ વેદ.

द्र० आम्नायशब्दः ।

*छादयति पापं इति क्लीबलिङ्गः, "छदि-वहिभ्यां छन्दोघौ च"–(उणा-९५४) इत्यस् ।

**छन्दस्**-પુ–૨૫૦– વેદનું ચોથું અંગ.

*छाद्यतेऽनेन प्रस्ताराद् भूरितिच्छन्दः छन्दोविचितिः ।

**छन्न**–ન.–૭૪૧ એકાન્ત.

द्र०उपह्वरशब्दः ।

*छाद्यते स्म इति छन्नम् ।

**छन्न**–ન.–૧૪૭૩–પૂર્ણ, ભરેલું.

द्र०आचितशब्दः ।

*छाद्यतेस्म इति छन्नं "णौ दान्तशान्त"–॥४।४।७४॥ इति इडभावे साधुः, छादितमपि ।

**छन्न**–ન.–૧૪૭૬–ઢંકાયેલું.

द्र०अन्तर्हितशब्दः ।

*छाद्यते इति छन्नम्, छादितमपि ।

**छर्दि**–સ્ત્રી–ન.–૪૬૯–ઉલટી, વમન.

☐प्रच्छर्दिका, छर्दिष्, वमथु, वमन, वमि ।

*छर्दनं इति छर्दिः स्त्रीक्लीबलिङ्गः, "पदिपठि"-(उणा–६०७) इति इः ।

**छर्दिष्**–સ્ત્રી–૪૬૯–ઉલટી, વમન.

द्र०छर्दिशब्दः ।

*छृणत्ति छर्दनं वा छर्दिः स्त्रीलिङ्गः "रुच्यर्चि" (उणा–९८९) इति इस् ।

**छल**–ન.–૩૭૮––કપટ, છળ.

द्र०कपटशब्दः ।

*छ्यति छिनत्त्यनेन इति छलम्, "छोडग् गादिर्वा"–(उणा–४७१) इति किदलः ।

**छल**–ન.–૮૦૪–ઠગાઈ.

☐स्खलित ।

*छ्यति इति छलम् ।

**छल्ली**–સ્ત્રી–૧૧૨૧–વૃક્ષવગેરેની છાલ.

द्र०चोचशब्दः ।

*छाद्यतेऽनया, छदयन्त्येनामिति वा छल्ली "भिल्लाच्छभल्ल"–(उणा–४६४) इति ले निपात्यते ।

**छवि**–સ્ત્રી–૧૦૦–કિરણ.

द्र०अंशुशब्दः ।

*छ्यति तम इति छविः स्त्रीलिङ्गः "छविच्छिवि–" (उणा–७०६) इत्यादिना निपात्यते ।

**छवि**–સ્ત્રી–૬૩૦–ચામડી.

द्र० अजनिशब्दः ।

*छ्यन्त्येनां छविः स्त्रीलिङ्गः "छविच्छिवि"–(उणा–७०६) इति वौ निपात्यते ।

**'छवि'**–સ્ત્રી–૧૫૧૨ શોભા.

द्र० अभिख्याशब्दः ।

**छाग**–પું–૪૮–૧૭મા ભગવાનનું લાંછન.

**छाग**–પું–૧૨૭૫- બકરો.

द्र० अजशब्दः ।

*छ्यति इति छागः, "गम्यमि"–(उणा ९२)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति गे छागः

**छागण**-पुं-११०१-છાણાનો અગ્નિ.

☐ करीषाग्नि ।

*छगणस्यायं इति छागणः

**छागरथ**-पुं-१०९७-અગ્નિ.

द्र० अग्निशब्दः ।

*छागो रथोऽस्य इति छागरथः ।

**(छागिका)**-स्त्री-१२७५-બકરી.

द्र०अजाशब्दः ।

**छागी**-स्त्री-१२७५-બકરી.

द्र०अजाशब्दः ।

*छ्यति इति छागी ।

**छात**-पुं-४४९-દૂબળો, કૃશ.

द्र०अमांसशब्दः ।

*छ्यति स्म इति छातः ।

**छात**-न.-१४९०-(शि. १३४) કાપેલું, છેદાયેલું.

द्र०कृत्तशब्दः ।

**छात्र**-पुं-७९-(शे० २)-शिष्य

द्र०अन्तेवासिन्शब्दः ।

**(छात्रक)**-न.-१२१४-એક જાતનું મધ.

**छादनी**-स्त्री-६३०-ચામડી.

द्र०अग्निशब्दः ।

*छाद्यते रुधिराद्यनया इति छादनी ।

**छादित**-न.-१४७३-(शि. १३२)-પૂર્ણ ભરેલું.

द्र०आचितशब्दः ।

**छादित**-न.-१४७७-(शि. १३२) ઢંકાયેલું.

द्र०अन्तर्हितशब्दः ।

**छान्दस**-पुं-८१७-વેદ જાણનાર., બ્રાહ્મણ.

☐श्रोत्रिय ।

**छाया**-स्त्री-१५१२-શોભા, કાન્તિ.

द्र०अभिख्याशब्दः ।

*छ्यति वैरूप्यं इति छाया "स्थाछामा"-(उणा-३५७) इति यः ।

**छायाकर**-पुं-७६४-છત્રધારણ કરનાર.

☐छत्रधार ।

*छायां करोति इति छायाकरः "हेतुतच्छीला"-॥५।१।१०३॥ इति टः ।

**(छायाङ्क)**-पुं-१०५-ચંદ્ર, ચંદ્રમા.

द्र०अत्रिदृग्जशब्दः ।

**छायापथ**-पुं-१६३-(शे. २८)-આકાશ.

द्र०अनन्तशब्दः ।

**छायाभृत**-पुं-१०५-ચંદ્ર, ચંદ્રમા.

द्र०अत्रिदृग्जशब्दः ।

*छायां बिभर्ति इति छायाभृत् यौगिकत्वात् छायाङ्कः ।

**छायासुत**-पुं-१२०-શનિ.

द्र०असितशब्दः ।

*छाया आदित्यपत्नी तस्याः सुतः इति छायासुतः ।

**( छिक्का)**-स्त्री-४६३-છીંક.

☐ क्षुत्, क्षुत, क्षव ।

**छित**-न.-१४८९-છેદાયેલું, કાપેલું.

द्र० कृत्तशब्दः ।

*छायते इति छितं, "छाशोर्वा"-॥४।४।१२॥ इति इत्वं छातमपि ।

**छिद्र**-न.-१३६४-કાણું, બાકોરું.

द्र० अन्तरशब्दः ।

*छिद्यते इति छिद्रं "ऋज्यजि"-(उणा-३८८) इति किद् रः ।

**छिद्रवस्त्र** न. ६७९-કાણા પડેલું વસ્ત્ર.

☐ शाणी, गोणी ।

*छिद्रं च तद्वस्त्रं च इति छिद्रवस्त्रम् ।

**छिद्रित**-पुं-१४८६-વીંધાયેલું, કાણું પડેલું.

☐ बिद्ध, वेधित ।

*छिद्र्यतेस्म इति छिद्रितः छिद्रं संजातमस्य वा ।

**छिन्न**-न.-१४८९-છેદાયેલું, કાપેલું.

द्र०कृत्तशब्दः ।

*छिद्यते स्म इति छिन्नम् ।

**छिन्नरुहा**-स्त्री-११५७-ગળો.

*अमृताशब्दः ।

**छुछुन्दरी**-स्त्री-१३०१-છુછુન્દરી,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

☐ गन्धमूषी, गन्धमूषिका ।

*छुछु इति शब्देन उपलक्षिता उन्दरी छुछुन्दरी पृषोदरादित्वात् ।

**छुरिका** स्त्री-७८४-(शि. ६८) छरी.

द्र० असिधेनुशब्दः ।

**छुरी**-स्त्री-७८४-छरी.

द्र०असिधेनुशब्दः ।

*छुरति छिनत्ति इति छुरी ।

**छेक**-पुं-३४३-અત્યન્ત હોંશિયાર.

☐ विदग्ध, [छेकाल, छेकिल, छइल्ल, शे.९२] ।

☐ छ्यति छिनत्ति मूर्खदुष्टचित्तानि इति छेकः "निष्कतुरुष्क"-(उणा-२६) इति कान्तो निपात्यते ।

**छेक**-(प.व).-पुं-१३४३-घरे પાળેલા પશુ, પક્ષી.

☐गृह्य ।

*छ्यन्ति आत्मनो भयमिति छेकाः "निष्कतुरुष्क"-(उणा-२६) इति के निपात्यते ।

**छेकाल**-पुं-३४३-(शे० ९२)-અત્યન્ત હોંશિયાર.

द्र०छेकशब्दः ।

**छेकिल**-पुं-३४३-(शे. ९२)-અત્યન્ત હોંશિયાર.

द्र०छेकशब्दः ।

**छेद**-पुं-३७२-કાપવું.

☐कर्तन, कल्पन, वर्धन ।

*छेदनं इति छेदः ।

**छेदित**-पुं-१४९०-છેદાયેલું, કાપેલું.

द्र०कृत्तशब्दः ।

*"छदेण् द्वैधीकरणे", छेद्यते इति छेदितम् ।

卐

## "ज"

**ज**-पुं-६-(प.)-જનક કારણ વાચક શબ્દથી લગાડાતો શબ્દ, દા, ત. જલજ

**जकुट**-पुं न.-१४२४-(शि.१२७) યુગલ, બેનું જોડું,

द्र० द्वितयशब्दः ।

**जक्षण**-न.-४२३-ખાવું, ભોજન.

द्र० अदनशब्दः ।

*जक्ष्यते इति जक्षणम् ।

**जगच्चक्षुष्**-पुं-९८-સૂર્ય.

द्र० अंशुशब्दः ।

*जगतां चक्षुः इति जगच्चक्षुः प्रकाशकत्वात् ।

**जगत्**-न.-१३६५-લોક, દુનિયા.

☐ लोक, विष्टप, 'पिष्टप', विश्व, भुवन, जगती ।

*गच्छतीत्येवंशील इति जगत् क्लीबलिङ्गः, "दिद्युद्दद"-॥५।२।८३॥ इति क्विपि निपात्यते ।

**जगत्**-न.-१४५४-હાલતું ચાલતું, જંગમ.

अ. ३६

द्र०इङ्गशब्दः ।

*गमनशील इति जगत् "दिद्युद्दद्‌ज्जगत्"-॥५।२।८३॥ इति क्विपि साधुः ।

**जगती**-स्त्री-९३७-પૃથ્વી.

द्र० अचलाशब्दः ।

*गच्छन्त्यस्यां इति जगती "गमेर्डिद्‌द्वेच"-(उणा-८८५) इतिकतृः "अधातूदृदितः" ॥२।४।२॥ इति ङीः ।

**जगती**-स्त्री-१३६५-લોક, દુનિયા.

द्र०जगत्शब्दः ।

*गच्छन्त्यस्यां इति जगती "गमेर्डिद्‌द्वेच"-(उणा-८८५) इति कतृः "अधातूदृदितः"-॥२।४।२॥ इति ङीः ।

**जगत्कर्तृ**-पुं-२१२-બ્રહ્મા.

द्र० अजशब्दः ।

*जगतां कर्ता इति जगत्कर्ता, योगिकत्वात् विश्वसृड् इत्यादयः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**जगत्प्रभु**-पुं-२४-અરિહંત, તીર્થંકર.
द्र० अधीश्वरशब्दः ।
*जगतां प्रभुः इति जगत्प्रभुः ।

**जगत्प्राण**-पुं-११०७-પવન, વાયુ.
द्र० अनिलशब्दः ।
*जगतां प्राणो इति जगत्प्राणः ।

**जगत्साक्षिन्**-पुं-९८ સૂર્ય.
द्र० अंशुशब्दः ।
*जगतः साक्षी इति जगत्साक्षी ।

**जगत्स्रष्टृ**-पु.-२००-(શે० ४८)-શંકર.
द्र० अट्टहासिन्शब्दः ।

**जगद्दीप**-पुं-९८-(શે० १०) સૂર્ય.
द्र० अंशुशब्दः ।

**जगद्योणि**-पुं-२०० (શે० ४८)-શંકર.
द्र० अट्टहासिन्शब्दः ।

**जगद्वहा**-स्त्री-९३८-(શે०१५७)-પૃથ્વી.
द्र० अचलाशब्दः ।

**जगन्नाथ**-पुं-२१८-વિષ્ણુ.
द्र० अच्युतशब्दः ।
*जगतां नाथः इति जगन्नाथः ।

**जगर**-पुं-७६६-બખ્તર, કવચ.
द्र० उरच्छदशब्दः।
*जायते इति जगरः, "जठर"-(उणा-४०३) इत्यरे निपात्यते, जागर्तीति वा बाहुलकाद् ह्रस्वः ।

**जगल**-पुं-९०४-મદિરાનો કાદવ, મદ્યનો નીચલો ભાગ.
☐ मेदक, मद्यपङ्क ।
*भृशं गलति इति जगलः पृषोदरादित्वात् ।

**जग्धि**-पुं-४२३-ભોજન, ખાવું.
द्र० अदनशब्दः ।
*अदनं इति जग्धिः, "यपिचादो जग्ध-" ॥४।४।१६॥ ।

**जघन**-न०-६०८-સ્ત્રીની કેડનો આગલો ભાગ.
*हन्यते इति जघनं "हनेर्घ्नतजघौ च'-(उणा-२७२) इत्यनः, स्त्रीकटेरग्रभागः ।

**जघनेफला**-स्त्री-११३३-કાળા ઉંબરાનું વૃક્ષ, ધુલરડો.
द्र० काकोदुम्बरिकाशब्दः ।
*जघने बुध्ने फलान्यस्या इति जघनेफला स्त्रीलिङ्गः ।

**जघन्य**-न०-१४५९-છેલ્લું, પાછલું.
द्र० अन्तशब्दः ।
* जघनेऽधस्ताद् भवं इति जघन्यं, दिगादित्वाद् यः ।

**जघन्यज**-पुं-५५२-નાનોભાઈ.
द्र० अनुजशब्दः ।
*पश्चाज्जातः इति जघन्यजः ।

**जघन्यज**-पुं-८९४--શૂદ્ર.
द्र० अन्त्यवर्णशब्दः ।
*जघन्ये जातः इति जघन्यजः ।

**जङ्गम**-न०-१४५४-જંગમ, હાલતું ચાલતું.
द्र० चरशब्दः ।
*भृशं गच्छति इति जङ्गमं, अकौटिल्येऽप्यभिधानाद् यङ् ।

**जङ्गमान्यत्**-न०-१४५४-સ્થાવર, સ્થિર.
☐ स्थावर ।

**जङ्गल**-पुं-न.-६२२-માંસ.
द्र०आमिषशब्दः ।
*जायन्ते रुधिराद् इति जङ्गलं पुंनपुंसकः, "ऋजनेर्गोन्तिश्च"-(उणा-४६७) इत्यलः ।

**जङ्गल**-पुं-न.-९५३-પાણી વગરનો દેશ.
☐ निर्जल [जाङ्गल-शि. ८४] ।
*जायन्ते स्थलान्यत्र इति जङ्गलः स्थलप्रायः, "ऋजनेर्गोऽन्तश्च"-(उणा-४६७) इत्यलः प्रज्ञादित्वात् जाङ्गलोऽपि ।

**जङ्घा**-स्त्री-६१४-જાંઘ.
☐ प्रसृता, नलकिनी ।
*जायते इति जङ्घा, "स्थातिजनिभ्यो घः" (उणा-१०९) जङ्घन्यते वा ।

**जङ्घाकर**-पुं-४९४-(शि. ३८)-ખેપીઓ.
☐ जाङ्घिक, जङ्घाकरिक ।

**जङ्घाकरिक**-पुं-४९४-ખેપીયો.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

☐जाङ्घिक, [जङ्घाकर-शि. ३८] ।

**जङ्घात्राण**-न.-७६८-બંધનું બખ્તર.

☐मत्कुण ।

*जङ्घा त्रायतेऽनेन इति जङ्घात्राणम् ।

**जङ्घाल**-પું-૪૯૪-વેગવાળો.

☐अतिजव ।

**जटा**-સ્ત્રી-८१६-મસ્તક ઉપરના મોટાવાળ.

☐सटा ।

*जायते तपसि इति जटा, तपस्विनां ग्रथितः केशसङ्घातः ।

**जटा**-સ્ત્રી-११२०-ઝાડનું મૂળ.

☐शिफा ।

*जटति इति जटा वृक्षादिमूलम् ।

**जटाजूट**-પું-२००-શંકરની જટા.

☐ कपर्द ।

*जटानां जूटो रचनाविशेषो जटाजूटः ।

**जटाधर**-પું-२००-(શે०-४७) શંકર.

द्र० अट्टहासिन्शब्दः ।

**जटिन्**-પું-११३१-પીંપળ.

☐ प्लक्ष, पर्कटी, (पर्कटिन्) ।

*जटाः सन्त्यस्य इति जटी शिखादित्वादिन् ।

**जटिन्**-પું-१२१८-(શે० १७६)-હાથી.

द्र० अनेकपशब्दः ।

**जठर**-પું-ન.-६०४ પેટ.

द्र० उदरशब्दः ।

*जमत्याहारं इति जठरं पुंक्लीबलिङ्गः "जठर"-(उणा-४०३) इत्यरे निपात्यते ।

**जठर**-પું-१३८७-કઠોરસ્પર્શ, કઠિન.

द्र० कक्खटशब्दः ।

*जीर्यति इति जठरः "भृमृशृजू-(उणा-१६७) इत्यटः, जरठोऽपि ।

**जड**-પું-३५२-મુર્ખ.

द्र० अमेधस्शब्दः ।

*जलति न तीक्ष्णोभवति डलयोरैक्ये इति जडः ।

**जड**-પું-१३८५-શીતસ્પર્શ, ઠંડુ.

☐ शीत, तुषार, शिशिर, सुशीम, शीतल, हिम, [सुषिम, 'सुषीम',] [शि० १२६] ।

*जलति इति जडः ।

**जड**-પું-३४९-(શે०९३) મૂંગો.

☐ मूक, अवाच् [कड-शे०-९३] ।

**जडुल**-પું-६१८-શરીરમાં કાળું ચિહ્ન, તલ.

द्र०कालकशब्दः ।

*जलति इति जडुलः "हृषिवृति"-(उणा-४८५) इति बहुवचनादुलः ।

**जतु**-ન.-६८६-લાખ.

द्र०कृमिजाशब्दः ।

*जायते इति जतु क्लीबलिङ्गः, "मनिजनिभ्यां घतौ च"-(उणा-७२१) इत्युः ।

**जतुक**-ન.-४२२-હીંગ.

☐सहस्रवेधिन्, वाल्हीक, हिङ्गु, रामठ [भूतनाशन-शे. १०३, अगूढगन्ध, अत्युग्र-शे. १०४] ।

*जायते इति जतुक "कञ्चुकांशुक"-(उणा-५७) इत्युके निपात्यते ।

**जतुका**-સ્ત્રી-१३३६-ચામાચીડિયું.

द्र०अजिनपत्रिकाशब्दः ।

*जत्विव कृष्णपिङ्गत्वात् जतुका ।

**'जतूका'**-સ્ત્રી-१३३६-ચામાચીડિયું.

द्र०अजिनपत्रिकाशब्दः ।

**जत्रु**-ન.-५८८-છાતી અને ખભા વચ્ચેનો સાંધો.

*वक्षःस्कन्धगतसन्धेरन्तरं जायत उद्भिन्नाऽस्थीति जत्रु, क्लीबलिङ्गः "जनिहनिशायतेस्तच्च" (उणा-८०९) इति रुः ।

**जन**-પું-५०१-લોક, પ્રજા.

☐लोक, प्रजा ।

*जायते जनयति वा इति जनः ।

**जनक**-પું-५५६-પિતા, બાપ.

☐वप्तृ, तात, बीजिन्, जनयितृ, पितृ [वप्य जनित्र, रेतोधस्-शे० ११७] ।

*जनयति इति जनकः जायतेऽस्माद् वा "दृकृ" (उणा-२७) इत्यकः ।

**जनङ्गम**-પું-९३३-ચંડાલ.

द्र०अन्तावसायिन्शब्दः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*जनं गच्छति इति जनङ्गमः "नाम्नोगमः"-॥५।१।१३१॥ इति खः ॥

**जनता**-स्त्री-१४२२-મનુષ્યોનો સમુદાય.

*जनानां समूहः इति जनता, "ग्रामजनबन्धु"-॥६।२।२८॥ ।

**जनन**-न०-५०३-કુલ, વંશ.

द्र० अन्वयशब्दः ।

*जन्यतेऽनेन इति जननम् ।

**जनन**-न०-१३६७-જન્મ, ઉત્પત્તિ.

द्र० उत्पत्तिशब्दः ।

*जन्यते इति जननम् ।

**जननी**-स्त्री-५५७-માતા

द्र०अम्बाशब्दः ।

*जायतेऽस्यां इति जननी ।

**जनपद्**-पुं-९४७-દેશ.

द्र०उपवर्त्तनशब्दः ।

*जनैः पद्यते जनानां वा पदं इति जनपदः ।

**जनप्रवाद्**-पुं-२७०-નિંદા, લોકાપવાદ.

द्र०कौलीनशब्दः ।

*जनस्य प्रतीपो वादः इति जनप्रवादः ।

**जनमनोहारिन्**-पुं-१३९०-સુગંધ.

द्र०गन्धशब्दः ।

**जनयितृ**-पुं-५५६-પિતા, બાપ.

द्र०जनकशब्दः ।

*जनयति इति जनयिता ।

**जनयित्री**-स्त्री-५५८-માતા, મા.

द्र०अम्बाशब्दः ।

*जनयति इति जनयित्री "या जनित्री त्रिलोक्याः" इति त्वन्तर्भावितण्यर्थत्वात् ।

**जनश्रुति**-स्त्री-२५९-લોકવાયકા.

☐किंवदन्ती ।

*जनेभ्य श्रूयते इति जनश्रुतिः ।

**जनार्दन**-पुं-२१४-વિષ્ણુ.

द्र०अच्युतशब्दः ।

*जनान् अर्दयति इति जनार्दनः ।

**जनाश्रय**-पुं-१००३-મંડપ.

☐मण्डप ।

*जनानामाश्रयः इति जनाश्रयः ।

**जनि**-स्त्री-१३६७-જન્મ.

द्र०उत्पत्तिशब्दः ।

*जन्यते इति जनिः, "पदिपठि"-(उणा-६०७) इति इ प्रत्यये जनिः, स्त्रीलिङ्गः ।

**जनित्र**-पुं-५५६-(शि०११७)-પિતા, બાપ.

द्र०जनकशब्दः ।

**जनित्री**-स्त्री-५५८-(शि० ४५)-માતા, માં.

द्र० अम्बाशब्दः ।

**जनी**-स्त्री-५१३-પત્ની, સહચારિણી.

द्र० ऊढाशब्दः ।

*जायतेऽस्यां पतिरिति जनिः ङ्यां जनी ।

**जनी**-स्त्री-५१४-પુત્રવધૂ.

☐स्नुषा, वधु, [वधूटी शि० ४१]

*जायतेऽस्यां इति जनी ।

**जनुष्**-न०-१३६७-જન્મ.

द्र०उत्पत्तिशब्दः ।

*"रुयर्त्ति"-(उणा-९९७) इत्युसि जनुः क्लीबलिङ्गः ।

**जन्तु**-पुं-न.-१३६६-સંસારી જીવ, પ્રાણી.

द्र० असुमत्शब्दः ।

*"कृसिकमि"-(उणा-७७३) इति तुज् जन्तुः पुंक्लीबलिङ्गः ।

**जन्तु**-पुं-१११४-(शि०-१७४) વૃક્ષ, ઝાડ.

द्र०अगशब्दः ।

**जन्तुफल**-पुं-११३२-ઉંબરાનું ઝાડ.

द्र० उदुम्बरशब्दः ।

*मशकगर्भाणि फलानि अस्य इति जन्तुफलः ।

**जन्म**-पुं-न.-१३६७-(शि०-१२३)-જન્મ.

द्र०उत्पत्तिशब्दः ।

**जन्मन्**-न.-१३६७ જન્મ.

द्र०उत्पत्तिशब्दः ।

*जननं इति जन्म "मन्"-(उणा-९११) इति मन् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**जन्मन**-(द-प.-)જનકવાચકથી લગાડતો શબ્દ દા. ત. આત્મજન્મા.

**जन्य**-(બ.વ.)-पुं-५१७-વરનામિત્રો, જાનૈયા

*वरस्य सुहृदो वयस्याः, जनीं वहन्ति इति जन्याः "हृद्यपद्य"-॥७।१।११॥ इति यः ।

**जन्य**-પુ.-ન.-७९६-युद्ध, લડાઈ.

द्र०अनिकशब्दः ।

*जायते विद्वेषात् इति जन्यं "भव्यगेय"-॥५।१।७॥ इति यः, पुंक्लीबलिङ्गः ।

**जन्यु**-पुं-१३६६-સંસારી જીવ, પ્રાણી.

द्र०असुमतशब्दः ।

*जायते इति जन्युः "यजिशुन्धि"-(उणा-८०१) इति युः ।

**जप**-पुं-८४२-વેદનું અધ્યયન.

☐स्वाध्याय ।

* जपनं इति जपः "व्यधजप"-॥५।३।४७॥ इत्यल् ।

**जपा**-स्त्री-११४७-જાસુદ, જપાપુષ્પ.

☐औड्रपुष्प [जवा शि० १०४]

*जपतीव जपा ।

**जमन**-न.-४२४-(शि० २९)-ભોજન, ખાવું.

द्र०अदनशब्दः ।

**जम्पति**-(द्वि. व.)-पुं-५१९-પતિ પત્ની બંને.

☐दम्पति, भार्यापति, जायापति ।

*जाया च पतिश्च इति जम्पती ।

**जम्बाल**-पुं-न.-१०९०-કાદવ.

द्र०कर्दमशब्दः ।

*जायते जमति ग्रसते वा जम्बालः पुंक्लीबलिङ्गः "चात्वाल"-(उणा-४८०) इत्याले निपात्यते ।

**जम्बालिनी**-स्त्री-१०८०-નદી.

द्र०आपगाशब्दः ।

*जम्बालोऽस्त्यस्यां इति जम्बालिनी ।

**'जम्बिर'**-पुं-११४९-લાંબુ લીંબુ.

द्र०जम्बीरशब्दः ।

**जम्बीर**-पुं-११४९-લાંબુ લીંબુ.

* जम्भ, जम्भल, 'जम्बिर, दन्तशठ, जम्भीर, जम्भर' ।

*जम्यते इति जम्बीरः "जम्बीर"-(उणा-४२२) इतीरे निपात्यते ।

**जम्बुक**-पुं-१२८९-શિયાળ.

द्र०क्रोष्टुशब्दः ।

*जमति इति जम्बुकः, "कञ्चुक"-(उणा-५७) इत्युके निपात्यते ।

**'जम्बूक'**-पुं-१२८९-શિયાળ.

द्र०क्रोष्टुशब्दः ।

**जम्बूद्वीपप्रज्ञप्ति**-स्त्री-२४५-५ મું ઉપાંગસૂત્ર.

**जम्बूस्वामिन्**-पुं-३३-ચરમ કેવલી જમ્બૂસ્વામી.

*गुणरत्नमयत्वेन जम्बूद्वीपे जम्बूरिव, जम्बूः स चासौ स्वामी च इति जम्बूस्वामी ।

**जम्भ**-पुं-१७५-ઈન્દ્રનો શત્રુ.

द्र०अद्रिशब्दः ।

*जम्भते इति जम्भः, जायते इति वा, "गदरमि"-(उणा-३२७) इति भः ।

**जम्भ**-पुं-५८३ દાઢ.

☐दाढा, दंष्ट्रा ।

*जायते इति जम्भः, "गदरमि"-(उणा-३२७) इति भः ।

**जम्भ**-पुं-न.-११४९-લાંબુ લીંબુ.

द्र०जम्बीरशब्दः ।

*जम्भते इति जम्भः पुंक्लीबलिङ्गः ।

**(जम्भद्विष्)**-पुं-१७५-ઈન્દ્ર.

द्र०अच्युताग्रजशब्दः।

**'जम्भर'**-पुं-११४९-લાંબુ લીંબુ.

द्र०जम्बीरशब्दः ।

**जम्भल**-पुं-११४९ લાંબુ લીંબુ.

द्र० जम्बीरशब्दः ।

*"मुरल"-(उणा-४७४) इत्यले निपातनात् जम्भान् दन्तान् लात्यम्लत्वाद् वा ।

**'जम्भीर'**-पुं-११४९-લાંબુ લીંબુ.

द्र०जम्बीरशब्दः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**जय**-पुं-१७५-ઇન્દ્રનો પુત્ર.
□जयन्त, जयदत्त [यागसन्तान शे. ३४] ।
*जयति इति जयः ।

**जय**-पुं-६९४-११ મા ચક્રવર્તી.
□विजयनन्दन ।
*जयत्यरातीनिति जयः ।

**जय**-पुं-८०३-વિજય.
□विजय ।
*जीयते इति जयः ।

**जय**-पुं-११७२-પીળામગ
द्र०खण्डीरशब्दः ।
*जयति अनेन इति जयः ।

**जय**-पुं-१७४-(शे. ३१)-ઇન્દ્ર.
द्र०अच्युताग्रजशब्दः ।

**जयदत्त**-पुं-१७५-શંકરનો પુત્ર.
□जयन्त, जय [यागसन्तान शे. ३४] ।
*जय एनं देयात् इति जयदत्तः "तिक्कृतौ-नाम्नि"-।।५।१।७१।। इति साधुः ।

**जयवाहिनी**-स्त्री-१७५-ઇન્દ્રાણી.
द्र०इन्द्राणीशब्दः ।
*जयं वहतीत्येवंशीला इति जयवाहिनी ।

**जयन्त**-पुं-१७५-ઇન્દ્રનો પુત્ર.
□जय, जयदत्त, [यागसन्तान शे. ३४]
*जयति इति जयन्तः, "तृजिभूवदि"-(उणा-२२१) इत्यन्तः ।

**(जयन्त)**-पुं-९४-૩જા અનુત્તર વિમાનના દેવો.

**जयन्ती**-स्त्री-१७६-ઈન્દ્રની પુત્રી.
□तविषी, ताविषी ।
*जयति इति जयन्ती ।

**जयन्ती**-સ્ત્રી-२०५ (શિ૦ ५८) પાર્વતી.
द्र०अद्रिजाशब्दः ।

**जयन्ती**-સ્ત્રી-७५०(-શિ૦ ६४) ધ્વજ દંડમાં નાખેલ હોય તે.
द्र०केतनशब्दः ।

**जया**-स्त्री-४०-१२મા ભગવાનની માતા.
*जयति सतीत्वेन इति जया ।

**जया**-સ્ત્રી-२०५-(શિ૦-४९) પાર્વતી.
द्र० अद्रिजाशब्दः ।

**जया**-સ્ત્રી-२०५-પાર્વતીની સખીઓ.
*विजया ।
*जयति इति जया ।

**जय्य**-पुं-७९३-જીતી શકાય તેવો.
*जेतुं शक्यः इति जय्यः "क्षय्यजय्यौ" ।।४।३।९०।। इति ये साधुः ।

**जरठ**-पुं-१३८७-કઠિન, કઠોર સ્પર્શ.
द्र०कक्खटशब्दः ।
*जीर्यति इति जरठः "मजश- " (उणा-१६७) इत्यठः, जरढोऽपि ।

**जरढ**-पुं-१३८७ (શિ૦-१२६)-કઠોર સ્પર્શ.

**जरण**-पुं-४२२-(શિ૦-१०३) જીરું.
द्र०कणाशब्दः ।

**जरत्**-पुं-३३९-વૃદ્ધ, સ્થવિર
□वृद्ध, प्रवयस्, स्थविर, जरिन्, जीर्ण, यातयाम, जीन ।
*जीर्यति स्म इति जरन् "जषोऽतृः"-।।५।१।१७३।। इत्यतृः ।

**जरत्**-पुं-१४४९-જુનું, પુરાતન.
द्र० चिरन्तनशब्दः ।
* जीर्यति स्म इति जरत् "जृषोऽतृः"-।।५।१।१७३।। ।

**जरत्तर**-पुं-३४०-(શિ૦ २१)-અતિ ઘરડો.
द्र० ज्यायस्शब्दः ।

**जरद्गव**-पुं-१२५८-ઘરડો બળદ.
□ वृद्धोक्ष ।
*जरंश्चा सौगौश्च इति जरद्गवः "गोस्तत्पुरुषात्"-।।७।३।१०५।। इत्यट्समासान्तः ।

**जरन्त**-पुं-१२८२-પાડો.
द्र० कासरशब्दः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

※ जीर्यति इति जरन्तः "जविशिभ्यामन्तः"–६ (उणा–२१९) ।

**जरा**–स्त्री–३४०–વૃદ્ધાવસ્થા.

☐ विस्त्रसा ।

※ जीर्यतेऽनया इति जरा "षितोऽङ्" ॥५।३।१०७॥ इत्यङि "ऋवर्णदृशोऽङि"–॥४।३।७॥ इति गुणः ।

**जराभीरु**–પું–२२७–કામદેવ.

द्र० अङ्गजशब्दः ।

※ जरायाः भीरुः इति जराभीरुः ।

**जरायु**–પું–५४०–ગર્ભાશય, ગર્ભસ્થાન.

☐ गर्भाशय, उल्ब ।

※ जरामेति जरायुः पुंलिङ्गः "कृवापाजि"–(उणा–१) इत्युण् ।

**जरायुज**–(બ. વ.)–પું–१३५६–મનુષ્ય, ગાય વગેરે.

※ जरायुः गर्भशय्या तस्मात् जाता जरायुजाः ।

**(जरासन्ध)**–પું–६९९–મગધ દેશના રાજા (પ્રતિવાસુદેવ).

**जरिन**–પું–३४०–સ્થવિર, વૃદ્ધ.

द्र० जरत्शब्दः ।

※ जराऽस्त्यस्य इति जरी शिखादित्वादिन् ।

**जर्ण**–પું–१०५–(શે० १२)–ચંદ્ર, ચંદ્રમા.

द्र० अत्रिदृग्जशब्दः ।

**जर्त्तिल**–પું–११७९–જંગલી તલ.

※ जीर्यते इति जर्त्तिलः "स्थण्डिल"–(उणा–४८४) इतीले निपात्यते ।

**जल**–ન०–१०६९–પાણી.

द्र० अप्शब्दः ।

※जलति जाड्यं गच्छति इति जलम् ।

**जल**–ન०–११५८–સુગંધી વાળો, ખસ.

☐ ह्रीवेर, वालक, 'बर्हिष्ट, उदीच्य, केशाम्बुनामन्' ।

※ जलति इति जलं यद्वाऽस्य केशसदृशत्वात् तृड्घ्नत्वाच्च वालजलपर्यायवाच्यत्वमपि ।

**(जलकपि)**–પું–१३५०–પાણીનો વાંદરો, શિશુમાર મચ્છ.

द्र० अम्बुकूर्मशब्दः ।

**जलकान्तार**–પું–१८८–વરુણદેવ.

द्र० अर्णवमन्दिरशब्दः ।

※ जलमेव कान्तारमस्य इति जलकान्तारः ।

**जलकान्तार**–પું–११०७–(શે०–૧૭૩) વાયુ, પવન.

द्र० अनिलशब्दः ।

**जलकुक्कुभ**–પું–१३३८–જલ કુકડી.

☐ कोयष्टि, शिखरिन् ।

※ जलचारी कुक्कुभो जलकुक्कुभः.

**जलज**–ન०–११६२–કમલ.

द्र० अरविन्दशब्दः ।

**जलजन्मन्**–ન०–११६२–કમલ.

द्र० अरविन्दशब्दः ।

**(जलतुरङ्ग)**–પું–१३५५–પાણીનો ઘોડો.

**जलद**–પું–१६४–મેઘ, વાદળ.

द्र० अभ्रशब्दः ।

**(जलद)**–પું–१८–(પ.)–મેઘ, વાદળા.

द्र० अभ्रशब्दः ।

**जलधर**–પુ.–१६४–મેઘ, વાદળા.

द्र० अभ्रशब्दः ।

**जलधि**–પું– १०७४–સમુદ્ર, દરિયો.

द्र० अकूपारशब्दः ।

※जलं धीयतेऽस्मिन् इति जलधिः ।

**(जलधि)**–પુ.–१८–(પ.)–સમુદ્ર, દરિયો.

द्र० अकूपारशब्दः ।

※ जलं धीयतेऽस्मिन् इति जलधिः ।

**जलधिगा**–સ્ત્રી–१०८०–નદી.

द्र० आपगाशब्दः ।

※जलधिं गच्छति इति जलधिगा ।

**(जलनर)**–પું–१३५५–જલમાં રહેનાર માણસ.

**जलनिधि**–પું–१०७४–સમુદ્ર, દરિયો.

द्र० अकूपारशब्दः ।

※जलस्य निधिः इति जलनिधिः ।

**जलनिर्गम**–પું–१०८८–પાણી નીકળવાનો રસ્તો.

☐ भ्रम ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

* जलं निर्गच्छत्येभिरिति निर्गमा जलपथाः ।

**जलनीलिका**-स्त्री-११६७-સેવાલ, લીલ.

☐ नीली, शैवाल, शेवल, शेवाल, शैवल, शेषाल, जलशूक, [जलनीली शि० १०६] ।

* जलं नीलयति अणि स्वार्थे के जलनीलिका ।

**जलनीली**-स्त्री-११६७-(शि०१०६)-સેવાલ, લીલ.

द्र० जलनीलिकाशब्दः ।

**जलपति**-पुं-१८८-વરુણ દેવતા.

द्र० अर्णवमन्दिरशब्दः ।

* जलस्य पतिः इति जलपतिः ।

**जलपिप्पक**-पुं-१३४४-(शे. १५६)માછલું, મચ્છ

द्र० अण्डजशब्दः ।

**जलभूषण**-पुं-११०७-(शे. १७१) પવન, વાયુ.

द्र० अनिलशब्दः ।

**(जलमनुष्य)**-पुं-१३५५-પાણીમાં રહેનાર મનુષ્ય.

**जलमार्ग**-पुं-१०८९-પાણી જવાની પરનાળ.

☐ प्रणाली ।

* जलनिर्गममार्गो मकरमुखादिः ।

**जलमार्जार**-पुं-१३५०-જળનો બિલાડો, નોળિયો.

द्र० उद्रशब्दः ।

* जलस्य मार्जारः इति जलमार्जारः ।

**जलमुच्**-पुं-१६४-મેઘ, વાદળ,

द्र० अभ्रशब्दः ।

*जलं मुञ्चतीति जलमुच् ।

**जलराशि**-पुं-१०७४-સમુદ્ર, દરિયો.

द्र० अकूपारशब्दः ।

* जलानां राशिः इति जलराशिः, यौगिकत्वात् वारिराशिः ।

**जलरङ्कु**-पुं-१३३२-જલકાગડો, જલકુકડો, ઢેંક.

द्र० कालकण्टकशब्दः ।

* जले रमते इति जलरङ्कुः "कैशीशमि"-(उणा-७४९) इति कुः ।

**जलरञ्ज**-पुं-१३३२-જલકાગડો, જલકુકડો, ઢેક.

द्र० कालकण्टकशब्दः ।

* जलेन रज्यति इति जलरञ्जः ।

**जलरुह**-न०-११६२-કમળ.

द्र० अरविन्दशब्दः ।

**जलरुह**-न.-११६२-કમળ.

द्र० अरविन्दशब्दः ।

**जललोहित**-पुं-१८८-(शे०-३८)-રાક્ષસ.

द्र०असृक्पशब्दः ।

**जलवायस**-पुं-१३२३-જલનો કાગડો.

☐ मद्गु ।

* जलचारी वायसः इति जलवायसः ।

**जलवाल**-पुं-१३४५- (शे०-१५७)-હજાર દાઢ-વાળો મચ્છ.

द्र० वादालशब्दः ।

**जलवालक**-पुं-१०२९-विन्ध्याचल પર્વત.

☐ विन्ध्य ।

* जलेन वाडते आप्लावयति इति जलवालकः ।

**जलवालिका**-स्त्री-११०५-વીજળી.

द्र० अचिरप्रभाशब्दः ।

* जलेन वलति प्राणिति इति जलवालिका ।

**जलवाह**-पुं-१६४-મેઘ, વાદળ.

द्र० अभ्रशब्दः ।

**जलव्याल**-पुं-१३०५-જલનો સર્પ.

द्र० अलगर्दशब्दः ।

* जलस्य व्यालः इति जलव्यालः ।

**जलाशय**-पुं-२१४-विष्णु.

द्र० अच्युतशब्दः ।

* जले शेते इति जलाशयः जलेशयोऽपि ।

**जलशूक**-न.-११६७-સેવાલ, નીલ.

द्र० जलनीलिकाशब्दः ।

* जलशब्दात् परे शूकम्, जलस्य शूकमिव इति जलशूकम् ।

**(जलसर्प)**-पुं-१३५१-આહિ, ઝુંડ.

द्र० अवहारशब्दः ।

**जलसर्पिणी**-स्त्री-१२०४-જળો (લોહી ચુસે તે)

द्र० अस्रपाशब्दः ।

* जले सर्पति इति जलसर्पिणी ।

**जलसूकर**-पुं-१३४९-મગરમચ્છ

द्र० आलास्यशब्दः ।

* जलचारी सूकरः इति जलसूकरः ।

**(जलस्फोट)**-पुं-१०७७-પાણીનો પરપોટો.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

☐ बुद्बुद, स्थासक ।

(जलहस्तिन)-पुं-१३५५-પાણીનો હાથી.

जलाकाङ्क्ष-पुं-१२१८-(શે. ૧૭૬) હાથી.

द्र० अनेकपशब्दः ।

जलाणुक-न०-१३४७-નાના માછલાનો સમુદાય.

☐ पोताधान ।

* जलेऽणति इति जलाणुकं "कण्यणेः"-(उणा-५६) इति णिदुकः ।

जलाधार-(અ. વ.)-पुं-१०९६-જલાશય, પાણીનું સ્થાન.

☐ जलाशय ।

* जलानामाधारा जलधाराः सामान्येन वाप्यादयः ।

जलार्द्रा-स्त्री-६७९-ભીંજાયેલું વસ્ત્ર.

☐ क्लिन्नवासस् ।

* जलेन आर्द्रा इति जलार्द्रा ।

जलालोका-स्त्री-१२०४-જળો (લોહી ચુસે તે)

द्र० अस्त्रपाशब्दः ।

* जले आलोक्यते इति जलालोका जले आलोकोऽस्या इति वा ।

जलाशय-(અ०व०)-पुं-१०९६-જલાશય, પાણીનું સ્થાન.

☐ जलाधार ।

* जलानामाशयो हृदयमेषां इति जलाशयाः जलमाशेते एषु वा ।

जलाशय-पुं-१३४४-(શે०-१९६)-મચ્છ, માછલું.

द्र० अण्डजशब्दः ।

'जलाशय'-न०-११५८-કાળા વાળાનું મૂળ.

द्र० उशीरशब्दः ।

जलूका-स्त्री-१२०४-જળો (લોહી ચૂસે તે)

द्र० अस्त्रपाशब्दः ।

* जलति इति जलूका "मृमन्यञ्जि"-(उणा-५८) इत्यूकः ।

जलेशय-पुं-२१९-(શિ०-१५)-વિષ્ણુ.

द्र० अच्युतशब्दः ।



जलोच्छ्वास-पुं-१०८८-વધી ગયેલા પાણીને નીકળવાનો માર્ગ.

☐ परीवाह, (परिवाह) ।

* जलं प्रवृद्धमुच्छ्वसिति यैस्ते इति जलोच्छ्वासाः ।

जलौकस्-पुं-१२०३-જળો.

द्र० अस्त्रपाशब्दः ।

* जलमोक आसां इति जलौकसः स्त्रियां वा बहुवचनान्तोऽयम् ।

जलौका-स्त्री-१२०४-જળો.

द्र० अस्त्रपाशब्दः ।

* जले ओकोऽस्या इति जलौका ।

जल्पाक-पुं-३४७-વાચાલ, નિંદ્ય બોલનાર.

द्र० गर्ह्यवाच्शब्दः ।

* जल्पनशीलो इति जल्पाकः "वृङ्भिक्षिलुण्टिजल्पिकुट्टाट्टाकः" ॥५।२।७०॥ इति टाकः ।

जल्पित-न.-२४१-(શે. ૮૨)-વાણી, વચન.

द्र० गिर्शब्दः ।

जव-पुं-४९५-વેગ.

☐ वेग, रय, रंहस्, स्यद, तर, वाज, प्रसर ।

* जवन्त्यनेन इति जवः ।

जवन-पुं-४९४-ઘણા વેગવાળો.

☐ त्वरित, जविन्, ।

* जवतीत्येवंशीलो जवनः ।

जवन-पुं-१२३४-અધિક વેગવાળો ઘોડો.

* जवतीत्येवं शीलः इति जवनः ।

जवन-न.-४२४-(શિ. ૨૯) ભોજન, ખાવું.

द्र० अदनशब्दः ।

जवनी-स्त्री-६८०-પડદો, કનાત.

द्र० अपटीशब्दः ।

* जवन्तेऽस्यां इति जवनी यमनीत्यपि ।

जवा-स्त्री-११४७-(શિ.૧૦૪)-જપા પુષ્પ, જાસુદ.

द्र० ओड्रपुष्पशब्दः ।

जवापुष्प-पुं-६४५-(શે. ૧૩૩)-કેશર.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्र० कुङ्कुमशब्दः ।

**जविन्**-पुं-४९४-घणा वेगवाळो.

☐ त्वरित, जवन ।

* जवोऽस्त्यस्य इति जवी, जुः सौत्रो वेगाख्येऽसंस्कारे वर्त्तते ।

**जवीयस**-न.-१०४३-(शि. १६२)-रूपुं.

द्र० कुमुदाह्वयशब्दः ।

**'जहा'**-स्त्री-११५१-कौवच.

द्र० आत्मगुप्ताशब्दः ।

**जह्नु**-पुं-२१६-विष्णु.

द्र० अच्युतशब्दः ।

* जहति मुञ्चति पादाङ्गुष्ठाद् गङ्गामिति जह्नुः "होजह्रूच"-(उणा-७८९) इति नुः ।

**जह्नुकन्या**-स्त्री-१०८२-(शि. ९६)-गंगानदी.

द्र० ऋषिकुल्याशब्दः ।

**जागर**-पुं-४४३-उजागरो.

☐ जागर्या, जागरण, जागरा ।

**जागरण**-न.-४४३-उजागरो.

द्र० जागरशब्दः ।

**जागरितृ**-पुं-४४३-(शि. ३१)-जागनार.

☐ जागरिन्, जागरूक ।

**जागरिन्**-पुं-४४३-जागनार,

☐ जागरूक [जागरितृ शि. ३१] ।

* जागरोऽस्त्यस्य इति जागरी ।

**जागरूक**-पुं-४४३-जागनार.

☐ जागरिन [जागरितृ-शि. ३१] ।

* जागरणशीलो जागरूकः "जागुः" ॥५।२।४८॥ इत्युकः जागरिताऽपि ।

**जागर्या**-स्त्री-४४३-उजागरो.

द्र० जागरशब्दः ।

**जागुड**-न०-६४५-केशर.

द्र० कुङ्कुमशब्दः ।

* जागर्ति मण्डनेषु इति जागुडं "विहड"-(उणा-१७२) इति निपात्यते ।

**जागृवि**-स्त्री-१०९९ अग्नि.

द्र० अग्निशब्दः ।

* जागर्ति वायुना इति जागृविः "जॄगृस्त"-(उणा-७०५) इति ङिद् विः ।

**जाङ्गल**-पुं-९५३-(शि०-८४)-पाणी विनानो देश.

☐ जङ्गल, निर्जल ।

**जाङ्गुलिक**-पुं-४७४-विष उतारनार वैद्य.

☐ विषभिषज्, (विषवैद्य) ।

* जाङ्गुलीं विषविद्यामधीते इति जाङ्गुलिकः, न्यायादिपाठादिकण् विषभिषग्, विषवैद्यः ।

**जाङ्गुली**-स्त्री-२०५-(शि० -५१)-पार्वती.

द्र० अद्रिजाशब्दः ।

**जाङ्घिक**-पुं-४९४-खेपीयो.

☐ जङ्घाकरिक, [जङ्घाकर शि०-३८]

* जङ्घाभ्यां जीवति इति जाङ्घिकः, वेतनादित्वादिकण् जङ्घाकरोऽपि ।

**जाड्य**-न०-३०५-जडता.

☐ स्तम्भ ।

* जडस्य भावः इति जाड्यम्, विष्टब्धचेतनत्वम् ।

**जाड्य**-न०-३१२-मूर्खता.

☐ मौर्ख्य ।

* जडस्य भावः कर्म वा इति जाड्यम् ।

**जात**-न.-१४१२-समूह.

द्र० उत्करशब्दः ।

* जायते स्म इति जातम् ।

**जात**-न.-१५१५-(शि. १३६)-सामान्य जाति, जात.

☐ जाति, सामान्य ।

**जातरूप**-न.-१०४४-सोनुं.

द्र० अर्जुनशब्दः ।

* जातं रूपमस्य इति जातरूपमकृतकरूपं सुद्रीदेशजम् ।

**जातवेदस**-पुं-१०९९-अग्नि.

द्र० अग्निशब्दः ।

* जाते विद्यते इति जातवेदः, "असू" (उण

Jain Education International For Private & Personal Use Only www.jainelibrary.org

९५२) इत्यस् जाता वेदा अस्मादिति वा पृषोदरादित्वात् ।

**जातापत्या**-स्त्री-५३९ સુવાવડી સ્ત્રી.

☐ विजाता, प्रजाता, प्रसूतिका ।

※ जातमपत्यमस्या इति जातापत्या ।

**जाति**-स्त्री-११४७-ચમેલી, જાઈ.

☐ मालती, 'सुमनस्, (सुमना), जाती'।

※ जायतेऽस्यां पुष्पादि इति जातिः ।

**जाति**-स्त्री-१५१५-સામાન્ય જાતિ, જાત.

☐ सामान्य [जात શિ० १३१] ।

※ जायतेऽस्या जातिः, गौरयं गौरयमित्यादिसदृशाभिधानज्ञानहेतुः जातमपि ।

**जातिकोश**-ન.-६४३-જાયફલ.

☐ जातिफल, (जातीफल), [सौमनस, पुटक, मदशौण्डक, कोशफल शि. १३२] ।

※ जातिलतायाः कोशं इति जातिकोशं जातिसस्याख्यम् ।

**जातिफल**-न.-६४३-જાયફલ.

द्र० जातिकोशशब्दः ।

※ जात्याफलं इति जातिफलम् ।

**जातिमात्रजीविन्**-પું-८५५-જાતિ માત્રથી જીવનાર બ્રાહ્મણ.

☐ द्विजब्रुव ।

※ जातिमात्रेण जीवति इति जातिमात्रजीवी ।

**'जाती'**-स्त्री-११४७-જાઈ.

द्र० जातिशब्दः ।

**जातीफल**-न०-६४३-જાયફલ.

द्र० जातिकोशशब्दः ।

**जातु**-अ.-१५३३-કોઈક વખત.

☐ कदाचित्, कर्हिचित् ।

※ जायते इति जातु, यथा:-"न जातु कामः कामानामुपभोगेन शाम्यति" ।

**(जातृकार)**-પું-१०३-માઠરાદિ १८ સૂર્યના પારિપાર્શ્વિક દેવો.

**जातोक्ष**-પું-१२५८-યુવાન બળદ.

※ उत्पन्न उक्षा इति जातोक्षः जातमहद्वृद्धादुक्षणः "कर्मधारयात्"-।।७।३।९५।। इत्यत् समासान्तः।

**जात्य**-પું-५०३-કુલવાન.

द्र० अभिजातशब्दः ।

※ जातौ साधुः इति जात्यः ।

**जात्य**-न०-१४३९-મુખ્ય, પ્રધાન.

द्र० अग्रेसरशब्दः ।

※ जातौ साधुः इति जात्यम् ।

**जानकी**-स्त्री-७०३ સીતા.

☐ वैदेही, मैथिली, सीता, धरणीसुता ।

※ जनकस्यापत्यं इति जानकी ।

**जानि**-स्त्री-५५८-(શિ०-११७)-માતા.

द्र० अम्बाशब्दः ।

**जानु**-પું-६१४-સાથળની ગાંઠ, ઢીંચણ, ઘૂંટણ.

☐ नलकील, अष्ठिवत् ।

※ जायतेऽनेनाकुञ्चनादि जानुः, पुंक्लीबलिङ्गः "कृवापा"-(उणा १-) इत्युण् ।

**जानुदघ्न**-न०-६०१-ઢીંચણ પ્રમાણ.

☐ जानुद्वयस, जानुमात्र ।

※ जानुः प्रमाणमस्येति जानुदघ्नम् ।

**जानुद्वयस**-न.-६०१-ઢીંચણ પ્રમાણ.

☐ जानुदघ्न, जानुमात्र ।

※ जानुः प्रमाणमस्येति जानुद्वयसम् ।

**जानुमात्र**-न.-६०१-ઢીંચણ પ્રમાણ.

☐ जानुदघ्न, जानुद्वयस ।

※ जानुः प्रामाणमस्येति जानुमात्रम्।

**जापक**-પું-६४६-મલયાગિરિ પીતચંદન.

☐ कालीयक [कालानुसार्य शि. ५२] ।

※ जापकाद्भिवत्वाज्जापकं कालानुसार्यमपि ।

**जामदग्न्य**-પું-८४८-પરશુરામ, જમદગ્નિનો પુત્ર.

☐ राम, भार्गव, रेणुकासुत, 'रेणुकेय', (पर्शुराम, परशुराम शि. ७४) ।

※ जमदग्नेरपत्यं इति जामदग्न्यः, गर्गादित्वाद् यञ् ।

**जामातृ**-પું-५१८-જમાઈ.

※ जायां प्रजायां मिन्वन्ति तमिति जामाता, "जायामिगः"-(उणा-८६०) इति तृः ।

**जामि**-स्त्री-५५३-બહેન.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

☐ भगिनी, स्वसृ ।

✻ जमति अत्तीव जामिः "कमिवमि"-(उणा-६१८) इति णिदिः ।

**जामेय**-पुं-५४३-भाणेज.

द्र० कुतपशब्दः ।

✻ जामेरपत्यं इति जामेयः "इतोऽनिञः" ॥१।६।७२॥ इत्येयण् ।

**जाम्बूनद**-न०-१०४५-सोनुं.

द्र० अर्जुनशब्दः ।

✻ जम्बूद्वीपे जम्बूफलरसोत्थनद्यां जातं इति जाम्बूनदं **यत्पुराणम्**:—

"तीरभृत् तद्रसं प्राप्य. मुखवायुविशोषिता ।
जाम्बूनदाख्यं भवति सुवर्णं सिद्धिभूषणम् ।"

**जाम्बूलमालिका**-स्त्री-५१८(शे०-१०८)-विवाह.

**'जायक'**-न०-६४६-पीत चंदन.

द्र० कालीयकशब्दः ।

**जाया**-स्त्री-५१३-पत्नी.

द्र० ऊढाशब्दः ।

✻ "ऋशिजनि"-(उणा-३६१) इति किति ये जाया **यन्मनुः**

"जायायास्तद्धि जायत्वं यदस्यां जायते सुतः" ।

**जायाजीव**-पुं-३२८-नट.

द्र० कृशाश्विन्शब्दः ।

✻ जायया आजीवति इति जायाजीवः ।

**जायापति**-पुं-(द्वि. व.)-५१९-पति पत्नी बंने.

☐ जम्पति, दम्पति, भार्यापति ।

**जायु**-पुं-४७३-ओषध.

द्र० अगदशब्दः ।

✻ जयति रोगान् इति जायुः पुंलिङ्गः "कृवापाजि"-(उणा-१) इति उण् ।

**जार**-पुं-५१९-जार पुरुष.

☐ उपपति ।

✻ जीर्यतेऽनेन जारयतिवा इति जारः, "न्यायाबाया ॥५।३।९३४॥ इति घञि साधुः ।

**जारी**-स्त्री-२०५-(शे०-५९)-पार्वती.

द्र० अद्रिजाशब्दः ।

**जाल**-न०-९२६-इन्द्रजाल, जादुगीरी.

द्र० इन्द्रजालशब्दः ।

✻ जालमिव इति जालम् ।

**जाल**-न०-१४१२- समूह, समुदाय.

द्र० उत्करशब्दः ।

✻ जलति इति जालं स्त्रीक्लीबलिङ्गः ज्वलादित्वादण् ।

**जालक**-न०-१०१२-गोख, जाळी, बारी.

☐ गवाक्ष, वातायन, ।

✻ जलति इति जालं ज्वलादित्वात् णः के जालकम् ।

**जालक**-न०-११२५-नवीकळी, नवी कळीओनो समूह.

☐ क्षारक ।

✻ जलति गन्धेन इति जालकम्, जालमिव वानवकलिकावृन्दम् ।

**जालकारक**-पुं-१२१०-करोळीओ.

द्र० अष्टपाद्शब्दः ।

✻ जालं करोति इति जालकारकः ।

**जालकिनी**-स्त्री-१२७७-घेटी.

द्र० कुररीशब्दः ।

✻ जालकं रोमगुच्छोऽस्त्यस्या इति जालकिनी ।

**जालन्धर**-पुं-(ब. व.)-९५८- त्रिगर्त देश (लाहोर प्रांतनो एक देश.)

☐ त्रिगर्त्ता ।

✻ जालं धारयन्ति इति जालन्धराः "धारेर्धंच" ॥५।१।११३॥ इति खः ।

**जालप्राया**-स्त्री-७६९-लोखंडनुं बख्तर.

द्र० अङ्गरक्षणीशब्दः ।

✻ जालप्राया जालसादृशी ।

**जालिक**-पुं-३७७-ठग, धूर्त.

द्र० कुहकशब्दः ।

✻ जालेन चरति इति जालिकः ।

**जालिक**-पुं-९२८-वाघरी (जाळथी मृग वगेरेने पकडनार माणस.

☐ वागुरिक ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

* जालेन जीवति इति जालिकः वेतनादित्वा-दिकण् ।

**जालिक**–પું–૧૨૧૦–કરોળીઓ.

द्र० अष्टपादशब्दः ।

* जालमस्त्यस्य इति जालिकः ।

**जालिका**–સ્ત્રી–૭૬૯–લોઢાનું બખ્તર.

द्र० अङ्गरक्षणीशब्दः ।

* "जलण अपवारणे" जालयति शस्त्राघातं इति जालिका ।

**जालिनी**–સ્ત્રી.–૯૯૯–ચિત્રશાલા.

☐ चित्रशाला (चित्रशाल)

* जालानि सन्त्यस्यां इति जालिनी ।

**जाल्म**–પું–૩૫૩–મૂર્ખ.

द्र० अमेधिन्शब्दः ।

* जलति इति जाल्मः "रुक्मग्रीष्म"-(उणा–३४६) इति मान्तो निपात्यते "जाल्मोऽसमीक्ष्यकारी· स्यात् इत्यमरः ।

**जावाल**–પું–૮૮૯–રબારી.

☐अजजीविक ।

* अजाः पालयतीति जावालः पृषोदरादित्वात्, जवमलति जवालश्छागस्तस्यायमिति ।

**जाहक**–પું–૧૩૦૨–સહેલો, એક જાતનો બિલાડો.

☐ गात्रसंकोचिन्, मण्डलिन् ।

* जहाति सर्पादिभयं इति जाहकः "कीचक"–(उणा–३३) इत्यके निपात्यते ।

**जाह्नवी**–સ્ત્રી–૧૦૮૧–ગંગાનદી.

द्र० ऋषिकुल्याशब्दः ।

* जह्नुना सगरात्मजेनावतारितत्वात् जह्नोरियं जाह्नवी, जह्नुना पीताश्रोत्रेण मुक्ता चेति जाह्नवीति लौकिकाः, जह्नुकन्याऽपि ।

**जिघत्सा**–સ્ત્રી–૩૯૩–ભૂખ, ક્ષુધા.

द्र० अशनायाशब्दः ।

* अत्तुमिच्छा इति जिघत्सा, "घस्लृसनद्यत"–॥४।४।१७॥ इति सन्यदेवं सादेशः ।

**जिघत्सु**–પું–૩૯૨–ભૂખ્યો.

द्र० अशनायितशब्दः ।

* अत्तुमिच्छुः इति जिघत्सुः ।

**जिघांसु**–પું–૭૨૯–શત્રુ.

द्र० अभिमातिशब्दः ।

* हन्तुमिच्छुः इति जिघांसुः ।

**जित्**–પું–૧૦ (૫૦)–વધ્યાવધક સંબંધમાં વધ્યથી લગાડાતો શબ્દ–દા૦ ત૦ પુરજિત્.

**जित**–પું–૮૦૫–પરાજીત.

द्र० अभिभूतशब्दः ।

* जीयते स्म इति जितः ।

**जितकाशिन्**–પું. ૮૦૬ લડાઈમાં જીતી ગયેલો

☐ जिताहव ।

* जितेन काशते इति जिताकाशी ।

**जितनेमि**–પું–૮૧૬–વ્રતમાં ધારણ કરવા લાયક પીપલાનો દંડ.

☐ आश्वत्थ ।

* क्षुद्रजन्तुघातेन जिता नेमिरनेन इति जितनेमिः ।

**जितमन्यु**–પું–૨૧૯–(શે૦૭૨)–વિષ્ણુ.

द्र० अच्युतशब्दः ।

**जितशत्रु**–પું–૩૬–શ્રી અજિતનાથ ભગ. ના પિતા.

* जिताः शत्रवोऽनेन इति जितशत्रुः ।

**जितारि**–પું–૩૬–શ્રી સંભવનાથ ભગવાનના પિતા.

* जिताः अरयोऽनेन इति जितारिः ।

**जिताहव**–પું–૮૦૬–લડાઈમાં જીતી ગયેલો.

☐ जितकाशिन् ।

* जित आहवोऽनेन इति जिताहवः ।

**जितेन्द्रिय**–પું–૮૧૧–ઇંદ્રિય ઉપર જય મેળવનાર.

☐ शान्त, श्रान्त ।

* जितानीन्द्रियाण्यनेन इति जितेन्द्रियः ।

**जित्या**–સ્ત્રી–૮૯૦–મોટું હળ.

☐ हलि ।

* जीयते निपुणैरिति जित्या "जिविपून्यो हलिमुञ्जकल्के" ॥५।१।४३॥ इति क्यप् ।

**जित्वर**–પું–૨૯૩–વિજય મેળવનાર.

☐ जेतृ, जिष्णु [विजयिन्, जैत्र शे० १५३] ।

* जयनशीलः इति जित्वरः "सृजीण्"–॥५।२।७७॥ इति ट्वरपि जित्वरः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**जिन**-પું-૨૪-જિનેશ્વર, અરિહંત.
द्र० अधीश्वरशब्दः ।
* जयति रागद्वेषमोहान् इति जिनः "जीण्-शीदी"-(उणा-२६१) इति नः ।

**जिन**-પું-૨૧૬-વિષ્ણુ.
द्र० अच्युतशब्दः ।
* जयति दैत्यान् इति जिनः ।

**जिन**-પુ-૨૩૨-બુદ્ધ, સુગત.
द्र० अद्वयशब्दः ।
* जयति भवं इति जिनः ।

**जिनसद्मन्**-ન૦-૯૯૪-જિનાલય, દેરાસર.
□ चैत्य, विहार, 'आयातन' ।
* जिनस्य सद्म इति जिनसद्मा ।

**जिनेश्वर**-પું-૨૪-અરિહંત, ભગવાન.
द्र० अधीश्वरशब्दः ।
* रागादिजेतारो जिनाः केवलिनः तेषामीश्वरो जिनेश्वरः ।

**जिनेश्वर**-પું-૫૨-ગત ચોવીશીનાં ૨૦ મા ભગ.નું નામ.
*जिनश्चासौ ईश्वरश्च इति जिनेश्वरः ।

**जिष्णु**-પું-૧૭૩-ઇન્દ્ર.
द्र० अच्युताग्रजशब्दः
* जयतीत्येवंशीलो जिष्णुः "भूजेः ष्णुक्"-॥५।२।३०॥ इति ष्णुक् ।

**जिष्णु**-પું-૨૧૪-વિષ્ણુ.
द्र० अच्युतशब्दः ।
* जयनशीलः इति जिष्णुः ।

**जिष्णु**-પું-૭૦૯-અર્જુન.
द्र० अर्जुनशब्दः ।
* जयनशीलः इति जिष्णुः ।

**जिष्णु**-પું-૭૯૩-વિજય મેળવનાર.
द्र० जित्वरशब्दः ।
* जयनशीलः इति जिष्णुः "भूजेः"-॥५।२।३०॥ इति ष्णुकि जिष्णुः ।

**जिहानक**-પું-૧૬૧-પ્રલયકાલ, ક્ષય.
द्र० कल्पशब्दः ।
* जिहीते गच्छति इति जिहानः, स्वार्थे जिहानकः ।

**जिह्म**-ન૦-૧૪૫૭-વક્ર, વાંકું.
द्र० अरालशब्दः ।
* जहाति ऋजुतां इति जिह्मं "ग्रसिहाग्भ्यां ग्राजहौ च" (उणा-३३९) इति मः ।

**जिह्मग**-પું-૧૩૦૪-સાપ, સર્પ, નાગ.
द्र० अहिशब्दः ।
* जिह्मं वक्रं गच्छति इति जिह्मगः ।

**जिह्वा**-સ્ત્રી-૫૮૫-જીભ.
□ रसज्ञा, रशना, लोला, ‡[रसिका, रस्ना, रसमातृका, रसा, काकु, ललना, शे०-१२३] ।
* लेढि रसान् जीह्वा, "लिहेर्जिह् च"-(उणा-५१३) इति वः ।

**जिह्वा**-સ્ત્રી-૧૧૦૨-અગ્નિની જીભ.
* लेढि हव्यमाभिर्जिह्वाः ।

**जिह्वास्वाद**-પું-૪૨૪-ચાટવું તે.
□ लेहन ।
* जिह्वायाः आस्वादनं इति जिह्वाऽऽस्वादः ।

**जीन**-પું-૩૪૦-સ્થવિર, વૃદ્ધ.
द्र० जरत्शब्दः ।
* जीनाति स्म इति जीनः क्ते "ज्याव्यधः क्ङिति" ॥४।१।८१॥ इति य्वृति, "दीर्घमवोऽन्त्यम्" ॥४।१।१०३॥ इति दीर्घत्वे "ऋल्वादेरेषां तो नोऽप्रः" ॥४।२।६८॥ इति नत्वम् ।

**जीमूत**-પું-૧૬૪-મેઘ, વાદળ.
द्र० अभ्रशब्दः ।
* जीवन्त्यनेन इति जीमूतः, "जीवेर्मं च"-(उणा-२१६) इत्यूतः, जीवनस्य जलस्य मूतः पुटबन्ध इति पृषोदरादित्वाद् वा ।

**जीमूतवाहिन्**-પું-૧૧૦૪-ધૂમાડો.
द्र० अग्निवाहशब्दः ।
* जीमूतं वहति इति जीमूतवाही ।

**जीर**-પું-૪૨૨-(शे० १०३)-જીરું
द्र० कणाशब्दः ।

**जीरक**-પું-ન૦-૪૨૨-જીરું.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्र० कणाशब्दः ।

* जयति मन्दाग्नित्वं इति जीरः, "चिजि"–(उणा–३९२) इति रे दीर्घत्वं ततः जिरकः पुंक्लीबलिङ्गः ।

**जीरण**–पुं–४२२–शे० (१०३)–જીરું.

द्र० कणाशब्दः ।

**जीर्ण**–पुं–३४०–સ્થવિર, વૃદ્ધ.

द्र० जरत्शब्दः ।

* जीर्यतिस्म इति जीर्णः

**जीर्ण**–पुं–१११४–વૃક્ષ, ઝાડ.

द्र० अगशब्दः ।

* जीर्यते इति जीर्णः, "इणुर्विशा"–(उणा–१८२) इति णः ।

**जीर्ण**–पुं न०–१४४८–પુરાતન, જુનું.

द्र० चिरन्तनशब्दः ।

* जीर्यतिस्म इति जीर्णम् ।

**जीर्ण**–पुं–१५२३–ઘરડાપણું.

☐ ज्यानि ।

**जीर्णवस्त्र**–न०–६७८–જુનું વસ્ત્ર.

☐ पटच्चर ।

**जीव**–न.–११८–ગુરુ, બૃહસ્પતિ.

द्र० आङ्गिरसशब्दः ।

* जीव्यतेऽनेन मृत सञ्जीवनीज्ञत्वात् जीवः ।

**जीव**–पुं–१३६६–પ્રાણી, સંસારી જીવ.

द्र० असुमत्शब्दः ।

* जीवति प्राणान् धारयति इति जीवः ।

**जीव**–त्रि.–१३६७–પ્રાણ.

द्र० असुशब्दः ।

* जीवत्यनेन इति जीवः ।

**जीव**–पुं–११६६–(शि०–१२३)–આત્મા, જીવ.

द्र० आत्मन्शब्दः ।

**'जीवक'**–पुं–११४४–અસનવૃક્ષ.

द्र० असनशब्दः ।

**जीवञ्जीव**–पुं–१३४०–ઝેર જોતાની સાથે મૃત્યુ પામનાર પક્ષી.

द्र० गुन्द्रालशब्दः ।

* जीवेन सहचरेण जीवति इति जीवंजीवः बाहुलकात् खः ।

**जीवत्तोका**–स्त्री–५३०–જેની સંતતિ જીવતી રહેતી હોય તેવી સ્ત્રી.

☐ जीवसू ।

* जीवत्तोकमपत्यमस्या इति जीवत्तोका ।

**जीवत्पति**–स्त्री–५३०–સધવા સ્ત્રી.

☐ पतिवत्नी, [जीवत्पत्नी शि०४२] ।

* जीवन् पतिः अस्या इति जीवत्पतिः जीवत्पत्नी अपि ।

**जीवथ**–पुं–१३५३–કાચબો.

द्र० कच्छपशब्दः ।

* जीवति इति जीवथः "भृशीशपि"–(उणा–१३२) इत्यथः ।

**जीवन**–न०–८६५–આજીવિકા.

द्र० आजीवशब्दः ।

* जीव्यतेऽनेन इति जीवनम् ।

**जीवन**–न०–१०६९–પાણી, જલ.

द्र० अप्शब्दः ।

* जीव्यतेऽनेन इति जीवनम् ।

**जीवन**–न०–१०४३–રુપું.

द्र० कलधौतशब्दः ।

**जीवनक**–न०–३९५–ભાત.

द्र० ओदनशब्दः ।

* जीव्यतेऽनेन अनट् स्वार्थे के जीवनकम् ।

**जीवनी**–स्त्री–११८५–હિરણહોડી, મીઠી ખરખોડી.

☐ जीवन्ती, जिवा, जीवनीया, मधुस्त्रवा, 'मधुश्रवा' ।

* जीवत्यनया इति जीवनी ।

**जीवनीय**–न०–१०६७–પાણી, જલ.

द्र० अप्शब्दः ।

* जीव्यतेऽनेन इति जीवनीयं बाहुलकाद् करणेऽपि "अनीये इति जीवनीयम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**जीवनीय**–न०–४०४–(शि०–९९)–દૂધ.

द्र० ऊधस्यशब्दः ।

**जीवनीया**–स्त्री–११८५–હિરણદોડી, મીઠી ખરખોડી.

द्र० जीवनीशब्दः ।

※ जिवत्यनया इति जीवनीया, "बहुल" ॥५।१।२॥ इति करणेऽनीये जीवनीया ।

**जीवनऔषधि**–न.–१३६७–જીવન રક્ષણોપાય, જીવન ઔષધ.

☐ जीवातु ।

※ जीवनाय औषधं इति जीवनौषधम्, जीवरक्षोपायः ।

**जीवन्ती**–स्त्री–११८५–મીઠીખરખોડી, હિરણ દોડી.

द्र० जीवनीशब्दः ।

※ जीवतात् जीवन्ती "रुहिनन्दि"–(उणा–२२०) इत्यन्तः ।

**जीववृत्ति**–स्त्री–८८८–પશુપાલનનું કામ.

☐ पशुपाल्य ।

※ जीवपालनाद् वर्तनं इति जीववृत्तिः ।

**जीवसू**–स्त्री–५३०–જેની સંતતિ જીવતી રહેતી હોયતે સ્ત્રી.

☐ जीवत्तोका ।

※ जीवा जीवन्ती सूः प्रसूतिरस्या इति जिवसूः ।

**जीवा**–स्त्री–७७६–પણછ, ધનુષ્યની દોરી.

द्र० गुणशब्दः ।

※ जीवत्यनया इति जीवा ।

**जीवा**–स्त्री–११८५–મીઠી ખરખોડી, હિરણ દોડી.

द्र० जीवनीशब्दः ।

※ जीवत्यनया इति जिवा, "क्तेटो"–॥५।३।१०६॥ इत्यप्रत्यये जीवा ।

**जीवातु**–पुं–न.–१३६७–જીવન ઔષધી.

☐ जीवनौषध ।

※ जीवत्यनेन इति जीवातुः पुंक्लीबलिङ्गः, "जीवेरातुः"–(उणा–७८२) इत्यातुः ।

**जीवातु**–पुं–१३६७–(शि. १२४) પ્રાણ.

द्र० असुशब्दः ।

**जीवान्तक**–पुं–९३०–પારેવા વગેરે પક્ષીઓને હણનાર.

☐ शाकुनिक ।

※ जीवान् कपोतादीन् अन्तयति इति जीवान्तकः ।

**(जीवाभिगम)**–पुं–२४५–ત્રીજું ઉપાંગ.

**जीविका**–स्त्री–८६५–આજીવિકા.

द्र० आजीवशब्दः ।

※ जीवत्यनया इति जीविका, "नाम्नि पुंसि च"–॥५।३।१२१॥ इति णकः ।

**जीवित**–न०–१३६७–પ્રાણ.

द्र० असुशब्दः ।

※ जीव्यतेऽनेनेति जीवितं, जीवातुरपि ।

**जीवितकाल**–पुं–१३६९–આયુષ્ય.

☐ आयुष्, [आयु शि० १२४] ।

※ जीवितस्य कालः इति जीवितकालः ।

**जुगुप्सन**–न०–२७१–નિંદા.

द्र० अवर्णशब्दः ।

※ जुगुप्स्यते इति जुगुप्सनम्, जुगुप्साऽपि ।

**जुगुप्सा**–स्त्री–७२–દુગંછા દોષ. તીર્થંકરમાં ન હોયતે १८ દોષ પૈકી १०મી દોષ.

※ जुगुप्सा घृणेति ।

**जुगुप्सा**–स्त्री–३०३–દુગંછા, બીભત્સરસનો સ્થાયી ભાવ.

☐ घृणा ।

※ जुगुप्सनं इति जुगुप्सा चित्तसंकोचः ।

**(जुगुप्सा)**–स्त्री–२७१–નિંદા.

द्र० अवर्ण शब्दः ।

**जुगुप्सा**–स्त्री–२७१–(शि०–१७)–નિંદા.

द्र० अवर्णशब्दः ।

**जुहुराण**–पुं–११००–(शि०–१७०)–અગ્નિ.

द्र० अग्निशब्दः ।

**जुहू**–स्त्री–८२८–યજ્ઞપાત્ર વિશેષ, ઘી હોમવાનો સરવો.

※ जुहूवत्यनया इति जुहूः "दिद्युद्दद्"–॥५।२।८३॥ इति क्विपि साधुः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**जूटक**-પું-૫૭૦-(શે૦-૧૧૯-)અંબોડો.

☐ धम्मिल, [मौलि शे०-११९] ।

**जूर्णाह्वय**-पुं-११७८-જુવાર.

☐ यवनाल, योनल, देवधान्य, जोन्नाला, बीजपुष्पिका ।

* "जूरैचि जरायां" जूर्यते जूर्णः 'डीयच्व्यैदितः' ॥४।४।६१॥ इति क्तस्य नत्वं जूर्ण इत्याह्वयो यस्य स इति जूर्णाह्वयः ।

**जृम्भण**-ન૦-૧૫૦૬-બગાસું.

☐ जृम्भा ।

* अनटि जृम्भणम् ।

**जृम्भा**-त्रि० १५०६-બગાસુ.

☐ जृम्भण ।

* जृम्भते इति जृम्भाः त्रिलिङ्गः ।

**जेतृ**-पुं-७९३-વિજય મેળવનાર.

द्र० जित्वरशब्दः ।

* जयनशीलः इति जेता "तृन्" ॥५।२।२७॥ इति तृन् ।

**जेमन**-ન૦-૪૨૪-ભોજન, ખાવું તે.

द्र० अदनशब्दः ।

* जिम्यते इति जेमनम्. जवनं च यद् दुर्गः- "जीवनं भोजनं क्वचित् ।"

**जेय**-પું-૭૯૩-જીતવા યોગ્ય.

**जैत्र**-પું-૭૯૩- શે० १५३)-વિજય મેળવનાર.

द्र० जित्वरशब्दः ।

**जैन**-પું-૮૬?-(શે૦-૭૬)-જૈન, આર્હત, સ્યાદ્વાદવાદી.

द्र० आर्हतशब्दः ।

**जैवातृक**-પું-૧૦૫-ચંદ્ર, ચંદ્રમા

द्र० अत्रिदृग्जशब्दः ।

* जीवयत्यनेन अमृतवर्षित्वाज्जगदिति इति जैवातृकः, "जीवेरातृकोजैवृच्च"-(उणा-६७) इत्यातृकः ।

**जैवातृक**-પું.-૪૭૯-લાંબી આવરદાવાળો.

☐ दीर्घायुम्, [आयुष्मत् शि. ३५] ।

* जीवति चिरं इति जैवातृकः "जीवेश"- (उणा-६७) इत्यातृकः ।

**जोङ्गक**-ન.-૬૪૦-અગરુ, અગર.

द्र० अगरुशब्दः ।

* जोङ्गकगिरिभवत्वाद् जोङ्गकम् ।

**जोटिन्**-પું-૨૦૦-(શે. ४६)-શંકર.

द्र० अट्टहासिन्शब्दः ।

**जोटीङ्ग**-પું-૨૦૦-(શે. ४६)-શંકર.

द्र० अट्टहासिन्शब्दः ।

**जोन्नाला**-સ્ત્રી-૧૧૭૮-જુવાર.

द्र० जूर्णाह्वयशब्दः ।

* जनाद् नालमस्या इति जोन्नाला पृषोदरादित्वात् ।

**जोषम्**-અ.-૧૫૨૮-મૌન.

☐ तूष्णीम्, तूष्णीकाम् ।

**ज्ञ**-પું-૧૧૭-બુધગ્રહ.

☐ बुध, सौम्य, (चन्द्रात्मज, चान्द्रमसायनि), प्रहर्पुल, पञ्चार्चिस्, श्रविष्ठाभू, श्यामाङ्ग, रोहिणीसुत, (रौहिणेय) ।

* जानाति इति ज्ञः ।

**ज्ञ**-પું-૩૪૧-વિદ્વાન્.

द्र० अभिरूपशब्दः ।

* जानातीति ज्ञः ।

**ज्ञप्ति**-સ્ત્રી.-૩૦૮-મતિ બુદ્ધિ.

द्र० उपलब्धिशब्दः ।

* ज्ञपनं इति ज्ञप्तिः, "ज्ञातिहेति"-॥५।३।९४॥ इति क्यन्तो निपात्यते ।

**ज्ञात**-ન૦-૧૪૯૬-જાણેલું.

द्र० अवगतशब्दः ।

* ज्ञायते इति ज्ञातम् ।

**ज्ञातनन्दतन**-પું-૩૦-શ્રી મહાવીર સ્વામી (૨૪મા તીર્થંકર).

द्र० चरमतीर्थकृत्शब्दः ।

* ज्ञातकुलोत्पन्नत्वात् ज्ञातः, ज्ञातः सिद्धार्थ राजः तस्य नन्दनः इति ज्ञातनन्दनः ।

**ज्ञाताधर्मकथा**-સ્ત્રી-૨૪૩-૭૬ઠ્ઠું અંગ.

* ज्ञातानि उदाहरणानि तत्प्रधाना धर्मकथा इति ज्ञाताधर्मकथा, तत्प्रतिपादको ग्रन्थोऽपि तथा ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**ज्ञाति**-पुं-५६१-स्वजन कुटुंबी.

द्र० बान्धव, स्वजन, बन्धु, सगोत्र ।

* ज्ञायते इति ज्ञातिः पुंलिङ्गः "क्लुज्ञा"-(उणा-६४६) इति तिः ।

**ज्ञान**-न०-३१०-मोक्षवाणी बुद्धि.

* मोक्षविषया मोक्षफला वा मतिः इति ज्ञानम् ।

**ज्ञानप्रवाद**-न०-२४७-पांचमुं पूर्व.

* मतिज्ञानादिपञ्चकं सभेदं प्रवदतीति ज्ञान-प्रवादम् ।

**ज्ञानिन्**-पुं-४८२-ज्ञानी, दैवज्ञ, ज्योतिषी.

द्र० आदेशिन्शब्दः ।

* कालादिज्ञानमस्त्यस्य इति ज्ञानी ।

**ज्या**-स्त्री-७७६-पणछ, धनुष्यनी दोरी.

द्र० गुणशब्दः ।

* जिनाति इति ज्या "क्वचित्" ॥५।१।१७१॥ इति डः ।

**ज्या**-स्त्री-९३६-पृथ्वी.

द्र० अचलाशब्दः ।

* जिनाति हीयते इति ज्या, "क्वचिद्"-॥५।१।१७१॥ इति डः ।

**ज्याघातवारण**-न.-७७६-चामडानो आडुबंध, (धनुष्यनी दोरी न लागे ते माटे)

☐ गोधा, तल ।

* ज्यायाः मौर्व्याः घातो वार्यतेऽनेनेति ज्याघा-तवारणम् । 'गोधा तला च नतरौ'-**वैजयन्तीकारः** ।

**ज्यानि**-स्त्री-१५२३-जीर्णता, घरडापणुं.

☐ जीर्ण ।

* ज्यानं इति ज्यानिः 'ग्लाहाज्यः' ॥५।३।११८॥ इत्यनिः ।

**ज्यायस्**-पुं-३४०-अतिघरडो.

